UNIVERSITY OF TORONTO DUPL
3 1761 00076129 6

HANDBOUND
AT THE
UNIVERSITY OF
TORONTO PRESS

342
II.
162

BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY

THE ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NOS. 512, 530, 544, 573, 590, 612, 627, 639, AND 663.

THE TATTVA-CHINTÁMAṆI:

BY

GAṄGES'A UPÁDHYÁYA.

PART I.

THE PRATYAKSHA KHAṆḌA

WITH EXTRACTS FROM THE COMMENTARIES OF MATHURÁNATHA TARKAVÁGÍS'A AND OF JAYADEVA MIS'RA.

EDITED BY

PUNDIT KÁMÁKHYÁNÁTH TARKAVÁGÍS'A,

PROFESSOR, SANSKRIT COLLEGE, CALCUTTA.

INDIA-OFFICE LIBRARY.

CALCUTTA:

PRINTED BY G. H. ROUSE, AT THE BAPTIST MISSION PRESS.

1888.

LIBRARY
NOV 30 1967
UNIVERSITY OF TORONTO

विज्ञापनम्।

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति नैयायिकमतं तच्च प्रत्येकप्रमाणस्य वैशदार्थं गङ्गेशोपाध्यायेन खण्डचतुष्टयात्मकः तत्त्वचिन्तामणिनामकग्रन्थो विरचितः मथुरानाथतर्कवागीशेन व्याख्यातश्च। तत्र प्रथमं प्रत्यक्षखण्डं द्वितीयम् अनुमानखण्डं तृतीयमुपमानखण्डं चतुर्थं शब्दखण्डं एषां खण्डानां मध्ये अनुमानखण्डं अत्यन्तविस्तीर्णं पदार्थसाधकविविधयुक्तिपरिपूर्णञ्च अस्य तात्पर्यावगमे अन्यान्यखण्डं विनोपदेशेनैव बोधगम्यं भवति अत एतत्प्रदेशे पण्डितैरनुमानखण्डमेव विशेषेणाद्रियते, अस्मादेतत् खण्डं बहुषु स्थानेषु सुप्राप्यं, अन्यान्यखण्डन्तु अत्यन्तदुष्प्राप्यं, परन्तु मया बहायासेन प्रत्यक्षखण्डस्य आदर्शपुस्तकचतुष्टयं संगृहीतं एकं पुस्तकं नवद्वीपनिवासिसर्व्वप्रधान-नैयायिक-पूज्यपादश्रीयुक्तभुवनमोहनविद्यारत्न-भट्टाचार्य-समीपे प्राप्तं तत्पुस्तकं क-नाम्नाङ्कितं, एकं नवद्वीपनिवासिश्रीयुक्तहरिनाथतर्कसिद्धान्त-भट्टाचार्य-समीपे प्राप्तं तत्पुस्तकं ख-नाम्नाङ्कितं, अपरं पुस्तकं ऑटपुरनिवासिपूज्यपादश्रीयुक्तश्यामापदन्यायभूषण-भट्टाचार्य-समीपे प्राप्तं तत्पुस्तकं ग-नाम्नाङ्कितं, अपरञ्च पुस्तकं शान्तिपुरनिवासिश्रीयुक्त-रामनाथतर्करत्न-भट्टाचार्य-समीपे प्राप्तं तच्च पुस्तकं घ-नाम्नाङ्कितं, पुस्तकचतुष्टयमेव परिशुद्धं, एषु पुस्तकेषु प्रायशः पाठभेदो नास्ति कुत्रचित् स्थलविशेषे यत्पाठवैलक्षण्यमस्ति तत् शब्दवैलक्षण्यमात्रं न तु तेनार्थवैलक्षण्यं तदपि मुद्रितपुस्तके उद्धृतम्। पूर्व्वं रघुनाथशिरोमणिकृतदीधितिनामकटीकया सह अनुमानखण्डं मुद्रितम् अन्यान्यखण्डन्तु सटीकं न केनापि मुद्रितं, शिरोमणिकृतटीकायाः प्रामाणिकत्वेपि तेन केवलम् हेत्वाभासाग्रं व्याख्यातं अतएव मथुरानाथेनोक्तं, "जानन्ति केचिद्धेत्वाभासाग्रम्" इति। मथुरानाथतर्कवागीशेन तु खण्डचतुष्टयमेव व्याख्यातं, अतः एसियाटीकसोसाइटी-समाजानुमत्यनुसारेण मथुरानाथ-तर्कवागीशकृतरहस्यनामकटीकया सह तत्त्वचिन्तामणिनामकग्रन्थस्य मुद्रणे मया प्रवृत्तं इति।

कलिकातासंस्कृतविद्यालयाध्यापकः
श्रीकामाख्यानाथशर्म्मा।

शुद्धिपत्रम्।

अशुद्धं		शुद्धं		पृष्ठं		पङ्क्तिः
स्वर्ग	...	सर्ग	...	१	...	४
न्योन्याश्रेया	...	न्योन्याश्रया	...	८	...	१२
जनताड़ना	...	जलताड़ना	...	९।१०।११	...	१४।१०।१
जन्यत्व	...	जन्यत्व	...	१५	...	१०
'शिष्टेति'	...	'शिष्टेति,	...	१७	...	८
आरब्द	...	आरब्ध	...	२०	...	१९
भिद्यात	...	भिद्यात	...	२२	...	११
कारणत्वा-	...	कारणत्वा-	...	२२	...	१२
विषयविषया-	...	विषयविषया-	...	२४	...	११
अन्य	...	अन्य	...	२९	...	१४
तत्प्रति	...	सत्प्रति	...	२९	...	९
सुव	...	सूव	...	२९	...	१०
निर्व्याहात्	...	निर्व्याहात्	...	३१	...	२
व्यपारः	...	व्यापारः	...	३२	...	४
पत्या	...	पत्था	...	३५	...	१५
इत्युद्देश्य	...	इत्युद्दिश्य	...	३५	...	१७
कल्पिना	...	कल्पना	...	३९	...	१९
तथात्वात	...	तथात्वात्	...	४०	...	१०
फलसिति	...	फलमिति	...	४८	...	८
शङ्खते	...	शङ्कते	...	५२	...	१५
तध्वंस	...	तद्वंस	...	५७	...	९
सिद्धतः	...	सिध्यतः	...	५८	...	१०
तार्य्यता	...	कार्य्यता	...	६०	...	१९

अथ प्रमालक्षणपूर्व्वपक्षः ।

अथ किं तत् प्रामाण्यम् । न तावज्जातिः योग्यव्यक्तिवृत्तित्वेन प्रत्यक्षत्वे प्रमात्वसंशयानुपपत्तेः प्रमात्वस्यानुमेयत्वाच्च साक्षात्त्वादिना सङ्करापत्तेश्च । वीजसाम्येन गुणेपि तस्य दोषत्वात् तारत्वादेरुत्कर्षरूपतया

अथ प्रमालक्षणपूर्व्वपक्षरहस्यं ।

प्रमात्वं गुणस्य कार्य्यतावच्छेदकं इत्यभिमानेन पृच्छति[१], 'अथ किमिति यत्प्रमात्वं कार्य्यतावच्छेदकं उच्यते तत् प्रमात्वं किमित्यर्थः' मिश्रास्तु । प्रामाण्यमनुमेयमित्यादि स्वतोग्राह्यत्वाभावसाधकानुमानपक्षस्वरूपं पृच्छति, 'अथ किमिति यत्प्रामाण्यं पक्षीकृत्य स्वाश्रयग्राह्यत्वाभावः साध्यते तत्प्रामाण्यं किमित्यर्थ इत्याहुः ।

प्रमात्वं निर्व्विकल्पकादिव्यावृत्तोजातिविशेषः, तच्चाभावत्वादिवत्सप्रतियोगिकं तेनेयं रजतत्वस्य प्रमा रङ्गत्वस्य प्रमेत्यादिव्यवहारोपपत्तिः, समवायवत् तत्तत्प्रतियोगिकमेव लाघवान्न तु प्रतियोगिभेदाद्भिन्नं गौरवात्, इमे रङ्ग-रजते इति समूहालम्बनप्रमायां रङ्गत्वप्रतियोगिकत्वविशिष्टप्रमात्व- रजतत्वप्रतियोगिकत्वविशिष्टप्रमात्वयोः साङ्कर्य्यप्रसङ्गाच्च[२] । तत्तत्प्रतियोगिकत्वविशिष्टनिरूपिताधा-

---

(१) कार्य्यतावच्छेदकस्वरूपं पृच्छतीति ग० ।

(२) व्यसमूहालम्बनरङ्ग-रजतप्रमान्तर्भावेण परस्पराभावसामानाधिकरण्यं, समूहालम्बनरङ्ग-रजतप्रमान्तर्भावेण ऐकाधिकरण्यमिति भावः ।

जातित्वनियमे चानन्यगतिकतया च नानात्वात्। प्रमात्वनानात्वे त्वननुगमः। किञ्चैवमप्रमाया अंशे प्रमात्वं न स्यात् जातेर्व्याप्यवृत्तितानियमात्। न चेष्टापत्तिः, अंशे संवादिनि विसंवादिनि च समूहा-

---

त्वविरहाच्च नातिप्रसङ्ग इति केषाञ्चिन्मतं निराकरोति[१], 'न तावज्जातिरिति, 'प्रत्यक्षत्वइति ज्ञानत्वविशिष्टप्रत्यक्षोत्पत्तिसमये प्रमात्वस्यापि विशिष्टप्रत्यक्षविषयत्वे तदनन्तरं प्रमात्व-तदभावोपस्थित्या तस्य संशयानुपपत्तेरित्यर्थः। नन्वेवं स्थाणुत्वादेर्योग्यव्यक्तिवृत्तितया स्थाणिन्द्रियसन्निकर्षेण धर्मितावच्छेदकप्रकारकस्थाणुप्रत्यक्षदशायां स्थाणुत्वस्यापि योग्यत्वेन प्रत्यक्षेण ग्रहात् कथं तत्संशयः, दोषप्रतिबन्धकवशात्तदानीं स्थाणुत्वस्य न प्रत्यक्षमिति चेत् प्रमात्वेऽपि तत् सुवचत्वादित्यत आह, 'प्रमात्वस्येति यत्रेदं ज्ञानं प्रमा न वा घटश्च घट इति समूहालम्बनप्रामाण्यसंशयात्मको व्यवसायः ततो विशेषदर्शनं तत्र प्रमात्वस्य प्रमात्वसंशयोत्तरमनुमेयत्वाच्च इत्यर्थः, अन्यथा संशयोत्तरं स्थाणुत्वादिबुद्धिवत् तत्र प्रामाण्यबुद्धिरपि प्रत्यक्षात् नानुमितिः तदृशस्थले प्रत्यक्षसामग्र्यावश्यकत्वात्। न चेष्टापत्तिः, अनुमिनोमीत्यनुव्यवसायादिति भावः। अथ तत्रानुव्यवसायोऽसिद्ध इत्यरुचेराह, 'साक्षात्त्वादिनेति प्रमात्वं विना साक्षात्त्वं निर्विकल्पके, साक्षात्त्वं विना च प्रमात्वमनुमित्यादौ, एकस्याञ्च साक्षात्कारिप्रमायां तयोः सङ्कर इत्यर्थः, आदिना चाक्षुषत्वादिपरिग्रहः।

---

(१) केषाञ्चिन्मतमाशङ्क्य निराकरोतीति ख०।

लम्बने प्रमात्वाप्रमात्वयोरनुभूयमानत्वेन एकाशेषस्य कर्त्तुमशक्यत्वात्। अथ विपर्ययस्यांशे न प्रमात्वं किन्तु स्मृतिवद्यथार्थत्वमेवेति[१] चेत् तर्हि यथार्थानुभवत्वमेव प्रामाण्यमावश्यकत्वात्। न च तदपीति वक्ष्यते। अथ

ननु गुणे जातेः सङ्करो न दोषायेत्यत आह, 'बीजेति, 'तत्र' सङ्करस्य। नन्वेवं कत्वादिना साङ्कर्य्येऽपि कथं तारत्वं मन्दत्वं जातिरित्यत आह, 'तारत्वादेरिति, 'उत्कर्षरूपतयेति, उत्कर्षस्तु जातिं विना अन्यन्निर्वक्तुं न शक्यते इत्यभिप्रायः। 'तन्नानात्वात्' तारत्वादेः ककार-खकारादिभेदेन नानात्वात्। नन्वेवं प्रमात्वान्यपि चाक्षुषत्वादिव्याप्यानि षट्, प्रत्यक्षत्वविरुद्धमनुमित्यादिचयसाधारणश्चैकमतो न सङ्कर इत्यत आह, 'प्रमात्वेति, 'अननुगमः' अनुगतबुद्ध्यभावः। ननु अनुगतबुद्धिरेवासिद्धेत्यत आह, 'किञ्चेति। वस्तुतस्तु ननु निर्विकल्पकेऽपि प्रमात्वाभ्युपगमान्न साङ्कर्य्यं। अथ तथाप्यनुभवत्वेन समसन्यूनानतिरिक्तवृत्तितया न जातित्वसम्भवः, प्रमुष्टतत्ताकस्मरणात्मकभ्रमस्य सर्व्वांशे भ्रमत्वसम्भवेऽपि सर्व्वांशे भ्रमात्मकानुभवस्याप्रसिद्धेः "धर्म्मिणि सर्वमभ्रान्तं" इति न्यायेन परोक्षानुभवस्य सर्वांशे भ्रमत्वासम्भवात् प्रत्यक्षे चान्ततस्तादात्म्यसम्बन्धेन स्वलक्षणेऽपि निर्धर्म्मितावच्छेदककस्वभाने बाधकाभावेन सर्वांशभ्रमत्वाभावात् स्मरणेऽपि प्रमात्वाभ्युपगमे च स्मृतित्वेनैव साङ्कर्य्यात् प्रमुष्टतत्ताकस्मरणात्मकभ्रमे प्रमात्वविरहादिति चेत्। न। समनियतयो-

---

(१) यथार्थत्वमात्रमितीति ग०।

यथा भावाऽभावोवा नाव्याप्यवृत्तिरितिनियमन्तिर-स्त्यबाधितानुभववशात् संयोग-तद्भावयोरव्याप्य-वृत्तित्वं तथा जातिर्व्याप्यवृत्तिरेवेति व्याप्तिमभिभूया-

---

र्विभिन्नजातित्वाभावे मानाभावात् अत्र तु रजतत्वस्य प्रमा रङ्गत्वस्य प्रमेति भ्रमव्यावृत्तविलक्षणप्रतीतेरेव मानतया निर्विकल्पकसाधा-रणप्रमात्वजातेरनुभवत्वसमनियतत्वेऽपि पृथक् जातित्वादित्यत आह, 'किञ्चेति, 'एवं' प्रमात्वस्य जातित्वे, 'अप्रमायामिति रजतत्वप्रति-योगिकत्वविशिष्टप्रमात्वाभाववति ज्ञाने किञ्चिदंशे रजतत्वप्रतियो-गिकत्वविशिष्टप्रमात्वं न स्यादित्यर्थः। अथ तत्र रजतत्वप्रतियो-गिकत्वविशिष्टप्रमात्वं नास्त्येवेत्यत आह, 'न चेति, संवादित्वं रजत-त्ववति रजतत्वप्रकारकत्वं, विसंवादित्वं रजतत्वाभाववति रजतत्वप्रका-रकत्वं, 'समूहालम्बने' रजत-रङ्गयोरिदमिदञ्च रजतमिति समूहाल-म्बने, 'प्रमात्वाप्रमात्वयोरिति रजतत्वप्रतियोगिकत्वविशिष्टप्रमात्व-तदभावयोरित्यर्थः, 'एकशेषस्येति इदं ज्ञानं रजतत्वप्रतियोगिकत्व-विशिष्टप्रमात्वाभाववदेव न तु तादृशप्रमात्ववत्, किं वा रजतत्वप्रति-योगिकत्वविशिष्टप्रमात्ववदेव न तु तादृशप्रमात्वाभाववत् इत्येकशे-षस्य कर्त्तुमशक्यत्वादित्यर्थः। शङ्कते, 'विपर्य्ययस्येति, 'न प्रमात्वं' न रजतत्वप्रतियोगिकत्वविशिष्टप्रमात्वं। नन्वेवमनुभवस्य का गति-रित्यत आह, 'किन्त्विति, 'यथार्थत्वमात्रमिति[१] रजतत्वयथार्थत्व-मात्रमित्यर्थः, अनुभवविषय इति शेषः। रजतत्वप्रमात्वाभावमादाय

---

(१) 'यथार्थत्वमात्रं' इत्यपि कस्यचिन्मूलपुस्तकस्य पाठः।

नुभववलादेव प्रमात्व-तदभावयोरव्याप्यवृत्तित्वमस्तु। न च यद्व्याप्यवृत्ति तन्न व्याप्यवृत्ति, यच्च व्याप्यवृत्ति न तद्व्याप्यवृत्तीति व्याप्तेः प्रमात्वस्य नोभयरूपत्वमिति वाच्यं। संयोगात्यन्ताभावे व्यभिचारात्। न च तस्याभावद्वयं,मानाभावात् गुण-दोषयोरेकत्र सत्त्वे अव्याप्यवृत्तित्वं गुणमात्रसत्त्वे व्याप्यवृत्तित्वमित्यन्यथोपपत्तेश्च।

विनिगमनाविरहे सत्येव दूषणान्तरमाह, 'तर्हीति, 'प्रामाण्यं' गुणजन्यतावच्छेदकं, 'आवश्यकत्वात्' तत्र प्रमाव्यवहारप्रयोजकत्वस्यावश्यकत्वात्। ननु लाघवात् प्रमात्वजातिरेव तज्जन्यतावच्छेदकतया कल्प्यत इत्यत आह, 'न चेति न वेत्यर्थः, 'तदपि' यथार्थानुभववमपि, निर्वक्तुं शक्यमिति शेषः। यत्र ज्ञाने रजतत्वप्रतियोगिकत्वविशिष्टप्रमात्वं तत्प्रतियोगिकत्वविशिष्टभ्रमत्वञ्च द्वयमेव वर्त्तते तत्र तदुभयमव्याप्यवृत्ति, यत्र चैकैकमात्रं तत्र व्याप्यवृत्त्येव इत्यभिप्रायेणाशङ्कते, 'न च यद्व्याप्येति, 'अव्याप्यवृत्तित्वं' अवच्छिन्नवृत्तिमत्त्वं, 'व्याप्यवृत्तित्वं' अनवच्छिन्नवृत्तिमत्त्वं, अत्र शब्द-संयोगादिर्दृष्टान्तः, 'यत्रेत्यादौ घटादिर्दृष्टान्तः। 'प्रमात्वस्य' रजतत्वप्रतियोकत्वविशिष्टप्रमात्वस्य, 'नोभयरूपत्वमिति, इदं रजतमिति प्रत्यायां तस्य व्याप्यवृत्तित्वादिति भावः। ननु भाव एवायं नियम इत्यत आह,[1] 'गुणेति, तथाच भावत्वे सति यद्व्याप्यवृत्ति तन्न व्याप्यवृत्ति इत्या-

---

(१) ननु भाव एवायं नियमः तथाच संयोगाद्यभावे न व्यभिचार इत्यत आहेति क०।

अन्यथा प्रमात्वस्योपाधेरप्यत्यन्ताभावसामानाधिकरण्यं न स्यात् सामान्यत्वात्, न स्याच्चोभयरूपत्वमिति। नैवं। अवच्छेदकभेदं विना विरुद्धयोरेकत्रासमावेशादप्रतीतेश्च। न च विषय एवांशरूपः प्रमात्ववृत्तावच्छेदकः,[१] तद्विषयत्वस्य भ्रमेऽपि सत्त्वात्। ननु

दिव्याप्तिरप्रयोजिकेति भावः। 'अन्यथेति तादृशव्याप्त्यभ्युपगमे, 'उपाधेरपि' उपाधित्वेऽपि, 'अत्यन्ताभावेति अत्यन्ताभावाधिकरणे जत-रङ्गयोरिदमिदञ्च रजतमिति समूहालम्बने अवच्छिन्नवृत्तिकमेव न स्यात्। 'न स्याच्चोभयरूपत्वं' न स्यात् व्याप्याव्याप्यवृत्त्युभयरूपत्वं, 'सामान्यत्वादिति योजना, 'सामान्यत्वात्' भावत्वात्। विषय एव' विशेष्य एव रजतमेवेति यावत्, 'अंशरूपः' अंशपदवाच्यः, 'प्रमात्ववृत्ताविति विशेष्यतासम्बन्धेन रजतत्वप्रतियोगिकत्वविशिष्टप्रमात्ववृत्तावच्छेदक इत्यर्थः। अतिप्रसक्तत्वात् तस्य नावच्छेदकत्वसम्भव इत्याह, 'तद्विषयकत्वस्येति रजतविशेष्यकत्वस्येत्यर्थः, 'भ्रमेऽपि' रजतविशेष्यकरङ्गत्वादिभ्रमेऽपि, भ्रमेत्युपलक्षणं रजतविशेष्यकद्रव्यत्वादिप्रकारकप्रमायामपि बोध्यं। 'विशेष्यावृत्त्यप्रकारकत्वमिति स्वासमानाधिकरणप्रकारानिरूपितरजतत्वनिष्ठप्रकारतानिरूपितानुभवीयविशेष्यताकत्वमित्यर्थः, 'विशेष्यावृत्तिप्रकारकत्वमिति स्वासमानाधिकरणप्रकारनिरूपितानुभवीयविशेष्यताकत्वमित्यर्थः, 'प्रमा-

---

(१) विषय एव प्रमात्ववृत्तेरंशरूपोऽवच्छेदकभेद इति ग०।

विशेष्यावृत्त्यप्रकारकत्वं, विशेष्यावृत्तिप्रकारकत्वञ्च प्रमात्वतदभावयोर्वृत्ताववच्छेदकमस्तीति चेत् तर्हि तयोरेव प्रमाप्रमाव्यवहारजनकत्वमस्तु आवश्यकत्वात् प्रयोगोपस्थितत्वाच्च, किं जात्या । न च तदपीति वक्ष्यते।

प्रमाव्यवहारेति प्रमा-भ्रमव्यवहारेत्यर्थः, 'आवश्यकत्वात्' प्रमाभ्रमयोरवश्यं तयोः सत्त्वात् । 'प्रयोगेति, अवच्छेद्यज्ञानं प्रति अवच्छेदकज्ञानस्य हेतुत्वादित्यभिप्रायः । ननु प्रमाव्यवहारप्रयोजकत्वसम्भवेऽपि न गुणजन्यतावच्छेदकत्वसम्भवः गौरवादतः प्रमात्वं जातिरेव तदवच्छेदकतया कल्प्यत इत्यनुभयादाह, 'न चेति न चेत्यर्थः 'तदपि' विशेष्यावृत्त्यप्रकारकत्व-तत्प्रकारकत्वमपि, रजतत्वप्रतियोगिकत्वविशिष्टप्रमात्व-तदभावयोरवच्छेदकं सर्वत्र सम्भवतीति शेषः । 'इति वक्ष्यते' इति त्वयापि वक्ष्यते, विशेष्यतावच्छेदकाभेदे विशेष्यतायाः अप्यभिन्नतया द्रव्यं रजतमित्यादिरजतारजतविशेष्यकज्ञाने तदुभयावच्छेदेन रजतत्वप्रतियोगिकत्वविशिष्टप्रमात्व-तदभावयोरसम्भवात् तत्र निरुक्तविशेष्यावृत्तिप्रकारकत्वविरहात् विशेष्यतावच्छेदक-विधेययोरेकैव विशेष्यता इति मते रङ्गत्वरूपेण रजतविशेष्यके रङ्गं सुवर्णं रजतमिति समूहालम्बनेऽपि तदुभयावच्छेदेन तादृशप्रमात्व-तदभावयोरसम्भवाच्च तत्र निरुक्तविशेष्यावृत्त्यप्रकारकत्वविरहात्, एवं संशयकोटिद्वयनिरूपितैकैव विशेष्यतेति मते इदं रजतं न वा सुवर्णं रजतमिति रजतविशेष्यकसमूहालम्बनसंशये तदुभयावच्छेदेन तादृशप्रमात्व-तदभावयोरसम्भवाच्च इति निरूढाभिप्रायः । एतच्चापातत

तापि यथार्थाग्रहीतग्राहित्वं लोकसिद्धप्रमात्वं, धारा-
वाहिकबुद्ध्यव्याप्तेः। न च प्रत्यक्षस्य वर्त्तमानार्थग्रा-
हित्वेन स्वाश्रयक्षणविशिष्टस्तत्पादिग्राहकत्वेनाग्रही-
तग्राहित्वं लोकसिद्धमन्यथैकसमये ज्ञानयौगपद्यप्रसङ्ग

प्रत्यक्षातिप्रसक्तधर्मस्यावच्छेदकत्वानभ्युपगमेऽपि रजतत्वप्रतियोगिकत्व-
विशिष्टप्रमात्वावच्छेदकत्वस्यातिप्रसक्तेऽपि रजतादौ विशेष्यितासम्बन्धे-
नाभ्युपगमात् अत्र ज्ञाने रजतत्वप्रमात्वमित्यादिप्रत्ययात् रजतत्वनिष्ठ-
प्रकारतानिरूपितत्वविशिष्टविशेष्यतासम्बन्धस्यावच्छेदकतानियामकस-
म्बन्धत्वाभ्युपगमेनातिप्रसङ्गस्यापि वारणसम्भवाच्च। वस्तुतस्तु प्रमात्वं
यदि सर्वप्रतियोगिकमेकमेव वैजात्यं तदा रजतत्वविषयकप्रमाया-
मपीदं ज्ञानं रजतत्वप्रमेति प्रत्ययापत्तिः, तत्र रजतत्वप्रतियोगिक-
त्वविशिष्टप्रमात्वाधारताविरहात्र तथा प्रत्यय इति चेत्तथापि गुणे
गुणान्यत्वविशिष्टसत्तेति प्रतीतिवदत्र ज्ञाने रजतत्वप्रतियोगिकप्रमा-
त्वाधेयतोल्लेखिप्रतीतेर्दुर्वारत्वात्। यदि च प्रतियोगिभेदात् प्र-
मात्वं विभिन्नं तदा इमे रङ्ग-रजते इति समूहालम्बनप्रमायामेव रङ्ग-
त्वप्रतियोगिकप्रमात्व-रजतत्वप्रतियोगिकप्रमात्वयोः साङ्कर्य्यापत्तिः।
न च वक्ष्यमाणोपाधिरेव प्रमात्वप्रतीतिनियामकः, गुणजन्यतावच्छे-
दिका च लाघवाज्जातिः कल्प्यते सा च न प्रमात्वप्रतीतिनियामिकेति
वाच्यं। गुणस्य हेतुतायामेव मानाभावादित्येव दूषणं सारं।

यत्तु विनिगमनाविरहात् प्रमात्वमिव भ्रमत्वमपि दोषजन्यताव-
च्छेदकतया जातिः स्यात्तथाच प्रमात्व-भ्रमत्वयोरेव परस्परं स-

इति वाच्यम्। क्षणानामतीन्द्रियत्वात्, स्थूलोपाधिमादाय वर्त्तमानत्वग्रहात्,[१] स्वरूपसत्क्रमिकक्षणोत्पत्तिकत्वेन ज्ञानायौगपद्यात्। न च स्तम्भादिषु प्रतिक्षणं गुण-कर्माद्युत्पत्तिरस्ति येन तदादायागृहीतग्राहित्वं

ङ्करप्रसङ्गः, प्रमात्वं विनापि प्रमुष्टतत्ताकस्मरणात्मकभ्रमे भ्रमत्वमत्वादिति। तन्न। स्मृतित्वानुभवत्वाभ्यां निखिलानुभवत्वव्याप्यजातिभिन्नसङ्करापत्त्या भ्रमत्वस्य सर्वसाधारणैकजातित्वासम्भवात्, सर्वानुभवत्वप्रमात्ववत् सर्वज्ञानस्य भ्रमत्वविरहात्। भ्रमत्वस्य चाक्षुषत्वादिव्याप्यनानाजातित्वाभ्युपगमे च प्रमात्वव्याप्यस्यैव सुवचत्वादिति कृतं पल्लवेन। निर्विकल्पकविशेषणज्ञानकारणत्व-ज्ञानलक्षणा-सामान्यलक्षणाद्यनङ्गीकुर्व्वतां प्राभाकराणां लक्षणमाह, 'नापीति यथार्थत्वे सति स्वसमानाधिकरण-स्वाव्यवहितपूर्व्ववर्त्तिस्वसमानाकारनिश्चयाविषयग्राहित्वमित्यर्थः, यथार्थत्वमात्रं लौकिकवाक्यजन्ययथार्थशाब्दज्ञाने, अगृहीतग्राहित्वमात्रञ्च प्रत्यक्षभ्रमे गतमिति विशिष्टं[२]। यथार्थत्वं तन्मते अगृहीतासंसर्गकधर्म्म-धर्म्मिगोचरैकज्ञानत्वं। नन्विदं प्रत्यक्षप्रयुक्तं न भवतीत्यत आह, 'लोकसिद्धप्रमात्वमिति व्यवहारोपयुक्तं प्रमात्वमित्यर्थः। 'धारावाहिकेति अयं स्तम्भ इति ज्ञानोत्तरमयं

---

(१) वर्त्तमानव्यवहारादिति ख०।

(२) 'विशिष्टं' यथार्थत्वविशिष्टागृहीतग्राहित्वं, तच्च लौकिकवाक्यजन्ययथार्थशाब्दज्ञाने प्रत्यक्षभ्रमे च नास्ति ऋते न तत्र तत्रातिव्याप्तिरिति भावः।

स्यात्। वेदात् क्रमोत्पन्नवेदार्थगोचरधारावाहिकबुद्ध्यव्याप्तेश्च। नापि यथार्थानुभवत्वं। ज्ञाने घटत्वादिना यथाशब्दार्थसादृश्याभावात् सादृश्यमात्रस्य भ्रमेऽपि गतत्वात्। न च गुणजन्यानुभवत्वं, दोषाभावजन्या-

---

स्तम्भ इति ज्ञाने अव्याप्तेरित्यर्थः। क्वचित् 'लोकसिद्धप्रमात्वद्धारावाहिकबुद्ध्यव्याप्तेः' इति पाठः, तत्र ननु तत्र धारावाहिकबुद्धिः प्रमैव इत्यत उक्तं 'लोकेति,। क्वचित्च 'लोकसिद्धप्रमात्वधारावाहिकेति मतुप्शून्यः पाठः, तत्रापि लोकसिद्धं प्रमात्वं यत्रेति बहुव्रीहिरिति वोध्यं। अथ प्रत्यक्षस्य स्वोत्पत्तिक्षणवृत्तितया अर्थविषयकत्वनियमेनायं स्तम्भ इति द्वितीयज्ञानस्य पूर्व्वज्ञानागृहीतस्वोत्पत्तिक्षणविषयकत्वान्नाव्याप्तिरित्याशङ्क्य निराकरोति, 'नचेति, 'वर्त्तमानार्थग्राहित्वेन' स्वोत्पत्तिक्षणवृत्तितया अर्थविषयकत्वेन, 'स्वाश्रयक्षणेति स्वोत्पत्त्याश्रयक्षणेत्यर्थः, 'अन्यथेति, 'अन्यथा' प्रत्यक्षस्य स्वोत्पत्तिक्षणाविषयकत्वे, 'ज्ञानयौगपद्यप्रसङ्गः' धारावाहिकबुद्धीनां एकदोत्पत्तिप्रसङ्गः, विषयविधयैव क्षणानां प्रतीतिकारणतया धारावाहिकबुद्धीनां स्वोत्पत्तिक्षणाविषयकत्वे तस्य तद्धेतुत्वासम्भवात् क्षणातिरिक्तसकलहेतूनाञ्च तुल्यतया युगपदेव सत्त्वात्, तेषां स्वोत्पत्तिक्षणविषयकत्वे तु एकदा स्वोत्पत्तिक्षणरूपहेत्वभावादेव न युगपदुत्पादः। नचोत्पत्तिक्षणानां पूर्व्ववर्त्तित्वाभावात् कथं कारणत्वमिति वाच्यं। अन्येषां सहवर्त्तित्व-पूर्व्ववर्त्तित्वाभ्यामेव कारणत्वनियमेऽपि क्षणानां सहवर्त्तितामात्रेणैव कारणत्वादिति पराभि-

नुभवत्वं वा, तयोरननुगतत्वात् प्रमाप्रमानिरूप-त्वाच्च । नाप्यबाधितानुभवत्वं, बाधस्य विपरीतप्रमा-त्वात् । नापि संवाद्यनुभवत्वं, ज्ञानान्तरेण तथो-ल्लिख्यमानत्वस्य संवादित्वस्य भ्रमसाधारणत्वात् । नापि

प्रायः । नन्वेवमिदानीं घट इति बुद्धिः कथं स्यात् क्षणना-मतीन्द्रियत्वादित्यत आह, 'स्थूलेति । यद्यपि स्थूलकालोपाधेरपि सूर्य्यक्रियारूपत्वेनातीन्द्रियतया कथं तस्य प्रत्यक्षे भानं, उपनीतभानत्व क्षणस्यापि सुलभमिति स्थूलकालपर्य्यन्तानुधावनमफलं, तथापि जन्य-मात्रस्य कालोपाधितया घटादिलक्षणस्थूलकालोपाधेरेव लौकिक-प्रत्यक्षं सम्भवतीत्यभिप्रायः । नन्वेवमुक्तज्ञानयौगपद्यप्रसङ्ग इत्यत आह, 'स्वरूपसदिति स्वस्वाविषयीभूतानामपि स्वस्वाव्यवहितपूर्व्वक्षणिकक्ष-णानां कारणत्वेनेत्यर्थः । 'नचेति, प्रमाणाभावादिति भावः । 'तदादाय' तद्विषयकत्वेन । मास्तु धारावाहिकप्रत्यक्षेऽव्याप्तिस्तथापि अन्यत्र धारा-वाहिके का गतिरित्याह, 'वेदेति, परमते लौकिकशब्दः प्रमाणमेव नेति 'वेदादित्युक्तं । 'यथार्थानुभवत्वमिति यथा अर्थः तथा अनुभवत्वमिति व्युत्पत्त्या अर्थसदृशानुभवत्वं प्रामाण्यमित्यर्थः, इत्यभिप्रायेण दूषयति, 'ज्ञाने इति 'सादृश्यमात्रस्येति यथाकथञ्चिद्रूपेण सादृश्यस्येत्यर्थः । 'तयोः' गुणत्व-दोषत्वयोः, 'प्रमेति गुणत्व-दोषत्वयोः प्रमाप्रमा घटितत्वाच्चेत्यर्थः, तथा चात्माश्रय इति भावः । यद्यपि अप्रमा-जनकत्वं दोषत्वं तदभावजन्यानुभवत्वं प्रामाण्यमित्यर्थः इत्युक्ते नात्माश्रयः, तथापि अप्रमात्वं प्रमाभिन्नत्वमेव, अन्यस्याप्रमात्वस्य दुर्व्वचत्वादित्यभिप्रायः । 'अबाधितेति अबाधिते तदनुभवत्वं तत्-

समर्थप्रवृत्तिजनकानुभवत्वं, उपेक्षाप्रमायामव्याप्तेः तद्योग्यतायाः प्रमानिरूप्यत्वात् । नापि तत्त्वानुभवत्वं, अवस्तुनोऽभानात् । भाने वा भ्रमसाधारण्यात् । नापि विशेष्यनिष्ठात्यन्ताभावाप्रतियोगिधर्मप्रकारका-

---

मात्वमित्यर्थः, 'बाधस्य' बाधत्वस्य, 'प्रमात्वात्' प्रमात्वघटितत्वात्, तदभावप्रमा हि बाधः, तथा च तदभाववत्तया अप्रमिते तदनुभवत्वं तत्प्रमात्वं, तदभावप्रमात्वमपि तद्वत्तया अप्रमिते तदभावानुभवत्वं, एवञ्च तत्प्रमात्वज्ञाने तदभावप्रमात्वग्रहः, तदभावप्रमात्वे ज्ञाते एव तत्प्रमात्वग्रह इत्यन्योन्याश्रय इति भावः । 'ज्ञानान्तरेण तयोर्निश्चिमानत्वस्य' ज्ञानान्तरविषयीकृतार्थविषयकत्वस्य । समर्थप्रवृत्तिजनकत्वं तदुपधायकत्वं, तत्त्वावच्छिन्नस्वरूपयोग्यत्वं वा, आद्ये आह, 'उपेक्षाप्रमायामिति प्रवृत्त्यनुपधायकप्रमायामित्यर्थः । द्वितीये आह, 'तद्योग्यताया इति, प्रमात्वेनैव तादृशप्रवृत्तित्वावच्छिन्नस्वरूपयोग्यत्वादिति भावः । 'तत्त्वानुभवत्वमिति असद्विषयकान्यानुभवत्वमित्यर्थः, 'अवस्तुनः' इति तथा चान्यत्व प्रतियोग्यप्रसिद्धिरिति भावः । 'भाने वेति भ्रमे सतोर्विशेषण-विशेष्ययोः सम्बन्धविधया असतो भानाभ्युपगमे वेत्यर्थः, 'भ्रमसाधारण्यादिति तादृशसङ्ग्रहस्य प्रमांशभ्रमसाधारण्यादित्यर्थः, तथा च तत्रत्या भ्रिरिति भावः । इदमुपलक्षणं, सर्वांशभ्रमात्मकस्यानुभवस्याप्रसिद्धतया आंशिकभ्रमस्य च लक्ष्यतया अन्यान्तविशेषणवैयर्थ्यञ्च(१) ।

---

(१) 'अन्यान्तविशेषणस्य' असद्विषयकान्येतिविशेषणस्य, अनुभवत्वस्यैव सत्त्वादिति भावः ।

नुभवत्वं, संयोगादिप्रमाऽव्याप्तेः, अभावे व्याप्यवृत्तित्वविशेषणे संयोगभ्रमेऽतिव्याप्तिः तदत्यन्ताभावस्यैकत्वात् । नापि विशेष्यवृत्त्यन्योन्याभावप्रतियोगिताव-

---

मिश्रास्तु 'तत्त्वानुभवत्वं' तत्त्वस्यानुभवत्वं, सद्विषयकानुभवत्वमिति यावत् । 'अवस्तुनोऽभानादिति केवलमवस्तुनः क्वाप्यभानादित्यर्थः, तथा च सद्विषयकत्वविशेषणव्यावृत्त्यप्रसिद्धिरिति भावः। 'भाने वेति क्वचिदसन्मात्रस्य भानाभ्युपगमे वेत्यर्थः, 'भ्रममाधारणत्वादिति इदं रजतमित्यादिभ्रमेष्युक्तलक्षणसत्त्वादित्यर्थः, तत्रापि शुक्त्यादेः सतो विषयत्वात्तथाचातिव्याप्तिरिति भावः। इति व्याचक्रुः।

'नापीति, यद्यपि विशेष्यत्वं केवलान्वयि विशेष्यपदस्य स्वविशेष्यपरत्वेऽपि घट-पटाविति समूहालम्बनप्रमायामव्याप्तिः, तथापि स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्व-स्वनिरूपकप्रकारताश्रयत्वोभयवत्तद्व्यक्तिकविशेष्यताप्रतियोग्यनुभवत्वं तद्व्यक्तेः प्रमात्वं, प्रतियोगिता च स्वनिरूपकसम्बन्धावच्छिन्नत्वेन स्वरूपतोऽधिकरणतावच्छिन्नत्वेन च विशेषणीया, तेन व्यधिकरणसम्बन्धावच्छिन्नाभावं वैशिष्ट्यासव्यवृत्तिधर्मावच्छिन्नाभावञ्चादाय नाप्रसिद्धिः । स्वत्वयं विशेष्यतापरं, रजतत्वादिमात्रवृत्तितत्ताख्याखण्डाधिकरणतावच्छेदकः शुक्त्यादिनिष्ठाभावप्रतियोगितावच्छेदकत्वादिदं रजतमित्यादि भ्रमे नातिव्याप्तिः, विशेष्यतावच्छेदकाभेदेऽपि प्रतिविशेष्यं विशेष्यताभेदाभ्युपगमाच्च प्रमेयं द्रव्यमित्याद्यतिप्रसक्तधर्मावच्छिन्नविशेष्यताकप्रमायां नाव्याप्तिः, गुणाद्यन्यत्वविशिष्टसत्तावान् गुणः, द्रव्यत्व-गुणत्वोभयवान्

च्छेदकधर्म्मप्रकारकानुभवत्वं, अव्याप्यवृत्तिप्रमानुपग्रहात्। मूले वृक्षः कपिसंयोगाभाववान्नाग्रे इत्यबाधितानुभवात् संयोगवदन्योन्याभावस्याव्याप्यवृत्तित्वात्। भेदाभेद एवं स्यादिति चेत् अनुभवमुपालभस्व यद्वलादवच्छेदभेदेनात्यन्ताभाववदन्योन्याभावस्याप्यव्याप्यवृत्तित्वमुपेयं। अतएव पक्षे इदानीं न श्याम इति धीः

घट इत्यादिप्रतीतेः सत्त्व-द्रव्यत्वादिव्यक्तिप्रमात्वस्य सर्व्वसम्मततया न तत्रातिव्याप्तिः, विशिष्टसत्तात्व-द्रव्यत्व-गुणत्वोभयत्वादिविशिष्टप्रमा तु सा न भवति स्वसमानाधिकरणात्यन्ताभावीयस्वनिरूपकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्व-स्वनिरूपकतावच्छेदकत्वोभयवत्तद्धर्म्मकविशेष्यताप्रतियोग्यनुभवत्वं तद्धर्म्मविशिष्टस्य प्रमात्वमिति विशिष्टप्रमाया लक्षणत्वात्। विशिष्टस्य वैशिष्ट्यमिति रीत्या गुणाद्यन्यतविशिष्टसत्तावद्द्रव्यमित्यादि धीरेव तादृशविशिष्टस्य प्रमा, विशेष्ये विशेषणमिति रीत्या तादृशधीस्तु सत्तादिव्यक्तेरेव प्रमा न तु विशिष्टस्येत्यभिप्रायः। अत्रावृत्तिप्रकारकप्रमायामव्याप्तिं सुगमत्वादुपेक्ष्य दूषणान्तरमाह, 'संयोगादीति, 'व्याप्यवृत्तित्वविशेषण इति, 'व्याप्यवृत्तित्वं' अवच्छिन्नवृत्तिकभिन्नत्वं, 'संयोगभ्रमेति गुणः संयोगवानित्यादिभ्रमेत्यर्थः। ननु व्याप्यवृत्तिरेव संयोगाभावोगुणादौ(१) इत्यत आह, 'तदन्ताभावस्येति(२)। अन्योन्याभावो नाव्याप्यवृत्तिरितिनिय-

---

(१) अधिकरणभेदेनाभावस्य भिन्नत्वमिति नियमादिति भावः।

(२) तादृशनियमे मानाभावादिति भावः।

समयभेदादविरुद्धा, तत्रैव तदन्योन्याभावमपेक्षते। नापि विशेष्यावृत्त्यप्रकारकानुभवत्वं, एकैकविशेष्यावृत्तिनानाप्रकारकसमूहालम्बनाऽव्याप्तेः। न च प्रकारस्यैकविशेष्यवृत्तितया न विशेष्यावृत्तित्वमिति वाच्यं, प्रमाप्रमारूपसमूहालम्बनातिव्याप्तेः। न च यावद्विशेष्यावृत्तित्वं विवक्षितं, एकैकविशेष्यवृत्तेर्यावद्विशेष्यावृत्तित्वेन समूहालम्बनाव्याप्तेः एकविशेष्यके यावदर्था-

---

मभिप्रायेणाशङ्कते, 'नापीति स्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकधर्मनिष्ठप्रकारतानिरूपितविशेष्यताप्रतियोग्यनुभवत्वमित्यर्थः(१), स्वं विषयता, तेन घट-पटाविति समूहालम्बनप्रमायां नाव्याप्तिः। प्रमा-भ्रमरूपञ्च समूहालम्बनं लक्ष्यमित्यभिमानः। संयोगादिव्यधिकरणसम्बन्धेन रूपादिप्रकारकभ्रमे अतिव्याप्तिसत्त्वेपि उक्तनियमं(२) निराकृत्य दूषयति, 'अव्याप्यवृत्तित्वादिति संयोगवति वृत्ते सत्त्वादित्यर्थः। शङ्कते, 'एवमिति संयोगवदन्योन्याभावस्यापि संयोगवति वृत्ते सत्त्वे इत्यर्थः, 'भेदाभेद इति वृत्तः संयोगिभेदतदभावोभयवान् स्यादित्यर्थः, संयोगिभेदाभावस्य संयोगानतिरिक्तत्वादिति भावः। 'अव्याप्यवृत्तित्व' संयोगवति सत्त्वं। 'अत एवेति अव्याप्यवृत्तिमतोऽन्योन्याभावस्याव्याप्यवृत्तित्वादेवेत्यर्थः, 'तत्रैव' प्रा-

---

(१) स्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकधर्मनिष्ठप्रकारतानिरूपितविशेष्यताप्रतियोग्यनुभवत्वमित्यर्थ इति ख०।

(२) अन्योन्याभावमात्रस्य व्याप्यवृत्तितानियमं इत्यर्थः।

भावात्। अथ विषयताया आश्रयो विशेष्यः, ज्ञानं तत्प्रतियोगि, भ्रमे च शुक्तिवृत्तिर्विषयता व्यधिकरणेन रजतत्वेनावच्छिद्यते, रजतवृत्तिस्तु समानाधिकरणेन रजतत्वेन, विषयता च विषये न ज्ञानाहिता ज्ञातताऽऽरूपा

रूपवत्येव, 'तदन्योन्याभावं' श्यामरूपवदन्योन्याभावं । नन्वत्यन्ताभावलक्षणे प्रतियोग्यनधिकरणत्वेन, अन्योन्याभावलक्षणे च प्रतियोगितावच्छेदकानधिकरणत्वेन स्वाधिकरणं विशेषणीयमित्युभयथापि नोक्तदोष इत्यत आह, 'विशेष्यभेदमादाय समूहालम्बनप्रमायामव्याप्तेश्चेति, 'समूहालम्बनप्रमायां' द्रव्यत्वादिरूपेण रजतारजतविशेष्यकरजतत्वप्रकारकप्रमायां, विशेष्यतावच्छेदकाभेदेन विशेष्यताया अप्यभिन्नत्वादिति भावः । अयन्तु क्वाचित्कः पाठः, क्वचित् 'तदत्यन्ताभावस्यैकत्वादित्यनन्तरं अयं पाठः, स प्रामादिकः 'नापि विशेष्यावृत्तीत्याद्यग्रिमलक्षणेन तद्दोषानुद्धारात् सन्दर्भाशुद्धेः । क्वचिच्च कुत्रापि नायं पाठः । 'विशेष्येति स्वविशेष्यावृत्तिप्रकारकं यद्यत् तदन्यानुभवत्वं इत्यर्थः, स्वं ज्ञानं, येन सम्बन्धेनावृत्तित्वं तेनैव तत्प्रकारकत्वं बोध्यं, तेनावृत्तित्वं यदि वृत्तिनियामकसम्बन्धमात्रेण विवक्षितं तदा गगणे द्रव्यत्वमित्याद्यवृत्तिप्रकारकप्रमायामव्याप्तिः, यदि च सम्बन्धसामान्येन विवक्षितं तदा अप्रसिद्धिः, यदि च यत्किञ्चित्सम्बन्धेन विवक्षितं तदेदं रजतमित्यादि प्रमायामेवासम्भव इति निरस्तं । अत्र स्वविशेष्यावृत्तित्वं यत्किञ्चित्स्वविशेष्यवृत्तिभिन्नत्वं, स्वविशेष्यवृत्तिसामान्यभिन्नत्वं वा, आद्ये आह

विवक्षिताऽपसिद्धान्तादसिद्धेः अतीतानागतप्रमायां तद्भावाच्च। किन्तु ज्ञानस्य विषये विशेषणताविशेषः कश्चित्। परज्ञानं ज्ञानत्वेन तद्विषयं च घटत्वेन जानतो घटमयं जनाति न वेति संशयाद्विषयज्ञानस्व-

---

'एकैकेति, 'समूहालम्बने' घट-पटाविति समूहालम्बने। द्वितीयमासङ्ग्य निराकरोति, 'नचेति, 'प्रकारस्य' घटत्व-पटत्वरूपप्रकारस्य, 'न विशेष्यावृत्तित्वं' न स्वविशेष्यवृत्तिसामान्यभिन्नत्वं। आंशिकप्रमाया लक्ष्यत्वे इदं रजतमिति भ्रमस्यापीदन्त्वांशे प्रमात्वेन लक्ष्यतया तत्राव्याप्तिरतः सर्वांशप्रमैव लक्ष्येत्यभिप्रायेणाह, 'प्रमाप्रमेति रजत-रङ्गयोरिमे रजते इति समूहालम्बनेत्यर्थः। इदमुपलक्षणं रजतरङ्गयोरिमे रङ्ग-रजते इति विपरीतभ्रमेऽप्यतिव्याप्तिर्बाधा। 'समूहालम्बनाव्याप्तेः' घट-पटाविति समूहालम्बनाव्याप्तितादवस्थ्यात्। पश्चाद्वक्ष्यमाणं स्वसमानाधिकरणधर्म्मप्रकारकविषयताप्रतियोग्यनुभवः प्रमेति लक्षणमसङ्गतं विषयत्वाभाव एव विषयत्वस्य प्रतियोगी (१), न तु ज्ञानमित्यप्रसिद्धेः, इदं रजतमिति प्रमायामव्याप्तेश्च। विषयताया: प्रकारवृत्तित्वेन विषयतासमानाधिकरणो धर्म्मः रजतत्वमेव तस्य तत्र विषयतायामप्रकारत्वादतः प्रथमं तद्वारणप्रकारमाह 'अथेति 'विशेष्य इति, तेनोक्तरीत्या स्वरूपतो रजतत्वादिप्रकारकप्रमायां न वक्ष्यमाणलक्षणमव्याप्तमितिभावः। 'ज्ञानं तत्प्रतियोगीति, तेन वक्ष्यमाणलक्षणे नोक्तरीत्या अप्रसिद्धिरिति भावः। अत-

---

(१) विषयत्वस्य विषयत्वाभावाभावरूपत्वादिति भावः।

रूपातिरिक्तस्य स्वाश्रय-स्वाभावादिविशेषणताविशेष-
स्यावश्यं स्वीकारात्, अन्यथा घटत्वेन ज्ञातोऽयमर्थ

निश्चितघटितवक्ष्यमाणलक्षणस्य भ्रम-प्रमयोरतिव्याप्त्यव्याप्तिवारण-
प्रकारमाह, 'भ्रम इति, 'व्याधिकरणेति प्रकारितासम्बन्धेनासमानाधि-
करणरजतत्वविशिष्टेत्यर्थः, 'समानाधिकरणेति प्रकारितासम्बन्धेन
समानाधिकरणरजतत्वविशिष्टेत्यर्थः। ननु विषयता कः पदार्थ
इत्यत आह, 'विषयता चेति, 'ज्ञानाहिता' ज्ञानजन्या। सति
प्रमाणे अप्रसिद्धान्तत्वमकिञ्चित्करमित्यत आह, 'असिद्धेरिति प्रमाण-
स्यासिद्धेरित्यर्थः। ननु बाधकाभाव एव मानमतो बाधकमाह, 'अती-
तेति अतीतानागतविशेष्यकप्रमायामित्यर्थः, 'तदभावाच्च' ज्ञातताया
असम्भवाच्च, ज्ञाततां प्रति विषयस्य समवायिकारणतया अतीताना-
गतविशेष्ये तदुत्पादासम्भवादिति भावः। प्रमात्वेनोपादानं प्रकृत-
लक्षणाव्याप्तिप्रदर्शनाय तेन ज्ञाततानिराकरणे अतीतानागतविष-
यकज्ञानमात्रस्यैवोपयोगित्वेऽपि न क्षतिः। 'विशेषणताविशेषः' ज्ञान-
विषययोः स्वरूपसम्बन्धविशेषः, 'कश्चित्' कृप्तपदार्थातिरिक्तः, स एव
सविशेष्यकः सप्रकारकः न तु ज्ञानं सविशेष्यकं सप्रकारकं इति भावः।
ननु विषयता नातिरिक्ता किन्तु ज्ञानविषयस्वरूपसेवेत्यत आह, 'पर-
ज्ञानमिति अयं पुरुषो ज्ञानवान् अयञ्च घट इति निश्चितइत्यर्थः,
'घटमयमिति अयं पुरुषो घटविषयकज्ञानवान्न वेत्यर्थः, 'स्वाश्रय-
स्वाभावेति ज्ञानाश्रय-ज्ञानाभावयोर्या विशेषणता तद्विलक्षणस्येत्यर्थः,
'अन्यथा' ज्ञानस्य विशेष्ये विषयताख्यातिरिक्तपदार्थानभ्युपगमे, 'इतो-

इति तृतीयार्थासम्भवः, प्रकारत्वमपि विषयस्य ज्ञाने विशेषणताविशेष एव, न तु विषयत्वमतिप्रसङ्गात्। एवञ्च विषयतासमानाधिकरणप्रकारकानुभवः, प्रकारसमाधिकरणविषयताप्रतियोग्यनुभवो वा, स्वसमानाधिकरणधर्मप्रकारकविषयताप्रतियोग्यनुभवो वा, स्वसमानाधिकरणधर्मावच्छिन्नविषयताप्रतियोग्यनुभवो वा

यार्थासम्भव इति तृतीयार्थस्य प्रकारत्वस्य कृत्प्रत्ययार्थे विषयत्वे अन्वयासम्भव इत्यर्थः, 'प्रकारत्वमपीति, यत इत्यादिः, 'ज्ञाने विशेषणताविशेष एवेति ज्ञानीयविषयताव्यतिरिक्तविशेषणताविशेष एव वर्त्तत इत्यर्थः। ननु ज्ञान-विषयोभयरूपसम्बन्ध एव तदभ्युपगमान्नान्वयासम्भव इत्यत आह, 'न त्विति, 'विषयत्वं' ज्ञान-विषयोभयरूपं विषयत्वं, प्रकारत्वाश्रय इति शेषः। 'अतिप्रसङ्गादिति विषये घटादावपि सप्रकारकव्यवहारप्रसङ्गादित्यर्थः। 'विषयतेति स्वसमानाधिकरणधर्म्मप्रकारकविषयताश्रयोऽनुभव इत्यर्थः, विषयतारूपो य समानाधिकरणप्रकारकस्तस्यानुभवइति कर्म्मधारयोत्तरमाश्रयत्वात्कषष्ठीतत्पुरुषसमासात्, स्वं विषयता, एवमग्रेऽपि। अत्र केनचित् सम्बन्धेनाश्रयत्वमादायातिव्याप्तिरतो लक्षणान्तरमाह, 'प्रकारेति स्वप्रकारसमानाधिकरणेत्यर्थः, 'स्वसमानाधिकरणेति, प्रथमं आश्रयमात्रं, अत्र तु प्रतियोगित्वमिति भेदः। 'स्वसमानाधिकरणधर्म्मावच्छिन्नेति प्रकारितासम्बन्धेन स्वसमाधिकरणधर्म्मविशिष्टेत्यर्थः, पूर्व्वत्र प्रकारित्वं विशेषणं, अत्र तु सम्बन्ध इति भेदः, अतस्तत्र-

मेति चेत्। न। निर्विकल्पकाव्याप्तेः विषयतासमाना-
धिकरणेदन्त्यप्रकारकभ्रमस्यापि प्रमात्वप्रसङ्गाच्च। भ्रम-
त्वांशे प्रमैवेति चेत् तर्हि अनुभवत्वमेव प्रमात्वं

घवमपि। निर्व्विकल्पकस्यासंग्राह्यत्वमतेऽपि दूषणमाह, 'विषय-
ति, 'भ्रमस्यापीति इदं रजतमित्यादिभ्रमस्यापीत्यर्थः, 'प्रमात्वापत्तेः'
माव्यवहारविषयत्वापत्तेः। इष्टापत्तिमाह, 'भ्रमेति 'तत्रांशे' इदन्त्वांशे,
मात्वं' प्रमाव्यवहारविषयतावच्छेदकं, अस्तिशेषः। 'व्यर्थमधिक-
ति, प्रमुष्टतत्ताकस्मरणात्मकस्य सर्व्वांशे भ्रमस्य सत्त्वेऽपि सर्व्वांश-
मात्मकस्यानुभवस्याप्रसिद्धेः प्रत्यक्षभ्रमे अन्ततस्तादात्म्यसम्बन्धेन
कारीभूतधर्म्मस्य स्वस्मिन्नेव प्रकारतया सर्व्वांशभ्रमत्वासम्भवात्।
त्र ह्रदत्वरूपेण पर्वते वह्निरूपेण जलानुमित्यादिरेव सर्व्वांशे
मात्मकोऽनुभवः प्रसिद्ध इति वाच्यं। विशेष्यतावच्छेदकांशे भ्रमा-
त्मकस्य विशेषणतावच्छेदकांशे भ्रमात्मकस्य वा परोक्षानुभवस्यान-
पगमात् तन्निराकरणप्रकारश्चास्माकृतसिद्धान्तरहस्ये अनुसन्धेयः।
तएव "धर्म्मिणि सर्व्वमभ्रान्तं प्रकारे तु विपर्य्ययः" इति प्रामा-
कप्रवादः, 'सर्व्वं' परोक्षानुभवरूपं ज्ञानं, 'धर्म्मिणि' धर्म्मिता-
च्छेदकांशे, 'अभ्रान्तं' परोक्षानुभवीयधर्म्मिता न स्वव्यधिकरण-
नावच्छिन्नेति यावत्, 'प्रकारे तु विपर्य्ययः' इति विशेषणता-
च्छेदकातिरिक्तप्रकारे एव विपर्य्ययः, विशेषणतावच्छेदकांशे न विप-
र्य्य इति यावत् (१), परोक्षानुभवीयप्रकारता न स्वव्यधिकरण-

---

(१) तुशब्दलभ्यएवार्थात् विशेषणतावच्छेदकांशे न विपर्य्यय इति
यावदिति खं।

व्यर्थमधिकं। अनुभव एव क्वचिदंशे भ्रमः प्रमा चेति चेत्। न। उक्तलक्षणे तादृशाभावात्। अथ स्वाधिकरणधर्मानवच्छिन्नविषयताप्रतियोग्यनुभवः प्रमा, समूहालम्बने च प्रतिविशेष्यं विषयताभेदादेकवृत्तिर्विषयता नापरवृत्तिनावच्छिद्यते, अतो नाव्याप्तिरिति चेत्[१]। न। भ्रमांशप्रमायामव्याप्तेः। न हि

धर्म्मावच्छिन्नेति तु निष्कर्षः। न च सर्व्वं ज्ञानं धर्म्यंशे अभ्रान्तमिति यथाश्रुत एव तदर्थ इति वाच्यं। तदभाववति तत्प्रकारकत्वरूपस्य भ्रमत्वस्य धर्म्यंश एव सत्त्वात्। न च धर्म्मिणीत्यत्र अंशता न सप्तम्यर्थः, किन्तु निरूपितत्वमिति वाच्यं। ह्रदो वह्निमान् ह्रदत्वाभाववांश्च वह्निरिति विशिष्टज्ञाने धर्म्मिनिरूपितभ्रमत्वस्यापि सत्त्वात्। न च तथापि प्रकारे तु विपर्य्यय इत्यस्य प्रकारांशे पुनर्विपर्य्यय इति यथा श्रुत एवार्थ इति वाच्यं। सर्व्वमित्यसङ्गतेः। न च सर्व्वपदं भ्रमात्मकसकलज्ञानपरमिति वाच्यं। तथापि 'प्रकारे तु विपर्य्ययः' इत्यस्य स्वप्रकाराभाववति स्वप्रकारप्रकारक इत्यर्थे बाधः इदं रजतमित्यादिभ्रमस्य स्वप्रकारसामान्याभाववति स्वप्रकाराप्रकारकत्वात्, विशिष्य रजतत्वादिरूपप्रकारोपादाने च सर्व्वमित्यसङ्गतेः, सर्व्वपदस्यापि विशिष्य रजतत्वादिभ्रमपरत्वे साध्याविशेषात्। नचांशत्वं सप्तम्यर्थः तथाच प्रकारांशे तु विपर्य्ययः इत्यर्थ इति वाच्यं। तदभाववद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपस्य भ्रमत्वस्य विशेष्यांशेऽपि सत्त्वेन व्यवच्छेदार्थकस्य तुशब्दस्यासङ्गतेः।

(१) इति नाव्याप्तिरिति चेदिति ख०।

या विषयता व्यधिकरणधर्मेणावच्छिद्यते सा तदनव-
च्छिन्ना, विरोधात्। नापि प्रकारव्यधिकरणविषयत्वा-
प्रतियोग्यनुभवः प्रमा, प्रकारव्यधिकरणविषयताप्रति-
योगिनि तदप्रतियोगित्वस्याभावेन भ्रमांशप्रमाव्याप्तेः।
नापि स्वव्यधिकरणधर्मावच्छिन्नविषयत्वाप्रतियोग्यनु-

त्र सर्व्वं भ्रमात्मकं ज्ञानं न धर्म्यंशे तत्प्रकारकत्वावच्छिन्नतद-
भाववद्विशेष्यकत्वरूपभ्रमत्वविशेषाश्रयः, 'प्रकारे तु विपर्य्ययः' किन्तु
प्रकारांश एव तादृशभ्रमत्वविशेषाश्रय इत्यर्थः, तदभाववद्विशेष्यक-
त्वावच्छिन्नतत्प्रकारकत्वरूपस्य भ्रमत्वस्य विशेष्यांशे सत्त्वेऽपि ता-
दृशभ्रमत्वस्य विशेष्यांशे विरहादिति चेत्। न। तथा सति वि-
शेष्यतासामान्यस्यैव विशेष्यावच्छेदेनाभावात् भ्रमत्वपर्य्यन्तानुधावनस्य
सर्व्वत्रप्रसङ्गात् तावता प्रामाणिकप्रवादोपपादनेऽपि सर्व्वांशभ्रमात्मक-
त्वानुमित्यादेरभ्युपगमे "व्यर्थमधिकं" इति मूलग्रन्थविरोधस्य गौ-
रवप्रसङ्गस्य दुर्व्वारत्वाच्च। गौरवञ्च सिद्धान्तरहस्ये प्रपञ्चितमिति
दिक्। 'क्वचिदंश इति तथाच सामान्यतोऽनुभवत्वस्य लक्षणत्वे
आंशिकभ्रमत्वस्य व्यावृत्तिर्न सिध्यतीति भावः। 'उक्तलक्षणे' उक्त-
लक्षणेऽपि, 'तादृशाज्ञानादिति आंशिकभ्रमव्यावृत्त्यज्ञानादित्यर्थः।
एतच्चापाततः सामानाधिकरण्य-प्रकारत्वयोः प्रमात्वनिरूपकसम्बन्ध-
घटकतया तत्तत्सम्बन्धमन्तर्भाव्य सामान्यतः प्रमाव्यवहारौपयिका-
ण्येव ह्येतानि लक्षणानि, तत्र च न वैयर्थ्यसम्भावनापि। तत्तत्-
सम्बन्धावच्छिन्नप्रकारताकानुभवत्वस्य तत्तत्सम्बन्धेन प्रमाव्यवहारौप-

भवः, स्वाधिकरणावृत्त्यप्रकारकविषयताप्रतियोग्यनुभवो वा प्रमा, तत एव। भ्रमे विषयतायाः स्वव्यधिकरणप्रकारावच्छिन्नत्वात् (१) स्वाधिकरणावृत्तिप्रकारकत्वाच्च। नापि स्वसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकधर्मानवच्छिन्नविषयताप्रतियोग्यनु-

---

यिकत्वे तादात्म्य-विषयत्वादिसम्बन्धेन पर्वतादिपक्षक-वह्न्यादिविधेयकानुमित्यादावपि तेन सम्बन्धेन सामान्यतः प्रमाव्यवहारापत्तेरिति ध्येयम्।

निर्विकल्पकसाधारणमिदं रजतमित्यादिभ्रमव्यावृत्तञ्च लक्षणमाशङ्कते, 'अथेति, 'अनवच्छिन्नत्वं' तदप्रकारकत्वं, 'स्वं' विषयता, 'समूहालम्बने चेति, घट-पटाविति समूहालम्बनप्रमायाञ्चेत्यर्थः, 'विषयताभेदात्' विशेष्यताभेदात्। 'भ्रमांशप्रमायामिति रजत एव रजतं रङ्गञ्चेति रङ्गत्वांशभ्रमात्मकरजतत्वप्रमायामित्यर्थः, 'नहीति 'व्यधिकरणधर्म्मेणावच्छिद्यते' स्वव्यधिकरणधर्म्मप्रकारिका, 'तदनवच्छिन्ना' तदप्रकारिका, 'विरोधादिति, प्रकारभेदेन च विषयताभेद इति भावः। 'प्रकारव्यधिकरणेति, स्वप्रकारानधिकरणवृत्तीत्यर्थः, 'स्वं' विषयता। अत्र स्वप्रकारानधिकरणत्वं यदि स्वप्रकाराधिकरणसामान्यभेदः तदेदं रजतमित्यादिभ्रमानुभवमात्रेऽतिव्याप्तिः तद्विषयतायाः स्वप्रकारेदन्त्वाधिकरणमात्रवृत्तित्वादतो यत्किञ्चित्स्वप्रकाराधिकरणभिन्नत्वमेव वक्तव्यं, तथाच पूर्व्वोक्ताव्याप्तिरेव

---

(१) स्वव्यधिकरणधर्म्मावच्छिन्नत्वादिति क०, ख०।

भवः प्रमा, भ्रमांशप्रमाव्याप्तेः अन्योन्याभावस्याव्याप्य-
वृत्तित्वेनाव्याप्यवृत्तिप्रमायामव्याप्तेश्च । यत्तु प्रमात्वा-
प्रमात्वयोर्विरोध एवेति भ्रमेन प्रमेति । तत्तुच्छं ।
अंशभेदमादायोभयस्यानुभवात् । अन्यथा भ्रमस्योभय-
बहिर्भावापत्तेः । एतेन स्वव्यधिकरणप्रकारकं ज्ञानं भ्रम-

तदवस्थेत्याह, 'प्रकारव्यधिकरणेति यत्किञ्चित्स्वप्रकारव्यधिकरणे-
त्यर्थः, 'भ्रमांशप्रमेति, एतल्लक्षणपक्षे प्रकारभेदेन विषयताभेदोपगमे-
ऽपि न प्रतीकारः इति भावः । 'स्वव्यधिकरणेति, 'अवच्छिन्नत्वं'
तत्प्रकारकत्वं । 'तत एवेति भ्रमांशप्रमाव्याप्तेरेवेत्यर्थः । अव्याप्तिमेव
विवृणोति, 'भ्रम इति प्रमांशभ्रमेत्यर्थः, 'प्रकारावच्छिन्नत्वादिति,
प्रकारः' धर्म्मः,। 'धर्म्मानवच्छिन्नेति, 'अनवच्छिन्नत्वं' तदप्रकारकत्वं ।
भ्रमांशप्रमायामव्याप्तिमुद्धरति, 'यत्चिति । 'उभयस्यानुभवादिति
उभयस्यैव व्यवहारादित्यर्थः, 'अन्यथेति प्रमाव्यवहारस्याप्रमात्वोपगमे
त्यर्थः, 'भ्रमस्येति इदं रजतमित्यादिभ्रमस्येत्यर्थः, धर्म्मितावच्छेद-
कांशे प्रमाव्यवहारस्येव विनिगमकाभावेन विधेयांशे भ्रमव्यवहार-
स्याप्रमात्वस्य सुवचत्वादिति भावः । 'एतेनेति भ्रमेऽपि धर्म्मिता-
वच्छेदकांशे प्रामाणिकानां प्रमाव्यवहारसत्त्वेनेत्यर्थः, 'स्वव्यधिकरणेति
स्वविशेष्यतानधिकरणवृत्तिधर्म्मेत्यर्थः, स्वपदं ज्ञानपरं । 'प्रकारा-
धिकरणावृत्तीति यत्किञ्चित्प्रकाराधिकरणावृत्त्यप्रकारकविषयताप्रति-
योग्यनुभव इत्यर्थः, स्वपदं विषयतापरम्, इदं रजतमित्यादिभ्रमे
अतिव्याप्तिवारणाय यत्किञ्चिदिति स्वप्रकारविशेषणं, धर्म्मितावच्छे-

स्तदन्योऽनुभवः प्रमा भ्रमो धर्म्यंशे न प्रमेति निरस्तं। नापि प्रकाराधिकरणावृत्त्यप्रकारकविषयताप्रतियोग्यनुभवः, प्रकारानधिकरणावृत्तिविषयताप्रतियोग्यनुभवो वा (१) प्रमा। प्रमेयमिदमिति ज्ञाने प्रकारानधिकरणस्याप्रसिद्धेः। किञ्च रजतत्वप्रकारकविषय-

---

दकप्रकारकधर्म्मिज्ञानस्य भ्रमानुभवहेतुतया प्रसुप्तत्ताकभ्रमानुभवस्याप्रसिद्धत्वाच्च न तत्रातिव्याप्तिरिति भावः। लक्षणान्तरमाह 'प्रकारानधिकरणावृत्तीति यत्किञ्चित्स्वप्रकारानधिकरणावृत्तिविषयतायाः प्रतियोग्यनुभव इत्यर्थः। इदं रजतमित्यादिभ्रमविषयताया अपि स्वप्रकारेदन्त्वाधिकरणमात्रवृत्तित्वेन प्रकारानधिकरणावृत्तित्वादतिव्याप्तिवारणाय यत्किञ्चिदिति स्वप्रकारविशेषणमिति भावः। द्वितीये दूषणमाह, 'प्रमेयमिदमितीति प्रमेयत्वसामान्यलक्षणादिजन्यप्रमेयमित्यादिप्रसुप्तत्ताकप्रमायामित्यर्थः। इदमुपलक्षणं लक्षणद्वय एव निर्विकल्पकाव्याप्तिः, इदं रजतमित्यादिभ्रमांशप्रमानुपग्रहश्च दूषणं बोध्यम्। रजततादात्म्यारोपे विषयतायौप्रकाररजतत्वमात्रप्रकारिका रजतमात्रनिष्ठा, अन्या रजतमात्रप्रकारिका शुक्तिमात्रनिष्ठा, अपरा च इदन्त्वमात्रप्रकारिका शुक्तिमात्रनिष्ठा, प्रकारभेदेन विषयताभेदादिति मतमालम्ब्य लक्षणद्वय एव तत्रातिव्याप्तिमाह, 'किञ्चेति, रजततादात्म्यारोप इति शेषः

---

(१) प्रकारानधिकरणावृत्तिविषयत्वाप्रतियोग्यनुभवो वेति पाठान्तरं कस्मिंश्चिद् मूलपुस्तके वर्त्तते परन्तु तन्न टीकाकारसम्मतमिति।

ताया रजतवृत्तित्वनियमात् रजतत्वावच्छिन्नैव रजत-
भ्रमे रजतवृत्तिविषयता अतो रजतभ्रमोऽपि रजते (१)
प्रमा स्यात्। अथ रजत-पुरोवर्त्तिनोरेकैव विषयता सा
च प्रकारानधिकरणवृत्तिधर्मावच्छिन्नैवेति चेत् तर्हि
धर्म्यंशेऽपि तज्ज्ञानं प्रमा न स्यात्। व्यधिकरणप्रकारक-

रजतवृत्तित्वेति रजतमात्रवृत्तित्वादित्यर्थः, 'रजतत्वावच्छिन्नैव' रजत-
समानाधिकरणैव, न त्विदन्त्वसमानाधिकरणा, 'रजतभ्रमे' रजत-
तादात्म्यारोपे, तथाच रजतवृत्तिविषयता स्वप्रकाररजतत्वाधि-
करणावृत्त्यप्रकारिका स्वप्रकाररजतत्वानधिकरणावर्त्तमाना चेति
भावः। 'रजते प्रमा स्यादिति रजतांशे प्रमा स्यादित्यर्थः। तादृश-
विषयताधिकरणस्यैव भवन्मते प्रमात्वरक्षावंशत्वादित्यभिमानः।

पूर्व्वोक्तमतमनादृत्य शङ्कते, 'अथेति, 'प्रकारानधिकरणेति यत्-
किञ्चित् स्वप्रकारानधिकरणवृत्तित्वविशिष्टेत्यर्थः। इदमुपलक्षणं यत्-
किञ्चित्स्वप्रकाराधिकरणावृत्तिप्रकारिका चेत्यपि बोध्यं। 'धर्म्यंशे-
पीति इदमंशेऽपीत्यर्थः। 'व्यधिकरणेति यत्किञ्चित्स्वप्रकाराधि-
करणावृत्तिप्रकारकत्वस्येत्यर्थः, 'तुल्यत्वादिति, रजतत्वप्रकारकविष-
यतावदिदन्त्वप्रकारकविषयतायामपि सत्त्वात्तयोरभेदादिति भावः।
धर्म्यंशे त्विति प्रकारभेदेन विषयताभेदमभ्युपेत्य इदन्त्वमात्रप्रकारक-
विषयताव्यक्तिमादाय धर्म्यंशे प्रमात्वोपपादन इत्यर्थः, 'रजतेऽपीति
रजतत्वमात्रप्रकारकविषयताव्यक्तिमादाय रजतांशेऽपि प्रमा स्यादि-

---

(१) रजतांश इति ख०।

त्वस्य तुल्यत्वात् धर्म्यंशे तु प्रमात्वे रजतेऽपि प्रमा स्यात्। अथ रजतांशे धर्म्यंशे च तज्ज्ञानं प्रमैव वैशिष्ट्यांशे न प्रमेति चेत्। न। वैशिष्ट्यस्य पूर्वज्ञानाविषयत्वेनाप्रकारत्वात्। वैशिष्ट्यवृत्तिविषयतायां रजतत्व-पुरोवर्त्तिनोः प्रकारत्वेन भ्रमस्य वैशिष्ट्यांशे प्रमात्वाप्रमात्वापातात्। नापि स्वव्यधिकरणप्रकारानवच्छिन्नविषयताप्रतियो-

---

त्यर्थः। 'प्रमैवेति, रजत-धर्म्मिणोरुभयोरेव निरूक्तविषयताधिकरणत्वादिति भावः। 'वैशिष्ट्यांश इति वैशिष्ट्यमात्रवृत्तिविषयतावच्छेदकप्रकाराप्रसिद्ध्या वैशिष्ट्यस्य निरूक्तविषयतानधिकरणत्वेन वैशिष्ट्यांश एव प्रमत्वाभावादित्यर्थः। वैशिष्ट्यस्याप्रकारकत्वेन प्रमात्वाभावत्वावंशत्वमेव न सम्भवतीत्यभिप्रायेण समाधत्ते, 'वैशिष्ट्यस्येति 'अप्रकारत्वादिति, स्वप्रकारस्यैव च प्रमात्वाभाव-प्रमात्वयोर्वृत्तावंशत्वादिति भावः। लक्षणे प्रकारपदं न विशेषणपरं परन्तु निरूपकपरं निरूपकभेदेनैव च विषयताभेदः, तथाच तादात्म्यारोपस्य वैशिष्ट्यांशे प्रमात्व-भ्रमत्वोभयप्रसङ्गः भवन्मते प्रकारीभूतधर्म्मस्यैव भ्रमत्ववृत्तावंशत्वमिति नियमादित्यभिप्रायेण दूषणान्तरमाह, 'वैशिष्ट्येति 'प्रकारत्वेन' निरूपकत्वेन, 'भ्रमस्य' तादात्म्यारोपस्य, 'वैशिष्ट्यांशे' रजततादात्म्यारोपस्य वैशिष्ट्यांशे, 'प्रमात्वाप्रमात्वेति रजतमात्रनिरूपितविषयताव्यक्त्यधिकरणत्वमादाय प्रमात्वप्रसङ्गः तस्याः स्वनिरूपकाधिकरणवृत्तित्वात्, शुक्तिमात्रनिरूपितविषयताव्यक्तिमादायैव भ्रमत्वप्रसङ्गः तस्याः स्वनिरूपकानधिकरणवृत्तित्वादित्यर्थः। 'स्व-

यनुभवः प्रमा। प्रमेयमिदमिति ज्ञाने प्रमेयत्वप्रकार-
विषयतानाश्रयस्याप्रसिद्ध्याव्याप्तेः। न च संयोगि-
त्वादिना प्रमेयत्वप्रकारकविषयताव्यतिरेको घटादौ
प्रसिद्ध इति वाच्यं। प्रतियोगितावच्छेदकरूपवत्त्वेन
प्रतियोगिज्ञानस्याभावधीहेतुत्वात्। किञ्च यत्किञ्चिद्-
व्यधिकरणप्रकारानवच्छिन्नत्वं भ्रमसाधारणं, प्रकृत-
ज्ञानव्यधिकरणप्रकारानवच्छिन्नत्वं निर्विकल्पकाव्याप्तं
तस्य निष्प्रकारकत्वादिति।

धिकरणेति स्वविषयतानधिकरणवृत्तिधर्म्माप्रकारकोऽनुभव इत्यर्थः।
संयोगित्वादिनेति संयोगित्वादिना व्यधिकरणधर्म्मेणेत्यर्थः, अप्रका-
रकत्वमपि व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभाव एव वाच्यः
न प्रमामात्रे नासम्भव इति भावः। अत्र भ्रमातव्याप्तौ सत्या-
मेव दोषमाह, 'प्रतियोगितावच्छेदकेति, तथाच व्यधिकरणधर्म्माव-
च्छिन्नाभावे मानाभावादिति भावः। 'यत्किञ्चिदिति यत्किञ्चिज्-
ज्ञानीयविषयताव्यधिकरणधर्म्माप्रकारकत्वमित्यर्थः,'भ्रमसाधारणमिति,
इदं रजतमित्यादिभ्रमेऽपि द्रव्यमित्यादिज्ञानीयविषयताव्यधिकरणध-
र्म्माप्रकारकत्वस्य सत्त्वादिति भावः। 'प्रकृतज्ञानेति प्रकृतज्ञानीयविष-
यताव्यधिकरणधर्म्माप्रकारकत्वमित्यर्थः, 'निष्प्रकारकत्वादिति, विषय-
ताया विशेष्यमात्रनिष्ठत्वनियमेन निष्प्रकारकज्ञाने विषयताविरहा-
दिति भावः। न च स्वविषयताव्यधिकरणधर्म्मप्रकारकं यद्यत्

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ
प्रत्यक्षखण्डे प्रमालक्षणपूर्वपक्षः ।

तदन्यत्वं लक्षणमस्तु तथाच न निर्विकल्पकाव्याप्तिरिति वाच्यं तथापि भ्रमांशप्रमानुपपत्त्यापत्तेः (१) इति दिक् ।

इति श्रीमथुरानाथतर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये प्रत्यक्षखण्डरहस्ये प्रमालक्षणपूर्वपक्षरहस्यम् ॥

---

(१) भ्रमांशप्रमानुपग्रहापत्तेरिति ख० ।

अथ प्रमालक्षणसिद्धान्तः ।

उच्यते । यत्र यदस्ति तत्र तस्यानुभवः प्रमा ।
ाद्वति तत्प्रकारकानुभवो वा ।
यत्र यन्नास्ति तत्र तस्य ज्ञानं तदभाववति तत्प्र-
ारकज्ञानं वा अप्रमा । तदन्यत्वे सत्यनुभवत्वमेव
ा प्रमात्वं । तत्प्रकारकत्वञ्च तद्वैशिष्ट्यविषयकत्वं,

अथ प्रमालक्षणसिद्धान्तरहस्यं ।

'यत्र यदस्तीति अस्तित्वं सम्बन्धित्वमात्रं न त्वाधेयत्वं तथाच
न् यत्सम्बन्धीति फलितार्थः । तेन गगने शब्द इत्याद्यवृत्ति-
ायां नाव्याप्तिः(१) । 'तत्रेति निरूपितत्वं सप्तम्यर्थः, अन्वय-
ास्य 'तस्येतिषष्ठ्यर्थविषयतायां, तन्निरूपित-तन्निष्ठविषयताप्रति-
ोग्यनुभव इत्यर्थः, तथाच तत्सम्बन्धिनिरूपित-तन्निष्ठविषयताप्रति-
ोग्यनुभवत्वं तत्र तत्प्रमात्वमिति समुदितार्थः । सम्बन्धिता विष-
ता च प्रमात्वनियामकसम्बन्धेन ग्राह्या तेन संयोगसम्बन्धेन वह्न्या-
दिमति पर्वतादौ समवायसम्बन्धेन वह्न्यादिभ्रमे नातिव्याप्तिः, न वा

---

(१) अस्तित्वस्य अधिकरणत्वरूपत्वे आधेयत्वस्य वृत्त्यनियामकसम्बन्ध-
या तत्सम्बन्धावच्छिन्नाधिकरणत्वाप्रसिद्ध्या गगने शब्द इत्यादिज्ञानस्य
ामाणत्वानुपपत्तिरिति भावः ।

तद्विशेषणज्ञानजन्यत्वं वा । ईश्वरस्य तद्विशिष्टविषयं ज्ञानं न तु तत्प्रकारकं । निर्विकल्पकञ्च प्रमाप्रमा-वहिर्भूतमेव व्यवहारानङ्गत्वात् । अव्यपदेश्यपदेन तदुपग्रहस्य नाम-जात्यादियोजनारहितमपि प्रत्यक्ष-मस्तीत्यत्र तात्पर्य्यं । इदं रजतमिति ज्ञानमिदन्त्ववति

तत्संसर्गकज्ञानस्य तत्प्रमात्वापत्तिः(१) सांसर्गिकविषयतायाः सम्बन्धा-नवच्छिन्नत्वात् । एतेन तत्र प्रमात्वनियामकसम्बन्धेन सम्बन्धि सप्तम्यर्थो विषयत्वं वा, आद्ये यत् यत्सम्बन्धि तत्सम्बन्धिनस्तस्यानुभव तत्र तस्य प्रमेति पर्य्यवसितं तथाच शुक्तावेदं रजतमिति संसर्गा-रोपस्यापि रजते रजतत्वप्रकारकप्रमात्वापत्तिः तस्यापि रजतसम्बन्धि रजतत्वविषयत्वात् । द्वितीये यत् यत्सम्बन्धि तद्विषयकस्तदनु भवस्तत्र तस्य प्रमेति पर्य्यवसितं तथाच रजत-रङ्ग्योरिमे रङ्ग-रज इति विपरीतभ्रमस्यापि रजते रजतत्वप्रमात्वापत्तिः इत्यादिदूषण अपास्तम् । अथ यथोक्तनिर्विकल्पकेऽव्याप्तिः, जाति-व्यक्तिनिर्वि-कल्पकविषयतायाः परस्परं निरूप्य-निरूपकभावे मानाभाव परन्तु जाति-व्यक्त्योरुभयनिष्ठा एकैव निर्विकल्पकविषयता साधा-र्दधिकरणस्य चानिरूपकत्वादिति चेत् । न । निर्विकल्पकालक्ष-त्वस्यानुपदं ग्रन्थकृतैव वक्ष्यमाणत्वादन्यथा द्वितीयलक्षणेऽपि तद्व्या-प्तेर्दुर्वारत्वादिति दिक् ।

---

(१) तत्संसर्गकज्ञानस्य संसर्गांशेऽपि प्रमात्वापत्तिरिति ख० ।

नन्वेवं तद्विशेष्यकज्ञानस्यापि तत्प्रमात्वापत्तिः। न चेष्टापत्तिः, तत्प्रकारकज्ञान एव तत्प्रमाव्यवहारादित्यस्वरसात् लक्षणान्तरमाह, 'तद्वतीति, विशेष्यित्वं सप्तम्यर्थः। न चैवं तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वं इति फलितं तच्च रजत-रङ्गयोरिमे रङ्ग-रजते इत्यादि-विपरीतसमूहालम्बनभ्रमेऽतिव्याप्तिरिति वाच्यं। विशेष्यित्वस्य सप्तम्यर्थस्य अवच्छिन्नतासम्बन्धेन तत्प्रकारकतायामन्वयात् तथाच तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकताशाल्यनुभवस्तत्प्रमेति फलितं। अवच्छिन्नत्वञ्च इदमेतद्विशेष्यकत्वांशे एतत्प्रकारकमिति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः, विपरीतभ्रमे च रजतविशेष्यकत्वावच्छिन्नं न रजतत्वप्रकारकत्वं अपि तु रङ्गविशेष्यकत्वावच्छिन्नं। वस्तुतस्तु 'तद्वतीत्यत्र विशेष्यितासम्बन्धेनावच्छिन्नत्वमेव सप्तम्यर्थः, अन्वयस्तु तत्प्रकारकत्वे, तथाच विशेष्यितासम्बन्धेन तदवच्छिन्ना या तत्प्रकारिता तच्छाल्यनुभवत्वं तत्प्रमात्वमिति फलितं। इदमेतत्प्रकारकमिति प्रतीत्या विशेष्यस्यापि विशेष्यितासम्बन्धेन प्रकारितायामवच्छेदकत्वात्, विपरीतभ्रमे च रजतावच्छिन्नं न रजतत्वप्रकारकत्वमपि तु रङ्गावच्छिन्नं। न चैवमिदमर्चांशे एतद्विशेष्यकमिति प्रतीत्या प्रकारितासम्बन्धेन प्रकारस्यापि विशेष्यितायामवच्छेदकतया प्रकारितासम्बन्धेन तदवच्छिन्ना या तद्विशेष्यिता तच्छाल्यनुभवत्वं तत्प्रमात्वं इत्यपि लक्षणमस्त्विति वाच्यं। विनिगमकाभावेन तयोरेव लक्षणत्वस्येष्टत्वात्। सर्व्वत्र तद्वत्ताप्रकारिता च प्रमात्वनियामकसम्बन्धेन ग्राह्या तेन संयोगादिसम्बन्धेन वह्न्यादिमति पर्व्वतादौ समवायादिना तद्बुद्धौ नातिव्याप्तिः।

प्रकारभेदेनेव सम्बन्धभेदेनापि प्रमालक्षणभेदस्येष्टत्वात्। तदुक्ता च तन्निरूपितसम्बन्धिता, न तु तन्निरूपिताधारतामात्रं, तेन दण्ड-नियामकसम्बन्धेन प्रमायां नाव्याप्तिः। समवायस्यैकत्वेऽपि समवाय-सम्बन्धावच्छिन्नरूपनिरूपितसम्बन्धितायाः वायावभावात् न वायु-रूपवानित्यादिसमवायसंसर्गकरूपादिभ्रमेऽतिव्याप्तिः[१]। सम्बन्धिता च धर्मितापरनाम्नी आधारानाधारसाधारणः सम्बन्धिमात्रसाधा-रणः स्वरूपसम्बन्धविशेषः। न चैवं गुण-कर्मान्यत्वविशिष्टसत्ता-वान गुण इत्यादिसमवायसंसर्गकज्ञानस्यापि सत्तायाः प्रमात्वापत्ति, गुणादावपि समवायसम्बन्धेन सत्तानिरूपितसम्बन्धित्वसत्त्वादिति वाच्यं, शुद्धसत्तायाः समवायसम्बन्धेन प्रमात्वस्य तत्रेष्टत्वात्, विशिष्टसत्ता-त्वावच्छिन्नसत्तायाः समवायसम्बन्धेन प्रमात्वस्यैव तत्रानभ्युपगमात्, तत्सम्बन्धेन तद्धर्मविशिष्टतन्निरूपितसम्बन्धितावति तत्सम्बन्धेन तद्ध-र्मविशिष्टतत्प्रकारकोऽनुभवः[२] तत्सम्बन्धेन तद्धर्मविशिष्टतत्प्रकारक विशिष्टप्रमाया लक्षणत्वात्। अतएव विशिष्टवैशिष्ट्यमितिरीत्या गुणा-द्यन्यत्वविशिष्टसत्तावत्द्रव्यमिति धीरेव विशिष्टसत्तात्वविशिष्टस्य प्रमा न तु विशेष्ये विशेषणमिति रीत्या गुणाद्यन्यत्वविशिष्टसत्तावत् द्रव्य-मितिधीर्विशिष्टसत्तात्वविशिष्टप्रमा, किन्तु सत्ताव्यक्तेरेव प्रमा। न चेदमेव सर्वसाधारणं लक्षणमस्तु किं विशिष्टाविशिष्टभेदाल्लक्षणद्वयेनेति वाच्यं। अयं घट इत्यादौ स्वरूपतो घटत्वादिप्रमायामव्याप्त्यापत्ते-

(१) तथाच सम्बन्धिसत्त्वं प्रति सम्बन्धि-सम्बन्धोभयसत्त्वं नियामकमिति भावः।

(२) तद्धर्मविशिष्टतन्निरूपितवैशिष्ट्यविषयताशालि ह्यनुभव इति खं।

त्र घटत्वादौ धर्म्मान्तरवैशिष्ट्याभानादिति भावः । 'तत्र तस्येति
निरूपिततन्निष्ठविषयताप्रतियोगिज्ञानं तत्र तद्भ्रम इत्यर्थः, तथाच
तद्भाववन्निरूपिततन्निष्ठविषयताप्रतियोगिज्ञानत्वं तद्भ्रमत्वमिति
समुदितार्थः । स्मृतेरपि भ्रमतया अनुभवत्वमपहाय ज्ञानत्वप्रवेशः ।
एवमत्र रजतत्वमित्यादिरजतत्वविशेष्यकभ्रमस्यापि रजतत्वभ्रमत्वा-
पत्तिः। न चेष्टापत्तिः, प्रकारीभूतधर्म्मांशएव भ्रमव्यवहारादित्यत
आह, 'तद्भाववतीति, विशेष्यित्वं सप्तम्यर्थः। न चैवं तद्भाववद्वि-
शेष्यकत्वे सति तत्प्रकारकं ज्ञानं तद्भ्रम इति फलितं, तच्च रजत-
त्वे इति समूहालम्बनप्रमायामतिव्याप्तमिति वाच्यं । सप्तम्यर्थस्य
विशेष्यित्वस्यावच्छिन्नतासम्बन्धेन तत्प्रकारकतायामन्वयात्, तथा च
शुक्तित्वावच्छिन्नप्रतियोगिताकाभाववद्विशेष्यकत्वावच्छिन्नतद्शुक्तिप्र-
कारिताशालिज्ञानं तद्शुक्तेर्भ्रम इति फलितं। यद्वा 'तद्भाववतीत्यत्र
विशेष्यितासम्बन्धेनावच्छिन्नत्वमेव सप्तम्यर्थः, तथा च विशेष्यिता-
सम्बन्धेन तद्शुक्तित्वावच्छिन्नप्रतियोगिताकाभाववदवच्छिन्ना या तद्शुक्ति-
प्रकारिता तच्छालि ज्ञानं तद्शुक्तेर्भ्रम इति फलितं । शेषं पूर्व्वोक्त-
दिशावसेयं । अभावः, प्रकारिता च भ्रमत्वनियामकसम्बन्धेन ग्राह्या
न समवायादिसम्बन्धेन वह्न्याद्यभाववति पर्व्वतादौ संयोगादिना
तद्बुद्धौ नातिव्याप्तिः । प्रतियोगिताकान्तोपादानात् न वैशिष्ट्या-
न्यवृत्तिधर्म्मावच्छिन्नप्रतियोगिताकाभावमादाय प्रमामात्रे नाति-
प्रसङ्गः(१) । न चैवं गुण-कर्म्मान्यत्वविशिष्टसत्तावान् गुण इत्यादि-

(१) द्रव्यत्ववत्यपि घटे पटवृत्तित्वविशिष्टद्रव्यत्वाभावस्य द्रव्यत्व-गुणत्वो-
भयाभावस्य च सत्त्वात द्रव्यं घट इत्यादि प्रमायामतिव्याप्त्यापत्तेरिति भावः।

समवायसंसर्गकज्ञानस्य सत्ताभ्रमत्वं न स्यात् तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकसत्ताव्यक्त्यभावस्य गुणादावभावादिति वाच्यं। समवायसम्बन्धेन स्वरूपतः सत्ताव्यक्तेर्भ्रमत्वाभावस्य तत्रेष्टत्वात्, विशिष्टसत्तावावच्छिन्नसत्तायाः समवायसम्बन्धेन भ्रमत्वस्यैव तत्राभ्युपगमात्, तत्सम्बन्धावच्छिन्न-तद्धर्म्मावच्छिन्नप्रतियोगिताकतदभाववति तत्सम्बन्धेन तद्धर्म्मविशिष्ट-तत्प्रकारकज्ञानं(१) तद्धर्म्मरूपेण तद्भ्रम इति विशिष्टभ्रमस्य लक्षणत्वात्। न चेदमेव सर्व्वसाधारणं लक्षणमस्तु किं विशिष्टाविशिष्टभेदात् लक्षणद्वयेन इति वाच्यं। इदं रजतमित्यादौ स्वरूपतोरजतत्वादिभ्रमे अव्याप्त्यापत्तेः, तत्र रजतत्वादौ धर्म्मान्तरवैशिष्ट्याभानात्। अतएव वह्निस्वरूपेण वह्निसामान्यप्रकारकस्य पर्व्वतो वह्निमानिति ज्ञानस्य वह्निस्वरूपेण महानसीयवह्न्यादेर्भ्रमत्वाभावेऽपि स्वरूपतो महानसीयवह्न्यादेर्भ्रमत्वं सर्व्वसिद्धं। अतएव च विशेष्ये विशेषणमिति रीत्या समवायसम्बन्धेन गुणाद्यन्यत्वविशिष्टसत्तावान् गुण इति धीर्न भ्रमस्तत्र विशिष्टनिरूपितप्रकारिताविरहेण विशिष्टभ्रमत्वाभावात् सत्ताव्यक्तित्वावच्छिन्नाभाववति सत्ताव्यक्तिप्रकारकत्वाभावेन तद्व्यक्तिभ्रमत्वाभावाच्च, तादृशमेव ज्ञानं उपलक्षणविधया गुणाद्यन्यत्वप्रकारकमिति गीयते, विशिष्टस्य वैशिष्ट्यमिति रीत्या तादृशज्ञानन्तु विशेषणविधया गुणाद्यन्यत्वप्रकारकं ज्ञानं तत्र विशिष्टस्य भ्रमः, न तु सत्ताव्यक्तेरिति विषयविभागः। ननु तथापि सत्ता गुणवृत्तिरितिप्रतीतेर्भ्रमत्वं दुर्व्वारं विशिष्टसत्तायां गुणवृत्तित्वा-

(१) तत्सम्बन्धावच्छिन्न-तद्धर्म्मावच्छिन्नप्रतियोगिताकतदभाववति तत्सम्बन्धेन तद्धर्म्मविशिष्टनिरूपितवैशिष्ट्यविषयताशालि ज्ञानं इति ख०, म०।

भावसत्त्वेन तदनतिरिक्तायां सत्तायामपि गुणवृत्तित्वाभावसत्त्वात्। न च सत्तायां विशिष्टसत्तात्वावच्छेदेन गुणवृत्तित्वाभावेपि सत्तात्वावच्छेदेन गुणवृत्तित्वसत्त्वात् वक्ष्यमाणरीत्या वृत्तः संयोगवानिति ज्ञानस्येव न भ्रमत्वमपि तु प्रमात्वमेवेति वाच्यं। तथा सति गुणत्वान्यत्वविशिष्टसत्ता गुणवृत्तिरिति प्रतीतेरपि स्वरूपसम्बन्धेन गुणवृत्तित्वभ्रमत्वाभाव-तत्प्रमात्वयोरापत्तेः सत्तायां गुणवृत्तित्वप्रयाणवृत्तित्वे गुणवृत्तित्वाभाववती सत्ता गुणवृत्तित्वाभावः सत्तावृत्तिरित्यपि प्रतीत्यापत्तेश्चेति चेत्। न। अतएवानुपपत्त्या गुणादौ विशिष्टसत्तानिरूपिताधारताविरहेऽपि विशिष्टसत्तायां गुणाद्याधारत्वमस्त्येवेत्यभ्युपगमात्, तथा च सत्ता गुणवृत्तिर्विशिष्टसत्ता गुणवृत्तिरिति प्रतीतिद्वयमेव न भ्रमः, किन्तु प्रमैवेति न काप्यनुपपत्तिः।

नव्यास्तु यावतीस्तद्व्यक्तीः प्रातिस्विकरूपेणोपादाय तत्तद्व्यक्तिविशेष्यक-तत्प्रकारकानुभवस्तत्प्रमेति प्रथमलक्षणार्थः। नन्वेवं विशेष्यव्यक्तिभेदेन प्रमात्वानन्त्यमतो द्वितीयं, भ्रमलक्षणद्वयमप्येवमेव योजनीयं। सर्व्वमन्यत् पूर्व्ववदिति प्राञ्चः।

'तदन्यत्वे सतीति यावद्भ्रमभिन्नत्वे सति तत्प्रकारकानुभवत्वमित्यर्थः। तद्विशेष्यक-तत्संसर्गकज्ञानयोः निर्विकल्पकस्य च व्युदासाय प्रकारकत्वान्तर्भावः। न चैवं विषयान्तरांशे भ्रमरूपायां प्रमायामव्याप्तिरिति वाच्यं। अत्राशिकभ्रमस्यालक्ष्यत्वादिति भावः। वस्तुतस्तु यद्यज्ज्ञानं तस्य भ्रम एव न तु तस्य प्रमा तत्तज्ज्ञानव्यक्तिभिन्नत्वे सति तत्प्रकारकानुभवत्वं तस्य प्रमात्वमित्यर्थः। तेनां-

तदनुभवत्वात् प्रमा, रजतत्वाभाववति तत्प्रकारक-ज्ञानत्वादप्रमा, अंशे समूहालम्बनञ्च नाप्रमा। एक-

---

शिकभ्रमरूपाया अपि प्रमायाः संग्रहः इत्येव तत्त्वं। एतच्चासर्व्वज्ञैः दुर्ज्ञेयत्वादनादेयं। ननु तत्प्रकारकत्वं तद्धर्म्मकत्वं तथा च रजतत्वादिप्रमा-भ्रमयोरव्याप्तिः प्रमात्व-भ्रमत्वनियामकसम्बन्धेन रजतत्वादेर्नाधर्म्मत्वात् साकारवादिभिरेव रजतत्वादेर्ज्ञानधर्म्मत्वाभ्युपगमादित्यत आह, 'तत्प्रकारकत्वञ्चेति, 'तद्वैशिष्ट्यविषयकत्वमिति तद्विशेषणकत्वमित्यर्थः, विशेषणता च विशेष्यतावत् स्वरूपसम्बन्धविशेष इति भावः। एतेन सामान्यतस्तद्वैशिष्ट्यविषयकत्वं यदि तत्प्रकारकत्वं तदा दण्ड-पुरुषसंयोग इति समूहालम्बनस्यापि दण्डादिप्रकारकत्वापत्तिः यदि च संसर्गमर्य्यादया तद्वैशिष्ट्यावगाहित्वं तदा तद्विशेष्यकज्ञानस्यापि तत्प्रकारकत्वापत्तिरिति दूषणमपास्तं। यदिचेश्वरज्ञानं प्रमा प्रमाबहिर्भूतमेवेति पक्षस्तदाह, 'तद्विशेषणेति 'ज्ञानपदं सम्पातायातं तद्विशेषणकत्वे सति जन्यत्वमित्यर्थः। 'ईश्वरस्येति, अत इत्यादि ननूक्तलक्षणानां निर्व्विकल्पकेऽव्याप्तिरित्यत आह, 'निर्व्विकल्पकस्येति 'व्यवहारेति प्रवृत्त्यादीत्यर्थः। नन्वेवं "इन्द्रियार्थसन्निकर्षोत्पन्नमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं ज्ञानं प्रत्यक्षं" इति प्रत्यक्षप्रमालक्षणस्य प्रत्यक्षप्रमामध्ये निर्व्विकल्पकस्य गणनमसङ्गतमित्यत आह, 'अव्यपदेश्येति, 'तदुपग्रहस्येति निर्व्विकल्पकाभिधानस्येत्यर्थः, 'नाम-जात्यादीति नाम-जात्यादीनां या 'योजना' वैशिष्ट्यं, तदविषयकमपीत्यर्थः, तथा च तत्सूत्रस्य इन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचारि ज्ञा-

प्रकाराभावपत्यपि तद्प्रतीतेः। नन्वेवमव्याप्यवृत्तिभा-
वाभावयोरेकत्र प्रमाप्रमा च स्यात् तदभाववति तत्प्र-
कारकज्ञानत्वादिति चेत्। न। भिन्न-भिन्नावच्छेदेन

प्रत्यक्षप्रमा, सा च द्विविधा 'अव्यपदेश्यं' निर्विकल्पकं ज्ञानं, 'व्यवसायात्मकं' विशिष्टज्ञानात्मकं ज्ञानञ्चेति नार्थः अव्यभिचारित्वस्य यथार्थत्वरूपतया लक्षणस्याव्याप्त्यापत्तेः निर्विकल्पकस्य व्यवहारा-नुगमाच्च। किन्तु इन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचारि यथार्थं ज्ञानं तत्प्रत्यक्षप्रमेति प्रत्यक्षप्रमालक्षणं, प्रत्यक्षप्रमाया लक्षणमुक्त्वा रजतनिराकरणाय प्रत्यक्षसामान्यं विभजते, 'अव्यपदेश्यमिति, यच्चन्तु द्विविधं अव्यपदेश्यं व्यवसायात्मकञ्चेत्येव तद्व्याख्येयमिति भावः। नन्वेवं शुक्तावेदं रजतमिति ज्ञानमेकस्मिन् विशेष्ये इद-न्त्वस्य प्रमा, रजतत्वस्य च भ्रमः स्यादित्यत आह, 'इदमिति, 'अंशे' एकस्मिन्नेव विशेष्यांशे, 'समूहालम्बनञ्चेति घट-पटावित्यादि समूहा-लम्बनञ्चेत्यर्थः। 'एकप्रकाराभाववत्यपीति घटत्वाभाववति घटत्वप्रका-रकत्वस्य पटत्वाभाववति पटत्वप्रकारकत्वस्य च विरहादित्यर्थः। भावाभावयोरिति, स्वावच्छेदकावच्छेदेन ज्ञानमिति शेषः, 'एकत्र' एकस्मिन्नेव विशेष्ये, तथा च मूले वृक्षः कपिसंयोगीति ज्ञानस्य वृक्षे प्रमाप्रमात्वोभयप्रसङ्गः, तथा अग्रे वृक्षः कपिसंयोगाभाववान् इति ज्ञानस्यापीत्यर्थः। लीलावतीकारमते संयोगस्य व्याप्यवृत्तितया मतमाश्रित्यैव समाधत्ते, 'भिन्न-भिन्नेति, 'संयोग-तदभावौ नेति

हि वृक्षे संयोग-तदभावौ न वृक्षमात्रे विरोधादननुभवाच्च। तथा च यत्र वृक्षे संयोगो न तत्र तदभावः, यदवच्छेदेन यत्र यदस्तीति वा विवक्षितं। गोत्वादेरपि

च्छेदः, भिन्न-भिन्नावच्छेदेन वृक्षे संयोग-तदभावौ न स्त इत्यर्थः, 'वृक्षमात्रे' सर्व्वस्मिन्नेव वृक्षे, 'विरोधादिति कपिसंयोग-तदभावयोः सत्त्वासत्त्वादित्यर्थः, प्रतियोग्यत्यन्ताभावयोः सामान्यत एव विरोधस्य क्लृप्तत्वादिति भावः। 'अननुभवाच्चेति वृक्षे कपिसंयोग-तदभावयोरनुभवविरहाच्चेत्यर्थः। मूले वृक्षे न कपिसंयोग-इति प्रतीतिर्हि घटे वृक्षे न कपिसंयोग-इति प्रतीतिवत् वृक्षवृत्तित्वस्यावच्छेदकतासम्बन्धेनाभावमेव मूले अवगाहते न तु वृक्ष एव कपिसंयोगाभावमिति भावः। 'तथाचेति, 'संयोगः' कपिसंयोगः, एवञ्च वृक्षे कपिसंयोगवत्त्वज्ञानं प्रमैव, तदभाववत्त्वज्ञानञ्च भ्रम एवेति भावः।

संयोगस्याव्याप्यवृत्तित्वमतमाश्रित्य समाधत्ते, 'यदवच्छेदेनेति यदवच्छेदेन यत्र यदस्ति तदवच्छेदेन तत्र तस्यानुभवः तत्प्रमेत्यर्थः, तथाच मूले वृक्षः कपिसंयोगीति ज्ञानं न प्रमा अपि तु भ्रमः, तथा अग्रे वृक्षः कपिसंयोगाभाववान् इति ज्ञानमपीति भावः। एतच्च प्रथमलक्षणाभिप्रायेण, द्वितीयलक्षणे तु यदवच्छेदेन यत्र यदस्ति तदवच्छेदेन तद्वति तत्प्रकारकानुभवस्तत्प्रमेति वक्तव्यमिति भावः।

केचित्तु विशिष्टस्यातिरिक्तत्वमतमाश्रित्य समाधत्ते, 'भिन्न-भिन्नेति अग्र-मूलादिरूपभिन्न-भिन्नावयवविशिष्टे हि वृक्षे कपिसंयोग-

ाजावच्छेदेन वृत्तेः। पाकरक्ते श्यामोऽयमिति धीः
ैव कदाचित्तच तत्सत्त्वात् इदानीं श्याम इति तु

दभावावित्यर्थः, 'न वृक्षमात्र इति न त्वेकस्मिन्नेव शुद्धवृक्षे तद्-
यमित्यर्थः, 'विरोधादिति प्रतियोगि-तदभावयोर्विरोधादित्यर्थः,
ननुभवाच्च' एकस्मिन्नेव शुद्धवृक्षे तयोरनुभवविरहाच्चेत्यर्थः।
त्याचेति, इत्यत्र मूले वृक्षः कपिसंयोगीतिज्ञानं भ्रम एव न तु
ा मूलविशिष्टे वृक्षे कपिसंयोगवत्त्वविरहात्, तथा अग्रे वृक्षः
पिसंयोगाभाववानिति ज्ञानमपीति भावः। विशिष्टस्यानतिरिक्तत्व-
मास्थित्य समाधत्ते, 'यदवच्छेदेनेति, इत्याहुः।

नन्वेवं गोत्वादेर्व्याप्यवृत्तिधर्मस्य प्रमायामव्याप्तिस्तस्यावच्छेदक-
रहादित्यत आह, 'गोत्वादेरपीति। नन्वेवं पाकरक्ते घटे
ालान्तरे अयं श्याम इति धीः प्रमा स्यादित्यनेष्टापत्तिमाह,
ाकेति, 'श्यामोऽयं' कालान्तरे श्यामोऽयं, 'कदाचित्' काला-
रावच्छेदेन। 'अप्रमैव' न प्रमैव। ननु तदवच्छेदकावच्छेदेन
दति तत्प्रकारकानुभवत्वं तत्प्रमात्वं इत्युक्तावव्याप्तिः तदवच्छेदकतानवगाहिनी
ीः प्रमा न स्यात्। न च तदविषयकप्रत्ययोऽसिद्ध एवेति वाच्यम्।
ाप्यवृत्तिधर्मस्यावच्छेदकत्वाविषयिकाया अपि प्रतीतेः सर्वसिद्ध-
ादव्याप्यवृत्तिधर्मस्यापि लौकिकप्रत्यक्ष एव प्राचीनैर्नियमतो-
वच्छेदकत्वविषयताभ्युपगमेन तदतिरिक्तप्रत्ययस्यावच्छेदकत्वाविष-
कस्यापि सत्त्वाच्च। न च तदनवच्छेदकावच्छेदेन तत्र तत्प्र-
ारकत्वशून्यत्वे सति तदिति तत्प्रकारकानुभवत्वं तत्र तत्प्रमात्वमिति

अप्रमैव। न च यत्तद्भ्यां लक्षणोऽननुगमः, न हि प्रमा सर्वत्र प्रमा, किन्तु क्वचित्तथाच किं ज्ञानं कुत्र प्रमेति तत्तद्विशेषस्य लक्ष्यत्वेन यत्तद्भ्यामेव लक्षणं युक्तं।

विवक्षितं, तत्रेत्युपादानादधिकरणान्तरे तदनवच्छेदकावच्छेदेन तत्प्रकारिकायां समूहालम्बनप्रमायां नाव्याप्तिरिति वाच्यम्। तथा च मूले अग्रे वृक्षः कपिसंयोगीति प्रमायां तत्तदभावावच्छेदकोभयावच्छेदेन तत्प्रकारिकायामव्याप्तिरिति चेत्। न। तदवच्छेदकावच्छेदेन तत्र तदप्रकारकत्वे सति यत् तदनवच्छेदकावच्छेदेन तत्र तत्प्रकारकत्वं तच्छून्यत्वे सतीति विवक्षितत्वात्। तदनवच्छेदकावच्छेदेन तत्र तत्प्रकारकत्वञ्च तत्र तदनवच्छेदकनिष्ठतद्वृत्तितदधिकरणतावच्छेदकत्वावगाहित्वे सति तत्र तत्प्रकारकत्वं, मूले वृक्षः कपिसंयोगीति ज्ञानञ्च मूले वृक्षवृत्तिकपिसंयोगाधारतावच्छेदकत्वावगाह्येवेति भावः। एतच्चापाततः, तथापि वृक्षः कपिसंयोगी अग्रे वृक्षः कपिसंयोगीति धीरुभयात्मिका स्यात् कपिसंयोगाभाववति कपिसंयोगप्रकारकत्वात्। न च तद्वद्भिन्न निरवच्छिन्नतदभावाधिकरणतावति वा तत्प्रकारकज्ञानत्वं भ्रमत्वमिति विवक्षितमिति वाच्यं। मूले वृक्षः कपिसंयोगीत्यत्राव्याप्तेः आद्ये समवायादिसम्बन्धेन गगनादेर्भ्रमे अव्याप्तेश्च। न च तदभावावच्छेदकावच्छेदेन तत्प्रकारकत्वं विवक्षितमिति वाच्यं। गुणः संयोगवानित्याद्यवच्छेदकतानवगाहिभ्रमेऽव्याप्तेः। न च तदभावानवच्छेदकावच्छेदेन तत्प्रकारकत्वशून्यत्वे सति तदभाववति तत्प्रकारकत्वं विवक्षितं

अग्रे तु अनुभवत्वमेव प्रामाण्यं। भ्रमेऽप्यंशमादाय
प्रमाव्यवहारात् रजतादिप्रमाऽप्रमा च विशिष्य लक्ष-

क्षः संयोगीत्यवच्छेदकतानवगाहिप्रमायामतिव्याप्तेः। न च यथा-
विवक्षितप्रामाण्यशून्यत्वे सति तदभाववति तत्प्रकारकत्वं विवक्षितं,
मूले अग्रे वृक्षः कपिसंयोगीत्यत्राव्याप्तेः। वस्तुतस्तु प्रमालक्षणे अव-
च्छेदकत्वं न निवेश्यते गौरवात् व्यर्थत्वाच्च, अपि तु तद्वति तत्प्रकार-
कानुभवत्वमेव प्रमात्वं, मूले वृक्षः कपिसंयोगवान् अग्रे वृक्षः कपि-
संयोगाभाववानित्यादि ज्ञानञ्च यदि केवलसमवाय-विशेषणताभ्यां
वृक्षे संयोग-तदभावावगाहेते, तदा वृक्षः कपिसंयोगवान् तदभाव-
वानितिवद्वृक्षे तदुभयोः प्रमैव किन्तु मूलाग्रयोर्वृक्षवृत्तितदुभया-
भावतावच्छेदकत्वावगाहित्वांश एव न प्रमा। यदि च मूलाग्राव-
च्छिन्नत्वविशिष्टसमवाय-विशेषणताभ्यां वृक्षे तावावगाहेते तदा तु
वृक्षे न तदुभयोः प्रमा तादृशविशिष्टसम्बन्धाभ्यां वृक्षस्य तदुभय-
त्वविरहात् प्रमालक्षणे सम्बन्धभेदनिवेशस्य प्रागुक्तयुक्त्या आवश्यक-
त्वात्। एतेन पाकरक्ते घटे इदानीमयं श्यामरूपवान् तदानीमयं
श्यामरूपाभाववान् इत्यादि ज्ञानमपि व्याख्यातं। न च तथापि
वृक्षादिषु कपिसंयोग-तदभाववत्त्वादिबुद्धेः तत्र तयोर्भ्रमत्वमपि
दुर्वारं तदभाववति तत्प्रकारकज्ञानस्यैव भ्रमत्वादिति वाच्यं। भ्रम-
लक्षणे तदभाववत्पदेन निरवच्छिन्नतदभावाधिकरणताया विव-
क्षितत्वात्। मूले वृक्षः कपिसंयोगवान् अग्रे वृक्षः कपिसंयोगाभाववान्

णीया रजतत्ववति तदनुभवः तदभाववति तदनुभवो वेत्यादिना[१]। नन्व नुभवत्वस्य प्रमाप्रमासाधारणत्वेन

इत्यादि ज्ञाने च[२] यदि केवलसमवायादिः सम्बन्धः तदा वृक्षे तदुभयोर्न भ्रमः किन्तु मूलादेर्वृक्षवृत्तिकपिसंयोग-तदभावाद्याधारतावच्छेदकत्वावगाहित्वांश एव भ्रमः। यदि च मूलावच्छिन्नत्वविशिष्टसमवायादिसम्बन्धस्तदा वृक्षे कपिसंयोगादेरपि भ्रम एव तादृशविशिष्टसम्बन्धावच्छिन्नकपिसंयोगाद्यभावस्य निरवच्छिन्नाधिकरणत्वस्यैव वृक्षे सत्त्वात्। एतेन पाकरक्तघटे इदानीमयं श्यामरूपवानित्यादि ज्ञानमपि व्याख्यातं। न च निरवच्छिन्नाधिकरणत्वस्य भ्रमलक्षणनिवेशे अन्योन्याभावस्य व्याप्यवृत्तित्वनियमवादिनये वृक्षः कपिसंयोगिभिन्न इति ज्ञानस्य भ्रमतया तत्राद्यादि कपिसंयोगिभेदाभावस्य कपिसंयोगस्य[३] निरवच्छिन्नाधिकरणत्वप्रसिद्धेरिति वाच्यं। तन्नये[४] कपिसंयोगिभेदाभावो न कपिसंयोगस्वरूपः, किन्तु व्याप्यवृत्तिरतिरिक्त एवाभाव इत्यभ्युपगमात्[५]

---

(१) तज्ज्ञानं वेत्यादिनेति क०।

(२) मूले वृक्षः संयोगवान् अग्रे वृक्षः संयोगाभाववान् इत्यादिज्ञानं चेति क०।

(३) अत्यन्ताभावाभावस्य प्रतियोगिरूपत्वमिव अन्योन्याभावाभावस्य प्रतियोगितावच्छेदकरूपत्वमिति नियमात् इति भावः।

(४) अन्योन्याभावस्य व्याप्यवृत्तितानियमवादिनये इत्यर्थः।

(५) तथा च व्याप्यवृत्तिमद्भेदाभावस्यैव प्रतियोगितावच्छेदकरूपत्वं त्वव्याप्यवृत्तिमद्भेदाभावस्य इति नियम इति भावः।

ाज्ञानस्य न निष्काम्यप्रवृत्त्यङ्गत्वमिति चेत्। सत्यं। विशेषविषयप्रमाया एव प्रवर्त्तकत्वात्। अतिरिक्तविष-

---

त्यव तत्त्वमिति समाम:। 'सर्व्वत्र प्रमेति सर्व्वत्र सर्व्वस्य प्रमेत्यर्थ:, किन्तु क्वचित्' किन्तु क्वचित् कस्यचित्, 'कुत्र प्रमेतीति कुत्र कस्य त्यर्थ:, जिज्ञासायामिति शेष:, 'लक्ष्यत्वेन' लक्षयितुमुचितत्वेन।

नन्वेवं भ्रमेऽतिव्याप्तिरित्यतो लक्ष्यत्वेन परिहरति, 'भ्रमे-ीति। 'विषयतेति विषयताश्रयावृत्त्यप्रकारकविषयताप्रतियोग्यनुभव त्यर्थ:, विषयताश्रयावृत्त्यप्रकारकस्यानुभव इति प्रतियोगित्वार्थक-ष्ठया समासात्, विषयताश्रयावृत्त्यप्रकारकोऽनुभव: प्रमेत्यसमस्त-ाटश्च प्रामादिक:। यद्यपि 'विषयताश्रयावृत्तीत्यत्र विषयतापदं विषयतासामान्यपरं रजतत्वादिभ्रमातिव्याप्ते:, समवायादि-सम्बन्धेनावृत्तेरेव समवायादिसम्बन्धेन विषयताश्रयावृत्तित्वात् तस्य र्म्मितावच्छेदकांशे प्रमात्वेन लक्ष्यत्वाभ्युपगमे अनुभवत्वमाच-ैव सम्यक्त्वेन प्रतियोग्यन्तविशेषणवैयर्थ्यात्। नापि स्वविषयतापरं, ुमनुभव:, रजत-रङ्गयोरिमे रङ्ग-रजते इति विपरीभ्रमेऽति-ाप्ते: तद्विषयताया: तदीयविषयताश्रयावृत्त्यप्रकारकत्वात्। तथापि ाश्रयावृत्तिप्रकारकान्यविषयताप्रतियोग्यनुभवत्वं विवक्षितं, स्वं विषयता, धर्म्मितावच्छेदकमात्रांशे प्रमारूपोभ्रमस्तु न लक्ष्य: तेन ुक्तावेदं रजतमित्यादिभ्रमे नाव्याप्ति:, धर्म्मितावच्छेदकातिरिक्तांशे प्रमारूपो भ्रमस्तु लक्ष्य एव तेन रङ्ग-रजतयोरिदमिदञ्च रजत-मित्यादिसमूहालम्बने विशेष्यतावच्छेदकभेदेन विषयताभेदेऽपि

यतापक्षे विषयताश्रयावृत्त्यप्रकारकानुभवः[१] प्रमा। केवलान्वयिनि विषयताश्रयावृत्तिरवृत्तिरेव प्रसिद्धः।

नातिव्याप्तिः, न वा रजतारजतयोर्द्वयं रजतमित्यादिज्ञाने अतिव्याप्तिः, तस्यापि लक्ष्यत्वात्। नचैवं रजत एवेदं रजतं रङ्गश्चेति भ्रमाप्रमायामव्याप्तिः तद्विषयतायाः स्वाश्रयावृत्तिरङ्गत्वप्रकारकतया तत्प्रकारकत्वाभावादिति वाच्यं। विशेष्यतावच्छेदकतातिरिक्तप्रकारताभेदेनापि विषयताभेदाभ्युपगमात्। एतच्च ग्रन्थकृदेवाग्रे वक्ष्यति। विषयताया विशेष्यमात्रनिष्ठत्वोपगमात् निर्विकल्पके निर्विशेष्ये विषयताविरहान्न तत्रातिव्याप्तिः, सप्रकारकत्वेन वा अनुभवो विशेष्यः। 'स्वाश्रयावृत्तीत्यत्र च वृत्तित्वं स्वनिरूपकसम्बन्धेन सम्बन्धित्वं न तु सामान्यतो वृत्तित्वं घटे घटत्वमित्यादिप्रमायामव्याप्तेः। न हि घटत्वे घटो वर्त्तते, न च वृत्तित्वं सम्बन्धित्वमात्रं, स्वाश्रयसम्बन्धिप्रकारकत्वस्याप्रसिद्धेः अवृत्तेरपि येन केनचित् सम्बन्धेन सम्बन्धित्वात्। स्वपदद्वयञ्च भेदप्रतियोगिविषयतापरं न तु प्रकारविषयतापरं, सर्व्वं प्रमेयं इति तादात्म्यसम्बन्धसंसर्गकप्रमायां भावज्ज्ञानं घटवदित्यादि विषयितासम्बन्धसंसर्गकप्रमायाञ्चाव्याप्तेः तत्र स्वनिरूपकतादात्म्य-विषयितादिसम्बन्धेन स्वाश्रयासम्बन्धितोऽप्रसिद्धेः। न च स्वपदद्वयस्य भेदप्रतियोगिपरत्वे संयोगादिस्वाधिकरणसम्बन्धेन गुणादिविशेष्यक-घटादिभ्रमेऽतिव्याप्तेः तद्विषयताव

---

(१) विषयताश्रयावृत्त्यप्रकारकोऽनुभवः इति ख०।

यद्वा यत्प्रकारिका या विषयता तत्प्रकारसमाना-
धिकरणविषयताकः, स्वप्रकारसमानाधिकरणविषय-
ताको वानुभवः प्रमा। यत्प्रकारिका या विषयता

पि स्वनिरूपकसम्बन्धेन स्वाश्रये गुणे वर्त्तमानस्याप्रसिद्धा तादृश-
भेदकूटवत्त्वादिति वाच्यं। स्वनिरूपकसम्बन्धेन कस्यचिदधिकरणे
र्त्तमानत्वेन चरमविषयताविशेषणात्। ननु प्रमेयं रजतमि-
त्यादिनिखिलप्रमेयविशेष्यकरजतत्वादिप्रकारकांशिकप्रमायामव्याप्तिः
विषयतायाः स्वनिरूपकसम्बन्धेन यत्किञ्चित्स्वाश्रयव्यक्तिवृत्ति-
प्रकारकतया तादृशभेदकूटवत्त्वविरहादित्यत आह, 'केवलान्वयि-
ति व्यापकत्वरूपमवच्छिन्नत्वं सप्तम्यर्थः, अन्वयश्चास्य विषयतायां,
केवलान्वयिधर्मावच्छिन्नविषयतायाः स्वनिरूपकसम्बन्धेन स्वाश्रय-
वृत्तिसामान्यभिन्न इत्यर्थः, 'अवृत्तिरेव प्रसिद्ध इति स्वनिरूपक-
सम्बन्धेन अवृत्तिरेव प्रसिद्धः न तु प्रकारीभूतो रजतत्वादिरित्यर्थः,
यच्च 'स्वाश्रयावृत्तिपदेन स्वाश्रयवृत्तिसामान्यभिन्नस्य विवक्षणान्ना-
व्याप्तिरिति भावः। ननु तथापि प्रकारतावच्छेदकैक्ये प्रकारभेदेन
विषयताभेदाभावात् घटो रूपवानित्यादिनिखिलरूपादिप्रकारक-
प्रमायामव्याप्तिस्तद्विषयतायाः स्वाश्रयावृत्तिजलादिनिष्ठरूपादिप्रका-
रकतया तत्प्रकारकान्यत्वविरहात् इति चेदेतदस्वरसेनैव 'यद्वेत्या-
दिना लक्षणान्तरप्रणयनात्। वस्तुतस्तु 'स्वाश्रयावृत्तिप्रकारकपदेन
स्वाश्रयवृत्तिनिष्ठत्वाभाववत्प्रकारताकं विवक्षितं तदन्यत्वमर्थः, इदं

तत्प्रकारव्यधिकरणविषयताकं, स्वप्रकारव्यधिकरणवि-
षयताकं वा ज्ञानं[१] भ्रमः । प्रकारभेदेनैकत्र विषय-
ताभेद इतिलक्षणद्वयसमावेशात् प्रमा-भ्रमसङ्करः।

रजतमित्यादिभ्रमीयविषयतायाः रजतत्वादिनिष्ठप्रकारताव्यक्तेः
तादृशनिष्ठत्वाभाववत्त्वान्नातिव्याप्तिः, रजत एवेदं रजतं रङ्गवे
भ्रमांशप्रमीयविषयतायाः रङ्गत्वनिष्ठप्रकारताव्यक्तेस्तादृशनिष्ठत्व
भाववत्त्वेऽपि प्रकारताभेदेन विषयताभेदात् रजतत्वनिष्ठप्रकारताव
विषयताव्यक्तिमादायैव लक्षणसमन्वयः, एवञ्चात्र निषेधद्वयप्रवे
ङ्गौरवं प्रकारताभेदेन विषयताभेदाभावे रजत एवेदं रजतं रङ्गवे
भ्रमांशप्रमाया असङ्गृहीतेत्यस्वरसाद् 'यद्वेत्यादिना लक्षणान्तर
यनमित्येव तत्त्वं ।

केचित्तु ननु निखिलप्रमेयविशेष्यक-संयोगादिसम्बन्धेन रजत
प्रकारकभ्रमे अतिव्याप्तिः तद्विषयतायाः केवलान्वयित्वेन स्वाश्र
वृत्तेरप्रसिद्धतया तत्प्रकारकान्यत्वादित्यत आह, 'केवलान्वयिनो
केवलान्वयिधर्मावच्छिन्नव्यधिकरणप्रकारकविषयतायाः स्वनिरू
सम्बन्धेन स्वाश्रयावृत्तिरित्यर्थः, 'अवृत्तिरेव प्रसिद्ध इति स्वनि
पकसम्बन्धेनावृत्तिः स्वप्रकारीभूतधर्म्म एव प्रसिद्ध इत्यर्थः, इत्याहुः।

प्राञ्चस्तु ननु निखिलप्रमेयविशेष्यक-प्रमेयमित्यादिसामा
प्रत्यासत्तिजप्रत्यक्षे अव्याप्तिः तत्र विषयताश्रयावृत्तेरप्रसिद्धेरि

---

(१) यत्प्रकारिका या विषयता तत्प्रकारव्यधिकरणविषयताकः स्वप्र
व्यधिकरणविषयताको वानुभव इति ख० ग०।

यद्वा विशेष्यनिष्ठात्यन्ताभावाप्रतियोगिप्रकारक-
विषयताप्रतियोगी, विशेष्यनिष्ठात्यन्ताभावप्रतियोगि-
प्रकारानवच्छिन्नविषयत्वप्रतियोगी वा, विषयतासमा-
नाधिकरणात्यन्ताभावप्रतियोगिप्रकारकविषयत्वाप्रति-

ह, 'केवलान्वयिनीति निरूपितत्वं सप्तम्यर्थः, केवलान्वयिधर्म्म-
रूपितविषयतायाः स्वनिरूपकसम्बन्धेन स्वाश्रयावृत्तिरित्यर्थः,
वृत्तिरेव प्रसिद्ध इति स्वनिरूपकविशेषणताविशेषसम्बन्धेनावृत्तिरेव
सिद्ध इत्यर्थः, इति व्याचक्षुः। तदसत्प्रागुक्तयुक्त्या स्वपदस्य भेद-
प्रतियोगिपरत्वावश्यकतया विषयताश्रयावृत्तेरप्रसिद्धावपि अव्याप्ति-
रहादिति दिक्।

'तत्प्रकारसमानाधिकरणेति प्रकारपदं धर्म्मपरं, तद्धर्म्मसमाना-
धिकरण-तद्विषयताक इत्यर्थः, 'अनुभवः प्रमा' इत्यग्रेतनमत्रापि
योज्यते, 'प्रमा' तद्धर्म्मस्य प्रमा। यत्तज्ज्ञां विषयताया उभयथा
ग्रहे गौरवादाह, 'स्वप्रकारेति, 'स्वं' विषयता, प्रकारता च
तावच्छेदकतातिरिक्ता ग्राह्या, तेनेदं रजतमित्यादिभ्रमे नाति-
व्याप्तिः, तस्यापि लक्ष्यत्वे अनुभवत्वमात्रस्यैव सम्यक्त्वात्। एतल्ल-
क्षणे इदं रजतं रङ्गश्चेत्यादौ प्रकारभेदेन विषयताभेदाभावेऽपि
घटतिरिति ध्येयं। अतिरिक्तविषयतापक्षे प्रमां लक्षयित्वा भ्रमं
लक्षयति, 'यत्प्रकारिकेति, 'तत्प्रकारव्यधिकरणविषयताक इति
प्रकारः' धर्म्मः, तद्धर्म्माधिकरणावृत्तितद्विषयताकं ज्ञानं भ्रम
इत्यर्थः, अत्रेऽपि 'स्वप्रकारव्यधिकरणत्वं' स्वप्रकाराधिकरणावृत्तित्वं,

योगी वा, विषयतासमानाधिकरणात्यन्ताभावप्रतियो-
गिप्रकारानवच्छिन्नविषयताप्रतियोगी वानुभवः प्रमा।
स्वसमानाधिकरणप्रकारानवच्छिन्नविषयताप्रतियोगि
ज्ञानं, स्वव्यधिकरणप्रकारावच्छिन्नविषयताप्रतियोगि

रजतारजतसाधारणधर्म्मद्रव्यविशेष्यकं द्रव्यं रजतमित्यादि ज्ञानन्तु न रजतत्वादिभ्रमः (१)।

मिश्रास्तु 'तत्प्रकारव्यधिकरणत्वं' तत्प्रकारानधिकरणवृत्तित्वं, अग्रेऽपि 'स्वप्रकारव्यधिकरणत्वं' स्वप्रकारानधिकरणवृत्तित्वं, तथा द्रव्यं रजतमित्यादि ज्ञानमपि रजतत्वस्य भ्रमः इत्याहुः।

प्राथमिकप्रमालक्षणं द्वितीयभ्रमलक्षणञ्चाभिप्रेत्याह, 'प्रकार-भेदेनेति विशेष्यतावच्छेदकतातिरिक्तप्रकारताभेदेनेत्यर्थः, 'प्रमा-भ्रमसङ्कर इति रजत एवेदं रजतं रङ्गञ्च इत्यादि समूहालम्बनं प्रमा-भ्रमयोः 'सङ्करः' अभेद इत्यर्थः। सामान्यतः प्रकारताभेदे-नैव विषयताभेदाभ्युपगमे इदं रजतमित्यादि भ्रमेऽपि धर्मि-तावच्छेदकनिरूपितविषयताव्यक्तिमादायैवातिव्याप्तिरतोऽतिरिक्तान्तं प्रकारताविशेषणं। एकधर्म्मावच्छिन्नतत्तदभावोभयवन्निष्ठविशेष्यतायां द्रव्यं रजतमित्यादि ज्ञानं न लक्ष्यमितिमते लक्षणान्याह, 'विशेष्य-निष्ठेति स्वाश्रयनिष्ठेत्यर्थः, 'स्वं' विषयता, प्रतियोगिता च स्व-पदेन व्यक्तिद्वयावृत्त्यधिकरणत्वावच्छिन्नत्वेन स्वनिरूपकसम्बन्धावच्छि-न्नत्वेन च विशेषणीया, तेन वैशिष्ट्य-व्यासज्यवृत्तिधर्म्मावच्छिन्नाभा-

---

(१) न रजतमित्यादि भ्रम इति क०।

ज्ञानं वा भ्रमः[१] इदं रजतमितिभ्रमे च विषयताद्वये स्वाधिकरणप्रकारावच्छिन्नत्व-तदनवच्छिन्नत्वयोः विषयत्वप्रतियोगित्व-तदप्रतियोगित्वयोरविरोधात् समूहा-

---

स्वाधिकरणसम्बन्धावच्छिन्नाभावस्वादाय नाप्रसिद्धिः, प्रकारता च विशेष्यतावच्छेदकतातिरिक्ता ग्राह्या तेनेदं रजतमित्यादि भ्रमे नातिव्याप्तिः, तस्यापि लक्ष्यत्वे अनुभवत्वमात्रस्यैव सम्यक्त्वात्। एवमग्रेऽपि वृक्षः संयोगवानित्याद्यव्याप्यवृत्तिसंयोगादिप्रमायां संयोगत्वादिनिरूपितविषयतामादाय लक्षणसम्भवेऽपि कालिकादिसम्बन्धेन स्वरूपतो गोत्वादिप्रमायामव्याप्तिरतो निरवच्छिन्ननिष्ठतालाभार्थं 'अत्यन्तपदं, एवमग्रेऽपि। अत्र विषयितादिसम्बन्धेन भगवज्ज्ञानादिविशेष्यकप्रमायामव्याप्तिस्तत्र तादृशप्रतियोगिनोऽप्रसिद्धेरतो लक्षणान्तरमाह, 'विशेष्यनिष्ठेति स्वाश्रयनिष्ठेत्यर्थः, 'प्रतियोगिप्रकारानवच्छिन्नेति प्रतियोगिप्रकारकं यद्यत् तत्त्वाभावकूटवदित्यर्थः। प्रतियोगिप्रकारकत्वञ्च तादृशप्रतियोगिनिष्ठत्वाभाववत्प्रकारताकत्वं, तेनेदं रूपवदित्यादि निखिलरूपादिप्रकारकप्रमायां नाव्याप्तिः। 'विषयतासमानाधिकरणेति स्वसमानाधिकरणाभावप्रतियोगिप्रकारकविषयताप्रतियोगि यद्यत् तत्तदन्यानुभव इत्यर्थः। अत्र सर्व्वांशप्रमैव लक्ष्या तेनांशिकप्रमायां नाव्याप्तिरिति भावः। 'विषयतासमानाधिकरणेति स्वाधिकरणनिष्ठेत्यर्थः, 'प्रतियोगिप्रका

---

(१) स्वाधिकरणप्रकारावच्छिन्नविषयत्वप्रतियोगिज्ञानं भ्रमः, स्वसमानाधिकरणप्रकारकविषयत्वाप्रतियोगि ज्ञानं भ्रम इति ख०।

स्वप्ने च विषयताभेदान्न प्रमाप्रमालक्षणेऽव्याप्त्यतिव्याप्ती । वस्तुतस्तु विशेषणताविशेषो नास्त्येव मानाभावात् ।'सामान्यतो ज्ञाने ज्ञाते तस्य क्वचिद्विशेषणतेति

रानवच्छिन्नेति प्रतियोगिप्रकारकं यद् यत् तदन्येत्यर्थः, प्रतियोगिप्रकारकत्वञ्च तादृशप्रतियोगिनिष्ठत्वाभाववत्प्रकारताकत्वं। न चैवं द्वितीयाभेदः, अत्यन्तान्योन्याभावभेदेन भेदात्।

केचित्तु द्वितीये विशेष्यनिष्ठेत्यस्य स्ववन्निष्ठेत्यर्थः, स्वं विषयता, तथाचात्र विषयताधिकरणत्वं प्रकारतया घटकं, तत्र तु संसर्गतयेति भेदः इत्याहुः ।

'स्वव्यधिकरणेति स्वाश्रयावृत्तिधर्मप्रकारकेत्यर्थः। लक्षणान्तरमाह, 'स्वसमानाधिकरणेति स्वसमानाधिकरणधर्मप्रकारकेत्यर्थः, प्रकारता च विशेष्यतावच्छेदकतातिरिक्ता ग्राह्या, तेनेदं रजतमिति शुक्तिमात्रविशेष्यकभ्रमे नाव्याप्तिः, विशेष्यतावच्छेदकांशे भ्रमरूपं विधेयांशे च प्रमारूपं ज्ञानं न लक्ष्यमिति न तत्राव्याप्तिरिति भावः । अयञ्च क्वाचित्कः पाठः। स्वाश्रया वृत्त्यप्रकारकविषयताप्रतियोग्यनुभवः प्रमेति प्राथमिकप्रमालक्षणं स्वव्यधिकरणधर्मप्रकारकविषयताप्रतियोगि ज्ञानं भ्रम इति द्वितीयभ्रमलक्षणञ्च सङ्ग्रामयति, 'इदं रजतमिति, चकारोभिन्नक्रमे, इदं रजतमिति तादात्म्यारोपे तदीयरजतत्व-पुरोवर्त्तिनिष्ठविषयताद्वये चेत्यर्थः। व्युत्क्रमेणाह, 'व्यधिकरणप्रकारावच्छिन्नेति 'स्वाश्रयावृत्तिप्रकारकत्व-स्वाश्रयावृत्त्यप्रकारकत्वयोरित्यर्थः, इदञ्च

सामान्यतो विशेषणताज्ञानेऽपि घटमयं जानाति न वेति सन्देहतादवस्थ्यात्। तस्माद्घट-तज्ज्ञानयोः स्वरूपग्रहेऽपि तदीयत्वं तद्विषयत्वं न गृहीतमिति तद्विषयत्वे

विषयताद्वये, 'विषयत्वप्रतियोगित्व-तदप्रतियोगित्वयोरिति स्वाश्रयवृत्तिप्रकारकविषयताप्रतियोगित्वस्वाश्रयावृत्त्यप्रकारकविषयताप्रतियोगित्वयोरित्यर्थः। यथाश्रुते भावाभावरूपतया विरोधस्य दुर्वारत्वात्। 'अविरोधात्' सत्त्वे बाधकाभावात्, प्राथमिकप्रमालक्षण-तृतीयभ्रमलक्षणयोः समन्वय इति शेषः। 'समूहालम्बने' इति इमौ घट-पटाविति समूहालम्बनप्रमायाञ्चेत्यर्थः, 'प्रमाप्रमालक्षण इति समाहारः[१]। 'विशेषणतेति कृत्स्नपदार्थातिरिक्तविषयतात्वविशेषणताविशेषो नास्त्येवेत्यर्थः, किन्तु ज्ञानविषयस्वरूपमेव विषयत्वमिति भावः। नन्वेवमयं पुरुषो ज्ञानवान् अयञ्च घट इति निश्चिन्वतोऽयं पुरुषो घटविषयकज्ञानवान्नवेति संशयो न स्यादतो विशेषणताविशेष आवश्यक इत्यत आह, 'सामान्येति, तथाचातिरिक्तविषयताभ्युपगमेऽपि सन्देहो दुरुपपद इति भावः। स्वमते संशयमुपपादयति, 'तस्मादिति, 'स्वरूपग्रहेऽपीति घटत्वज्ञानत्वाभ्यां निश्चयेऽपीत्यर्थः, 'तदीयत्वं तद्विषयत्वमिति घटीयत्वरूपं घटविषयत्वमित्यर्थः, 'न गृहीतमिति पुरुषविशेषणीभूतज्ञाने प्रकारतया न निश्चितमित्यर्थः, 'इतीति, समानप्रकारक-समान-

---

(१) समाहारादेकवचनान्ततानिर्वाहः, अन्यथा 'प्रमाप्रमालक्षणयोः' इति द्विवचनान्तप्रयोगः स्यात्।

सन्देहः। तदीयत्वञ्च सम्बन्धं विना तत्सम्बन्धस्वभावत्वं[३]। तदुक्तं। "प्रकाशस्य सतस्तदीयतामात्रनियन्त्रणः स्वभावविशेषस्तद्विषयत्वं" इति। सम्बन्धं विना कथं

विशेष्यकनिश्चयस्यैव संशयविरोधित्वादितिभावः। 'तदीयत्वञ्चेति ज्ञाननिष्ठघटीयत्वञ्चेत्यर्थः, 'सम्बन्धं विना' ज्ञान-घटातिरिक्तसम्बन्धं विना, 'तत्सम्बन्धस्वभावत्वं' घटसम्बन्धस्वरूपत्वं, घटसम्बन्धाश्रयत्वमिति यावत् तदीयत्वस्य तद्विषयत्वरूपत्वे आचार्य्यसंवादमाह 'तदुक्तमिति, बौद्धाधिकारे आचार्य्यचरणैरिति शेषः। 'प्रकाशस्य सत इति ज्ञानाभिन्नस्य सतस्तदीयताव्यवहारमात्रप्रयोजक इत्यर्थः, 'स्वभावविशेषः' धर्म्मविशेषः, मात्रपदादिच्छादिषु तदीयताव्यवहारप्रयोजकस्य तद्विषयतारूपत्वव्यवच्छेदः। न चैवमिच्छादिषु कथं तद्विषयताव्यवहार इति वाच्यं। तद्विषयताव्यवहारस्यौपचारिकत्वात्। उपचर्य्यतावच्छेदकधर्म्मश्च व्यापार्य्यनुबन्धिविषयितानामकं तज्ज्ञानजन्यत्वमेव, तत्र तदीयताव्यवहारप्रयोजकमपि तदेव। तज्ज्ञानजन्यत्वञ्च इच्छास्थले स्वसमानाधिकरणज्ञानाधिकरणक्षणध्वंसोत्पत्तिक्षणवृत्तित्वं, तेन भगवदिच्छाया नित्यत्वेऽपि न घटादिविषयतव्यवहारोऽनुपपन्नः। कृतिस्थले च तादृशक्षणवृत्तीच्छाधिकरणक्षणध्वंसोत्पत्तिक्षणवृत्तित्वं, तेन भगवत्कृतेर्नित्यत्वेऽपि नासङ्गतिः। न वा तज्ज्ञाननाशानन्तरोत्पन्नकृतिव्यक्तेरसंग्रहः। घटमिच्छामि घटं करो-

---

(३) सम्बन्धान्तरमनपेक्ष्य स्वसम्बन्धस्वभावत्वमिति ख०। सम्बन्धान्तरं विना तत्सम्बन्धस्वभावत्वमिति ग०।

तदीयत्वं, सम्बन्धस्यैव स्वभावत्वात्। यथा तवैव विशेषणतायां, अन्यथानवस्थानात्। अन्यत्रापि स्वरूपसम्बन्धे एषैव गतिः अन्यथा सामान्येनाभाव-समवाययोर्ज्ञानेऽधिकरणे ज्ञाते तयोः संशयो न स्यात्। अधि-

---

मीत्याद्यनुव्यवसायविषयोऽपीदमेव। अतएवेच्छादीनां याचितमण्डनन्यायेनैव विषयित्वमिति प्राचीनप्रवादः। यथा दरिद्रपत्नीनां याचितपरकीयालङ्काराधीनं स्वस्य भूषणं न स्वस्यालङ्कारोऽस्ति तथेच्छादीनामपि परकीयविषयित्वोपाधिको विषयित्वव्यवहार इति तत्प्रवादार्थः। न चेच्छादिष्वेव तद्विषयित्वव्यवहारो मुख्यः, ज्ञाने तद्व्यवहारस्य तदिच्छादिजनकत्वनिबन्धनो लाक्षणिक एव किं न स्याद्विनिगमकाभावादिति वाच्यं। इच्छाद्यनुत्पादस्थलेऽपि ज्ञाने तद्विषयिताव्यवहारात्। न च तथापीच्छादिषु तद्विषयिताव्यवहारस्य मुख्यत्वाभ्युपगमे किं बीजमिति वाच्यं। ज्ञानविषयरूपस्य विषयसम्बन्धस्य विषयिपदमुख्यार्थत्वात् लाघवादिच्छाद्यनुत्पादस्थले तस्य तद्विषयिताव्यवहारप्रयोजकत्वावश्यकत्वाच्च इच्छादेश्च विषयसम्बन्धत्वे मानाभावात् तस्य तत्सम्बन्धत्वकल्पने गौरवाच्च। यद्यप्येवं कारणीभूतज्ञानविषयत्वस्य घटादाविवेष्टसाधनत्वादावपि सत्त्वाद्घटमिच्छामीत्यनुव्यवसायवदिष्टसाधनत्वमिच्छामीत्याद्यनुव्यवसायोऽपि स्यात्, किञ्चैवं ज्ञानेच्छादीनां कार्य्यकारणभावे सर्वत्र निरुक्तजन्यत्वरूपमव्यवहितोत्तरत्वमेव कार्य्यता-

कारण-तदुभयस्वरूपाणां ज्ञातत्वात्। तत्राप्यभाव-समवाययोर्विशेषणताविशेषो न गृहीत इति चेत्। न। सामान्यतस्तद्ग्रहेऽपि संशयात्।

वच्छेदकघटकं स्यात् तथा च महद्गौरवं। तथापि अयमेव तन्मते दोष इति स्मर्त्तव्यं। शङ्कते, 'सम्बन्धं विनेति ज्ञाने तस्य सम्बन्धं विनेत्यर्थः, 'तदीयत्वं' तदीयताव्यवहारप्रयोजकं तत्सम्बन्धाश्रयत्वं। उत्तरयति, 'सम्बन्धस्यैवेति विषय-स्वात्मकस्य विषयत्वस्य सम्बन्धस्यैव स्वस्मिन् भावादित्यर्थः, स्वं ज्ञानं, 'विशेषणतायां' अतिरिक्तविषयतायां, स्वात्मकस्तत्सम्बन्धस्तदीयताव्यवहारप्रयोजक इति शेषः। 'अन्यथा' सम्बन्धान्तरस्य तत्र तदीयताव्यवहारप्रयोजकत्वे, तथाच ज्ञाने घटादिरूपः सम्बन्ध एव ज्ञाने घटादिविषयित्वं घटादौ ज्ञानविषयत्वञ्चेति भावः। 'अन्यत्रापीति घटाभाववद्भूतलं घटसमवायवत्कपालमित्यादिप्रतीतावपीत्यर्थः, 'स्वरूपसम्बन्धे' घटाभाववद्भूतल-घटसमवायवत्कपालादिरूपस्य सम्बन्धे 'एषैव गतिरिति भूतलं घटाभाववन्नवा कपालं घटसमवायवन्नेत्यादिसंशयप्रतिबन्धकतानुपपत्तिरेव सिद्ध्युपाय इत्यर्थः। 'अन्यथा' घटाभाववद्भूतलादिविषयकज्ञानत्वेनैव तत्प्रतीतेस्तादृशसंशयप्रतिबन्धकत्वे, 'सामान्येन' घटाभावत्व-घटसमवायत्वाभ्यां, 'अधिकरणे ज्ञाते' भूतल-कपालादिरूपे अधिकरणे उदासीनतयाभाते। शङ्कते 'तत्रेति उदासीनया अधिकरणविषयके घटाभाव-घटसमवाययोर्

यत्तु समूहालम्बन-विशिष्टज्ञानयोर्विशेषानुभवाद्वि-शिष्टज्ञाने विशेषणताविशेषोविषय इति। तन्न। विशे-षणतामादायापि समूहालम्बनसम्भवात्। तत्रापि विशेषणतान्तरस्वीकारेऽनवस्था। समूहालम्बनात्तु

त्यर्थः, 'विशेषणताविशेषः' कृत्स्नपदार्थातिरिक्तोऽधिकरणनिष्ठो विशेषणताविशेषः, तथाच घटाभावादिनिरूपिततादृशपदार्थविष-यकघटाभाववद्भूतलादिज्ञानमेव तादृशसंशयप्रतिबन्धकमिति भावः। 'सामान्यत इति विशेषणतात्वरूपेणेत्यर्थः, 'तत्संशयात्' तत्संशयस्य तथाभ्युपगमात्। कृत्स्नपदार्थेनैवोपपत्तावतिरिक्तपदार्थकल्पने गौर-वाच्चेत्यपि बोध्यं।

'समूहालम्बनेति घटाभावोभूतलञ्चेत्यादिसमूहालम्बन-घटाभा-ववद्भूतलमित्यादिविशिष्टज्ञानयोरित्यर्थः, 'विशेषानुभवात्' वैलक्षण्या-नुभवात्, 'विशिष्टज्ञाने' घटाभाववद्भूतलमित्यादिविशिष्टज्ञाने, 'विशे-षणताविशेष इति कृत्स्नपदार्थातिरिक्तो घटाभावादिनिरूपितविशेष-णताविशेषः सम्बन्धमर्यादया विषय इत्यर्थः, अन्यथा विषयाधि-क्याभावाद्वैलक्षण्यं न स्यादिति भावः। ननु घटाभावादिविशिष्टबुद्धौ विशेषणताया अपि विशेषणता भाषते विशेषणतामादाय समूहा-लम्बने च न भाषते अतो विषयाधिक्याद्वैलक्षण्यमित्यत आह, 'तत्रापीति। नन्वेवं कथं वैलक्षण्यमित्यत आह, 'समूहेति घटाभावो भूतलञ्चेत्यादिसमूहालम्बनादित्यर्थः, 'विशिष्टज्ञानस्य'

विशिष्टज्ञानस्य विशेषः कारणकृतः कार्यकृतः प्रकारकृतोवा। प्रकारोऽपि विशेषणताविशेषः स च धर्मिण्येवास्त्विति चेत्। न। तमादायाऽपि समूहालम्बनसम्भवात्।

घटाभाववद्भूतलमित्यादिविशिष्टज्ञानस्य, 'कारणेति जन्यताविशेषसम्बन्धेन घटाभावादिज्ञानरूपकारणवत्त्वकृत इत्यर्थः, घटाभावादिविशिष्टबुद्धौ घटाभावादिज्ञानस्य हेतुत्वादिति भावः। 'कार्यकृत' इति जनकताविशेषसम्बन्धेन विशिष्टवैशिष्ट्यबोधादिलक्षणकार्यवत्त्वकृत इत्यर्थः, घटाभावादिविशिष्टवैशिष्ट्यबोधादौ घटाभावादिविशिष्टज्ञानस्य हेतुत्वादिति भावः। नन्विदं द्वयमपि न युक्तं जन्यता-जनकताविशेषयोरितरव्यावृत्त-तदवच्छेदकं विना असम्भवादित्यत आह, 'प्रकारकृतो वेति स्वरूपतः प्रकारित्वाकृतो वेत्यर्थः, विशिष्टज्ञाने घटाभावादिकं प्रकारः, समूहालम्बने च न तथेत्येव विशेषादिति भावः। इदमुपलक्षणं विशिष्टज्ञाने घटाभाववद्भूतलादेः सम्बन्धमर्यादयापि भानं समूहालम्बने च न तथेति संसर्गिताकृतोऽपिविशेष इति मन्तव्यं। शङ्कते, 'प्रकारोऽपीति घटाभावादिनिरूपिततत्प्रकारितापीत्यर्थः, 'विशेषणताविशेषः' विशेषणता नाम पदार्थविशेषः, 'धर्मिण्येवेति एवकारोऽप्यर्थे भूतलादावधिकरणेऽपि घटाभावादेः सम्बन्धरूपोऽस्त्वित्यर्थः, तथाचाधिकतद्विषयताकृत एव विशिष्टबुद्धौ विशेष इति भावः। 'तमादायापीति, इदमुपलक्षणं, प्रकारितापि

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ
प्रत्यक्षखण्डे प्रामाण्यवादे प्रमालक्षणसिद्धान्तः।

समाप्तोऽयं प्रामाण्यवादः।

पदार्थविशेषः, किन्तु तत्तज्ज्ञानरूपः, पदार्थविशेषत्वेऽपि भूतलादौ तदभ्युपगमे भूतलं घटाभावप्रकारकमिति व्यवहारप्रसङ्गस्यापि बोध्यं॥

इति श्रीमथुरानाथतर्कवागीशविरचिते प्रामाण्यवादरहस्ये
प्रमालक्षणसिद्धान्तरहस्यं सम्पूर्णं। समाप्तमिदं
प्रामाण्यवादरहस्यं॥

अथान्यथाख्यातिवादः ।

ननु सर्वज्ञानानां यथार्थत्वात्प्रमालक्षणे विशेषण-
व्यावर्त्त्याप्रसिद्धेर्विशेषणवैयर्थ्यमन्यथाख्यातौ मानाभा-

अथान्यथाख्यातिवादरहस्यं ।

प्रमालक्षणोपोद्घातसङ्गत्या अन्यथाख्यातिविचारमवतारयति
'नन्विति, 'सर्व्वज्ञानानां' तत्प्रकारकसर्व्वज्ञानानां,(१) 'यथार्थत्वात्'
तत्तद्विशेष्यकत्वावच्छिन्न-तत्प्रकारकत्वात् ।

केचित्तु 'सर्व्वज्ञानानां' रजतत्वाभाववद्विशेष्यकत्वावच्छिन्नरजत-
धर्म्मप्रकारकं यज्ज्ञानं तद्भिन्नानां, 'यथार्थत्वात्' रजतत्वाभाववद्वि-
शेष्यकत्वावच्छिन्न-रजतत्वप्रकारताशून्यत्वादित्याहुः(२)।

'विशेषणव्यावर्त्त्येति तद्वद्विशेष्यकत्वावच्छिन्नत्वविशेषणव्यावर्त्तनी-
येत्यर्थः, 'विशेषणवैयर्थ्यमिति तद्वद्विशेष्यकत्वावच्छिन्नत्वविशेषणवैयर्थ्य-
मित्यर्थः। ननु तदभाववन्मात्रे तत्प्रकारकज्ञानस्यैव तद्वद्विशेष्यकत्वा-
वच्छिन्न-तत्प्रकारकत्वविरहात् तदेव व्यावर्त्तनीयमित्यत आह
'अन्यथाख्याताविति 'ख्यातौ' ज्ञाने, अन्यथात्वसाधकप्रमाणाभावा-

---

(१) 'ज्ञानानां' तत्प्रकारकज्ञानानां, इति क०, ग०।
(२) केचित्त्वित्यादिपाठः क०, ग० पुस्तकद्वये नास्ति।

ात्। तथाहि रजतार्थिप्रवृत्तिविषयत्वं रजतत्व-
ाकारकानुभवविषयत्वव्याप्यं रजतार्थिप्रवृत्तिविषय-

त्यर्थः। 'अन्यथात्वं' तदभाववद्विशेष्यकत्वावच्छिन्न-तत्प्रकारकत्वं।
ाश्रुते अन्यथाख्यातिरूपे अधिकरणे प्रमाणसामान्याभावादि-
र्थस्य विवक्षितत्वे प्रमाणसामान्याभावोऽप्रसिद्धः तन्मते अधिकरणा-
सिद्धेः। यदि चान्यथाख्यातिसाधकप्रमाणाभावादित्यर्थो विवक्षितः
दा तन्मते प्रतियोग्यप्रसिद्ध्या तदभावाप्रसिद्धेरिति ध्येयं। न
। तन्मते तदभाववद्विशेष्यकत्वावच्छिन्न-तत्प्रकारत्वमप्यप्रसिद्धमिति
ाच्यं। तदभाववति तत्प्रकारकेच्छादौ प्रसिद्धेः तैर्ज्ञान-संस्कारयोर-
ाथार्थ्यानभ्युपगमेऽपि इच्छादीनामयथार्थत्वाभ्युपगमात्। अत्र ज्ञानं
जतत्वाभाववद्विशेष्यकत्वावच्छिन्न-रजतत्वप्रकारकं न वेति विप्र-
ाप्तिः, विधिकोटिर्नैयायिकानां, पक्षतावच्छेदकसामानाधिकरण्येन
ुसिद्धेरुद्देश्यत्वात् रजतत्वभ्रमाद्यन्यज्ञानमात्रे नांशतो बाधः।
विधकोटिस्तु इदं रजतमित्यादिभ्रमस्थले इदन्त्वप्रकारकशुक्त्यनुभव-
ाजतस्मरणाद्यात्मकज्ञानद्वयमङ्गीकर्तॄणां गुरूणां, पक्षतावच्छेदका-
च्छेदेन तत्सिद्धेरुद्देश्यतया न रजतत्वभ्रमान्यज्ञानमात्रेऽंशतः सिद्ध-
ाधनं। न च रजतत्वाभाववद्विशेष्यकत्वावच्छिन्न-तत्प्रकारकत्वस्य
न्मते इच्छायामेव प्रसिद्धतया ज्ञाने तदभावसाधने नैयायिकानां
सिद्धसाधनमिति वाच्यं। नैयायिकनये ज्ञानेच्छादिभेदेन प्रका-
रिता-विशेष्यितयोर्भेदाभावेन सिद्धसाधनासम्भवात्, तद्भेदेन प्रका-

मात्रवृत्तिधर्म्मत्वात् रजतमात्रवृत्तिधर्म्मवदित्यन्यत्र ख्यातिव्याप्यं सिद्ध्यतीत्यप्राप्तकालत्वं। रजतमात्रवृ

रिता-विशेष्यितयोर्भेदेऽपि प्रकारितात्व-विशेष्यितात्वयोः सर्व्वसाधारणानुगतधर्म्मयोः सत्त्वेन सामान्याभावस्य साध्यतया सिद्धसाधनासम्भवाच्च। न हीच्छादिवृत्तिरजतत्वाभाववद्विशेष्यकत्वावच्छिन्न-रजतत्वप्रकारकत्वत्वावच्छिन्नाभावत्वेन साध्यत्वं, अपि तु सामान्यतोरजतत्वाभाववद्विशेष्यकत्वावच्छिन्न-रजतत्वप्रकारकत्वत्वावच्छिन्नाभावत्वेनैतादृशाभावश्च न्यायनये ज्ञानसामान्ये अप्रसिद्ध एव। यद्वा 'अन्यथाख्यातौ मानाभावादित्यस्य ख्यातिवृत्तिरजतत्वप्रकारकत्वस्य ख्यातिवृत्तिरजतत्वाभाववद्विशेष्यकत्वावच्छिन्नत्वे, ख्यातिवृत्तिरजतत्वाभाववद्विशेष्यकत्वस्य ख्यातिवृत्तिरजतत्वप्रकारकत्वावच्छिन्नत्वे मानाभावादित्यर्थः, तथा च ज्ञानवृत्तिरजतत्वप्रकारकत्वं ज्ञानवृत्तिरजतत्वाभाववद्विशेष्यकत्वावच्छिन्नं न वा, ज्ञानवृत्तिरजतत्वाभाववद्विशेष्यकत्वं ज्ञानवृत्तिरजतत्वप्रकारकत्वावच्छिन्नं न वेति वा विप्रतिपत्तिः, ज्ञानवृत्तिरजतत्वप्रकारकत्वं रजतत्वप्रमायामेव प्रसिद्धं, तदवच्छिन्नं रजतत्वप्रमावृत्तिरजतत्ववद्विशेष्यकत्वे प्रसिद्धं, एवं ज्ञानवृत्तिरजतत्वाभाववद्विशेष्यकत्वं रजतत्वाभावप्रमायामेव प्रसिद्धं, तदवच्छिन्नं रजतत्वाभावप्रमावृत्तिरजतत्वाभावप्रकारकत्वे एव प्रसिद्धमिति ज्ञानेच्छादिभेदेन प्रकारिता-विशेष्यितयोर्भेदेऽपि सर्व्वसाधारणानुगतप्रकारितात्व-विशेष्यितात्वयोरभावेऽपि च न क्षतिः इति संक्षेपः।

प्रमाणाभावमेव नैयायिकाभिमतं प्रमाणमाशङ्क्य उपपादयति

पोपाधिः। शुक्तिवृत्तिज्ञानविषयता[१] रजतत्वप्रका-
रिका रजतार्थिताजन्यप्रवृत्तिविषयवृत्तिविषयतात्वात्
रजतवृत्तिविषयतावदित्यत्र रजतवृत्तित्वमुपाधिः। रज-

'तथाहीति, 'रजतार्थीति रजतत्वप्रकारकत्वावच्छिन्नप्रवृत्तिविशेष्यत्व-
मित्यर्थः, रजतत्वप्रकारकानुभवविशेष्यत्वेऽंशतः सिद्धसाधनवारणाय
'प्रवृत्तीति, तादृशप्रवृत्तिविशेष्यत्वस्य च गुरुनये शुक्तावपि सत्त्वान्न
सिद्धसाधनमिति भावः। 'रजतत्वप्रकारकेति रजतत्वप्रकारकत्वा-
वच्छिन्नानुभवविशेष्यत्वव्याप्यमित्यर्थः। यथाश्रुते इदं रजतमिदञ्च
शुक्तिभिन्नमिति समूहालम्बनप्रत्यक्षविषयतामादायार्थान्तरतापत्तेः
व्यापकसामानाधिकरण्यरूपव्याप्तेः स्वत्वाननुगमेनाननुगतत्वात्तदभाववद-
वृत्तित्वरूपव्याप्तेरेवात्र प्रवेशात् रजतत्वप्रकारकभगवत्साक्षात्कार-
विशेष्यत्वमादाय न्यायनये तादृशव्याप्यत्वासिद्ध्यापत्तेश्च। अनुभवपदञ्च
रजतत्वप्रकारकत्वावच्छिन्नेच्छादिविशेष्यत्वमादाय सिद्धसाधनवारणाय,
अनुभवविशेष्यत्वञ्च साक्षात्कारत्वनिरूपितविशेष्यत्वं, अन्यथा उक्त-
युक्त्या[२] तदभाववदवृत्तित्वरूपव्याप्तेरेवात्र प्रवेशात् न्यायनये सर्वं
रजतमिति भ्रमविशेष्यत्वस्य सर्वत्र सत्त्वात् तदभावाप्रसिद्ध्यापत्तेः।
उपादानत्वाख्यप्रवृत्तिविषयताया एव पक्षत्वान्न बाधः। रजतत्व-
प्रकारकत्वावच्छिन्न-रजतारजतोभयविशेष्यकप्रवृत्तिविशेष्यत्वस्य रज-
तमादाय तादृशानुभवविशेष्यत्वसामानाधिकरण्यसत्त्वात्सिद्धसाधन-

---

(१) शुक्तिनिष्ठा ज्ञानविषयतेति ख०।

(२) तुल्ययुक्त्येति ग०।

तत्वं अरजतवृत्तिज्ञानविषयतावच्छेदकं अरजतविषय-प्रवृत्तिहेतुज्ञानप्रकारत्वात् शुक्तित्ववदित्यत्र रजता-

---

वारणाय व्याप्यत्वानुमरणं। व्याप्यत्वन्तु तदभाववद्वृत्तित्वमात्रं न तु तदभाववद्वृत्तित्वे सति तत्सामानाधिकरण्यं, तत्र सामानाधिकरण्यांशस्य निष्फलत्वात्। ननु तथापि रजतमात्रविशेष्यक-रजतत्वप्रकारकप्रवृत्तिविशेष्यताव्यक्तावंशतः सिद्धसाधनं तस्या रजतमात्रनिष्ठत्वात् पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे व्याप्यत्वपर्य्यन्तानुमरण-वैयर्थ्यप्रसङ्गाच्च सामानाधिकरण्यमात्रेणैव सामञ्जस्यादिति चेत्। न। निखिलरजतत्वप्रकारकप्रवृत्तेरेकैव विशेष्यता सकलतद्विशेष्यसाधारणीतिमताश्रयणात् समवायादिवदतिप्रसङ्गभङ्गात्।

यद्वा रजतत्वप्रकारकरजतारजतोभयविशेष्यकप्रवृत्तिविशेष्यत्वं पक्षे तस्याः प्रवृत्तेरुभयत्र एकैव विशेष्यता इति रजतमादाय सामानाधिकरण्यमत्त्वात् सिद्धसाधनवारणाय व्याप्यत्वपर्य्यन्तानुधावनमिति भावः। 'रजतार्थीति रजतत्वप्रकारकत्वावच्छिन्नप्रवृत्तिविशेष्यताश्रयातिरिक्तावृत्तिधर्म्मत्वात् इत्यर्थः, विशेषणताविशेषसम्बन्धेनावृत्तित्वलाभाय 'धर्म्मेति, तदभाववद्वृत्तित्वरूपव्याप्तेरवृत्तावपि सत्त्वेन व्यभिचाराविरहाद्धर्म्मपदस्य प्रयोजनान्तरविरहादिति भावः[१]। 'रजतमात्रेति विशेषणताविशेषेण रजतत्वप्रकारकप्रवृत्तिविशेष्यरजतमात्रवृत्तिधर्म्मवदित्यर्थः, तेन रजतत्वादिव्युदासः। रजतत्वादेः रजतत्वप्रकारकप्रवृत्त्यविषये रजतेऽपि सत्त्वात् साधनविकलत्वेन दृष्टान्तत्वासम्भवादिति

---

(१) प्रयोजनान्तरविरहादितिध्येयमिति क०, ख०।

वृत्तित्वमुपाधिः । रजतत्वप्रकारिका ज्ञानविषयता अरजतवृत्तिः अरजतनिष्ठात्यन्ताभावाप्रतियोगिनी वा अरजतविषयप्रवृत्तिहेतुज्ञानविषयतात्वात् शुक्तिवृत्ति-

---

भावः। 'अन्यथाख्यातिव्याप्यमिति अन्यथाख्यातिसाधिका व्याप्तिरित्यर्थः, अनेनानुमानेन रजतत्वप्रकारकप्रवृत्तिविशेष्यत्वस्य तादृशानुभवविशेष्यत्वव्याप्यत्वनिश्चयादनन्तरं शुक्तिः रजतत्वप्रकारकानुभवविशेष्या रजतत्वप्रकारकप्रवृत्तिविशेष्यत्वादित्यनुमानेनान्यथाख्यातिसिद्धिरिति भावः। 'अप्राप्तकालत्वमिति, शुक्तिः रजतत्वप्रकारकानुभवविशेष्या रजतत्वप्रकारकप्रवृत्तिविशेष्यत्वादित्यनुमानोद्भावनानन्तरमेव[१] तादृशप्रवृत्तिविशेष्यत्वव्याप्यत्वे जिज्ञासोत्पत्तेः प्रथमं तत्र तद्व्याप्यत्वे आकाङ्क्षाविरहादिति भावः। ननु तदनुमानोद्भावनानन्तरमेव एतदनुमानमुद्भावनीयं तथा च नाप्राप्तकालत्वमतो दूषणान्तरमाह, 'रजतमात्रेति रजतवृत्तित्वस्यावृत्तौ शुद्धसाध्याव्यापकत्वान्मात्रपदापादानं रजतान्यावृत्तित्वमर्थः। 'शुक्तिवृत्तिज्ञानविषयतेति, रजतवृत्तिज्ञानविषयतायामंशतः सिद्धसाधनवारणाय 'वृत्त्यन्तं, इच्छादिनिरूपितविषयतायामंशतः सिद्धसाधनवारणाय 'ज्ञानपदं, 'रजतत्वप्रकारिकेति, इदञ्च विषयतातिरिक्तपदार्थः सा च ज्ञानादिवत्स्वविशेष्यिका सप्रकारिका चेत्यभिमानेन। पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वाच्च नांशतोबाधः। 'रजतार्थितेति रजतत्वप्रकारकप्रवृत्तिमात्रजनकज्ञानविषयतात्वादि-

---

(१) शुक्तिः रजतत्वप्रकारकेत्याद्युपदर्शितानुमानोद्भावनानन्तरमेवेति ग०।

विषयतावदित्यत्र रजतावृत्तित्वमुपाधिः। विषयताया निरस्तत्वाच्च[1] विवादपदं रजतज्ञानं शुक्तिविषयकं शुक्तौ प्रवर्तकज्ञानत्वात् शुक्तिज्ञानवदित्यत्र ज्ञायमानेष्टभेदा-

---

त्यर्थः। अन्यथा शुक्तिवृत्तिशुक्तित्वादिप्रकारकज्ञानविषयतायां व्यभिचारापत्तेः। 'रजतवृत्तीति प्रवृत्तिविषयरजतनिष्ठरजतत्व-प्रकारकज्ञानविषयतावदित्यर्थः। तेन रजतवृत्तिद्रव्यत्वादिप्रकारक-ज्ञानविषयतायाः प्रवृत्त्यविषयरजतनिष्ठरजतत्वप्रकारकज्ञानविषय-तायाश्च व्युदासः, तयोः साध्य-साधनविकलत्वेन दृष्टान्तत्वासम्भवा-दिति ध्येयं। 'रजतवृत्तित्वमिति तस्य ज्ञानविषयतारूपपक्षधर्म्या-वच्छिन्नसाध्यव्यापकत्वादिति भावः। रजतत्वप्रकारकशुक्तीच्छादि-विषयतायां व्यभिचारेण शुद्धसाध्यव्यापकत्वासम्भवादिति ध्येयं। 'अरजतवृत्तिज्ञानविषयतावच्छेदकमिति अरजतवृत्तिर्या ज्ञानविष-यता तदवच्छेदकमित्यर्थः, अवच्छेदकत्वं प्रकारत्वं, अन्यथा अरजत-वृत्तित्वस्य ज्ञानविशेषणत्वे शुक्ति-रजते इति समूहालम्बनमादाय सिद्धसाधनापत्तेः हेतौ प्रकारत्वमात्रस्यैव गमकत्वेन शेषवैयर्थ्यप्रसङ्गा-च्चेति ध्येयं। 'अरजतेति अरजतविशेष्यकप्रवृत्तिहेतुज्ञानप्रकारत्वा-दित्यर्थः। न चेदं सर्व्ववदित्यरजतविशेष्यकभ्रममादाय साधन-केवलान्वयितया प्रकारत्वादित्येवास्त्विति वाच्यं। साध्ये अवच्छेदक-पदेन निरवच्छिन्नप्रकारताया विवक्षणात् यस्य जातिविशेषस्य स्वरूपतो नारजते भानं तत्र व्यभिचारापत्तेः। न चेदं सर्व्ववदित्य-

---

(१) निराकृतत्वाच्चेति ग०।

हे कारणतावच्छेदकं रजतज्ञानं न प्रवर्त्तकमित्य-
तेति। शुक्तिः रजतज्ञानविषयताश्रयः[१] रजतार्थिप्र-

जतविशेष्यकभ्रममादाय विवक्षितहेतेरपि तत्र सत्त्वाद्व्यभि-
चारतादवस्थ्यमिति वाच्यं! हेतोरपि निरवच्छिन्नप्रकारताया
विवक्षणात्। न च तथापि रजतारजतोभयगोचरसमूहालम्बन-
ज्ञानप्रकारीभूते तादृशजातिविशेषे व्यभिचार इति वाच्यम्। अर-
जतविशेष्यकप्रवृत्तिमात्रहेतुज्ञानप्रकारत्वस्य विवक्षितत्वात्। 'रज-
तवृत्तित्वमिति अरजतवृत्तित्वमित्यर्थः, यथाश्रुते द्रव्यत्वादौ सा-
ध्यव्यापकत्वादिति[२] ध्येयम्। 'रजतत्वप्रकारिका ज्ञानविषयतेति,
न शुक्तित्वप्रकारकज्ञानविषयतायामंशतः सिद्धसाधनवारणाय
रजतत्वप्रकारिकेति, रजतत्वप्रकारकशुक्तीच्छादिविषयतायामंशतः
सिद्धसाधनवारणाय 'ज्ञानेति, पक्षतावच्छेदकसामानाधिकरण्येन
साध्यसिद्धेरुद्देश्यत्वाच्च न सत्यरजतज्ञानविषयतायामंशतोबाध इति
भावः। 'अरजतनिष्ठेति अरजतत्वव्यापकत्वं तादात्म्यसम्बन्धेनारजत-
व्यापकत्वं वा अरजतनिष्ठत्वं, तेन रजतत्वप्रकारकभ्रमाविषयारजत-
त्वमादाय न दोषः[३]। 'अरजतविषयकप्रवृत्तिहेतुरिति अरज-
तविशेष्यकप्रवृत्तिमात्रहेतुरित्यर्थः, तेन रजतवृत्तिरजतारजतोभय-
उभयकसमूहालम्बनविषयतायां न व्यभिचारः। 'ज्ञानेति स्वरूप-

---

(१) रजतत्वप्रकारकज्ञानविषयताश्रय इति ख०।
(२) साध्याव्यापकत्वे उपाधित्वव्याघातः साध्यव्यापकत्वे सति साधनाव्याप-
कत्वस्य उपाधिलक्षणत्वादिति भावः।
(३) न बाधः इति क०, ख०।

वृत्तिविषयत्वात् रजतवदित्यत्र रजतत्वमुपाधिः। शुक्तौ रजतार्थिप्रवृत्तिः[१] स्वधर्मिधर्मिकरजतत्वप्रकारकज्ञान-साध्या रजतार्थिप्रवृत्तित्वात् रजतप्रवृत्तिवदित्यत्र र-

कथनं, 'रजतावृत्तित्वमिति। यद्यपि द्रव्यत्वप्रकारकप्रमाविशेष्यत्वा-दाविदं साध्याव्यापकं तथापि रजतारजतोभयवृत्तिधर्म्मान्यप्रका-रकविषयतात्वावच्छिन्नसाध्यव्यापकत्वमवसेयं। न च तथापि र-तारजते इति समूहालम्बनज्ञानविषयतायां व्यभिचार इति वाच्यं अत्र विशेष्यभेदेन विशेष्यताभेदादिति भावः। 'विषयतायाः स-विशेष्यक-सप्रकारकातिरिक्तविषयताया निरस्तत्वाच्चेत्यर्थः, तथा पक्षाप्रसिद्धिः, हेत्वप्रसिद्धिः, दृष्टान्ताप्रसिद्धिः, तृतीयानुमाने साध्य-प्रसिद्धिश्चेति भावः। 'विवादपदं रजतज्ञानमिति शुक्तिविशेष्य-प्रवृत्तिजनकं रजतत्वप्रकारकज्ञानमित्यर्थः, रजतमात्रविशेष्यक-तत्वप्रकारकज्ञाने अंशतो बाधवारणाय जनकान्तं, प्राचीनत्वं पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वादंशतः सिद्धसाधन-दोषतया शुक्ताविदं शुक्तिरितिज्ञाने अंशतः सिद्धसाधनवारणाय 'रजतत्वप्रकारकेति, शुक्तौ रजतत्वप्रकारकेच्छायामंशतः सिद्ध-धनवारणाय 'ज्ञानमिति, एकमात्रविशेष्यकत्वेनापि विशेषणो-तेन शुक्ति-रजतोभयसमूहालम्बने शुक्ताविदं रजतवदिति ज्ञाने द-नांशतः सिद्धसाधनमिति भावः। 'शुक्तिविषयकमिति शुक्ति-विशेष्यकमित्यर्थः। अग्रावच्छिन्नो वृक्षः कपिसंयोगीत्यादिवत् प-तावच्छेदकावच्छेदेन साध्यसिद्धावेव रजतत्वप्रकारकत्वावच्छि-

(१) रजतार्थिताजन्या प्रवृत्तिरिति ग०।

विषयत्वं उपाधिः स्वपदार्थाननुगमश्च। तत्परित्यागे रजतार्थिप्रवृत्तिधर्मिधर्मिकरजतत्वप्रकारकज्ञानेनोपस्थितिद्वेन रजतस्मरणेनार्थान्तरम्। उच्यते। रजता-

---

विशेष्यकज्ञानसिद्धिस्तदेवान्यथाख्यातिरिति भावः। 'शुक्तौ प्रवर्त्तमानत्वादिति शुक्तिविशेष्यकप्रवृत्तिजनकज्ञानत्वादित्यर्थः, इदं रजतमित्यादिप्रमायां व्यभिचारवारणाय जनकान्तं, आत्म-शरीरादौ व्यभिचारवारणाय ज्ञानपदं, फलज्ञानस्य प्रवृत्त्यहेतुत्वान्न तत्र व्यभिचारः[1]। 'ज्ञायमानेति इष्टतावच्छेदकज्ञानविशिष्टेष्टभेदाग्रहनिष्ठप्रवृत्तिकारणतायामवच्छेदकं रजतत्वप्रकारकं ज्ञानमित्यर्थः, 'न प्रवर्त्तते' न प्रवृत्तिजनकं, 'असिद्धिरिति आश्रयासिद्धिरित्यर्थः, रजतप्रकारकज्ञाने शुक्तिविशेष्यकप्रवृत्तिजनकत्वस्य पक्षतावच्छेदकाभावादिति भावः।

यद्वा 'असिद्धिः' स्वरूपासिद्धिः। न च हेतुतावच्छेदकावच्छिन्नाभाववत्पक्षतावच्छेदकविशिष्टपक्ष एव स्वरूपासिद्धिः स च प्रकृते शुक्तिपक्षतावच्छेदकविशिष्टपक्षाप्रसिद्धेरिति वाच्यं। काञ्चनमयपर्वतो धूमान् जलत्वादित्यादौ जलत्वाभाववत्पर्वतस्य स्वरूपासिद्धित्वात्तापि शुक्तिविशेष्यकप्रवृत्तिजनकज्ञानत्वाभाववद्रजतत्वप्रकारकज्ञानस्यैव स्वरूपासिद्धित्वादिति ध्येयं।

'रजतज्ञानेति रजतत्वप्रकारकत्वावच्छिन्नज्ञानविशेष्यताश्रयेत्यर्थः, न शुक्ति-रजते इति समूहालम्बनमादाय न सिद्धसाधनं, तादृ-

---

(१) न तत्र व्यभिचार इति भाव इति क०, ख०।

र्थिताजन्या शुक्तौ प्रवृत्तिरिष्टप्रवृत्तिविषयविधि-
ज्ञानसाध्या प्रवृत्तित्वात् शुक्तौ शुक्त्यर्थिप्रवृत्तिवत्
न चेष्टविषयप्रवृत्तित्वमुपाधिः, साधनविशेषितत्वात्

शेच्छादिविशेष्यत्वमादाय सिद्धसाधनवारणाय ज्ञानप्रवेशः। 'रज-
र्थीति रजतत्वप्रकारकत्वावच्छिन्नप्रवृत्तिविशेष्यत्वादित्यर्थः, तेन म-
हालम्बनप्रवृत्तिविशेष्यतामादायारजतप्रमाविषये(१) अरजते न दो-
चारः। 'रजतवदिति रजतत्वप्रकारकप्रवृत्तिविशेष्यरजतवदित्यर्थः, ते-
तादृशप्रवृत्त्यविषयरजतस्य साधनविकलत्वेऽपि न क्षतिः। 'शुक्ति-
शुक्तिविशेष्यिका रजतत्वप्रकारिका प्रवृत्तिरित्यर्थः, अत्र शुक्ति-
ष्यकशुक्तित्वप्रकारकप्रवृत्तावंशतो बाधवारणाय रजतत्वप्रकारि-
प्राचीननये पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वेऽपि
सिद्धसाधनस्य दोषत्वात् रजतप्रवृत्तावंशतः सिद्धसाधनवार-
शुक्तिविशेष्यिकेतीति भावः। 'स्वधर्मिधर्मिकेति स्वविशेष्यविशेष्य-
त्यर्थः। 'स्वं' प्रवृत्तिः, 'रजतार्थीति रजतत्वप्रकारकप्रवृत्तिमा-
त्यर्थः। 'रजतप्रवृत्तिवदिति रजतविशेष्यकरजतत्वप्रकारकप्रवृ-
वदित्यर्थः, 'स्वपदार्थेति, तथाच स्वपदस्य प्रकृतपक्षव्यक्ति-
साध्याप्रसिद्धिः दृष्टान्ताप्रसिद्धिश्च, दृष्टान्तपरत्वे च रजतस्मरण-
त्वेन सिद्धसाधनमिति भावः। 'तत्परित्यागेति स्वपदं परि-
रजतत्वप्रकारकप्रवृत्तिधर्मिधर्मिकरजतत्वप्रकारकज्ञानसाध्येत्यभिप्रा-
त्वित्यर्थः, 'रजतार्थिप्रवृत्तीति रजतत्वप्रकारकप्रवृत्तीत्यर्थः। 'स-

---

(१) रजतत्वभ्रमाविषये इति ख०।

र्चितिति समवायसम्बन्धेन रजतत्वप्रकारिका शुक्तिविशेष्यिका प्रवृ-
त्तिरित्यर्थः, अत्र शुक्तिविशेष्यक-शुक्तित्वप्रकारकप्रवृत्तावंशतः सिद्ध-
साधनवारणाय रजतत्वप्रकारिकेति, रजतविशेष्यक-रजतत्वप्रकार-
कप्रवृत्तावंशतः सिद्धसाधनवारणाय शुक्तिविशेष्यिकेतीति भावः।
इष्टप्रवृत्तिविषयेति समवायसम्बन्धेनेष्टप्रकारकप्रवृत्तिविषयविशेष्यक-
ज्ञानसाध्येत्यर्थः। अत्रेष्टत्वं न स्वजनकेच्छाविशेष्यत्वं, शुक्तिविशेष्यक-
रजतत्वप्रकारकप्रवृत्तिस्थले शुक्तेरेव स्वजनकेच्छाविशेष्यतया तत्प्र-
कारकज्ञानस्य चाहेतुत्वाद्बाधापत्तेः, किन्तु इष्टतावच्छेदकत्वं स्वज-
नेच्छाप्रकारत्वमिति यावत् स्वप्रकारत्वमिति तु निष्कर्षः।
प्रवृत्तिविषयत्वञ्च प्रवृत्तिविशेष्यत्वं स्वविशेष्यत्वमिति यावत्। तथा
समवायसम्बन्धेन स्वप्रकारप्रकारक-स्वविशेष्यविशेष्यकज्ञानसाध्येति
वाच्यं, समवायसम्बन्धेनेति साक्षाद्बुद्धिकरणप्रकारकत्वसिद्धये। प्राची-
नये स्वत्वस्यानुगतत्वात् न साध्याप्रसिद्धिः संवादिप्रवृत्तावेव
सिद्धेः, अत एव न दृष्टान्तासिद्धिः। समवायसम्बन्धेन
रजतमात्रप्रकारक-शुक्तिमात्रविशेष्यकप्रवृत्तेः पक्षत्वान्न समूहाल-
म्बनप्रवृत्तावंशतः सिद्धसाधनमिति भावः। 'प्रवृत्तित्वात्' समवा-
यसंसर्गकप्रवृत्तित्वात्, तेन तादात्म्यसम्बन्धेन रजतादिप्रकारकप्रवृत्तौ
व्यभिचारः। न चेश्वरप्रयत्ने व्यभिचार इति वाच्यं। प्रवृत्ति-
त्वं इच्छाजन्यतावच्छेदकजातिविशेषरूपतया भगवत्प्रयत्ने तदभा-
वेति भावः। 'शुक्ताविति शुक्तिविशेष्यकसमवायसम्बन्धेन शुक्ति-
प्रकारकप्रवृत्तिवदित्यर्थः।

केचित्तु तादात्म्यसम्बन्धेन रजतप्रकारिका शुक्तिविशेष्यिका प्रव-

त्तिरिति पक्षार्थः, तादात्म्यसम्बन्धेनेष्टप्रकारकप्रवृत्तिविषयविशेष्यक-ज्ञानसाध्येति साध्यार्थः, इष्टत्वादिकञ्च पूर्ववत्, अन्यथा शुक्तिविशेष्यकरजतप्रकारकप्रवृत्तिस्थले शुक्तेरेव स्वजनकेच्छाविशेष्यतया तद्भेदज्ञानस्य चाहेतुत्वाद्बाधापत्तेः, तादात्म्यसंसर्गकप्रवृत्तित्वादिति हेत्वर्थः, तेन समवायसम्बन्धेन रजतत्वादिप्रकारकप्रवृत्तौ न व्यभिचारः, तादात्म्यसम्बन्धेन शुक्तिप्रकारक-शुक्तिविशेष्यकप्रवृत्तित्वादिति दृष्टान्तार्थः इत्याहुः। तदसत्। 'समवायातीन्द्रियत्ववादिनं प्रतीत्याद्यग्रिमग्रन्थासङ्गतेः तच्च तत्रैव स्फुटीभविष्यति इति दिक्।

'इष्टविषयप्रवृत्तित्वमिति इष्टविशेष्यकप्रवृत्तित्वमित्यर्थः, अनिष्टत्वं इष्टतावच्छेदकाश्रयत्वं, स्वजनकेच्छाप्रकाराश्रयत्वमिति यावत् स्वप्रकाराश्रयत्वमिति तु निष्कर्षः। स्वजनकेच्छाविशेष्यत्वरूपे यथाश्रुतेऽर्थे रजतत्वेन शुक्तेरेव स्वजनकेच्छाविशेष्यतया साधनव्यापकत्वापत्तेः। 'साधनविशेषितत्वादिति प्रवृत्तित्वघटितत्वादित्यर्थः, विषयविशेषितेच्छानुव्यवसायादौ आहार्य्यधारावाहिकज्ञानादौ च साधनवति प्रवृत्तित्वघटितत्वस्याभावेन साध्याव्यापकत्वात् स्वविशेष्यविशेष्यक-स्वप्रकारप्रकारकज्ञानसाध्यत्वस्य साध्यत्वे अनुमित्यादावतिसाध्याव्यापकत्वाच्चेति भावः। यद्यपि प्रवृत्तित्वरूपसाधनावच्छिन्नसाध्यव्यापकत्वमस्त्येव तथापि शुद्धसाध्यव्यापक एवोपाधिरिति मतेनेदमभिहितं।

वस्तुतस्तु अस्योपाधित्वज्ञानसत्त्वात् कथं व्याप्तिग्रह इति पूर्वपक्षिणोऽभिमतं,(१) किं वा वस्तुगत्या अनेनोपाधिना सोपाधित्व

(१) पूर्वपक्षिणाभिहितमिति ग०।

.हा रजतेच्छाजन्यशुक्तिविषयप्रवृत्तिजनकरजतत्वप्र-
ारकं ज्ञानं शुक्तिविशेष्यकं शुक्तिप्रवृत्तिप्रयोजकज्ञा-
त्वात् शुक्तौ शुक्त्यर्थिप्रवृत्तिजनकज्ञानवत्। अव-

यं हेतुर्दुष्ट इत्यभिमतं,(१) नाद्यः उपाधिज्ञानस्य कादाचित्कतया
द्विरहदशायामेव व्याप्तिग्रहसम्भवात् अन्यथा अनुमानमात्रोच्छेदात्
र्वैव कस्यचिदुपाधित्वभ्रमसम्भवात्। नान्त्यः लाघवेन तद्वि-
शेष्यक-तत्प्रकारकप्रवृत्तिं प्रति तद्विशेष्यक-तत्प्रकारकप्रत्यक्षत्वेन
हेतुत्वात् पक्ष एव साध्याव्यापकतया अस्य वस्तुगत्या उपाधित्व-
रहादित्येव दूषणं सारं। एतेन प्रवृत्तित्वाविशेषितं स्वजनकेच्छा-
कारागश्रयविशेष्यकत्वं स्वप्रकाराश्रयविशेष्यकत्वञ्च शुद्धसाध्यव्यापकतया
उपाधिरित्यपि निरस्तं।

नवीननये स्वत्वस्य तत्तद्व्यक्तिविश्रान्ततया स्वपदस्य प्रकृतपक्ष-
त्वे असिद्धिः, दृष्टान्तपरत्वे बाध इत्यतोऽनुमानान्तरमाह,
इति रजतेच्छाजन्या या शुक्तिविशेष्यिका प्रवृत्तिः तत्प्रयोजकं
रजतप्रकारकज्ञानमित्यर्थः, अत्र 'रजतेच्छाजन्येति स्वरूपकथनं,
तस्यर्थं पूर्वोक्तदिशावसेयं। 'शुक्तिविशेष्यकमिति अग्रावच्छिन्नो
धूमः संयोगीत्यादिवत् पक्षतावच्छेदकरजतत्वप्रकारकत्वावच्छेदेन
शुक्तिविशेष्यकत्वसिद्ध्या अन्यथाख्यातिसिद्धिरित्यर्थः, 'शुक्तिप्रवृत्तीति
शुक्तिविशेष्यकप्रवृत्तिप्रयोजकज्ञानत्वादित्यर्थः। पूर्वोक्तासिद्धिमुद्धरति,
अवच्छेदकत्वेऽपीति अवच्छेदकव्यावृत्तान्यथासिद्धिचतुष्टयराहित्ये सति

---

(२) इत्यभिहितमिति ग०।

छेदकत्वेऽपि प्रयोजकत्वान्नासिद्धिः। हेतुत्वमपि तस्य साधयिष्यामः। तथाविधमिदं ज्ञानं वा रजतत्वप्रकारकं रजतेच्छाजन्यप्रवृत्तिहेतुज्ञानत्वात् सत्यरजतज्ञान-

---

नियतपूर्ववर्त्तित्वरूपस्यात्र प्रयोजकत्वरूपत्वादितिभावः(१)। 'हेतुत्वमपीति, इष्टतावच्छेदकज्ञान-इष्टभेदाग्रहयोर्विशेष्य-विशेषणभावे विनिगमकाभावात् कार्य्य-कारणभावद्वयस्यावश्यकतया उभयोरस्वातन्त्र्ये हेतुत्वादिति भावः। 'तथाविधमिति रजतत्वप्रकारकप्रवृत्तिजनकमित्यर्थः, 'इदं ज्ञानं' शुक्तिविशेष्यकं ज्ञानं, अत्र शुक्तावियं शुक्तिरिति ज्ञानेऽंशतो बाधवारणाय जनकान्तं। प्राचीनमते पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वादंशतः सिद्धसाधनस्य दोषत्वात् रजतमात्रविशेष्यक-रजतत्वप्रकारकज्ञानेऽंशतः सिद्धसाधनवारणाय 'शुक्तिविशेष्यकेति, शुक्तौ रजतत्वप्रकारकेच्छायामंशतः सिद्धसाधनवारणाय 'ज्ञानमिति। एकमात्रविशेष्यकत्वेन ज्ञानं विशेषणीयं, तेन शुक्तिरजतोभयसमूहालम्बने नांशतः सिद्धसाधनमिति भावः। 'रजतत्वप्रकारकमिति अत्राप्यग्रावच्छिन्नोवृत्तः कपिसंयोगीत्यादिवत् पक्षतावच्छेदकावच्छेदेन साध्यसिद्धौ शुक्तिविशेष्यकत्वावच्छिन्नरजतत्वप्रकारिताकज्ञानसिद्धिः तदेव चान्यथाख्यातिसिद्धिरित्यर्थः, 'रजतेच्छा

---

(१) अनुगतान्यथासिद्धित्वस्य निर्वक्तुमशक्यत्वात्कारणतावच्छेदकावच्छेदकवृत्तान्यथासिद्धिसामान्याभावनिवेशासम्भवादुक्तं अन्यथासिद्धिचतुष्टयविरहित्वे सतीति, तथा च तत्तदन्यथासिद्ध्यभावघटितकूटस्यैव प्रयोजकतावच्छरीरेऽन्तर्भाव इति भावः।

त्। न च ग्रहण-स्मरणयोर्विशिष्टस्य ज्ञानस्य वा
पक्षत्वे बाध आश्रयासिद्धिर्वा, उभयसिद्धेन शुक्तिनिष्ठ-
प्रवृत्तिहेतुत्वेन पक्षत्वात् । अन्यथा साध्य-तद्भाववतः

न्येति रजतत्वप्रकारकप्रवृत्तिहेतुज्ञानत्वादित्यर्थः । तेनेश्वरीयरज-
तेच्छाजन्यशुक्तिविशेष्यकशुक्तित्वादिप्रकारकप्रवृत्त्यादिजनके इयं शु-
क्तिरिति ज्ञाने न व्यभिचार इति ध्येयं । 'यद्वेत्याद्यनुमानद्वये शङ्कते,
नचेति, 'ग्रहण-स्मरणयोरिति 'तथाविधमित्यादिद्वितीयानुमाने
ग्रहणस्य केवलेदन्त्वप्रकारकानुभवस्य पक्षत्वे बाधः, 'रजतेच्छाजन्येत्या-
दिप्रथमानुमाने स्मरणस्य रजतमात्रविशेष्यकस्मरणस्य पक्षत्वे बाधः,
उभयत्रैव शुक्तिविशेष्यकरजतत्वप्रकारकज्ञानस्य पक्षत्वे आश्रयस्य
तत्त्वज्ञानरूपासिद्धिरित्यर्थः । 'शुक्तिनिष्ठेति शुक्तिविशेष्यकप्रवृत्ति-
प्रयोजकज्ञानत्वेनेत्यर्थः, इदञ्च प्रथमाभिप्रायेण, द्वितीये तु रजतत्व-
प्रकारकप्रवृत्तिजनकज्ञानत्वेनेति बोध्यं । 'पक्षत्वादिति अतिरिक्त-
विशिष्टभ्रमव्यक्तेरेव पक्षत्वादित्यर्थः । न च तज्ज्ञानासिद्धिरिति
वाच्यं । तव नये पक्षधर्मतावललभ्यसाध्यव्यक्तेरिव पक्षधर्मतावललभ्य-
पक्षव्यक्तेरपि ज्ञानस्याहेतुतया पक्षतावच्छेदकरूपेण प्रसिद्धपक्षक-
परामर्शादेव पक्षधर्मतावलात्प्रसिद्धपक्षव्यक्तिभानसम्भवेन तदप्रसिद्धा-
पि क्षतिविरहात्, मम तु शुक्तिविशेष्यकप्रवृत्तिप्रयोजकज्ञानत्वादि-
रूपेण तस्यापि ज्ञानसत्त्वादिति भावः । 'अन्यथा' पक्षधर्मतावल-
भ्यपक्षव्यक्तेर्विशेषतो ज्ञानस्यापेक्षितत्वे, 'साध्य-तद्भाववतः पक्षत्वे-
ति 'साध्यः' साधनीयो यो धर्मी, यश्च 'तद्भाववान्' साधनी-

पक्षत्वेनानुमानोच्छेदः। समवायातीन्द्रियत्ववादिनं प्रति अगृहीतासंसर्गकधर्मधर्मिविषयकमेकं ज्ञानमेव विशिष्टज्ञानं सिद्ध्यति। नचैवमुभयख्यातिः नान्यथाख्या-

---

यान्योन्याभाववान् धर्मी प्रसिद्धो धर्मीति यावत्, तयोः पक्षत्वविकल्पेनेत्यर्थः, 'अनुमानोच्छेदः' पक्षधर्मतावलेन पक्षविधया अपूर्वव्यक्तिसाध्यकानुमानमात्रोच्छेदः। ननु तन्मते समवायसम्बन्धेन स्वजनकेच्छाप्रकारप्रकारक-स्वविशेष्य-विशेष्यकज्ञानजन्यत्वं साध्यमपसिद्धं तन्मते समवायस्यातीन्द्रियतया सत्यस्यलेऽपि समवायस्य संसर्गमर्यादया अभानात् उपादानगोचरप्रत्यक्षस्यैव हेतुतया आनुमानिकादिज्ञानस्याहेतुत्वादित्यत आह, 'समवायेति समवायस्यातीन्द्रियतया संसर्गमर्यादयाप्यभानवादिनं प्रतीत्यर्थः, 'अगृहीतासंसर्गकधर्मधर्मिविषयकमिति समवायसम्बन्धावच्छिन्नधर्म्म-धर्म्मिभावाख्यस्वरूपसम्बन्धविशेषसंसर्गकमित्यर्थः, 'एकं ज्ञानमिति स्वजनकेच्छाप्रकारप्रकारक-स्वविशेष्यविशेष्यकज्ञानमित्यर्थः, तैः समवायस्य संसर्गमर्यादया भानानभ्युपगमेऽपि समवायसम्बन्धावच्छिन्नधर्म्म-धर्म्मिभावात्मकस्वरूपसम्बन्धविशेषस्य संसर्गमर्यादया भानाभ्युपगमात् तज्जन्यत्वस्यैव साध्यत्वात्। न चैवं न्यायनये अप्रसिद्धिरिति वाच्यं। नैयायिकैरपि इदं रजतमित्यत्र समवायवत् तदवच्छिन्नधर्म्म-धर्म्मिभावस्यापि संसर्गत्वाभ्युपगमादिति भावः। 'उभयख्यातिरिति शुक्तिविशेष्यक-रजतत्वप्रकारकख्यातिरित्यर्थः, सिद्ध्यतीतिशेषः, 'नान्यथाख्यातिरिति तु रजतत्वाभाववद्विशेष्यकत्वावच्छिन्न-रजतत्वप्रकारकत्वविशिष्टख्याति-

तिरिति वाच्यं। व्यधिकरणप्रकारकज्ञानस्य तत्त्वात्। न च विसंवादिप्रवृत्त्यजनकत्वमुपाधिः, तथाविधे इदं-ज्ञाने रजतज्ञाने च[१] त्वन्मते साध्याव्यापकत्वात्।

त्यर्थः, शुक्तौ रजतत्वाभाववत्त्वभ्रमकाभावादिति भावः। 'व्यधि-करणप्रकारकज्ञानस्येति रजतत्वाभाववद्विशेष्यकत्वावच्छिन्नरजतत्व-प्रकारकत्वाश्रयज्ञानस्यैवेत्यर्थः, 'तत्त्वादिति शुक्तिविशेष्यक-रजतत्व-प्रकारकत्वसम्भवादित्यर्थः, तथा च शुक्तिविशेष्यक-रजतत्वप्रकारकत्वे सिद्धे तेन हेतुना पश्चात्तदनुमेयमिति हृदयं। 'यद्वेत्याद्यनुमानद्वये उपाधिमाशङ्कते, 'न चेति, पक्षधर्मज्ञानत्वावच्छिन्नसाध्यव्यापकत्वा-दित्यभिमानः। अभिमानं निराकरोति, 'तथाविध इति विसंवा-दिप्रवृत्तिजनक इत्यर्थः, 'इदंज्ञाने' इदन्त्वरूपेण शुक्त्यनुभवे, एतच्च शुक्तिविषयकत्वे साध्ये बोध्यं। रजतत्वप्रकारकत्वे साध्ये त्वाह, 'रज-तज्ञाने चेति रजतस्मरणेचेत्यर्थः, 'त्वन्मत इति, मन्मते तु शुक्तिविशे-ष्यक-रजतत्वप्रकारकज्ञाने च साध्याव्यापकमिति भावः। 'परस्येति, तथाच साधनव्यापकत्वमिति भावः। 'तथात्वात्' दोषाजन्यत्वात्। मन्मते तु शुक्तिविशेष्यक-रजतत्वप्रकारकज्ञाने एव साध्याव्याप-कत्वमिति हृदयं। 'अन्यथा' विसंवादिप्रवृत्तिजनकज्ञानस्य दोष-जन्यत्वाभ्युपगमे, 'तयोरेवेति शुक्तिविषयकत्वे साध्ये इदन्त्वरूपेण शुक्त्यनुभव एव साध्याव्यापकत्वं, रजतत्वप्रकारकत्वे साध्ये रजतस्मरण-

---

(१) रजतस्मरणे चेति ग०।

नापि दोषाजन्यत्वं, परस्य ज्ञानमात्रे तथात्वात्। अन्यथा तयोरेव साध्याव्यापकत्वात्। न चाप्रयोजकत्वं, इष्टपुरोवर्त्तिविशिष्टज्ञानस्य प्रवृत्तिहेतुत्वात्।

अत्र प्राभाकराः। अप्रयोजकमिदं स्वतन्त्रोपस्थितेष्टभेदाग्रहादेव प्रवृत्त्युपपत्तेः किं विशिष्टज्ञानेन। परेणाप्यारोपनियमार्थं तदभ्युपगमात्। न च रजते प्रवृ-

---

एव साध्याव्यापकत्वमित्यर्थः। 'इष्टपुरोवर्त्तीति पुरोवर्त्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानस्येत्यर्थः, 'प्रवृत्तिहेतुत्वादिति पुरोवर्त्तिविशेष्यकेष्टतावच्छेदकप्रकारकप्रवृत्तिं प्रति हेतुत्वादित्यर्थः।

'स्वतन्त्रोपस्थितेति स्वातन्त्र्येणाभावाविशेषणत्वेनोपस्थितयाः रजतत्वावच्छिन्नेदन्त्वावच्छिन्नयोर्भेदाग्रहादेवेत्यर्थः, 'प्रवृत्त्युपपत्तेरिति शुक्तौ रजतत्वादिप्रकारकप्रवृत्त्युपपत्तेरित्यर्थः, 'किं विशिष्टज्ञानेनेति किं शुक्तौ रजतत्वादिप्रकारकज्ञानेनेत्यर्थः, तथा च स्वातन्त्र्येणेदन्त्वावच्छिन्न-रजतत्वावच्छिन्नयोरुपस्थितिरिदन्त्वावच्छिन्न-रजतत्वावच्छिन्नयोर्भेदाग्रहश्च रजतत्वप्रकारकप्रवृत्तिहेतुरिति भावः। अत्रेदं-रजतयोरनुपस्थितिदशायामपि तयोर्भेदाग्रहस्य सत्त्वात्तदानीं प्रवृत्तिवारणाय उपस्थितेरादरः, रजते नेदं रजतमिति ज्ञानस्याप्यन्यथाख्यात्यापत्त्या ज्ञानद्वयात्मकत्वेनेदन्त्वरूपेण रजते रजतभेदाविषयकत्वात्ततोऽपि प्रवृत्तिप्रसङ्गवारणाय स्वातन्त्र्येणेति रजतत्वावच्छिन्नोपस्थितिविशेषणं, यत्र चात्र भेद इत्यनुभवो रजतस्मरणेति क्रमेण रजते नेदं रजतमिति भ्रमस्तत्र प्रवृत्तिवारणाय स्वातन्त्र्ये-

तं प्रति विशिष्टज्ञानस्य हेतुत्वादिष्टापि तत्सिद्धिः, प्र-
त्तिमात्रे भेदाग्रहे सतीष्ट-पुरोवर्तिज्ञानस्य लाघवेन
हेतुत्वान्न तु सदपि विशिष्टज्ञानं तन्त्रं गौरवात्। न च

ति इदन्त्वावच्छिन्नोपस्थितेरपि विशेषणं। प्रतियोगितावच्छेदकप्र-
कप्रतियोगिज्ञानस्याभावलौकिकप्रत्यक्षहेतुतया शुक्तौ नेदं रज-
मिति भेदलौकिकप्रत्यक्षदशायामपि स्मरणादिलक्षणस्वतन्त्ररजत-
वच्छिन्नोपस्थितिसत्त्वादेवं रजत-शुक्त्योरिमे रजत-रजतभिन्ने
ति समूहालम्बनदशायामपि इदन्त्व-रजतत्वरूपेण शुक्ति-रजतयोः
तन्त्रोपस्थितिसत्त्वाच्च तदानीं शुक्तौ रजतत्वप्रकारकप्रवृत्तिवार-
य भेदाग्रहादरः। भेदपदञ्चोपलक्षणं रजतत्वात्यन्ताभावोऽपि
ष्टव्यः, नातो रजतमिति स्मरणदशायामिदं रजतत्वात्यन्ताभाववत्
ति ज्ञानात् शुक्तौ रजतत्वप्रकारकप्रवृत्तिः, न वा रजत-शुक्त्योरिमे
तत्व-तदत्यन्ताभाववती इति समूहालम्बनदशायामपीदन्त्व-रजत-
रूपेण शुक्ति-रजतयोः स्वतन्त्रोपस्थितिसत्त्वेऽपि शुक्तौ रजतत्व-
प्रकारकप्रवृत्तिः। न चैवं प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञा-
नादाय रजते नेदं रजतमिति ज्ञानस्थले प्रवृत्त्यतिप्रसङ्गो दुर्वार-
ति वाच्यं। अभावलौकिकप्रत्यक्षं प्रति प्रतियोगितावच्छेदकविशिष्ट-
तियोगिज्ञानस्य हेतुत्वात् रजते नेदं रजतमिति ज्ञानस्य च भ्रम-
पतया तन्मते अभावांशे लौकिकप्रत्यक्षानात्मकत्वात् तन्मते रजते
दं रजतमिति भ्रमस्य ज्ञानद्वयतया तज्जनकीभूतप्रतियोगि-
वच्छेदकविशिष्टप्रतियोगिज्ञानस्य प्रवृत्तिपूर्वमनवस्थानाच्च युग-

रजते इष्ट-पुरोवर्त्तिभेदग्रहस्याप्रसिद्धा कथन्तदभाव-इति वाच्यं। पुरोवर्त्तिनिष्ठे भेदे रजतप्रतियोगित्वज्ञान-विषयत्वाभावस्य पुरोवर्त्तिनीष्टभिन्नत्वप्रकारकज्ञान-

---

पज्ज्ञानद्वयानुपस्थितेः। न चैवं गृहं रजतवत् इदञ्च तद्रजत-मित्यादि समूहालम्बनादपि प्रवृत्तिप्रसङ्गः स्वतन्त्ररजतत्वावच्छिन्ने-दन्त्वावच्छिन्नोपस्थिति-भेदाग्रहयोः सत्त्वादिति वाच्यं। इष्टत्वात्। त्वयापि तदनन्तरं इदं रजतमिति विशिष्टज्ञानसम्भवेन तृतीयक्षणे तत्र प्रवृत्तेरभ्युपगमादिति भावः। इदमापाततः रजतमिदं गेहे नास्ति रजतवन्निष्ठभेदप्रतियोगि भूतलमित्यादिज्ञानादप्रवृत्त्या-पत्तेः अभावाविशेषणत्वेनेदन्त्वावच्छिन्न-रजतत्वावच्छिन्नयोरुपस्थिति-विरहात्। यत्र च भेदप्रकारेणेदमनुभवोरजतस्मरणञ्चेतिक्रमेण रजते नेदं रजतमिति भ्रमस्तत्र, यत्र वा गृहं रजतवदिदञ्च न रजत-मिति समूहालम्बनात्मा रजते रजतभेदवत्ताभ्रमस्तत्र च प्रवृत्त्या-पत्तेः। किञ्च यन्मते ग्रहण-स्मरणात्मकमेकमेव ज्ञानं भ्रमस्तन्मते रजतमिति स्मरणदशायां रजते नेदं रजतमितिज्ञानात् प्रवृत्ति-प्रसङ्गोदुर्वारः। न च भ्रमस्यैव ज्ञानत्वाभ्युपगमे धर्म्म-धर्म्मिविषयक-ज्ञानत्वेन विशिष्टधीत्वादन्यथाख्यातित्वापत्तिरिति वाच्यं। समूहाल-म्बनवत् प्रकारप्रकारीभावविरहादिति दिक्।

ननु यत्र भेदाग्रहो नास्ति तत्र प्रवृत्तिः कथं स्यादित्यत आह 'परेणापीति, 'नियमार्थं' उत्पादार्थं, 'तदभ्युपगमात्' प्रवृत्तिपूर्वं भेदाग्रहस्यावश्यमभ्युपगमात्। 'रजते प्रवृत्तिं प्रतीति रजतविशेष्य-रज-

विषयत्वाभावस्य वा हेतुत्वात्। न चाभेदव्यवहारो व्यवहर्त्तव्यधीसाध्यो न तु तदभावाग्रहात् अन्यथा-भेदाग्रहाद्भेदव्यवहारापत्तिरिति वाच्यं। इच्छादीनां

त्वप्रकारकप्रवृत्तिं प्रतीत्यर्थः, 'विशिष्टज्ञानस्येति इदन्त्वधर्म्मितावच्छेदककरजतविशेष्यक-रजतत्वप्रकारकज्ञानस्येत्यर्थः, 'इहापि' शुक्तिविशेष्यक-रजतत्वप्रकारकप्रवृत्तिस्थलेऽपि, 'तत्सिद्धिरिति इदन्त्वधर्म्मितावच्छेदकक-शुक्तिविशेष्यक-रजतत्वप्रकारकज्ञानसिद्धिरित्यर्थः,तच्चेदन्त्वधर्म्मितावच्छेदकक-रजतविशेष्यक-रजतत्वप्रकारकज्ञानस्य हेतुत्वे कल्प्यमाने सामान्यतस्तद्विशेष्यक-रजतत्वप्रकारकप्रवृत्तित्वेन कार्य्यता इदन्त्वधर्म्मितावच्छेदकक-तद्विशेष्यक-रजतत्वप्रकारकज्ञानत्वेन कारणतेति-रूपेण कल्पनादिति भावः। इदञ्च तच्चेदन्त्वयोरनुगतत्वमभिप्रेत्य।

नव्यास्तु तत्पुरुषीयरजतत्वप्रकारकप्रवृत्तित्वेन तत्पुरुषीयरजतत्वप्रकारकज्ञानत्वेन हेतु-हेतुमद्भावः, यत्र विशेष्यतासम्बन्धेन तत्पुरुषीयरजतत्वप्रकारकप्रवृत्तिः तत्र व्यक्तिद्वयावृत्तिधर्म्मविशिष्टविशेष्यतासम्बन्धेन तत्पुरुषीयरजतत्वप्रकारकज्ञानमिति विशेष्यताघटितसामानाधिकरण्यं प्रत्यासत्तिरित्यभिप्रायेणायं ग्रन्थः, अवृत्तित्वञ्चाभावीयविशेषणतया विवक्षितं, तादृशधर्म्मः तत्तद्विशेष्यव्यक्तिमात्रवृत्तिविशेष्यतात्यन्तात्मकं तादृशविशेष्यताव्यक्त्यात्मकं वा इदन्त्वमेव। तद्विशिष्टत्वञ्च ख(१) सामानाधिकरण्य-खावच्छिन्नावच्छेदकतानिरूप-

---

(१) खं तादृशधर्म्मः।

ज्ञातपुरोवर्त्तिमात्रविषयत्वात् । अभेदाभिलापोऽपि ज्ञाताभेदस्यासंसर्गाग्रहादिति नाज्ञाते व्यवहारः । ननु

कत्वोभयसम्बन्धेन ग्राह्यं, तेन शुक्तिवृत्ति(१)तादृशेदन्त्वधर्म्मितावच्छेदककादभावीयविशेषणताविशेषसम्बन्धेन(२) द्रव्यत्वादिधर्म्मितावच्छेदककाद्वा रजतविशेष्यक-रजतत्वप्रकारकज्ञानान्न रजते रजतत्वप्रकारिका प्रवृत्तिः सर्व्वत्र स्वरूपतस्तत्तदधिकरणताव्यक्त्यात्मकेदन्त्वधर्म्मितावच्छेदककं स्वरूपतस्तत्तद्विशेष्यताव्यक्त्यात्मकेदन्त्वधर्म्मितावच्छेदककं वा ज्ञानमेव प्रवर्त्तकं न त्विदन्त्वान्तरधर्म्मितावच्छेदककमिति न व्यभिचार इति प्राहुः ।

'प्रवृत्तिमात्रे' सत्यासत्यस्थलीयरजतत्वप्रकारकप्रवृत्तिमात्रे, 'भेदाग्रहे सति' इदन्त्वरूपेण प्रवृत्तिविशेष्ये रजतभेदाग्रहे सति, 'इष्टपुरोवर्त्तिज्ञानस्येति रजतत्वावच्छिन्नरजतेदन्त्वावच्छिन्नप्रवृत्तिविशेष्ययोर्ज्ञानस्येत्यर्थः, 'लाघवेन' अनन्यथासिद्धत्वमात्रकल्पनालाघवेन। 'सदपीति सत्यस्थलीयरजतत्वप्रकारकप्रवृत्तिस्थले सदपीत्यर्थः, 'विशिष्टज्ञानमिति इदन्त्वधर्म्मितावच्छेदकक-प्रवृत्तिविशेष्यविशेष्यक-रजतत्वप्रकारकज्ञानमित्यर्थः, 'तन्त्रमिति तद्विशेष्यक-रजतत्वप्रकारकप्रवृत्तित्वावच्छिन्नं प्रति इदन्त्वधर्म्मितावच्छेदकक-तद्विशेष्यकरजतत्वप्रकारकज्ञानत्वेन तन्त्रमित्यर्थः, 'गौरवादिति अनन्यथासिद्धत्व-नियतपूर्व्ववर्त्तित्वोभयकल्पनागौरवादित्यर्थः । 'रजत इति रजतविशेष्यक-रजतत्वप्रकारकप्रवृत्तिस्थल इत्यर्थः, 'इष्ट-पुरोवर्त्तीति इदन्त्वरूपेण प्रवृत्ति-

---

(१) स्वसामानाधिकरण्येत्यादिसम्बन्धनिवेशप्रयोजनमाह शुक्तीति ।
(२) इदन्तु व्यक्तिद्वयावृत्तीत्यस्य प्रयोजनं ।

पीतः शङ्खो न श्वेत इति भेदज्ञानेऽपि श्वेताभेदानुमित्या श्वेतार्थिप्रवृत्तेरभेदधीस्तद्धेतुरिति चेत्। न। तवापि

विशेष्ये रजतत्वावच्छिन्नभेदग्रहस्येत्यर्थः, अन्यथाख्यात्यनभ्युपगमादिति भावः। 'कथं तदमात्र इति, कारणमिति शेषः। 'पुरोवर्त्तिनिष्ठेति इदन्त्वावच्छिन्ननिष्ठभेदत्वावच्छिन्ने इत्यर्थः, 'रजतप्रतियोगित्वेति रजतत्वावच्छिन्नप्रतियोगिताकत्वप्रकारकज्ञानविशेष्यत्वाभावस्येत्यर्थः, एतन्निष्ठभेदोरजतत्वावच्छिन्नप्रतियोगिताक इति ज्ञाने प्रवृत्त्यनुदयादिति भावः। अत्र तत्तत्पुरुषीयत्वेन ज्ञानं विशेषणीयं, तेन पुरुषान्तरीयतादृशज्ञानविशेष्यत्वसत्त्वेऽपि न प्रवृत्त्यनुपपत्तिः। कालान्तरे तत्पुरुषस्य तादृशज्ञानसत्त्वेपि प्रवृत्त्यव्यवहितपूर्व्वकाले तदभावसत्त्वान्न यदाकदाचित् तत्पुरुषीयतादृशज्ञानमादायातिप्रसङ्गः, एवमग्रेऽपीति ध्येयं। 'पुरोवर्त्तिनीति इदन्त्वावच्छिन्ने प्रवृत्तिविशेष्ये इत्यर्थः, 'इष्टभिन्नत्वेति रजतभिन्नत्वेत्यर्थः, इदं रजतभिन्नमिति ज्ञानेऽपि प्रवृत्त्यनुदयादिति भावः। 'वाशब्दश्चार्थे, न तु विकल्पे, उभयोरेव ज्ञानयोः प्रतिबन्धकतया अभावद्वयस्यैव हेतुत्वात्। न च रजत एव नेदं रजतमिति ज्ञानात् प्रवृत्त्यापत्तिः भ्रमानङ्गीकारेण तत्रापि इदन्त्वावच्छिन्ने रजते च रजतभिन्नत्वप्रकारकज्ञानविषयत्वाभावसत्त्वादिति वाच्यं। तत्र निरुक्तभेदाग्रहसत्त्वेऽपि निरुक्तस्वतन्त्ररजतत्वोपस्थितिविरहादप्रवृत्तेरिति भावः। 'अभेदव्यवहार इति, शुक्तिविशेष्यक-रजताभेदप्रकारकेच्छादिरित्यर्थः, 'व्यवहर्त्तव्यधीसाध्य इति स्वविशेष्यविशेष्यकरजताभेदप्रकारकज्ञानसाध्य इत्यर्थः, यो रजताभेदप्रकारकव्यवहारः

पीतः शङ्ख इत्यभेदज्ञानात् पीतार्थी न प्रवर्त्तते भेदानुमितेरिति भेदाग्रह एव तद्धेतुः स्यात्। भ्रमत्वेन ज्ञातम-

---

स स्वविशेष्यकतादृशज्ञानसाध्यः रजताभेदप्रकारकव्यवहारवदिति व्याप्तेरिति भावः। 'न तु तदभावाग्रहादिति न तु शुक्तौ रजताभेदाभावाग्रहमात्रादित्यर्थः। 'अन्यथा' तदभावाग्रहमात्रादेव तत्प्रकारकव्यवहाराभ्युपगमे, 'अभेदाग्रहादिति यदा भेदोऽभेदश्च न गृहीतस्तदाप्यभेदाग्रहसत्त्वात् भेदव्यवहारापत्तिरित्यर्थः। ज्ञानवदिच्छादेरपि व्यधिकरणप्रकारकत्वमनभ्युपेत्य समाधत्ते, 'इच्छादीनामिति, 'ज्ञातपुरोवर्त्तिमात्रेति खण्डशो रजताभेद-शुक्तिविषयकत्वादित्यर्थः, तथाच शुक्तिविशेष्यक-रजताभेदप्रकारकव्यवहारत्वमेवासिद्धमिति भावः। नन्विच्छादीनां व्यधिकरणप्रकारकत्वानभ्युपगमे तवापसिद्धान्त इत्यस्वरसादाह, 'अभेदाभिलापोऽपीति प्रवृत्तिवदिदं रजताभिन्नमित्यभिलापादिरपीत्यर्थः, आदिपदादिच्छादिपरिग्रहः, तथाचाप्रयोजकत्वमितिभावः। 'ननु पीतः शङ्ख इति 'पीत इति स्वरूपकथनं, अयं न श्वेत इतिदोषविशेषजन्यभेदज्ञानेऽपीत्यर्थः, 'श्वेताभेदानुमित्येति अयं श्वेत इतिविशेषदर्शनजन्यभ्रमोत्तरप्रत्यक्षेत्यर्थः, यथाश्रुते उपादानगोचरप्रत्यक्षस्यैव प्रवृत्तिहेतुत्वादानुमानिकज्ञानात् प्रवृत्त्यसम्भवादसङ्गतेः। 'अभेदधीस्तद्धेतुरिति अभेदधीरेव प्रवृत्तिहेतुरित्यर्थः, अन्यथा भेदाग्रहस्य प्रवर्त्तकत्वे तत्र भेदग्रहसत्त्वात् प्रवृत्त्यनुपपत्तेः। न च तत्र विशेषदर्शनेनाभेदप्रत्यक्षोत्पत्तिसमये श्वेतभेदज्ञाननाशान्न प्रवृत्त्यनुपपत्तिरिति वाच्यं। यत्र श्वेताभेदव्याप-

भेदज्ञानमकिञ्चित्करमिति यदि तदा भ्रमत्वेन ज्ञातं भेदज्ञानमपि तथा।

वत्तापरामर्शरूपविशेषदर्शनात्मकमेव भेदज्ञानं तत्र प्रवृत्त्यनुपपत्तेरिति भावः। यद्यपि शङ्खे श्वेतभेदग्रहे अन्यथाख्यात्यापत्त्या तत्रापि तन्मते भेदाग्रहोऽस्त्येवेति न प्रवृत्त्यनुपपत्तिः, तथापि स्फुटतरत्वादुपेत्य समाधानान्तरमाह, 'तवापीति, 'अभेदज्ञानात्' दोषविशेषजन्याभेदप्रत्यक्षात्। कुतो न प्रवर्त्तते तदेवाह, 'भेदानुमितेरिति शङ्खत्वहेतुकपीतभेदानुमितेरित्यर्थः। 'अभेदज्ञानं' पीतः शङ्ख इति दोषविशेषजन्यमभेदज्ञानं, 'अकिञ्चित्करं' प्रवृत्त्यजनकं, अगृहीतभ्रमत्वकाभेदज्ञानस्येव प्रवृत्तिहेतुत्वादिति भावः। 'भेदज्ञानमपि' दोषविशेषजन्यश्वेतभेदज्ञानमपि, 'तथा' प्रवृत्त्यप्रतिबन्धकं। ममाप्यगृहीतभ्रमत्वकभेदग्रहाभावस्यैव प्रवृत्तिहेतुत्वादिति भावः। भ्रमत्वन्तु इच्छादिप्रसिद्धव्यधिकरणप्रकारकत्वं ज्ञानद्वयत्वं वा तज्ज्ञानमपि स्वतन्त्रोपस्थितस्यासंसर्गाग्रहो विशिष्टज्ञानं वेत्यन्यदेतत्।

ननु तन्मते (१) अभावस्याकारणत्वाद्भेदाग्रहस्य न हेतुत्वसम्भव इत्यस्वरसादाह, 'यद्वेति, 'दृष्टभेदाविषयकमिति, 'दृष्टः' रजनकेच्छाप्रकाराश्रयो रजतादिः, तद्भेदाविषयकं रजतत्वावच्छिन्नभेदत्वावच्छिन्नस्य च स्वातन्त्र्येण ज्ञानमित्यर्थः, एवञ्च शङ्खो न श्वेत इत्यत्र पूर्वं श्वेतभेदप्रत्ययेऽपि तदुत्तरं श्वेताभेदप्रत्यक्षस्यैव

---

(१) ननु मवन्मते इति ख०।

यद्वा इष्टभेदाविषयकं ज्ञानं प्रवर्त्तकं। न चाभेदानुमिताविष्टभेदोविषयः। अत एव पूर्वं भेदप्रत्ययेऽपि स प्रत्ययो न भेदग्राहीतिदिङ्मात्रं-प्रतिबिम्बादिप्रत्ययाः।

तादृशज्ञानस्य सत्त्वान्न प्रवृत्त्यनुपपत्तिरिति भावः। नन्वेवं रजतमिदञ्च रजतमित्यादिसमूहालम्बनादप्रवृत्त्यापत्तिस्तस्येष्टभेदविषयकत्वात्। न चेष्टभेदाविषयकत्वपदेन स्वसमानकालीनस्वसमानाधिकरणोपस्थितिविषयेष्टभेदाग्रहीतासंसर्गकपुरोवर्त्तिविषयकं यद्यत् तदन्यत्वं विवक्षितं, भवति च उक्तसमूहालम्बनमपि तथा तेन पुरोवर्त्तिनि रजते तादृशरजतभेदासंसर्गस्य रजतत्वस्य ग्रहादिति वाच्यं। घटो न रजतमिति समूहालम्बनात्मकाच्छुक्तौ रजतत्वभ्रमादिदं न रजतभिन्नं किन्तु रजतमितिभ्रमाच्च शुक्तावप्रवृत्त्यापत्तेः तत्र ज्ञानद्वयतया पुरोवर्त्तिन्यां शुक्तौ रजतभेदासंसर्गस्य रजतत्वस्याग्रहात् रजतस्यानुपस्थितत्वाच्च इति चेत्। न। इष्टभेदाविषयकत्वपदेन इदन्त्वावच्छिन्नपुरोवर्त्तिनिष्ठेष्टभेदाविषयकत्वस्य विवक्षितत्वात्। यत्रेदन्त्वावच्छिन्नेदमनुभवो रजतभेदस्मरणञ्चेति क्रमेण रजते नेदं रजतमिति भ्रमस्तत्र, यत्र वा अत्र भेद इत्यनुभवो रजतस्मरणञ्चेति क्रमेण तादृशभ्रमस्तत्र च प्रवृत्त्यापत्तिः तयोरन्यथाख्यात्यापत्त्या पुरोवर्त्तिनि रजते रजतभेदाविषयकत्वादतः स्वातन्त्र्येणेति ज्ञानविशेषणं, 'स्वातन्त्र्य' अभावाविशेषणत्वं। न चैवमयं न पीत इत्यनुमितिसत्त्वेऽपि चाक्षुषपीतत्वज्ञानात् पीतार्थिप्रवृत्त्यापत्तिरिति वाच्यं। अगृहीताप्रामाण्यकत्वेन ज्ञानविशेषणात्

नत्वेवं रजतेऽपि विशिष्टज्ञानं न सिद्ध्येत्प्रवृत्तेर्भेदाग्र-
हादेवोपपत्तेः। इदं रजततया जानामि रजततया
ज्ञातमित्यनुभवः शुक्तावपि तुल्यः। न च शुक्तौ
रजतत्वबाधात् सोऽप्यसंसर्गाग्रहः, बाधस्यापि विशिष्ट-
ज्ञानत्वे मानाभावादिति चेत्। न। तत्र हि रजतस्य
न स्मृतिः प्रागननुभवात्, ग्रहणञ्च तस्य धर्मिविषयकं
योग्यधर्मियोगेन रजतत्वजातिग्रहादित्यर्थसिद्धं धर्म-

अप्रामाण्यज्ञानदशायां न्यायनयेऽपि तत्र प्रवृत्तेर्दुर्वारत्वादिति निगर्वः। इदञ्चापाततः पूर्व्वकल्पोक्तदूषणस्याप्यत्राप्यविशेषात् नेदं रजतमिति विशिष्टदशायामपि रजतं द्रव्यं इदञ्च प्रमेयमित्यादिसमूहालम्बनात् प्रवृत्त्यापत्तेश्चेति ध्येयं।

नव्यास्तु 'इष्टभेदाविषयकं ज्ञानमित्यस्य इष्टभेदविषयतासाकाङ्क्षपुरोवर्त्तिविषयतातिरिक्ता या इष्टतावच्छेदकविषयतासाकाङ्क्षेदन्त्वावच्छिन्नपुरोवर्त्तिविषयता तदाश्रयीभूतं ज्ञानमित्यर्थः, भेदेत्युपलक्षणं अत्यन्ताभावोऽपि द्रष्टव्यः, तेनेदं रजतात्यन्ताभाववदित्यादिज्ञानादपि न प्रवृत्तिः। अगृहीताप्रामाण्यकत्वेनापि ज्ञानं विशेषणीयं, नातः 'न चैवमित्याद्युक्तदोषस्यावकाश इति प्राहुः।

केचित्तु ननु पीतः शङ्खइति पूर्व्वपक्षे समाधानान्तरमाह, 'पक्षेति, न तु पूर्वकल्पापेक्षया कल्पान्तरमिदं, तथाचेष्टभेदाविषयकमित्यस्य श्वेतभेदविषयकज्ञानानुपरक्त-श्वेताभेदानुमित्यन्तरमेव तत्र प्रवृत्तिजनकं न तु प्राथमिकमित्यर्थः। न च सिद्धिसत्त्वात्

धर्मिविषयकमेकं ज्ञानं। न च रजतत्वस्य शुक्त्यनुभ-
वविषयत्वे हेतुरस्ति। न च प्रत्यभिज्ञानवत् संस्कारे-
न्द्रिये हेतू, तयोरत्र भिन्नविषयकत्वात्। एकदा स्वतन्त्रो-

कथमनुमित्यन्तरमिति वाच्यं। गुरुमते सिद्धेरप्रतिबन्धकत्वात्(१) अनुमितिपदस्य प्रकृते विशेषदर्शनजन्यभ्रमोत्तरप्रत्यक्षपरत्वाच्च। यदा 'इष्टभेदाविषयकं ज्ञानं' श्वेतभेदाविषयकं श्वेताभेदानुमानं, 'प्रवर्त्तकं' तत्र तृतीयक्षणे एव प्रवृत्तिजनकं न तु द्वितीयक्षणे क्षणविलम्बेन शपथनिर्णयत्वात् इत्यर्थः, इत्याहुः।

ननु प्रकृतेण श्वेतभिन्नतया गृह्यमाणशङ्खे श्वेताभेदानुमिति-र्भवतीति तत्र श्वेतभेदमपि विषयीकरोति तस्य पूर्वोपस्थितत्वेन उपनीतभाने बाधकाभावात्तथाचेष्टभेदाविषयकज्ञानमपि तत्र नास्ती-त्यत आह, 'न चेति, 'अभेदानुमितौ' श्वेताभेदानुमितौ, 'इष्टभेदः' श्वेतभेदः, विरोधिनोरेकनिश्चयप्रकारत्वासम्भवादिति भावः। 'अत एवेति विरोधिनोरेकनिश्चयप्रकारत्वासम्भवादेवेत्यर्थः, 'भेदप्रत्ययेऽपीति प्राच्यां प्रतीचीभेदप्रत्यये जले चन्द्रवद्भेदप्रत्ययेऽनु-मितिरूपे विद्यमानेऽपीत्यर्थः, 'स प्रत्ययः' तदनन्तरभावी दोषवि-शेषजन्यः प्राच्यां प्रतीच्यभेदप्रत्ययः जले चन्द्रवदभेदप्रत्यय इत्यर्थः, 'न भेदग्राही' न प्रतीचीभेद-चन्द्रवद्भेदविषयकः, 'दिङ्मोहेति तदनन्तरभाविप्राचीविशेष्यक-प्रतीच्यभेदभ्रम-जलविशेष्यक-चन्द्रवदभे-

---

(१) धारावाहिकप्रत्यक्षमिव धारावाहिकानुमितिरपि गुरुभिरङ्गीकृत-मेव इति भावः।

पस्थितविरुद्धानेकभेदाग्रहे संशयः। न च क्रमेणोपस्थितानेकभेदाग्रहो येन स क्रमिकविपर्य्ययद्वयरूपः स्यात्, अन्यथा तवाप्यप्रतीकारात्। न च संशयानन्तरं विपर्ययदशायामुभयभेदाग्रहे संशयः एक भेदाग्रहे अन्यथाख्यातिः। दोषमहिमा ह्येकस्य न स्यातन्त्र्येणोपस्थितिः,

---

दयमादिरूपाः प्रत्यया इत्यर्थः, निश्चयात्मका इति शेषः। अन्यथा तत्र भेदाभेदयोरुभयोर्भानात् संशयत्वापत्तेरिति भावः। 'रजतत्वबाधादिति कदाचिद्रजतत्वस्य बाधादित्यर्थः, 'सोऽपि' अनुव्यवसायोऽपि, 'असंसर्गाग्रह इति इदन्त्वावच्छिन्नपुरोवर्त्तिज्ञाने रजतत्वप्रकारकत्वस्य रजतत्वप्रकारकज्ञाने इदन्त्वावच्छिन्नपुरोवर्त्तिविशेष्यकत्वासंसर्गाग्रह इत्यर्थः। 'बाधस्यापीति, असंसर्गाग्रहरूपोबाधः कदाचिद्रजतेऽपि तुल्य इति भावः। सत्यस्थले ज्ञानद्वयेन विशिष्टज्ञानस्य नान्यथासिद्धिसम्भव इति समाधत्ते, 'तत्रेति सत्यरजतानुभवस्थले इत्यर्थः(१), 'रजतस्य' रजतत्वावच्छिन्नस्य, 'प्रागिति, एतज्जन्मनीति शेषः। न च जन्मान्तरानुभूतस्य स्मरणं, तस्य तदानीमुद्बोधके मानाभावात् अपूर्वचैत्रादिस्थले तदभावाच्च इति भावः। ननु मास्तु स्मरणं तथापि रजत-रजतत्वयोः साक्षात्कारात्मकज्ञानद्वयेनैवान्यथासिद्धिरित्यत आह, 'ग्रहणञ्चेति साक्षात्कारश्चेत्यर्थः, 'तस्य' रजतत्वस्य, 'धर्म्मिविषयकं' इदन्त्वावच्छिन्नरजतविषयकं। धर्म्मिविषयकत्वे हेतुमाह, 'योग्येति, 'अर्थसिद्धं' सामग्रीबलसिद्धं, 'धर्म्म-धर्म्मीति।

---

(१) आद्ये रजतानुभवे इत्यर्थ इति ग०।

भिन्नभावविशेषणतयेति तद्भेदाग्रहोऽप्यविशिष्टः। न च संशयानन्तरन्धूमभ्रमादस्ति क्वचिद्वह्न्यर्थिप्रवृत्तिर्न तु तेन विना। न च तस्य स्वतन्त्रोपस्थितवह्न्यसंसर्गाग्रहो द्वारं संशयानुरोधेन तस्य प्रागपि सत्त्वाद्वह्न्यनुमितिर्द्वारमिति वाच्यं। विशिष्टभ्रमस्य हि निर्वाहित्वात्

न चैतावता समूहालम्बनादेकप्रत्यक्षगोचरत्वसिद्धावपि विशिष्टज्ञानस्य नियामकधर्म-धर्मिभावविषयकत्वासिद्धा न तत्सिद्धिरिति वाच्यं, कारणबाधाभावेनैकानुभवगोचरत्वेन द्वयोः सिद्धेः इदं रजततया ज्ञानमीत्यनुव्यवसायस्यैव धर्म्म-धर्मिविषयकत्वे प्रमाणीकर्त्तुं शक्यत्वात् प्रकृते तु कारणबाधादेकानुभवगोचरत्वासम्भवेनानुव्यवसायस्यातथात्वादित्यत्र तात्पर्य्यात्। सत्यरजतस्थले सामग्रीबलाद्विशिष्टज्ञानसिद्धिर्न तु प्रकृते सोऽस्तीत्याह, 'न चेति, रजतत्वेन समं सन्निकर्षाभावादिति भावः। 'संस्कारेन्द्रिये इति रजतत्वविषयकसंस्कार-शुक्तीन्द्रियसन्निकर्षावित्यर्थः, 'तयोः' संस्कार-शुक्तीन्द्रियसन्निकर्षयोः, 'भिन्नविषयकत्वादिति एकधर्मिविषयकत्वाभावादित्यर्थः, प्रत्यभिज्ञानस्थले तु तत्ताविशिष्टेदन्त्वविशिष्टयोरभेदादेकधर्मिविषयकत्वमेव तयोरिति भावः। मिथ्याज्ञानाभावे संशयस्य व्यवहारं समर्थयति, 'एकदेति एककालोत्पन्ना या स्वातन्त्र्येणोपस्थितिस्तद्विषयकेत्यर्थः, 'भेदाग्रहे' भेदाग्रहसत्त्वे, धर्मिज्ञानमिति शेषः, नातः सम्भवनन्यः। रजत एव नेदं रजतं किन्तु शुक्तिरिति विपर्य्ययवारणाय 'स्वातन्त्र्येणेति, 'स्वातन्त्र्यं' अभावाविशेषणत्वं। 'एकदेत्यस्य व्यावृत्तिमाह

स्वातन्त्र्येणोपस्थितिप्रतिबन्धकत्वेन नियमतः स्वतन्त्रव-
स्तुस्मृतिर्द्वारमिति न संशयान्यथाख्याती। न च पर्वतस्य
प्रत्यक्षत्वे वह्नेश्च स्मरणे प्रत्यक्षभ्रमान्न विशेष इति
वाच्यं लिङ्गात्मरोमीति स्यान्न त्वनुमिनोमीति वाच्यं। लिङ्ग-
ज्ञानानन्तरभावित्वप्रतिसन्धानाप्रतिसन्धानाभ्यामुभय-

न चेति न त्वित्यर्थः, 'अनेकभेदाग्रहः' विरुद्धानेकभेदाग्रहः, 'संशय-
त्वमुपैति', 'क्रमिकविपर्य्ययद्वयेति एकधर्म्मिक-क्रमिकगोत्वाश्वत्वा-
दिभ्रमरूपः स्यादित्यर्थः। नन्वेकदा विरुद्धोभयस्मृतेः सर्वत्रासिद्धा
त्वेकानुभवजसंस्कारस्य प्रत्येकत्वाचस्मारकत्वनियमादित्यत आह,
'अन्यथेति युगपदुभयस्मृत्यनभ्युपगमे इत्यर्थः, 'अप्रतीकारादिति
संशयाभावादित्यर्थः, क्रमिकप्रत्येककोटिद्वयोपस्थिति-धर्म्मिज्ञानानां
युगपदनवस्थानादिति भावः। 'संशयानन्तरमिति स्थाणौ स्थाणु-पु-
रुषसंशयोत्तरमयं पुरुष इति भ्रमदशायामित्यर्थः, 'उभयभेदाग्रहे'
स्थाणु-पुरुषोभयभेदाग्रहे। ननु भ्रमानुरोधात् पुरुषभेदग्रह एव
तत्र नास्ति स्थाणुभेदग्रहस्तु तत्र वर्त्तत एवेत्यत आह, 'एकभेदाग्रह-
इति पुरुषभेदाग्रहमात्राभ्युपगमे इत्यर्थः, स्थाणौ स्थाण्वभेदाग्रहाभ्यु-
पगम इति यावत्। 'एकभेदग्रह इत्येव क्वचित्पाठः, तत्र 'एकभेद-
ग्रहे' स्थाणुभेदग्रहे। समाधत्ते, 'दोषमहिम्नेति दोषप्राधान्येन संश-
योत्तरं पुरुष एवायं न तु स्थाणुरित्येव तत्र भ्रमस्तया च स्थाणुत्वको-
टेर्न स्वातन्त्र्येणोपस्थितत्वमित्यर्थः, संशयात्मकस्वतन्त्रोपस्थितेर्विशेषद-
र्शनेन नाशादिति भावः। 'तद्भेदाग्रहोऽपि' स्थाणौ स्थाणुभेदाग्रहो-

सम्भवात्। एवं स्वतन्त्रोपस्थितानिष्टभेदाग्रहोऽपि निवर्त्तकः। तेनेदं रजतं न शुक्तिरित्यभावप्रतियोगित्वेनानिष्टोपस्थितेस्तद्भेदाग्रहेन निवर्त्तकः, शुक्त्यभावासंसर्गाग्रहश्च नकारस्यार्थ इति नान्यथाख्यातिः। अनिष्टाभेदग्रहस्य निवर्त्तकत्वे च रजत एव नेदं रजतमिति

ऽपि, 'अकिञ्चित्करः' न संशयापादकः। अनुमितिरूपामन्यथाख्यातिमाशङ्कते, 'न चेति, 'संशयानन्तरमिति जलह्रदादौ वह्निसंशयानन्तरमित्यर्थः, 'धूमभ्रमात्' उपस्थितधूमासंसर्गाग्रहात्, 'वह्न्यर्थिप्रवृत्तिः' वह्न्यर्थिनिष्कम्पप्रवृत्तिः, 'तेन' धूमभ्रमेण। 'तस्य' धूमस्य 'वह्न्यसंसर्गाग्रहः' ह्रदादौ वह्न्यसंसर्गाग्रहः, 'तस्य' ह्रदादौ वह्न्यसंसर्गाग्रहस्य, 'वह्न्यनुमितिरिति अत इत्यादिः अतोह्रदादिविशेष्यक-वह्न्यनुमितिरेव द्वारमित्यर्थः, ह्रदविशेष्यक-वह्न्यनुमितिरेव चान्यथाख्यातिरिति भावः। स्वतन्त्रनिर्वह्निस्मृत्यसमवहिता स्वतन्त्रवह्निस्मृतिरेव द्वारमित्याह, 'लिङ्गभ्रमस्येति। न चैवं ह्रदादौ धूमभ्रमे सति महानसादावपि निर्वह्निभ्रमो न स्यात् तस्य तदुपस्थितिप्रतिबन्धकत्वादिति वाच्यं। यत्र लिङ्गभ्रमस्तत्र तदभावव्यवहारकैकोद्युपस्थितेरेव फलबलेन प्रतिबन्धकत्वकल्पनादिति भावः। 'नियमतः' व्याप्तिज्ञानसहभावेन[१], 'संशयान्यथाख्याती' इति लिङ्गभ्रमस्य वह्न्यनुमितिजनकत्वे अन्यथाख्यातिः, तदजनकत्वे प्रागेव लिङ्गभ्रमानन्तरमपि संशय इत्यर्थः। 'न विशेष इति धूमभ्रमाधीनवह्न्यर्थि-

---

(१) व्याप्तिज्ञानसहकारेणेति ग०।

त्वा न निवर्त्तेत, अन्यथान्यथाख्यात्यापत्तेः। अत एव रजत एव नेदं रजतमिति ज्ञानेऽपि न प्रवृत्त्यन्यथाख्याती रजतभेदासंसर्गाग्रहात्। ननु रजत-रङ्गयोरिमे रङ्ग-रजते इत्यत्र प्रत्येकमुभयभेदाग्रहे युगपत्प्रवृत्तिनिवृत्ती स्यातामिति चेत्। न। एवंविधभ्रमे माना-

---

प्रवृत्तिहेतुज्ञानस्य(१) न विशेष इत्यर्थः। 'लिङ्गज्ञानेति, स्वतन्त्रवह्निस्तेरद्बोधकविधया लिङ्गज्ञानजन्यत्वेऽपि पर्व्वतानुभवस्य लिङ्गज्ञानजन्यत्वमतोजन्यत्वं विहाय 'अनन्तरभावित्वमात्रमुक्तं। न चैवं यदानुमितौ न तत्प्रतिसन्धानं तत्रानुमिनोमीत्यनुव्यवसायो न स्यात् संशयानुत्तरप्रत्यक्षेऽपि लिङ्गज्ञानजन्यत्वप्रतिसन्धानादनुमिनोमीत्यनुव्यवसायापत्तिश्चेति वाच्यं। तन्मते अनुमितित्वजातेरभावेन लिङ्गज्ञानजन्यत्वस्यैव तादृशानुव्यवसायविषयत्वात् तदप्रतिसन्धाने तादृशानुव्यवसायस्येष्टत्वात् एवं संशयोत्तरप्रत्यक्षेऽपि तत्प्रतिसन्धानदशायां तादृशानुव्यवसायस्येष्टत्वादिति भावः। 'उभयसम्भवादिति त्वानुमिनोमीत्यनुव्यवसायस्य प्रत्यक्षभ्रमे तादृशानुव्यवसायाभावस्य च सम्भवादित्यर्थः। प्रवृत्तिवन्निवृत्तिमपि अन्यथोपपादयति, 'एवमिति, 'स्वतन्त्रोपस्थितेति 'स्वातन्त्र्येण' अभावाविशेषणत्वेन, या अनिष्टस्य इदन्त्वावच्छिन्ननिवृत्तिविशेष्यस्य चोपस्थितिः तत्सहकृतः इदन्त्वावच्छिन्ननिवृत्तिविशेष्यानिष्टयोर्भेदाग्रह इत्यर्थः। 'अनिष्टं'

---

(२) धूमभ्रमाधीनवह्निज्ञानस्येति ग०।

भावात्। कार्योन्नेयधर्माणां यथाकार्य्यमुन्नयनात् क्रमोत्पन्नज्ञानयोर्भेदाग्रहादेकत्वाभिमानः। अन्यथा तवापि स्वतन्त्रोभयभेदाग्रहात्प्रत्येकं रजतं रङ्गं वेति[1] संशयः स्यात्। यदेव वा तत्र विपर्य्ययनियामकन्तत एव प्रवृत्ति-निवृत्ती स्यातां, तद्धेतोरेवेतिन्यायात्।

स्वजनकद्वेषप्रकारीभूतधर्म्माश्रयः शुक्त्यादिः, तदुपस्थितिश्च शुक्तित्वादिरूपेण। स्वातन्त्र्यविशेषणप्रयोजनमाह, 'तेनेति, शुक्ताविति शेषः। 'अनिष्टोपस्थितेः' शुक्त्युपस्थितेः। यद्यपि धर्म्मिज्ञानरूपा स्वातन्त्र्येण शुक्त्युपस्थितिः तत्राप्यस्ति तथाप्यनिष्टतावच्छेदकशुक्तित्वप्रकारेण स्वातन्त्र्येणोपस्थितिर्नास्तीति भावः। अन्यत्सर्व्वं पूर्व्ववत्।

ननु न शुक्तिरित्यत्र शुक्तिभेदस्य नञर्थतया शुक्तौ शुक्तिभेदज्ञानाभ्युपगमे अन्यथाख्यात्यापत्तिः, तदनभ्युपगमे इदं न शुक्तिरिति वाक्यप्रयोगानुपपत्तिः तादृशवाक्यप्रयोगं प्रति इदन्त्वावच्छिन्नशुक्तिविशेष्यक-शुक्तिभेदप्रकारकज्ञानस्य हेतुत्वादित्यत आह, 'शुक्त्यभावेति इदन्त्वावच्छिन्नशुक्तावुपस्थितशुक्तिभेदासंसर्गाग्रहश्चेत्यर्थः, 'नस्यार्थइति[2] इदं न शुक्तिरितिनञ्शब्दघटितवाक्यप्रयोगकारणमित्यर्थः, शुक्तित्वप्रतियोगिताकभेदस्यैवात्र नञर्थतया यथाश्रुतासङ्गतेरिति ध्येयं।

---

(१) रङ्गं वा रजतं वेतीति ख०।

(२) 'नस्यार्थ इतीत्यनेन पाठधारणं कस्यचित् मूलपुस्तकस्य तादृशपाठमनुसृत्य इत्यनुमीयते, अस्माल्लब्धमूलपुस्तकेषु सर्व्वत्रैव 'नकारस्यार्थः' इत्ययं पाठो वर्त्तते।

वतु "प्रसक्तप्रतिषेधात्मा बाधोऽख्यातौ न युज्यते।
साधयत्यन्यथाख्यातिं बाध एव हि नः स्फुटं" ॥
इति तद्विपरीतं, परस्परविरुद्धत्वाविशेषेण बाध्यत्वा-

नन्विदन्त्वावच्छिन्ननिवृत्तिविशेष्ये अनिष्टाभेदग्रह एव गुरूणां
त्यं निवर्त्तक इति सत्यां जिज्ञासायामाह, 'अनिष्टाभेदेति,
त्वेति ज्ञात्वेत्यर्थः, 'न निवर्त्तेतेति इदन्त्वावच्छिन्नतद्रजत-
विशेष्यक-रजतभिन्नत्वप्रकारकनिवृत्तिर्न जायेतेत्यर्थः, इदन्त्वावच्छिन्ने
जते रजतभिन्नाभेदज्ञानविरहादित्यर्थः, 'अन्यथा' इदन्त्वावच्छिन्ने
जते रजतभिन्नाभेदग्रहे। प्रवर्त्तकस्वातन्त्र्यविशेषणव्यावृत्तिमाह,
त एवेति स्वातन्त्र्यविशेषणादेवेत्यर्थः, 'न प्रवृत्त्येति रजते रजत-
दाग्रहे प्रवृत्त्यापत्तिः तद्भेदग्रहे अन्यथाख्यात्यापत्तिरित्यर्थः, 'रजत-
देति, 'असंसर्गाग्रहः' संसर्गाग्रहाभावः संसर्गग्रह इति यावत् भेदे
जतस्य संसर्गग्रहादिति फलितार्थः, तथाचाभावाविशेषणत्वरूप-
तन्त्र्येण रजतस्य उपस्थितिर्नास्तीति भावः। 'इमे रङ्ग-रजते इति
जते रङ्गत्वभ्रमे रङ्गे च रजतत्वभ्रमे इत्यर्थः, 'उभयभेदाग्रहे' रजत-
ङ्गोभयभेदाग्रहे, 'युगपत्प्रवृत्ति-निवृत्ती इति एकस्मिन्नेव रजते
र्मिणि रजतत्वप्रकारकप्रवृत्ति-रङ्गत्वप्रकारकनिवृत्त्योर्युगपदुत्पत्त्या-
त्तिरेवं रङ्गेऽपीत्यर्थः, रजतभेदाग्रह-रङ्गभेदाग्रहयोः रजत-रङ्गयोः
तन्त्रोपस्थितेश्च सत्त्वादिति भावः। 'एवंविधभ्रम इति युगपद्रजत-
ङ्गयोः स्वतन्त्रोपस्थितौ इदन्त्वरूपेण रजत-रङ्गयोर्युगपदनुभवे च
नाभाव इत्यर्थः। तत्र हि कार्य्यं मानं प्रत्यक्षं वा आद्ये 'कार्य्येति,

व्यवस्थितेः। विरुद्धार्थकतयोत्पन्नत्वञ्च तुल्यं। पूर्वेणापि
क्वचित्परस्य बाधात्। तस्माद्भेदाग्रहात् प्रसञ्जितो
व्यवहारो भेदग्रहाद्बाध्यत इति युक्तं। उपेक्षाभ्रमे

प्रकृते युगपत्प्रवृत्ति-निवृत्तिलक्षणकार्य्यस्यानन्भवादिति भावः।
अन्ये 'क्रमेति, यद्यपि ज्ञानचतुष्टयमेव तदभ्युपगतं तथापि ग्रहणत-
स्मरणत्वाभ्यामैक्यविवक्षया द्विवचनं। न च तथापि ज्ञानचतुष्टयस्य
एकदा असत्त्वात् कथं तेष्वेकत्वाभिमान इति वाच्यं। स्मरणोपनी-
तानां ज्ञानचतुष्टयानां भेदाग्रहादभेदाभिमान इत्यभिप्रायात्।
'अन्यथेति यद्येकदैव स्वातन्त्र्येणोभयोपस्थितिरित्यर्थः, 'स्वतन्त्रोभयोप-
प्रत्येकं स्वतन्त्रोपस्थितयोः रजत-रङ्गयोर्भेदाग्रहादित्यर्थः। ननु मम
प्रत्येकं स्वतन्त्रोपस्थितरजत-रङ्गोभयभेदाग्रहसत्त्वेऽपि रजते रङ्गत्व-
भ्रमजनकदोषेण रजतत्वविशिष्टज्ञानप्रतिबन्धाद्रङ्गे रजतत्वभ्रमजनक-
दोषेण रङ्गत्वविशिष्टज्ञानप्रतिबन्धान्न तत्र संशय इत्यत आह, 'यदेव-
वेति, 'विपर्य्ययनियामकं' एकैकविशिष्टबुद्धिमात्रोत्पादनियामकं अपर-
कोटिविशिष्टबुद्धिप्रतिबन्धकमिति यावत्, 'प्रवृत्ति-निवृत्ती इति रङ्गे
रजतत्वप्रकारकप्रवृत्तिमात्रं रजते रङ्गत्वप्रकारकनिवृत्तिमात्रमाख्या-
मित्यर्थः, तथाच ममापि रङ्गे रजतत्वभ्रमजनकदोषो रङ्गत्वप्रकारक-
निवृत्तिप्रतिबन्धकः रजते च रङ्गत्वभ्रमजनकदोषो रजतत्वप्रकारक-
प्रवृत्तिप्रतिबन्धक इति भावः। 'तद्धेतोरेवेति रजतविशेष्यक-रजतत्व-
विशिष्टज्ञानाभाव-रङ्गविशेष्यक-रङ्गत्वप्रकारकज्ञानाभावयोः प्रयोजका-
द्दोषादेव रजतविशेष्यक-रजतत्वप्रकारकप्रवृत्त्यभावोरङ्गविशेष्यक-रङ्गत्व-

ञ्च शब्दप्रयोगो बाध्यः। तदीयतामात्रस्वभावत्वात् त-
द्विषयत्वस्य कथं रजतीयमात्रज्ञानमरजतीयं स्वभाव-
बाधात्। न चोभयीयं, समूहालम्बनापत्तेः। तदुक्तं।

प्रकारकनिवृत्त्यभावश्चास्तु किं रजतविशेष्यक-रजतत्वविशिष्टज्ञानाभाव-
रङ्गविशेष्यक-रङ्गत्वविशिष्टज्ञानाभावयोस्तत्प्रयोजकत्वेनेत्यर्थः। 'प्र-
त्यप्रतिषेधात्मेति प्रसक्तस्य तत्रारोपितस्य प्रामाण्यस्य तत्राभाव-
निश्चयरूप इत्यर्थः, 'बाधः' बाधशब्दार्थः, 'अख्याताविति तत्र
प्रामाण्यस्यारोपं विनेत्यर्थः, 'साधयतीति, अत इत्यादिः, 'बाध
इवेति विशेषदर्शनजन्यज्ञाने बाधकव्यवहारान्तर्गतबाधशब्दार्थएवे-
त्यर्थः। 'विपरीतं' सद्विपरीतं असदिति यावत्, 'परस्परेति यदि
तत्रारोपितस्य प्रामाण्यस्य तत्राभावनिश्चयजनकत्वं तद्बाधकत्वं स्वनि-
ष्ठारोपितस्य प्रामाण्यस्याभाववत्तया तज्ज्ञाप्यत्वमेव च तद्बाध्यत्वं तदा
पूर्वोत्तरज्ञानयोः प्रामाण्याभाववत्ताज्ञापकताप्रयोजकस्य परस्पर-
विरुद्धार्थकत्वस्याविशेषेण बाध्यपदप्रयोगनियमभङ्गापत्तेरित्यर्थः, बा-
धकेऽपि बाध्यपदप्रयोगापत्तेरिति भावः। ननु तद्विरुद्धार्थकत्वे सति
तदुत्तरोत्पन्नत्वं तन्निष्ठप्रामाण्याभाववत्ताज्ञापकतायां प्रयोजकं न तु
तद्विरुद्धार्थकत्वमात्रमित्यत आह, 'विरुद्धार्थकतयेति तद्विरुद्धा-
र्थकत्वे सति तदुत्तरोत्पन्नत्वञ्चेत्यर्थः, 'तुल्यं' बाधतुल्यं, बाध्येऽपि
तद्विरुद्धार्थकत्वे सति तदुत्तरोत्पन्नत्वमस्तीत्यर्थः। एतदेवोपपादयति,
'पूर्वेणापीति, 'बाधात्' प्रामाण्याभावज्ञापनात्।

मिश्रास्तु 'तुल्यं' तद्विरुद्धार्थकत्वमात्रस्य तुल्यं, यथा तद्विरु-

"अन्यस्य ह्यन्यथा भानं प्रतीत्यैव पराहतं। परस्मिन् भासमाने तु न परस्मासते यतः" इति। विषयं विनैव तदाकारं ज्ञानमिति साकारवादः। ज्ञानायथार्थत्वे

द्धार्थकत्वमात्रं न तन्निष्ठप्रामाण्याभावज्ञापकतायां प्रयोजकं, तथा तद्विरुद्धार्थकत्वे सति तदुत्तरोत्पन्नत्वमपि न तत्र प्रयोजकमिति यावत्, अत्र हेतुमाह, 'पूर्व्वेणापीति, तथाच व्यभिचारान्न प्रयोजकमिति भावः इति व्याचख्युः।

नन्वेवं कस्यावत् तत्र बाधकशब्दार्थ इत्यत आह, 'तस्मादिति, 'भेदाग्रहात्' अगृहीतभेदकज्ञानद्वयरूपादिदं रजतमितिपूर्व्वोत्पन्नज्ञानात्, 'प्रसञ्जितः' प्रसक्तः, 'व्यवहारः' प्रवृत्त्यादिः, 'भेदग्रहात्' उत्तरोत्पन्नेदं न रजतमिति शुक्तिविशेष्यक-रजतभेदज्ञानात्, 'बाध्यते' प्रतिबध्यते, 'इतियुक्तमिति इत्यस्यैव बाधकशब्दार्थत्वं युक्तमित्यर्थः। तथाच तत्रारोपितस्य प्रामाण्याभावनिश्चायकत्वं न तद्बाधकत्वं अपि तु तज्जन्यप्रवृत्त्यादिरूपव्यवहारप्रतिबन्धकत्वमेव तद्बाधकत्वं, पूर्व्वोत्पन्नज्ञानञ्च नोत्तरज्ञानजन्यप्रवृत्त्यादिप्रतिबन्धकमसत्त्वादिविशेषदर्शनाद्यभावविशिष्टस्यैव विरोधिविषयकज्ञानस्य प्रतिबन्धकत्वाच्चेति भावः। नन्वेवमुपेक्षाभ्रमेण प्रवृत्ति-निवृत्त्योरजननात् तदुत्तरोत्पन्नविरोधिविषयकज्ञाने तद्बाधकव्यवहारो न स्यादित्यत आह, 'उपेक्षेति प्रवृत्ति-निवृत्त्याद्यजनकभ्रमे चेत्यर्थः,' शब्दप्रयोगः' तज्जन्यशब्दप्रयोगरूपव्यवहारः, 'बाध्यः' प्रतिबध्यः।

अन्यथाख्यातौ दूषणान्तरमाह, 'तदीयतेति तादात्म्यसम्बन्धे

ज्ञानमात्रस्य तच्छङ्कया न निष्कम्पप्रवृत्तिः। न च दोषाजन्यत्वादिना विश्वासः, भ्रमादविश्वासे प्रवृत्त्यभावापत्तेः। नापि तज्ज्ञानात्, ज्ञानत्वेन तत्राप्य-

---

तद्वन्मात्रवृत्तित्वव्याप्यत्वादित्यर्थः, 'तद्विषयत्वस्य' तन्निरूपितज्ञानविशेष्यत्वस्य, तत्प्रकारकत्वावच्छिन्नज्ञानविशेष्यत्वस्येति यावत्। 'रजतीयमावज्ञानमिति रजतमात्रीयस्य रजतत्वस्य ज्ञानमित्यर्थः, 'अरजतीयमिति अरजतविशेष्यकमित्यर्थः, ज्ञानजिष्ठरजतत्वप्रकारकत्वं कथमरजतविशेष्यकत्वावच्छिन्नमिति तु समुदितार्थः। 'स्वभावव्याघातादिति व्याप्तिव्याघातप्रसङ्गादित्यर्थः। 'उभयीयमिति तत्प्रकारकत्वावच्छिन्नज्ञानविशेष्यत्वं तद्वत्तदभाववदेतदुभयवृत्तित्वव्याप्यमित्यर्थः, 'समूहालम्बनेति निखिलरजतत्वप्रकारकज्ञानानामरजतविशेष्यकत्वापत्तेरित्यर्थः। 'तदुक्तमिति प्राभाकरैरित्यर्थः। 'अन्यस्येति तदनाश्रयस्य तत्प्रकारेण भानमित्यर्थः, 'प्रतीत्यैव' प्रतीतिविशेष्यत्वस्वभावादेव, तत्प्रकारकत्वावच्छिन्नज्ञानविशेष्यत्वस्य तद्वन्मात्रवृत्तित्वनियमादेवेति यावत्। ननु तत्प्रकारकत्वावच्छिन्नज्ञानविशेष्यत्वं न तद्वन्मात्रवृत्तित्वव्याप्यं अपि तु तद्वत्तदभाववदुभयवृत्तित्वस्यैव व्याप्यमित्यत आह, 'परस्मिन्निति तदाश्रय इत्यर्थः,'भासमाने' तत्प्रकारेण भासमाने, 'न परं भासते यत इति न तदनधिकरणं नियमतो भासते यत इत्यर्थः। तथाच निखिलरजतत्वादिप्रकारकज्ञानानां तदनधिकरणविशेष्यकत्वापत्त्या न तथा नियम इति भावः।

अन्यथाख्यातौ दूषणान्तरमाह, 'विषयं विनैवेति विना सन्निकर्षं

विश्वासात्। तदुच्यते। "अहोवत महानेष प्रमादो-धीमतामपि। ज्ञानस्य व्यभिचारित्वे विश्वासः किंनिबन्धनः" इति॥ भ्रमस्य च सन्मात्रविषयकत्वेनायथार्थता,

रजतत्वभानासम्भवात् रजतत्वरूपं विषयं विनैव सन्निकर्षस्यासम्भवात्-तत्तदाकारमेव ज्ञानं वाच्यं इत्यत्र स्वप्रकाशमर्य्यादया स्वनिष्ठरजतत्वमादाय रजतत्वप्रकारकं शुक्ताविदं रजतमिति ज्ञानं तथाच साकारत्वापत्तिरित्यर्थः। साकारत्वं ज्ञानस्य रजतत्वादिधर्म्माश्रयत्वं।

अन्यथाख्यातौ दूषणान्तरमप्याह, 'ज्ञानायथार्थत्व इति, 'तच्छङ्कया' ज्ञानत्वरूपसाधारणधर्म्मदर्शनेन सर्व्वत्र ज्ञाने अयथार्थत्वशङ्कया। 'विश्वासः' प्रामाण्यनिश्चयः, दोषाजन्यत्वं ज्ञातं स्वरूपसत्त्वाविश्वासहेतुः, अन्ये 'भ्रमादिति, भ्रमादप्रवृत्त्यापत्तेरिति(१) योजना, 'अविश्वासे' विश्वासाभावे, तत्र दोषाजन्यत्वाभावादिति भावः। आद्ये 'नापीति, 'तत्रापि' दोषाजन्यत्वज्ञानेऽपि। 'अहोवतेति, 'वत' खेदे, 'महानेष प्रमादः' एषा महती अनवधानता, 'धीमतामपि' धीमतां नैयायिकानामपि, 'व्यभिचारित्वे' व्यधिकरणप्रकारकत्वे, 'विश्वासः' अयथार्थत्वशङ्कानिवृत्तिः।

अन्यथाख्यातौ दूषणान्तरमप्याह,(२) 'भ्रमस्य चेति, 'नायथार्थतेति तथाच भ्रमस्य सन्मात्रविषयकत्वे कथमयथार्थत्वमित्यर्थः, सन्मात्रविषयकत्वमेव यथार्थत्वमिति भावः। 'असद्विषयकत्व इति

(१) 'प्रवृत्त्यभावापत्तेः' इत्यत्र 'अप्रवृत्त्यापत्तेः' इति कस्यचिन्मूलपुस्तकस्य पाठमनुसृत्येदं।

(२) अन्यथाख्यातौ बाधकान्तरमाहेति ग०।

असद्विषयकत्वेऽसत्ख्यातिः। न च तत्र हेतुरस्ति, शब्द-
ख्याप्तोक्तस्य निर्दोषस्य लिङ्गस्य चाहेतुत्वात्। न च
शब्दानुमानाभासात्सा। योग्यतादिमत्तया शब्दस्य

तदुपरागेणासद्वैशिष्ट्यविषयकत्व इत्यर्थः, 'असत्ख्यातिः' असत्ख्यात्या-
पत्तिः, तस्याश्च नैयायिकैरनभ्युपगमादिति भावः। अन्यथाख्यातौ
हेत्वभावरूपं बाधकमाह, 'नचेति नवेत्यर्थः, 'तत्र' अन्यथाख्यातौ।
ननु शब्दादेवान्यथाख्यातिरुत्पत्स्यतीत्यत आह, 'शब्देति, 'आप्तोक्तस्य'
प्रकृतवाक्यार्थयथार्थज्ञानवदुक्तस्य, 'निर्दोषस्य' दोषाजन्यस्य, 'अहेतु-
त्वात्' अन्यथाख्यातावहेतुत्वात्। 'सा' अन्यथाख्यातिः, 'योग्यता-
दीत्यादिपदात् यथार्थतात्पर्य्यकत्वस्य परिग्रहः। 'न चाभास इति।
न च तत्रापि लिङ्गाद्यसंसर्गाग्रहस्य हेतुत्वमिति वाच्यं। लाघवेन
विशिष्टज्ञानस्यानुमित्यादिहेतुत्वादिति भावः। न च प्रत्यक्षत एव
तदुत्पत्तिरित्याह, 'इन्द्रियस्येति, 'सम्बद्धग्राहकत्वात्' सम्बद्धमात्र-
ग्राहकत्वात्। ननु प्रत्यभिज्ञायां तत्ताया इव संस्कारोपनीतरजतत्व-
स्य चक्षुषा शुक्तौ ग्रहः स्यादित्यत आह, 'न चेति, 'उक्तेति,
संस्कार-चक्षुषोरत्रैकविषयत्वाभावादिति भावः। 'दोषवशात्' दोष-
सहकारात्, इन्द्रियेणेति शेषः, 'असम्बन्धेऽपि' असन्निकृष्टेऽपि रज-
तत्वे, 'विजातीयकार्य्यं' साक्षात्कारातिरिक्तमन्यथाख्यातिरूपं ज्ञानं,
'भ्रमजनकत्वात्' भ्रमाजनकत्वात्, दोषस्य शुक्तित्वग्रहप्रतिबन्धमात्र-
प्रयोजकत्वाभ्युपगमादिति भावः। 'न हीति न वेत्यर्थः। ननु यथा-
भस्मकरूपदोषसहकारात् उद्दीप्तानलस्य आहारभस्मलक्षणविजाती-

लिङ्गवत्तया पक्षस्य ज्ञानाच्छाब्दानुमिती । न चाभासे तज्ज्ञानमस्ति हेत्वभावादेव, किन्त्वगृहीतासंसर्गज्ञानद्वयं तत्र इन्द्रियस्य सम्बद्धग्राहकत्वात् । न च प्रत्य-

---

यकार्य्यजनकत्वं, तथात्रापि दोषसहकारादिन्द्रियस्य विजातीयज्ञानजनकत्वमित्यत-आह, 'भस्मकश्चेति, 'उद्भवः' उद्भूतस्पर्शविशेषः 'रसार्जनमिति, 'रसः' बल-पुष्ट्यादि । ननु यथादवदहनरूपदोषविशेषसहकृतं वेत्रबीजं कदलीवृक्षरूपविजातीयकार्य्यजनकं तथेहापि स्यादित्यत आह 'दवेति । नन्वेवं कथं कदलीवृक्ष इत्यत आह, 'भस्मन इति । अन्यथाख्यातावुक्तदोषेषु प्राचीनसम्मतिं(१) आह, 'तदुक्तमिति, 'साकारेति ज्ञानस्य साकारत्वप्रसङ्गादित्यर्थः, 'असतो न भानादिति असत्ख्यात्यनभ्युपगमादित्यर्थः, 'संविद्विरोधादिति प्रतीतिविशेष्यत्वस्वाभाव्यव्याघातात्, तत्प्रकारकत्वावच्छिन्नज्ञानविशेष्यत्वस्य तद्धर्म्मावृत्तित्वनियमव्याघातादिति यावत् । 'धियामनास्वादेति ज्ञानत्वरूपसाधारणधर्म्मदर्शनेन सर्व्वत्र ज्ञाने अयथार्थत्वप्रसङ्गादित्यर्थः, 'यत इति, 'यतः ख्यातिः', 'अन्यथा' व्यधिकरणप्रकारिका, 'नेष्टा', अतः 'सा यथार्थेति योजना । 'विवादपदं ज्ञानमिति शुक्तिविशेष्यक-रजतत्वप्रकारकप्रवृत्तिजनकं ज्ञानमित्यर्थः, 'न व्यधिकरणेति न रजतत्वाभाववति रजतत्वप्रकारकमित्यर्थः । 'स्वव्यधिकरणेति स्वव्यधिकरणधर्म्मप्रकारत्वावच्छिन्नविशेष्यतेत्यर्थः, 'स्व'

---

(१) प्राचीनसंवादमिति ख० ।

भिज्ञानवत्, उक्तोत्तरत्वात्। न च दोषवशादसम्बद्धे-
पि विजातीयं कार्य्यं, दोषस्याजनकत्वात्। नहि
दुष्टात्[1] कुटजबीजाद्यवाङ्कुरः। भस्मकश्च न दोषः,
किन्तु वह्नेरुद्भवः, तस्य च दाहसामर्थ्यं दृष्टमेव। रसा-
दिनन्तु न भवति, भक्ष्यदाहात्। दवदहनदग्धवेत्र-
बीजञ्च नष्टमेव। तद्भस्मनः कदलीजनकत्वं। तदुक्तं।

विषयता। नच सर्व्वं प्रमेयमिति ज्ञानत्व व्यभिचारः तद्विषयता-
धिकरणप्रकाराप्रसिद्धेरिति वाच्यं। तादृशप्रतियोगि यद्यत् तद-
त्वस्य साध्यस्य तत्रापि सत्त्वादिति भावः। 'ज्ञानमात्रेति, गुणत्वे
व्यभिचारवारणाय 'मात्रपदं ज्ञानान्यव्यावृत्त्यर्थकं, 'धर्म्मेति वृत्तेः
समवायतालाभाय, तेन ज्ञानान्यासमवेतत्वादिति फलितं। 'प्रमा-
त्वदिति सर्व्वांशे प्रमामात्रवृत्तितत्तत्प्रमात्ववदित्यर्थः, तेन न भ्रमे-
त्यंशतः प्रमात्वसत्त्वात् साध्यवैकल्यमिति ध्येयं। 'इति प्रतिरोध इति
इतिप्रतिबन्धिः, पूर्व्वानुमानात् ख्यातावन्यथात्वाभावसिद्धिवत् एतद-
नुमानात्पक्षधर्म्मताबलेन ख्यातेरन्यथात्वस्यापि सिद्ध्यापत्तिरिति यावत्।
यथाश्रुतन्तु न सङ्गच्छते भिन्नपक्षकतया प्रकृतसाध्याभावासाधकतया
च सत्प्रतिपक्षत्वासम्भवात्। अत्र चाक्षुषपदेन तन्मते अप्रसिद्धेः सत्य-
पदेन बाधस्य द्वितीयज्ञानपदेन संयोगादिमादाय सिद्धसाधनस्य
निरासः। प्रथमं ज्ञानपदञ्च सम्पातायातं। सत्यत्वञ्च रजतत्वाभाववति

---

(१) भस्मादिति ग०।

"साकारपातादसतोन भानात्संविद्विरोधादथ हेत्वभावात्। धियामनाश्वासभयाच्च नेष्टा यतोऽन्यथाख्यातिरतो यथार्था" इति ॥ तस्माद्विवादपदं ज्ञानं न व्यधिकरणप्रकारकं ज्ञानत्वात् सत्यज्ञानवत्। भेदाग्रहजन्यरजतत्वप्राकारकशुक्तीच्छायां प्रतियोगिप्रसिद्धिः। ज्ञानत्वं स्वव्यधिकरणप्रकारावच्छिन्नविषयता-

---

रजतत्वप्रकारकत्वाभाववत्त्वं, न तु रजतत्ववति रजतत्वप्रकारकत्वं घटादिधी-रजतत्वनिर्विकल्पकाभ्यां सिद्धसाधनापत्तेः। न च द्वितीयज्ञानं रजतत्वप्रकारकत्वेन विशेषणीयं, चाक्षुषरजतत्ववद्विशेष्यक-रजतत्वप्रकारकातिरिक्तरजतत्वप्रकारकज्ञानञ्च रजतत्वप्रकारक-त्वाचादिकमेव प्रसिद्धमिति वाच्यं। दृष्टान्तस्य साधनविकलत्वापत्तेः, रसनस्य द्रव्यग्राहकत्वात् अलौकिकप्रत्यक्षस्य च परैरनभ्युपगमात्।

केचित्तु सत्यत्वं गुणत्ववति गुणत्वप्रकारकत्वं, द्वितीयज्ञानञ्च गुणत्वप्रकारकत्वेन विशेषणीयं, रसनाया अपि गुणत्वग्राहकत्वाच्च न न दृष्टान्तस्य साध्यवैकल्यं, परैरपि अखण्डोपाधिरूपस्य गुणत्वस्याभ्युपगमाच्च न साध्याप्रसिद्धिरित्याहुः।

'इन्द्रियत्वादिति। नच रजतत्वप्रमाजनकखण्डचक्षुर्व्यक्तौ व्यभिचार इति वाच्यं। तादृशजनकवृत्तीन्द्रियत्वव्याप्यजातिमत्त्वस्य साध्यत्वादिति भावः। अतएव च इन्द्रियत्वविवेचने न वैयर्थ्यसम्भावनेति ध्येयं। ननु निरुपाधित्वमेवानुकूलतर्कः स्यादित्याशङ्कायामुपाधिमाह 'चाक्षुषेति, 'जनकत्वं' स्वरूपयोग्यत्वं, नातो ज्ञानानुपहिते साध्या-

प्रतियोगिवृत्ति न भवति ज्ञानमात्रवृत्तिधर्म्मत्वात् प्रमात्ववत्। न च चक्षुश्चाक्षुषसत्यज्ञानातिरिक्तज्ञानजनकं इन्द्रियत्वाद्रसनवदिति प्रतिरोधः, अप्रयोजकत्वात् चाक्षुषज्ञानातिरिक्तज्ञानजनकत्वोपाधेः अन्यथाख्यातेरपि धर्म्म्यंशे सत्यत्वात्तुल्यन्यायतया व्यापकेऽपि व्यर्थविशेषणत्वाच्च। एवं स्वरूपतो विषयतश्चागृहीतभेदं ज्ञानद्वयमेव विसंवादिप्रवृत्तिहेतुः। तदुक्तं। "सन्निहितरजतशकले रजतमतिर्भवति यादृशी सत्या।

व्यापकत्वमिति भावः। बाधमाह, 'अन्ययेति, 'धर्म्म्यंशे' धर्म्मितावच्छेदकांशे, इदमुपलक्षणं रजतांशे चेत्यपि बोध्यं। 'सत्यत्वादिति रजतत्वाभाववति रजतत्वप्रकारकत्वाभाववत्त्वादित्यर्थः, रजतत्वप्रकारकत्वस्याव्याप्यवृत्तित्वादिति भावः। ननु सत्यत्वं रजतत्वाभाववति रजतत्वप्रकारकेतरत्वं अन्योन्याभावश्च नाव्याप्यवृत्तिरित्यत आह, 'तुल्येति, ज्ञानजनकत्वमात्रस्यैव साध्यत्वसम्भवादिति भावः। उपसंहरति, 'एवमिति, स्वरूपतोऽगृहीतभेदत्वं भ्रमत्वेनाज्ञातत्वलाभाय। 'सन्निहितेति सन्निकृष्टरजतखण्डे, 'सत्या रजतमतिः', 'यादृशी' यथा प्रवृत्तिजनिका, 'भेदानध्यवसायात्' स्वरूपतो भेदाग्रहात्, 'इयमपि' अगृहीतासंसर्गक-शुक्ति-रजतधीरपि, 'तादृक्' तथा प्रवृत्तिजनिका भवतीत्यर्थः। नन्वेवं विसंवादिप्रवृत्तिस्थलीये इदं रजतमिति ज्ञाने कथमयथार्थत्वव्यपदेशः इत्यत आह, 'व्यवहार-

भेदानध्यवसायादियमपि तादृक्परिस्फुरति" इति। व्यवहारमात्रस्य भेदाग्रहजन्यत्वेऽपि तस्य संवाद-तद्भावाभ्यां ज्ञाने यथार्थत्वायथार्थत्वव्यपदेशः। अत एव लोके उष्णञ्जलमिति ज्ञाने नायथार्थत्वव्यपदेशः। उपेक्षाज्ञाने तु तद्व्यपदेशस्तद्योग्यत्वात्।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे अन्यथाख्यातिवादपूर्व्वपक्षः।

मात्रस्येति, 'भेदाग्रहजन्यत्वेऽपि' स्वरूपतोऽगृहीतभेदकप्रमाजन्यत्वेऽपि, 'स्वरूपतोऽगृहीतभेदेति भ्रमत्वेनाज्ञातत्वलाभार्थं स्वरूपकथनं, 'तस्य' व्यवहारस्य। 'अतएव' विसंवादिप्रवृत्तिजनकत्वस्यायथार्थत्वव्यपदेशनियामकत्वादेव, 'उष्णं जलमितीति जले परम्परासम्बन्धेन उष्णत्वप्रकारकज्ञान इत्यर्थः। तस्य विसंवादिप्रवृत्त्यजनकत्वादिति भावः। 'तद्योग्यत्वात्' विसंवादिप्रवृत्तिस्वरूपयोग्यत्वात्।

इति श्रीमथुरानाथतर्कवागीशविरचिते प्रत्यक्षखण्डरहस्ये अन्यथाख्यातिपूर्व्वपक्षरहस्यं।

अथान्यथाख्यातिवादसिद्धान्तः ।

सिद्धान्तस्तु[1] । सत्यस्थले प्रवृत्तिमात्रं प्रतीष्ट-पुरोवर्त्तिज्ञाने हेतुतया व्यवस्थितेऽतिप्रसङ्गवारणार्थं विषयतया वैशिष्ट्यमेव[2] कारणतावच्छेदकं कल्प्यते लाघवात् । कारणताग्रहसमये ज्ञान-वित्तिवेद्यतया शीघ्रो-

---

अथान्यथाख्यातिसिद्धान्तरहस्यं ।

रजतत्वादिप्रकारेण शुक्त्युपादानकविसंवादिप्रवृत्तिकारणतया लाघवादन्यथाख्यातिः सिद्ध्यतीत्याह, 'सत्यस्थले प्रवृत्तिमात्रं प्रतीति सत्यस्थलोपादानकप्रवृत्तिमात्रं प्रतीत्यर्थः, उपादानत्वस्य सप्तम्यर्थत्वात् । सत्यस्थलोपादानकत्वञ्च रजतत्वादिप्रकारेण वस्तुगत्या रजतत्वाद्यधिकरणोपादानकत्वं, तथाच रजतत्वादिप्रकारेण रजताद्युपादानकसंवादिप्रवृत्तिमात्रं प्रतीति समुदितार्थः, 'इष्ट-पुरोवर्त्तिज्ञान इति मावधारणं, पुरोवर्त्तित्वावच्छिन्ने इष्टतावच्छेदकधर्म्मवैशिष्ट्यावगाहिप्रत्यक्ष एवेत्यर्थः, पुरोवर्त्तित्वं इदन्त्वं, इष्टतावच्छेदकधर्म्मः उपादानेच्छाविषयतावच्छेदको धर्म्मः उपादानतानिरूपकप्रकारताश्रयधर्म्म इति यावत्, स च रजतत्वादिः, एवं सर्व्वत्र । एवकारात् स्वतन्त्रतादृश-

---

(१) राद्धान्तस्त्विति ख० ।
(२) विशिष्टत्वमेवेति क० ।

पस्थितिकत्वात्[१] बाधकाभावाच्च। ननु स्वतन्त्रोपस्थितेष्टभेदाग्रहः[२] कारणं, तादृशभेदाग्रहत्वञ्च कारणतावच्छेदकं[३] गौरवात् कल्पनीयोपस्थितिकत्वाच्च।

धर्म्मप्रत्यक्षकालीनपुरोवर्त्तित्वप्रकारकोपादानप्रत्यक्षमात्रस्य व्यवच्छेदः 'हेतुतया व्यवस्थिते' कारणतावच्छेदकशरीरलाघवेन कारणतयोभयवादिसिद्धे, रजतत्वादिप्रकारेण शुक्त्याद्युपादानकविसंवादिप्रवृत्तावपीति शेषः। 'अतिप्रसङ्गवारणार्थं' पुरोवर्त्तित्वावच्छिन्ने इदं रजतमित्युपादानतानिरूपकप्रकारताश्रयधर्म्मावच्छिन्नभेदग्रहदशायामपि तदुत्पत्तिवारणार्थं, 'विषयतया वैशिष्ट्यमेवेति पुरोवर्त्तित्वावच्छिन्ने उपादानतानिरूपकधर्म्मवैशिष्ट्यविषयकत्वमेवेत्यर्थः, एवकारात् स्वतन्त्रोपस्थिततादृशधर्म्मावच्छिन्नभेदाग्रहत्वव्यवच्छेदः। 'लाघवादिति कारणतावच्छेदकशरीरलाघवादित्यर्थः, परेणापि शरीरलाघवस्य हेतुत्वासिद्धेरिति भावः। हेत्वन्तरमाह, 'कारणताग्रहसमय इति प्रवृत्त्युत्पादानन्तरमेव उपादानप्रत्यक्षप्रवृत्तेः प्रत्यक्षतः कारणताग्रहसमय इत्यर्थः, 'ज्ञानवित्तीति उपादानप्रत्यक्षानुव्यवसायवेद्यतयेत्यर्थः। एतच्च इच्छादिज्ञानानुव्यवसायस्य यौगपद्याभ्युपगमेन। 'शीघ्रोपस्थितिकत्वादिति अवश्योपस्थितिकत्वादित्यर्थः। 'अवश्यं शीघ्रोपस्थितिकत्वात्' इति पाठस्तु प्रामादिकः। न च पुरोवर्त्तित्वावच्छिन्ने उपादानतानिरूपकधर्म्मवैशिष्ट्यविषयकत्वस्यानुव्यवसायग्राह्यत्वे स्वतः प्रामाण्यापत्ति-

---

(१) अवश्यं शीघ्रोपस्थितिकत्वादिति क०।
(२) स्वतन्त्रोपस्थितेष्टभेदग्रहस्याभावः इति ख०, ग०।
(३) हेतुतावच्छेदकमिति ख०, ग०।

विशिष्टज्ञानेऽपि हेतुत्वेनावश्यककत्वाद्भेदाग्रह एव हेतुरिति चेत्। न। विशिष्टज्ञाने तद्धेतुत्वस्य तत्कल्पनीयेतरकल्प्यत्वेन प्रवृत्तिकारणताग्रहसमये तदनुप-

---

रेति वाच्यं। तद्वति तद्वैशिष्ट्यावगाहित्वस्य तद्वति तत्प्रकारकत्वस्य च प्रामाण्यतया तस्य प्रामाण्यत्वाभावादिति भावः। एतत्स्वमतेनाभिहितं, परमते विसंवादिप्रवृत्तौ विशिष्टप्रत्यक्षस्य भ्रमरूपस्याप्रसिद्धेनाहेतुतया कारणताग्रहसमये अनुव्यवसायात् ताद्रूप्येणानुस्थितेरिति मन्तव्यं। सति बाधके उपस्थितत्वमप्रयोजकमत आह, बाधकाभावाच्चेति। 'दृष्टभेदाग्रहः' उपादानतानिरूपकधर्म्मावच्छिन्नभेदाग्रहः, इदन्त्वरूपेणोपादानव्यक्तिप्रत्यक्षमहकृत इति शेषः। गौरवादिति कारणतावच्छेदकशरीरगौरवादित्यर्थः। 'कल्पनीयेति उपादानव्यक्तिप्रत्यक्ष-प्रवृत्त्योः कारणताग्रहदशायामनियतोपस्थितिकत्वाच्चेत्यर्थः।

मिश्रानुयायिनस्तु 'सत्यस्थल इति संवादिप्रवृत्ताविवार्थः, विशिष्टज्ञानस्यान्वय-व्यतिरेकसहचारज्ञानाभ्यामिति शेषः। 'कल्प्यत इति अग्रेतनेन चास्यान्वयः। 'इष्ट-पुरोवर्त्तिज्ञाने' इष्टतावच्छेदकधर्म्मप्रकारकसमकालीनपुरोवर्त्तिप्रत्यक्षे, इष्टतावच्छेदकधर्म्मः पूर्व्ववदुपादानतानिरूपकप्रकारताश्रयोधर्म्मः, पुरोवर्त्ती च इदन्त्वविशिष्टोपादानव्यक्तिः, 'हेतुतया व्यवस्थिते' हेतुतया निश्चिते, 'अतिप्रसङ्गवारणार्थं' नेदं रजतमिति भेदग्रहदशायामप्युक्तप्रत्यक्षात् प्रवृत्त्यापत्तिवारणाय, 'विषयतया वैशिष्ट्यमेवेति इदन्त्वविशिष्टे उपादानतानिरूपकप्रकार-

स्थितेः। न चैवं मिथ्याज्ञानकल्पने गौरवं, प्रमाण-प्रवृत्तिसमये सिद्ध्यसिद्धिपराहतत्वेन फलमुखगौरव-स्यादोषत्वात्। प्रमाणवतस्तस्य न्याय्यत्वात्। एवञ्च

ताश्रयधर्म्मप्रकारकत्वमेवेत्यर्थः, तथाच तन्निष्ठप्रकारतानिरूपित-तद्व्यक्त्युपादानकप्रवृत्तित्वेन इदन्त्वधर्म्मितावच्छेदकक-तद्व्यक्तिविशेष्यक-तत्प्रकारकप्रत्यक्षत्वेन सामान्यकार्य्य-कारणभाव इति भावः, इदं पूर्व्ववत्। न च कारणतानिश्चयोत्तरमवच्छेदककल्पने प्रथमं कारण-तानिश्चय एव कथं स्यादिति वाच्यं। विशेषणतावच्छेदकीभूतधर्म्मक-तन्निष्ठावच्छेदकत्वस्य वा ग्रहं विनाप्यन्यथासिद्ध्यनिरूपकनियतपूर्व्व-वर्त्तितावच्छेदकधर्म्मवत्त्वरूपेण सामान्यतः कारणतानिश्चयसम्भवा-दन्यथा कारणतावच्छेदकतया धर्म्मसिद्धिः क्वापि न स्यादन्योन्याश्रय-ग्रासात्। अस्तु वा 'व्यवस्थित इत्यस्य व्यवस्थाप्यमान इत्यर्थः, तथाच नायं दोषः। न चैवं सत्यस्य इत्यस्य सत्यप्रवृत्त्युत्पादानन्तरमित्ये-वार्थोऽस्तु अन्वयस्तस्य व्यवस्थित इत्यनेन किमन्वय-व्यतिरेकसहचा-ज्ञानाभ्यां इति पूरणेनेति वाच्यं। प्रवृत्तौ सत्यत्वविशेषणोपादाना-सङ्गतेः प्रवृत्त्युत्पादानन्तरमित्यस्यैव सम्यक्त्वादित्याहुः। तदसत्। तद्भेदत्वादेरननुगततया विशेष्यभेदेनैव ज्ञान-प्रवृत्त्योः कार्य्य-कारण-भावभेदाद्विसंवादि-संवाद्युभयप्रवृत्तिं प्रति एकरूपेण उपादान-प्रत्यक्षस्य हेतुत्वासम्भवात्। न च रजतत्वादिप्रकारकप्रत्यक्षत्वेन कार-णता रजतत्वादिनिष्ठप्रकारतानिरूपितोपादानताकप्रवृत्तित्वेन कार्य्यता विशेष्यत्वोपादानत्वघटितसामानाधिकरण्यञ्च प्रत्यासत्तिरिति वाच्यं।

.ाभति नेदं रजतमिति भेदग्रहदशायामपि निधर्म्मितावच्छेदकात्
द्रव्यत्वादिसामान्यधर्म्मधर्म्मितावच्छेदकाच्च रजतत्वप्रकारकप्रत्यक्षाद्रजत-
.प्रकारक-तद्रूप्युपादानकप्रवृत्तिप्रसङ्गस्य दुर्व्वारत्वात्। न च विशे-
.ावच्छेदकत्वोपादानतावच्छेदकत्वोभयघटितसामानाधिकरण्यं प्रत्या
.त्तिरिति वाच्यं। उपादानप्रत्यक्षस्येदन्त्वधर्म्मितावच्छेदककस्यैव सर्व्वत्र
.वृत्तिहेतुतया तस्य तेन रूपेण कार्य्य-कारणत्वासम्भवात्। अन्यथा
.इदं रजतमिति पुरोवर्त्तिव्यक्तौ भेदग्रहदशायामपि द्रव्यत्वादिधर्म्मि-
.वच्छेदककतद्व्यक्तिविशेष्यक-रजतत्वादिप्रकारकप्रत्यक्षात् द्रव्यत्वाद्यु-
.पादानतावच्छेदकक-रजतत्वप्रकारक-तद्व्यक्त्युपादानक-प्रवृत्तिप्रसङ्गात्
.त्वाद्युपादानकप्रवृत्तेः रजतमित्याद्याकारकतया निधर्म्मितावच्छेद-
.केन प्रवृत्तेः उपादानतावच्छेदकविरहाच्च इत्यन्यत्र विस्तरः।

कारणतावच्छेदकशरीरगौरवेऽपि कल्पनालाघवात् भेदाग्रह एव
.वादिन्यां विसंवादिन्याञ्च प्रवृत्तौ हेतुरित्याशङ्कते 'विशिष्ट ज्ञाने-
.ति इदं रजतमिति भ्रम-प्रमासाधारणविशिष्टप्रत्यक्षसामान्यं प्रति
.ग्रहस्य हेतुत्वेनेत्यर्थः, 'आवश्यकत्वादिति प्रवृत्तिं प्रत्यनन्यथासि-
.नियतपूर्व्ववर्त्तिताकत्वादित्यर्थः, 'हेतुरिति संवादिन्यां विसंवादिन्याञ्च
.प्रवृत्तौ हेतुरित्यर्थः, विशिष्टज्ञानस्य नियतपूर्व्ववर्त्तित्वानन्यथासिद्धत्वो-
.पकल्पनामपेक्ष्य सिद्धनियतपूर्व्ववर्त्तिताकस्य भेदाग्रहस्यानन्यथासि-
.द्धत्वाचकल्पनाया लघुत्वादिति भावः। भ्रम-प्रमासाधारण-विशि-
.ष्टज्ञानकारणत्वेन सिद्धनियतपूर्व्ववर्त्तिताकतया भेदाग्रहस्यैव संवाद्य-
.वादिसाधारणप्रवृत्तिसामान्यहेतुत्वाभ्युपगमेऽप्यन्यथाख्यातिसिद्धिरप्र-
.तिहता। विशिष्टोभयसिद्धिं विना भेदाग्रहे विशिष्टभ्रमहेतुत्वसिद्धे-

रसम्भवादित्यभिप्रायेण समाधत्ते, 'विशिष्टज्ञाने तद्धेतुत्वस्येति विशिष्टभ्रमं प्रति भेदाग्रहहेतुत्वस्येत्यर्थः, 'तत्कल्पनेति विशिष्टभ्रमसिद्ध्यधीनसिद्धिकत्वेनेत्यर्थः, 'प्रवृत्तिकारणताग्रहसमये' विशिष्टभ्रमं विसंवादिप्रवृत्तिकारणताया विसंवादिप्रवृत्तिनियतपूर्ववर्त्तितया अग्रहसमये विसंवादिप्रवृत्तिपूर्वं विशिष्टभ्रमस्यासिद्धाविति यावत् विसंवादिप्रवृत्तिपूर्वमिति स्वरूपकथनं, 'तदनुपस्थितेरिति भेदाग्रहस्य विशिष्टभ्रमहेतुत्वासिद्धेरित्यर्थः, विशिष्टभ्रमसिद्धौ च सिद्धिः समीहितमिति भावः। इदमुपलक्षणं, अन्यथाख्यातिसिद्धिं विना रजतत्वप्रकारक-रजतोपादानकसंवादिप्रवृत्तिं प्रत्यपि रजतनिष्ठरजतभेदग्रहाभावरूपस्य भेदाग्रहस्य हेतुत्वं न सम्भवति रजतव्यक्तौ रजतभेदग्रहस्य भ्रमत्वनियमेन तदप्रसिद्धौ तदभावस्याप्रसिद्धेः। नचान्यथाख्यातिसिद्धिं विनापीदन्त्वनिष्ठरजतभिन्नत्वप्रकारक-ज्ञानविशेष्यतावच्छेदकत्वाभावरूपस्य भेदाग्रहस्य तत्र हेतुत्वं सम्भवतीति वाच्यं। अन्यथाख्यात्यनभ्युपगमे रजतवृत्तीदन्तायास्तादृशाभावस्य सर्वदैव वर्त्तमानत्वेनाव्यावर्त्तकतया कारणत्वे मानाभावात्तद्व्यतिरेकेण केवलव्यतिरेकविरहादेवमन्यथाख्यात्यनभ्युपगमे भ्रमात्मकविशिष्टज्ञानं प्रत्यपि भेदग्रहस्य प्रतिबन्धकत्वं न सम्भवति तत्र विशेष्ये विशेषणवद्भेदग्रहस्य भ्रमत्वनियमात् भेदग्रहादेः समानविशेष्यतावच्छेदकताप्रत्यासत्त्या प्रतिबन्धकत्वासम्भवस्यान्यत्र प्रतिपादितत्वादित्यपि बोध्यं। न च साख्यन्यथाख्यातिः तथाच प्रवृत्तिं प्रति विशिष्टप्रत्यक्षहेतुत्वे मानाभावः कल्पनालाघवेन स्वतन्त्रोपस्थितोपादानतानिरूपकप्रकारताश्रयधर्म्मावच्छिन्नप्रतियोगिताकभेदाग्रहस्यैव

दृष्टप्रकारकोपादानव्यक्तिप्रत्यक्षमहकृतस्य हेतुत्वौचित्यादिति वाच्यं। कारणतावच्छेदकशरीरगौरवे कल्पनालाघवस्याकिञ्चित्करत्वात् प्रागुक्तीया स्वातन्त्र्यस्य दुर्व्वचत्वाच्च तादृशभेद-तद्व्याप्यादिग्रहाभावानां तज्जन्योपस्थितितादृशधर्म्मात्यन्ताभाव-तद्व्याप्यादिग्रहाभावानाञ्च वह्नानुमित्यथासिद्धत्वकल्पनामपेक्ष्य विशिष्टप्रत्यक्षस्य नियमानन्यथासिद्धतोभयकल्पनाया एव लघुतया कल्पनालाघवविरहाच्च।

मिश्रानुयायिनस्तु विशिष्टज्ञानस्य प्रवृत्तिसामान्यनियतपूर्व्ववर्त्तिताबाधकत्वमेव न सम्भवति अप्रयोजकत्वात्, तन्नियतपूर्व्ववर्त्तितानियतपूर्व्ववर्त्तिनस्तन्नियतपूर्व्ववर्त्तित्वावश्यकत्वस्यैव तत्तद्विपक्षबाधकत्वात् तथाच विशिष्टज्ञानस्य यदि प्रवृत्तिनियतपूर्व्ववर्त्तित्वं न सिद्धं तदा द्वयमेवासिद्धनियतपूर्व्ववर्त्तिताकं, यदि च तस्य नियतपूर्व्ववर्त्तित्वं सिद्धं तदा द्वयमेव सिद्धनियतपूर्व्ववर्त्तिताकमिति न कल्पनालाघवं, द्वितीये सिद्धञ्च नः समीहितमित्यभिप्रायेण समाधत्ते, 'विशिष्टज्ञानमिति, 'तद्धेतुत्वस्य' भेदाग्रहप्रवृत्तिनियतपूर्व्ववर्त्तित्वस्य, 'विशिष्टज्ञाने कल्पनोत्तरकल्प्यत्वेन' विशिष्टज्ञाने प्रवृत्तिनियतपूर्व्ववर्त्तित्वसिद्ध्यधीनसिद्धिकत्वेनेति योजना, 'प्रवृत्तिकारणताग्रहसमये' विशिष्टज्ञाने प्रवृत्तिकारणताया अग्रहदशायां, 'तदनुपस्थितेरिति भेदाग्रहनिष्ठप्रवृत्तिनियतपूर्व्ववर्त्तित्वासिद्धेरिति प्राञ्चः।

'नचैवमिति, 'एवं' विसंवादिप्रवृत्तिं प्रत्यपि विशिष्टप्रत्यक्षत्वेन कारणत्वे, 'मिथ्याज्ञानेति सर्व्वत्र विसंवादिप्रवृत्तिपूर्व्वं मिथ्याज्ञानत्वकीनां कल्पनागौरवमित्यर्थः। अतो विसंवादिप्रवृत्तौ भेदाग्रहादेरहेतुत्वं युक्तमिति भावः। गौरवं न स्वरूपसत् कारणत्वादिग्रह-

विसंवादिप्रवृत्तिरपि विशिष्टज्ञानसाध्या प्रवृत्तित्वा

प्रतिबन्धकं, नापि तच्छंसयः तत्र प्रतिबन्धकः, किन्तु तन्निर्णय ए
प्रतिबन्धकः स च प्रकृतकारणताग्रहपूर्वं न सम्भवति, तत्तत्रणे
मिथ्याज्ञानवान् विसंवादिप्रवृत्त्यव्यवहितपूर्वत्वात् इत्यनुमानेनानन
मिथ्याज्ञानव्यक्त्यात्मकगौरवनिर्णये अनुकूलतर्कविधया विशिष्टज्ञान
विसंवादिप्रवृत्त्योः कार्य्य-कारणभावग्रहस्योपजीव्यत्वेन तत्पूर्वं तद
सम्भवादतो विशिष्टप्रत्यक्षत्वेन कारणत्वमेव युक्तं इत्यभिप्रायेण सम
धत्ते, 'प्रमाणेति, 'प्रमाणप्रवृत्तिसमयः' कारणताग्राहकप्रमाणप्रव
त्तिसमयः कारणताग्रहपूर्ववर्त्तिसमय इति यावत्, 'सिद्ध्यसिद्धि
राहतत्वेनेति 'सिद्धेः' अनन्तमिथ्याज्ञानव्यक्त्यात्मकगौरवसिद्धेः, 'असि
द्ध्या' कारणत्वासिद्ध्या, 'पराहतत्वेन' असम्भवित्वेन इत्यर्थः, 'सिद्धि
निर्णयः, 'असिद्धिः' तदभावः, 'फलमुखगौरवस्येति 'फलं' मिथ्या
ज्ञान-विसंवादिप्रवृत्तिकारणत्वावधारणं, तदेव मुखं निर्णयबीजं य
एवम्भूतस्यानन्तमिथ्याज्ञानव्यक्त्यात्मकगौरवस्येत्यर्थः, 'अदोषत्वात्' कार
णताग्रहाविघटकत्वात्, एतच्च 'न्याय्यत्वादित्यत्र हेतुः, 'तस्य' तस्यै
विशिष्टप्रत्यक्षत्वेन विसंवादिप्रवृत्तौ कारणत्वस्यैवेति यावत्। 'विसंवा
दिप्रवृत्तिरपीति शुक्त्यादिमात्रविशेष्यक-रजतत्वादिप्रकारिका प्रवृ
त्तिरपीत्यर्थः, 'विशिष्टज्ञानसाध्येति रजतत्वादिप्रकारक-ज्ञानविशेष्य
विशेष्यिकेत्यर्थः, 'प्रवृत्तित्वादिति रजतत्वादिप्रकारकप्रवृत्तित्वादि
त्यर्थः, 'सत्यप्रवृत्तिवदिति, रजतादिविशेष्यक-रजतत्वादिप्रकारक
प्रवृत्तिः दृष्टान्त इति भावः। ननु यत्र रजतत्वप्रकारक-रजत

त्यप्रवृत्ति वत्। क्लृप्तकारणं विनानुपपत्तेः अनन्यथा-
सिद्धतया प्रवृत्त्या समानीतविशिष्टज्ञानबलात् तत्कारणं

विशेष्यकप्रवृत्तिविशेष्यव्यक्तिविशेष्यकरजतत्वप्रकारकज्ञानं न कस्याप्यस्ति
तत्रैव व्यभिचार इत्यत आह, 'क्लृप्तेति रजतत्वप्रकारक-रजोतोपा-
दानकप्रवृत्तिं प्रति रजतत्वप्रकारक-रजतविशेष्यकप्रत्यक्षस्य हेतुतया
तेन विना तदुत्पत्तेरसम्भवादित्यर्थः। इदमुपलक्षणं अन्ततो भगवतो
योगिनां वा ज्ञानमादायैव सर्व्वत्र साध्यसत्त्वाच्चेत्यपि बोध्यं।

प्राचस्तु 'विशिष्टज्ञानसाध्येति शुक्त्यादिविशेष्यक-रजतत्वादिप्रका-
रकज्ञानजन्येत्यर्थः, 'प्रवृत्तित्वादिति शुक्त्यादिविशेष्यक-रजतत्वादिप्र-
कारकप्रवृत्तित्वादित्यर्थः। या यद्विशेष्यक-यत्प्रकारिका प्रवृत्तिः सा
तत्प्रकारक-तद्विशेष्यकज्ञानजन्या रजतविशेष्यक-रजतत्वप्रकारकप्रवृ-
त्तिरिति यत्तद्भ्यां सामान्यमुखी च व्याप्तिरतः साध्याप्रसिद्धा-
वपि न क्षतिर्न वा दृष्टान्तासिद्धिरिति भावः। ननु या रजतवि-
शेष्यक-रजतत्वप्रकारकप्रवृत्तिः तादृशज्ञानं विनैव उत्पन्ना तत्र
व्यभिचार इत्यत आह, 'क्लृप्तेति, अर्थस्तु पूर्व्ववदित्याहुः।

ननु तथापि विसंवादिप्रवृत्तिकारणीभूतं मिथ्याज्ञानमकारणकं
सकारणकं वा, नाद्यः सदातनत्वापत्तेः। नान्त्यः तत्कारणस्य दुर्व्व-
चत्वादित्यत आह, 'अनन्यथासिद्धतयेति विसंवादिप्रवृत्तेः विशिष्टभ्र-
मव्यतिरेकानुपपन्नतयेत्यर्थः, 'प्रवृत्त्या समानीतेति विसंवादिप्रवृत्ति-
सिद्धविशिष्टभ्रमात्मकात् प्रमाणादित्यर्थः, 'इन्द्रियाद्येवेति, सिद्ध-
तीति शेषः। आदिपदादिन्द्रियसन्निकर्षपरिग्रहः। ननु दोषस्य

सदोषमिन्द्रियाद्येव। सर्वतो बलवती ह्यन्यथानुपपत्तिः। न च भेदाग्रहात् प्रवृत्त्युपपत्तिरपि। विपरीतचतुष्के

ज्ञानजनकत्वमदृष्टचरमित्यत आह, 'सर्वत इति, तथाच कार्यान्यथानुपपत्त्या ज्ञानान्तरं प्रत्यदृष्टमपि दोषस्य जनकत्वमत्र कल्प्यत इति भावः। संवाद्यसंवादिसाधारणप्रवृत्ति-निवृत्तिसामान्यं प्रत्येव भेदाग्रहस्य कारणत्वे बाधकान्तरमाह, 'न चेति न वेत्यर्थः, 'विपरीतचतुष्क इति इमे रङ्ग-रजते इत्याकारकमिदन्त्वरूपेण रजते रङ्गत्वप्रकारकं रङ्गे च रजतत्वप्रकारकं विपरीतं नैकमेवात्र पारिभाषिकं विपरीतचतुष्के तादृशप्रत्यक्षस्थले युगपद्रजत-रङ्गयोरुभयत्रैव रजतत्वप्रकारकप्रवृत्ति-रङ्गत्वप्रकारकनिवृत्त्योरापत्तेरिदन्त्वरूपेण रजत-रङ्गयोः प्रत्यक्ष-स्वतन्त्ररजत-रङ्गत्वसाक्षात्कार-रजत-रङ्गभेदाग्रहाणां सत्त्वादित्यर्थः। इदमुपलक्षणं रजत-रङ्गयोरिमे रङ्ग-रजते इति प्रमात्मकप्रत्यक्षादपि तन्मते युगपद्रङ्ग-रजतयोरुभयत्रैव रङ्गत्वप्रकारकनिवृत्ति-रजतत्वप्रकारकप्रवृत्त्योरापत्तिः, तथा यत्र रजते रजतत्वप्रमा सुवर्णे च सुवर्णत्वप्रमा तत्र रजत-सुवर्णयोरुभयोरेव रजतत्व-सुवर्णत्वोभयप्रकारकप्रवृत्त्यापत्तिः, रजतत्व-सुवर्णत्वयोः स्वतन्त्रानुपस्थितौ रजतेऽपि रजतत्वप्रकारकप्रवृत्तेः सुवर्णेऽपि सुवर्णत्वप्रकारकप्रवृत्तेरनुपपत्त्या तयोपस्थितेरावश्यकत्वमित्यादिकमपि बोध्यं।

भट्टाचार्य्यानुयायिनस्तु 'विपरीतचतुष्क इति इमे रङ्ग-रजते नेमे रजत-रङ्गे इति समूहालम्बनप्रत्यक्षे इत्यर्थः। न च तत्र रजत-

युगपत् प्रवृत्तिनिवृत्त्यापत्तेः। न च तत्र मानाभावः, इमे-
रङ्ग-रजते इति सत्यज्ञानवत् रजत-रङ्गयोः प्रत्येकभ्रम-

ङ्गयोः रजत-रङ्गभेदाग्रहस्यैवासत्त्वात् कथं तयोरुभयोरुपादानमिति वाच्यं। मीमांसकनये रजते रजतभेदस्य रङ्गे रङ्गभेदस्य ग्रहाभ्युपगमे अन्यथाख्यात्यापत्त्या तत्सत्त्वात्। न च तथापि भेदज्ञानपर्यन्तानुधावनं व्यर्थं रङ्ग-रजतयोरिमे रङ्ग-रजते इति विपरीतद्विकेऽपि उक्तरीत्या अतिप्रसङ्गसाम्राज्यादिति वाच्यं। तत्र कदाचिदिष्टापत्तेः सम्भवात्। न चात्रापीष्टापत्तेः सम्भवः, अगृहीतासंसर्गकभेदग्रहसत्त्वेऽपि इष्टापत्तावत्यन्तानुभवविरोधादिति मणिकृतो निगर्वः। अतएव रङ्ग-रजतयोरिमे रङ्ग-रजते इति भ्रमात्मकप्रत्यक्षादेरपि परित्यागः तत्रापि कदाचिदिष्टापत्तिसम्भवात्। न च तथाप्यरजत-रजतयोरिमे रजतारजत इति विपरीतद्विकस्य कुतः परित्यागः तत्राप्यगृहीतासंसर्गकस्य रजतभेदस्य, अगृहीतासंसर्गकस्यारजतभेदस्य रजतत्वस्य ग्रहसत्त्वेन इष्टापत्तेरसम्भवादिति वाच्यं। 'विपरीतचतुष्कपदस्य तादृशविपरीतद्विकस्याप्युपलक्षकत्वात्। एवं यत्र रजतारजतयोरेकत्र रजतत्वप्रमा अन्यत्र चारजतत्वभ्रमस्तत्र रजतत्वप्रमाविषय इवारजतत्वभ्रमविषयेऽपि रजतत्वप्रकारकप्रवृत्तिप्रसङ्गः, रजतत्वस्य स्वतन्त्रानुपस्थितौ रजतत्वप्रमाविषयेऽपि तत्प्रकारकप्रमानुपपत्त्या तयोपस्थितेरावश्यकत्वात् रजते रजतभेदस्य ग्रहे अन्यथाख्यात्यापत्त्या तदभावस्य स्फुटत्वादिति प्राञ्चः।

सासग्रेयारेकदा सत्त्वेन तादृशभ्रमोत्पत्तेरानुभविकत्वात्। अन्यथा समूहालम्बनोच्छेदे द्वित्वाद्यप्रत्यक्षतापत्तेः।

यद्यपि न्यायनयेऽपि विपरीतद्विकाद्विपरीतचतुष्काद्वा युगपद्रजते रङ्गत्वप्रकारिका निवृत्तिः रङ्गे रजतत्वप्रकारिका प्रवृत्तिः कुतो नोत्पद्यते, एवं यत्रैकस्यामेव व्यक्ताविदं रजतं रङ्गश्चेति समुच्चयात्मकं प्रत्यक्षं तत्रापि एकस्यां व्यक्तौ रजतत्वप्रकारकप्रवृत्ति-रङ्गत्वप्रकारकनिवृत्त्योः कुतो युगपदनुत्पत्तिः तद्वारणाय परस्परसामग्र्याविरोधित्वाभ्युपगमे च मीमांसकनयेऽपि तस्य सुवचत्वात्, तथापि न्यायनये विपरीतद्विकादितोयुगपत् रजते रङ्गत्वप्रकारकनिवृत्तेः रङ्गे च रजतत्वप्रकारकप्रवृत्तेरुत्पत्तिरुक्तस्थले एकस्यामेव व्यक्तौ रजतत्वप्रकारक-प्रवृत्ति-रङ्गत्वप्रकारक-निवृत्त्योर्युगपदुत्पत्तिश्चेत्येव ज्ञानद्वयोरेव यौगपद्यानभ्युपगमात् विंशत्यङ्गुल्यव्यच्छेदेन परस्परविलक्षणानां विंशतिप्रयत्नानां युगपदेवोत्पादात् मीमांसकनये च विपरीतद्विकादितो रजत-रङ्गयोरुभयत्रैव युगपद्रजतत्वप्रकारकप्रवृत्ति-रङ्गत्वप्रकारकनिवृत्त्योरापत्तिरित्येव विशेषात्तत्रापीष्टापत्तौ चानुभवविरोधादिति भावः। एतेन उपादानप्रत्यक्षवदुपादानगोचरराग-द्वेषयोरपि प्रवृत्ति-निवृत्तिहेतुतया क्रमोत्पन्नानाञ्च तत्त्रयाणां एकदानवस्थानात् कथं युगपत् प्रवृत्ति-निवृत्त्यापादनं मीमांसकैरपेक्षाबुद्धेरपि क्षणद्वयमात्रावस्थायित्वाभ्युपगमात्। न च प्रवृत्ति-निवृत्तिपरं ततकारणीभूतराग-द्वेषपरमिति वाच्यं। फलगोचरचिकीर्षा-द्वेषयो-

रङ्ग-रजते इति शब्दाभासादेवंविधभ्रमसम्भवाच्च।
म दोषमहिम्ना रजत-रङ्गयोः रजत-रङ्गभेदग्रहान्न
शयः तव चैकत्र स्वतन्त्रोभयभेदाग्रहात् प्रत्येकं रङ्गं
जतं वेति संशयः स्यात्। अथ यद्धर्म्मज्ञानाद्यदुप-

पादानगोचररराग-द्वेषजनकतया फलगोचरराग-द्वेषोपादानगोचर-
तानाञ्च त्रयाणामेकदानवस्थित्या तयोरपि युगपदुत्पत्त्यसम्भवादि-
पि निरस्तं। ज्ञानेतरात्मविशेषगुणद्वयोर्योगपद्याभ्युपगन्तृनये इष्टा-
फलसाधनताविषयकविपरीतचतुष्कस्य पूर्व्वक्षणे युगपत् फलगो-
चिकीर्षा-द्वेषयोस्तद्द्वितीयक्षणे चोपादानगोचर-रागद्वेषयोः सम्भवेन
तृतीयक्षणे प्रवृत्ति-निवृत्त्यापत्तेर्दुर्व्वारत्वात्। फलचिकीर्षादेरुपा-
नेच्छाद्वारैव प्रवृत्त्यादौ हेतुतया प्रवृत्त्यादिपूर्व्वं तन्नाशेऽपि क्षति-
रहात्। यदि च उपादानप्रत्यक्षमुपादानेच्छाद्वारैव प्रवृत्ति-
तुः न तु साक्षात् तदा तादृशविपरीतचतुष्कानन्तरं फलचिकी-
भ्युपगमेऽपि न क्षतिः।

नव्यास्तु 'युगपत् प्रवृत्ति-निवृत्त्यापत्तेः' इत्यत्र प्रवृत्ति-निवृत्त्यो-
गपद्यं नार्थः, किन्तु विपरीतद्विकादितो रङ्गे रजतत्वप्रकारकप्रवृत्त्यु-
त्तिदशायां रजतेऽपि रजतत्वप्रकारकप्रवृत्त्यापत्तिः, रजते रङ्गत्व-
प्रकारकनिवृत्त्युत्पत्तिदशायां रङ्गेऽपि रङ्गत्वप्रकारकनिवृत्त्यापत्ति-
रित्येवार्थः, रङ्गे रजतत्वप्रकारकरागोत्पत्तिदशायां रजतेऽपि रजत-
प्रकारकरागस्य समूहालम्बनरूपस्य, रजते रङ्गत्वप्रकारकद्वेषो-
त्पत्तिदशायां रङ्गेऽपि रङ्गत्वप्रकारकद्वेषस्य समूहालम्बनरूपस्य

स्थितिस्तत्र तद्भेदाग्रहात् प्रवृत्ति-निवृत्ती। रङ्ग-रजत
धर्मेण रजत-रङ्गे स्मारिते न तु रङ्ग-रजते, माष
राशिस्थमसीविषये माषार्थिप्रवृत्तिः मसीनीलिमस्

सम्भवात् राग-द्वेषौ प्रत्यपि तन्नये भेदाग्रहादेर्हेतुत्वादिति भाव
एवञ्च योग्यात्मविशेषगुणमात्रस्य यौगपद्यविरहेऽपि न ग्रन्थासङ्ग
रिति प्राहुः।

'न चेति, 'तत्र' तादृशसमूहालम्बनप्रत्यक्षे, 'प्रत्येकभ्रमसामग्र्
रिति रजतादिप्रत्यक्षसामग्री-रङ्गादिप्रत्यक्षसामग्र्योरित्यर्थः। प्रथम
दिपदाद्रङ्गत्वस्य, द्वितीयादिपदाद्रजतत्वस्य परिग्रहः। भट्टाचार्यै
प्रथमादिपदाद्रङ्गत्व-रजतभिन्नत्वयोः, द्वितीयादिपदाच्च रजत
रङ्गभिन्नत्वयोः परिग्रहः। 'तादृशभ्रमेति तादृशसमूहालम्बनप्र
क्षेत्यर्थः, 'आनुभविकत्वात्' प्रामाणिकत्वात्। नन्वेवमेकमुख्यविशेष्य
धीसामग्री नापरमुख्यविशेष्यिकां धियमर्जयतीति नियमव्या
दत्यत आह, 'अन्यथेति तादृशनियमानुपगम इत्यर्थः, 'समूहालम्ब
नानामुख्यविशेष्यकं ज्ञानं, 'द्वित्वाद्यप्रत्यक्षतेति, तन्नये द्वित्वादेरपे
बुद्धिव्यङ्ग्यत्वात्तस्य च समूहालम्बनरूपत्वनियमादिति भावः। एत
न्यायनये अयमेकोऽयञ्चैक इति समूहालम्बनापेक्षाबुद्धेरेव द्वित्वादि
जनकत्ववत् परनयेऽपि तादृशसमूहालम्बनापेक्षाबुद्धिरेव द्वित्वादि
व्यञ्जिका अन्यथा क्रमिकापेक्षाज्ञानस्थले द्वित्वानुत्पत्त्या द्वावितिप्रत्य
क्षस्य नैयायिकैरनभ्युपगमेनानुभवकलहापत्तेः व्यङ्ग्य-व्यञ्जकभा
गौरवापत्तेश्च इत्यभिप्रायेणाभिहितं। विवेचितञ्चेदं सिद्धान्तरहस्ये

तमाषभेदाग्रहात्। अनुभूयमानारोपोऽसिद्ध एव। अन्यथा तवापि प्रत्येकमुभयज्ञानं स्यादिति चेत्। मैवं। शब्दाभासात् प्रत्यक्षाद्वा इष्टानिष्टोपस्थितौ तदभावात्।

केचित्तु 'द्वित्वादीत्यतद्गुणसम्विज्ञानबहुव्रीहिना त्रित्वादिपरं क्रमिकापेक्षाबुद्धित्रयाणां एकदावस्थानासम्भवात् समूहालम्बनोच्छेदे प्रत्यक्षतापत्तेरित्यभिप्राय इत्याहुः।

अन्ये तु न्यायनयेनैवेदं बाधकं, न्यायनये क्रमिकापेक्षाज्ञानानामेव द्वित्वोत्पत्तौ प्राथमिकापेक्षाबुद्धिनाशस्य द्वित्वोत्पत्तिक्षणोत्पत्तौ बाधकाभावेन तन्नाशादेव द्वित्वनाशे तस्य क्षणिकतया तदप्रत्यक्षतापत्तेरित्यभिप्रायादित्याहुः।

केचित्तु 'द्वित्वाद्यप्रत्यक्षतापत्तेरिति पर्य्याप्त्याख्यसम्बन्धेन द्वित्वाद्यप्रकारकप्रत्यक्षाभावापत्तेरित्यर्थः, तादृशप्रत्यक्षस्य नानामुख्यविशेष्यकत्वनियमाभावात् इत्याहुः।

उक्तनियमे व्यभिचारमप्याह, 'इमे' इति, 'एवंविधभ्रमेति भवतेऽपि नानापदार्थमुख्यविशेष्यकसमूहालम्बनस्मरणसम्भवाच्च इत्यर्थः, च शब्दाभासपदं भ्रमपदञ्चोपलक्षणं तादृशशब्दजन्यप्रमायामपि व्यभिचारो बोध्यः। वस्तुतस्तु 'शब्दाभासात्' शब्दज्ञानात्, 'एवंविधभ्रमेत्यत्र च 'भ्रमः' विशिष्टानुभवः, नानापदार्थमुख्यविशेष्यकविशिष्टानुभवसम्भवाच्चेत्यर्थः, इत्येव तत्त्वं। नन्वेवं भवन्मते विपरीतद्विकाद्विपरीतचतुष्काद्वा रजते रङ्गत्वप्रकारिका निष्कम्पनिवृत्तिः, रङ्गे च रजतत्वप्रकारिका निष्कम्पप्रवृत्तिः न स्यात् रजत-रङ्गात्मक-धर्म्मि-

मम त्वेकधर्मादुभयोपस्थितावपि रजत-रङ्गयोस्तत्त्व
न ज्ञानं दोषादित्युभयसिद्धं विपरीतज्ञानञ्च दोषात्

द्वयज्ञान-रजतत्व-रङ्गत्वात्मककोटिद्वयोपस्थित्यादिरूपायाः संशयस
मग्र्याः सत्त्वेन तस्य संशयरूपत्वादित्यत आह, 'ममेति, 'रज
रङ्गयोरिति, 'रजत-रङ्गभेदग्रहादित्यत्र यथाक्रममन्वितं, 'रज
रङ्गभेदग्रहात्' रजत-रङ्गभेदस्यैव ग्रहात् रजतत्व-रङ्गभेदयोः रङ्ग
रजतभेदयोरग्रहादिति यावत्, प्रत्युत तवैव तस्य संशयत्वापत्त्या त
रजते रङ्गत्वप्रकारकनिष्कम्पनिवृत्तिः, रङ्गे च रजतत्वप्रकारकनिष्क
प्रवृत्तिर्न स्यादित्याह, 'तवेति तवैवेत्यर्थः, 'एकत्र स्वतन्त्रोभ
भेदाग्रहादिति स्वतन्त्रोपस्थितरजतत्व-रङ्गत्वावच्छिन्न-प्रतियोगिता
भेदाग्रहादित्यर्थः, रजते अन्यथाख्यात्यापत्त्या रजतभेदस्य दोषप्र
बन्धवशाच्च रङ्गभेदस्याग्रहादेवं रङ्गे अन्यथाख्यात्यापत्त्या रङ्गभेद
दोषप्रतिबन्धवशाच्च रजतभेदस्याग्रहादिति भावः। 'प्रत्येकमि
भवन्नये अगृहीतभेदधर्मिज्ञानसहितस्वतन्त्रविरुद्धकोटिद्वयज्ञान
संशयत्वादिति भावः। युगपत् प्रवृत्ति-निवृत्त्यापत्तौ समाधानं ग्रन्थ
'अथेति रजतवृत्तिचाकचक्येन रङ्गमेव स्मारितं न तु रजतं तादृ
चाकचक्यविशेषस्य तेन पुंसा रङ्गवृत्तितयैव पूर्वं ग्रहात् एवं रङ्ग
वृत्तिचाकचक्येन रजतमेव स्मारितं न तु रङ्गमतः प्रवृत्ति-निवृत्ति
विषयवृत्तिधर्मोपस्थितेष्टानिष्टभेदाग्रहयोरेव प्रवृत्ति-निवृत्तिहेतुत
रङ्गरजतयोः रजतत्व-रङ्गत्वप्रकारकप्रवृत्ति-निवृत्ती एव न तु वैपरी
त्यमित्यर्थः। नन्वेवं माषभेदाग्रहात् मस्यां माषत्वप्रकारकप्रवृत्ति

न चैवमावश्यकदोषादेव प्रवृत्ति-निवृत्ती, सत्यस्थले तदभावात्। न च विसंवादिनी दोषात्, इन्द्रिय-लिङ्ग-

---

कथं स्यादित्यत आह, 'माषेति। नन्वेवमनुभूयमानारोपात् प्रवृत्ति-निवृत्ती न स्यातां तत्रारोप्यस्यानुभूयमानत्वेन प्रवृत्तिविशेष्यवृत्ति-धर्मान्यथानुपस्थितेरित्यत आह, 'अनुभूयमानारोप इति अनुभूय-मानरजतत्वादेः पुरोवर्त्तिन्यसंसर्गाग्रहात् क्वचित् प्रवृत्ति-निवृत्त्युत्पा-दोऽसिद्ध एवेत्यर्थः। नन्वेक एव धर्मो रजत-रङ्गयोरुभयोरपि कारक इति नोक्तं समाधानमित्यत आह, 'अन्यथेति एकस्यैवोभय-कारकत्वे इत्यर्थः, 'उभयज्ञानं स्यादिति रङ्गं रजतं वेति संपयः स्या-दित्यर्थः, साधारणधर्मवद्धर्मिज्ञानजन्यकोटिद्वयस्मृतेः सत्त्वादित्यभि-मानः। एतच्च पूर्वोक्तरीत्यैवाग्रे स्वयमेव निवारयिष्यत इति नास-ङ्कनीयः। यत्र शब्दात् प्रत्यक्षाद्वा रङ्ग-रजतयोरुपस्थितिः ततो रज-तत्व-रङ्गत्वप्रकारकप्रत्यक्षात् प्रवृत्ति-निवृत्तिः तत्र रजत-रङ्गोपस्थितौ प्रवृत्ति-निवृत्तिभावादुक्तकारणं व्यभिचारीत्यभिप्रायेण समाधत्ते, 'शब्दाभासादिति शब्दज्ञानादित्यर्थः, यथाश्रुते आभासपर्यन्तानु-धावनस्य व्यर्थत्वात्, 'दृष्टानिष्टेति रजत-रङ्गोपस्थितावित्यर्थः, 'तद-भावात्' इति प्रवृत्ति-निवृत्तिविशेष्यवृत्तिधर्मजन्यत्वाभावादित्यर्थः। नचानुभूयमानारोपात् प्रवृत्त्यादिकमेवासिद्धमिति प्रागेवाभिहित-मिति वाच्यम्। तत्रापि प्रवृत्त्यादेरनुभवसिद्धत्वादिति भावः। 'अन्यथेत्यादिकमपि पूर्वोक्तदोषेणैव दुष्टमित्याह, 'मम त्विति, 'तत्तया' रजतत्व-रङ्गत्वप्रकारेण, 'इत्युभयसिद्धमिति इदञ्चोभयसिद्ध-

शब्दादिदोषाणामननुगतत्वात्। तज्जन्यज्ञाने च जातिभेदात्।

नव्यास्तु रङ्गवृत्तितया ज्ञातधर्मस्य रजते उत्कटा-

मित्यर्थः। नन्वेवं दोषस्य रजतादौ रजतत्वाद्यग्रहं प्रत्येव प्रयोजकतया रजतादौ रङ्गत्वादिग्रहः कथं स्यादित्यत आह, 'विपरीतज्ञानञ्चेति विपरीतज्ञानमपीत्यर्थः, 'विपरीतज्ञानं' रजते रङ्गत्वज्ञानं रङ्गे रजतत्वज्ञानञ्च, 'आवश्यकत्वादिति, आवश्यकत्वं रजतत्वाद्यग्रहप्रयोजकतया रङ्गत्वादिभ्रमजनकतया च, 'तदभावात्' दोषाभावात्। स्वेष्टसाधने स्वेष्टसाधनताभ्रमादुक्तप्रवृत्तिस्तत्रापि तज्जनकीभूतदोषा एव हेतवो वाच्या अन्यथा तत्र स्वेष्टसाधनताविशिष्टज्ञानस्य हेतुत्वाभ्युपगमे तत एवान्यथाख्यातिसिद्ध्यापत्तेरित्यभिप्रेत्य दूषणमाह, 'इन्द्रियेति प्रात्यक्षिकेष्टसाधनत्वादिभ्रमानुमानिकेष्टसाधनत्वादिभ्रम-शाब्देष्टसाधनत्वादिभ्रमजनकीभूतानां दोषाणामननुगतत्वादित्यर्थः। एतेनोपादानप्रत्यक्षकारणताविचारकोऽयं ग्रन्थस्तत्र लिङ्ग-शब्दयोः प्रसङ्ग इति पूर्वपक्षो निरस्तः। नन्वेवमिष्टसाधनत्वादिभ्रमं प्रत्येव कथं दोषाणां हेतुत्वमननुगमादित्यत आह, 'तज्जन्येति तथा च प्रात्यक्षिकभ्रमत्वादिकं तत्कार्यतावच्छेदकमित्यर्थः, प्रवृत्त्यादौ च वैजात्यस्यानुपलम्भबाधितत्वात् लाघवेन प्रवृत्तिमात्रे विशिष्टधिय एव हेतुतायाः क्लृप्तत्वाच्चेति भावः।

'नव्याः' प्राभाकरनव्याः, 'ज्ञातधर्मस्येति ज्ञातस्य चाकचक्यविशेषस्येत्यर्थः, 'रजते' रजतत्वोपस्थितौ, 'उत्कटाकाङ्क्षेति, आकाङ्क्षा

काङ्क्षा तेन सह भूयःसहचारदर्शनात्। न रङ्गे अल्पतथात्वादिति तत्रानुत्कटा सा। एवं रजतवृत्तितया ज्ञातधर्मस्यापि,अत उत्कटाकाङ्क्षयानुत्कटाकाङ्क्षाप्रतिबन्धान्न रङ्गे निवृत्तिः। एवं रजते न प्रवृत्तिरिति

वोपस्थितिनिष्ठपदार्थान्तरं, 'तेन सह' रजतत्वेन सह, 'न रङ्गे' न रङ्गत्वोपस्थितौ, 'अल्पतथात्वात्' अल्पसहचारज्ञानात्, 'रजतवृत्तितया ज्ञातधर्मस्यापीति, रङ्गत्वोपस्थितावुत्कटाकाङ्क्षा रजतत्वोपस्थितावनुत्कटा सेति शेषः। 'उत्कटाकाङ्क्षयेति रङ्गादिवृत्तितया ज्ञातधर्मोत्कटाकाङ्क्षाविशिष्टरजतत्वाद्युपस्थित्येत्यर्थः, 'अनुत्कटाकाङ्क्षाप्रतिबन्धादिति रङ्गादिवृत्तितया ज्ञातधर्मानुत्कटाकाङ्क्षाविशिष्टरङ्गत्वानुपस्थितिजन्यरङ्गादिविशेष्यक-रङ्गत्वादिप्रकारकप्रयत्नस्य प्रतिबन्धादित्यर्थः, 'निवृत्तिः' रङ्गत्वप्रकारिका निवृत्तिः, 'न प्रवृत्तिः' न रजतत्वप्रकारकप्रवृत्तिः। 'शब्दाभासादिति तादृशशब्दाभासजन्यरङ्गत्वरजतत्वोपस्थितिसहकृतादिदन्त्वरूपेण रजत-रङ्गप्रत्यक्षादित्यर्थः, 'प्रवृत्तिनिवृत्तौति रजत-रङ्गयोरुभयोरेव प्रवृत्ति-निवृत्तिप्रसङ्गादित्यर्थः, 'शब्दादुपस्थिताविति तत्रापि केनापि समं भूयः सहचाराध्यवसायाभावेन कुत्राप्युत्कटाकाङ्क्षाविरहादिति भावः। 'धर्मयोर्द्वयोरिति रजतत्व-रङ्गत्वरूपयोर्धर्मद्वयोरित्यर्थः, 'अल्पाधिकसहचारावगमादिति[१] रङ्गादिवृत्तिधर्मेण सममल्पाधिकसहचारावगमादित्यर्थः,

---

(१) 'किञ्चैवंधर्मयोर्द्वयोरल्पाधिकसहचारावगमात्' इति कस्यचिन्मूलपुस्तकस्य पाठः इति टीकाकारप्रतीकधारणेनानुमीयत इति।

तन्न। इमे रङ्ग-रजते इति शब्दाभासाद्युगपत्प्रवृत्ति-निवृत्तिप्रसङ्गात् शब्दादुपस्थितौ आकाङ्क्षायास्तुल्यत्वात्। किञ्चैवंधर्म्मयोर्भूयोऽल्पसहचारावगमादुत्कटानुत्कटकोटिको रङ्गं रजतं वेति संशयः स्यात्।

भूयःसहचरितधर्म्मवद्धर्म्मिज्ञानाल्पसहचरितधर्म्मवद्धर्म्मिज्ञानयोरेवोत्कटानुत्कटकोटिकसंशयनियामकत्वात्, भवन्नये अगृहीतासंसर्गकधर्म्मिज्ञानसहितस्वतन्त्रविरुद्धकोटिद्वयज्ञानस्यैव संशयतया दोषाद्रजतरङ्गयोः रङ्गत्व-रजतत्ववत्ताज्ञानासम्भवेऽपि संशयत्वे बाधकाभावादिति भावः। मूलदोषमाह, 'उत्कटेति, 'उत्कटत्वेति, आकृतिव्यङ्ग्याभावात् तन्मते न तस्य जातित्वं पदार्थान्तरकल्पने च गौरवमिति भावः।

ननु यदि संवाद्यसंवादिसाधारणप्रवृत्तिसामान्यं प्रत्येव भेदाग्रहो हेतुरुपेयते तदैव विपरीतचतुष्के रजत-रङ्गयोरुभयत्रैव युगपत्प्रवृत्ति-निवृत्त्यापत्तिर्यदि पुनः संवादिप्रवृत्तिं प्रति विशिष्टज्ञानमेव हेतुर्विसंवादिप्रवृत्तौ च भेदाग्रह इत्युपेयते तदा तु नेत्यभिप्रेत्य शङ्कते, 'स्यादेतदिति, 'प्रवृत्त्योर्वैचित्र्ये' तद्रूपविचित्रप्रवृत्त्योः 'कृत्स्नत्वादिति भेदाग्रहस्य विसंवादिप्रवृत्तिं प्रति कृत्स्ननियतपूर्व्ववर्त्तिताकत्वादित्यर्थः। न च विसंवादिप्रवृत्तिनियतपूर्व्ववर्त्तिनो विशिष्टभ्रमस्य नियतपूर्व्ववर्त्तित्वादेव भेदाग्रहे विसंवादिप्रवृत्तिनियतपूर्व्ववर्त्तित्वकल्पनाद्विशिष्टज्ञानमपि कृत्स्ननियतपूर्व्ववर्त्तितां सिद्धयान्यथाख्यात्या विशिष्टभ्रमसिद्धिं विना भेदाग्रहे विशिष्ट-

...टानुत्कटाकाङ्क्षाकल्पने मानाभावात् उत्कटत्वा-
...निरुक्तेश्च।

स्यादेतत्। संवादि-विसंवादिप्रवृत्त्योर्वैचित्र्ये वि-
...शिष्टज्ञान-भेदाग्रहौ हेतू कृतत्वात् न तु विशिष्टज्ञान-
...यथार्थासत्यत्वे गौरवादसिद्धेश्च। प्रवृत्ति-निवृत्तिमात्रे

...तपूर्व्ववर्त्तित्वसिद्धेरसम्भवादिति वाच्यं। भेदग्रहो विसंवादिप्रवृत्ति-
...तपूर्व्ववृत्त्यभावप्रतियोगी तत्पूर्व्ववर्त्तित्वे मानाभावादित्यादिना
...रान्तरेणापि तत्सिद्धिसम्भवादिति भावः। 'विशिष्टज्ञानसत्यत्वा-
...त्वे' सत्यासत्यविशिष्टज्ञाने, प्रथमे हेतुमाह, 'गौरवादिति संवादि-
...तौ विशिष्टधीत्वापेक्षया सत्यविशिष्टधीत्वेन हेतुत्वे गौरवादित्यर्थः।
...रसुपलक्षणं अयथार्थज्ञानासिद्धिदशायां सत्यत्वस्योपरञ्जकतया
...वर्त्तकत्वेन कारणतानवच्छेदकत्वाच्चेत्यपि बोध्यं। द्वितीये हेतु-
...ह, 'असिद्धेरिति ज्ञाने असत्यत्वस्यासिद्धेरित्यर्थः, इति सम्प्रदायः।

वस्तुतस्तु विसंवादिप्रवृत्तावसत्यविशिष्टज्ञानस्य हेतुत्वे एव हेतु-
...माह, 'गौरवादसिद्धेश्चेति, 'गौरवात्' सर्व्वत्र विसंवादिप्रवृत्ति-
...लगन्तविशिष्टज्ञानव्यक्तिकल्पने गौरवात्, 'असिद्धेः' विशिष्टज्ञाने
...संवादिप्रवृत्तिनियतपूर्व्ववर्त्तित्वासिद्धेश्चेत्यर्थः। न च फलमुखगौरव-
...दोषतया प्रथमो हेतुरसङ्गत इति वाच्यं। एतदखरसेनैव
...द्वितीयहेतुप्रणयनात् संशय-निश्चयसाधारणगौरवज्ञानत्वेनैव साध-
...ने प्रतिबन्धकतया फलमुखगौरवस्यापि संशयात्मकज्ञानस्य कारण-
...ताग्रहपूर्व्वं सम्भवात् जातेरपि कारणताग्रहे तदुत्तरोत्पन्नतज्ज्ञानेन

चेष्टानिष्टपुरोवर्त्तिज्ञानं हेतुरिति नाननुगमः, न तु वि-
शिष्टज्ञानं गौरवात्। न च भेदग्रहेऽतिप्रसङ्गः, विशिष्ट-
ज्ञानं भेदाग्रहश्च विशेषद्वयहेतुं विना सामान्यहेतो-
कार्य्यानुत्पादात्। न हि निर्विशेषं सामान्यं नाम
अन्यथा अन्धस्य त्वक्सम्बन्धे महत्युद्भूतरूपवति चन्द्र-

तचाप्रामाण्यकल्पनाच्च। तादृशगौरवमपि न दोषायेत्यभिप्रायात्
'प्रवृत्ति-निवृत्तिमात्र इति तत्प्रकारकप्रवृत्ति-निवृत्तिसामान्य-
इत्यर्थः, 'इष्टानिष्टपुरोवर्त्तिज्ञानमिति इष्टानिष्टतावच्छेदकतज्ज्ञान-
मित्यर्थः, अवच्छेदकान्तं स्वरूपकथनं, तज्ज्ञानत्वमात्रं कारणतावच्छेदकमित्यर्थः, 'न तु विशिष्टज्ञानमिति समानविशेष्यताप्रत्यासत्त्या
तत्प्रकारकं ज्ञानमित्यर्थः। 'अतिप्रसङ्ग इति सामान्यसामग्रीतः
सामान्यकार्य्यप्रसङ्ग इत्यर्थः। 'अन्यथेति सामान्यसामग्रीसत्त्वेऽपि
विशेषहेतुं विना कार्य्यानुदयानभ्युपगम इत्यर्थः, 'त्वक्सम्बन्ध इति
अन्धज्ञानसामान्यहेतोस्त्वङ्मनःसम्बन्धस्य सत्त्व इत्यर्थः, 'चन्द्रमहति
चन्द्रप्रभायां, 'प्रत्यक्षतापत्तिरिति बहिरिन्द्रियजन्यद्रव्यसाक्षात्कार-
सामान्यापत्तिरित्यर्थः, 'द्रव्यसाक्षात्कारेति त्वाक्प्रत्यक्षकारणतावच्छेदकोद्भूतस्पर्शस्य चाक्षुषप्रत्यक्षकारणस्य चक्षुःसंयोगस्याभावेऽपि बहिरिन्द्रिय-
जन्यद्रव्यसाक्षात्कारसामान्यकारणस्य महत्त्वसमानाधिकरणोद्भूतरूपव-
त्त्वादित्यर्थः।

प्राञ्चस्तु 'त्वक्सम्बन्धे' त्वक्चन्द्रप्रभयोः संयोगे, महत्त्वोद्भूतरूप-

इति प्रत्यक्षतापत्तिः द्रव्यसाक्षात्कारहेतोः सत्त्वात्। ं रङ्गे रजते च विसंवादिन्यौ भवतः भेदाग्रहात् च संवादिन्यौ, विशिष्टज्ञानाभावात्। अथ रजत-ङ्गयोः रजत-रङ्गभेदाग्रहात् विसंवादिन्यौ बलात्या- ां तत्सामग्रीसत्त्वात्। विसंवादिनी तत्र सत्यरजते सम्भवतीति चेत्। अत एव भेदाग्रहो न तद्धेतुः तत्-

---

ाः चन्द्रप्रभायाः वहिरिन्द्रियजद्रव्यसाक्षात्कारसामान्यापत्तिः हिरिन्द्रियजद्रव्यसाक्षात्कारसामान्यहेतोर्वहिरिन्द्रियसंयोगस्य मह- ्भागाधिकरणोद्भूतरूपस्य च सत्त्वादित्यर्थः इत्याहुः।

एवञ्च विपरीतचतुष्काद्युगपत्प्रवृत्ति-निवृत्ती न सम्भवत इत्याह, एवमिति, विपरीतचतुष्कादिति शेषः, 'विसंवादिन्याविति, रजतत्व- ारकप्रवृत्ति-रङ्गत्वप्रकारकनिवृत्ती इति शेषः, 'संवादिन्याविति, ङ्गत्वप्रकारकप्रवृत्ति-रजतत्वप्रकारकनिवृत्ती इति शेषः। रजतत्वाभाव- वृत्तिविशेष्यतासम्बन्धेन रजतत्वप्रकारकप्रवृत्त्युत्पत्तिं प्रति स्वरूपसम्ब- न्धेन विशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताकरजतभेदग्रहाभावो रङ्ग- ाभाववद्वृत्तिविशेष्यतासम्बन्धेन रङ्गत्वप्रकारकनिवृत्त्युत्पत्तिं प्रति स्व- रूपसम्बन्धेन विशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताकरङ्गभेदग्रहाभावो हेतुरिति क्रमेण भेदाग्रह-विसंवादिप्रवृत्ति-निवृत्तीनां कार्य्य-कारण- भाव इत्यभिप्रायेणाशङ्कते, 'अथेति, 'रजत-रङ्गभेदाग्रहादिति विशेष्य- तासम्बन्धावच्छिन्नप्रतियोगिताकरजत-रङ्गभेदग्रहाभावसत्त्वादित्यर्थः,

सत्त्वेऽपि तदभावात्। न च प्रवृत्ति-निवृत्तिगतं विसंवादित्वं संवादित्वमपेक्ष्य तद्धेतुना ते जन्येते, कारणस्य कार्य्यानपेक्षणादिति। मैवं। प्रवृत्तेरनिष्टविषयत्वं निवृत्तेरिष्टविषयत्वं विसंवादः, तथाचानिष्टविषयप्रवृत्तावि-

---

'विसंवादिन्याविति विसंवादित्वसम्बन्धेन रजते रजतत्वप्रकारकप्रवृत्तिः रङ्गे रङ्गत्वप्रकारकनिवृत्तिः स्यातामित्यर्थः। विसंवादित्वञ्च रजतत्वरङ्गत्वाभाववद्वृत्तिविशेष्यत्वमिति शङ्कते, 'विसंवादिनीति रजते विसंवादित्वसम्बन्धे रजतत्वप्रकारकप्रवृत्तिः रङ्गे विसंवादित्वसम्बन्धेन रङ्गत्वप्रकारकनिवृत्तिर्न सम्भवतीत्यर्थः, रजत-रङ्गयोर्वस्तुगत्या रजतत्व-रङ्गत्वाधिकरणत्वादिति भावः। 'अतएवेति रजतत्वादिमति रजतत्वाभाववद्वृत्तिविशेष्यत्वादिसम्बन्धेन प्रवृत्त्यादेरसम्भवादेवेत्यर्थः, 'तत्त्वेऽपीति, तथाचापत्तौ बाधस्यानुगुणतया तस्य तद्धेतुत्वे आपत्तिर्दुर्व्वारेति भावः। 'न चेति न हीत्यर्थः, 'प्रवृत्ति-निवृत्तिगतं विसंवादित्वमिति रजतत्वप्रकारकप्रवृत्ति-रजतत्वप्रकारकनिवृत्त्योर्विसंवादित्वसम्बन्धेन विशेष्यसत्त्वमित्यर्थः, 'कार्य्यानपेक्षणादिति कार्य्यात्यन्ताधिकरणे कार्य्यतावच्छेदकसम्बन्धेन सत्तासहकारेण कार्य्याजनकत्वादित्यर्थः। यथोक्तरीत्या भेदाग्रहस्य न प्रवृत्त्यादिहेतुत्वं तथासति निर्द्धर्म्मितावच्छेदकस्य प्रमेयत्वादिसामान्यधर्म्मधर्म्मितावच्छेदकस्य वा रजतत्वादिप्रकारकभेदग्रहस्य सत्त्वेऽपि रजतत्वादिप्रकारकप्रवृत्त्यादेरनुत्पादापत्तेरपि तु उपादानव्यक्तिभेदेनैव भेदाग्रहस्य विसंवादि-

विषयनिवृत्तौ च भेदाग्रहो हेतुरिति कथन्तत इष्टानि-
विषयप्रवृत्ति-निवृत्ती स्यातां, तच्च तस्यासामर्थ्यादिति।
च ब्रूमः। ज्ञानं स्वविषये प्रवर्त्तकमित्याद्यप्रवृत्तौ

वृत्त्यादिकं प्रति कार्य्य-कारणभावभेदाभ्युपगमात् वस्तुगत्या रजत-
त्वाभाववती या या व्यक्तिः तत्तद्व्यक्त्युपादानकरजतत्वप्रकारकप्रवृत्तिं
प्रति इदन्त्वधर्म्मितावच्छेदककतत्तद्व्यक्तिविशेष्यक-रजतभेदग्रहाभावः
पुरुषनिष्ठो हेतुरेवं वस्तुतो रङ्गत्वाभाववती या या व्यक्तिः तत्त-
द्व्यक्त्युपादानकरङ्गत्वप्रकारकनिवृत्तिं प्रति इदन्त्वधर्म्मितावच्छेदककतत्त-
द्व्यक्तिविशेष्यक-रङ्गभेदग्रहाभावः पुरुषनिष्ठो हेतुः रजतव्यक्त्युपादानक-
रजतत्वादिप्रकारकप्रवृत्त्यादिकं प्रति तु नेदन्त्वधर्म्मितावच्छेदकक-
तद्रजतव्यक्तिविशेष्यक-रजतभेदग्रहाभावो हेतुः तादृशप्रवृत्त्यादेः
तादिनियमात् तादृशभेदाग्रहस्य परमते अप्रसिद्धत्वाच्च अतो-
न्योन्याश्रयापत्तिरेव इत्यभिप्रायेण भ्रमं निराकृत्य दूषयति, 'मैव-
मिति, 'प्रवृत्तेः' रजतत्वप्रकारकप्रवृत्तेः, 'अनिष्टविषयत्वं' रजतत्वा-
भाववत्तत्तद्व्यक्त्युपादानकत्वं, 'निवृत्तेः' रङ्गत्वप्रकारकनिवृत्तेः, 'इष्ट-
विषयत्वं' रङ्गत्वाभाववत्तत्तद्व्यक्त्युपादानकत्वं, 'अनिष्टविषयप्रवृत्ताविति
रजतत्वाभाववत्तत्तद्व्यक्त्युपादानकरजतत्वप्रकारकप्रवृत्ताविति अर्थः, 'इष्ट-
विषयनिवृत्तौ चेति रङ्गत्वाभाववत्तत्तद्व्यक्त्युपादानकरङ्गत्वप्रकारकनि-
वृत्तौ चेत्यर्थः, 'भेदाग्रहो हेतुरिति इदन्त्वधर्म्मितावच्छेदकक-तत्त-
द्रजतव्यक्तिविशेष्यक-रजतभेदाग्रहः इदन्त्वधर्म्मितावच्छेदकक-तत्त-
द्रङ्गविशेष्यक-रङ्गभेदाग्रहः यथाक्रमं हेतुरित्यर्थः। 'कथं तत इति

संवादिप्रवृत्तौ च सर्व्वैरवधारितं लाघवाद्बाधकाभावाच्च। तत इष्टज्ञानं शुक्तौ प्रवर्त्तकं तद्विषयकं तद्व्यवहारहेतुत्वात् स्वाविषये तस्यासामर्थ्यात्। अथ भेदाग्रहात् ग्रहण-स्मरणाद्यावश्यकाद्विसंवादिप्रवृत्त्युपपत्तेर्वि-

---

कथं विशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताकरजत-रङ्गभेदग्रहाभावाभ्यां रजतोपादानकरजतत्वप्रकारकप्रवृत्ति-रङ्गोपादानक-रङ्गत्वप्रकारकनिवृत्तौ स्यातामित्यर्थः, 'तत्र तस्येति तादृशरजतभेदग्रहाद्यभावस्य प्रवृत्तादावहेतुत्वादित्यर्थः।

केचित्तु यथोक्तसम्बन्धेन रजतत्व-रङ्गत्वप्रकारकप्रवृत्ति-निवृत्त्युत्पत्तिं प्रति विशेष्यतासम्बन्धावच्छिन्नरजत-रङ्गभेदग्रहाभावयोः विशेषणतासामान्यसम्बन्धेन न हेतुत्वमपि तु रजतत्व-रङ्गत्वाभाववद्वृत्तिविशेषणतासम्बन्धाभ्यामिति नोक्तापत्तिसम्भव इत्यभिप्रेत्य भ्रमसभ्युपेत्यैव दूषयति, 'सैवमिति, 'प्रवृत्तेः' रजतत्वादिप्रकारकप्रवृत्तेः, 'अनिष्टविषयत्वं' इष्टतावच्छेदकरजतत्वाद्यभाववद्विशेष्यकत्वं, 'निवृत्तेः' रङ्गत्वादिप्रकारकनिवृत्तेः, 'इष्टविषयत्वं' इष्टतावच्छेदकरङ्गत्वाद्यभाववद्विशेष्यकत्वं, 'अनिष्टविषयप्रवृत्ताविति रजतत्वाभाववद्वृत्तिविशेष्यतासम्बन्धेन रजतत्वप्रकारकनिवृत्त्युत्पत्तावित्यर्थः, 'इष्टविषयनिवृत्तौ चेति रङ्गत्वाभाववद्वृत्तिविशेष्यतासम्बन्धेन रङ्गत्वप्रकारकनिवृत्त्युत्पत्तौ चेत्यर्थः, 'भेदाग्रहो हेतुरिति रजतभेदवद्वृत्तिविशेषणतासम्बन्धेन विशेष्यतासम्बन्धावच्छिन्नरजतभेदग्रहाभावो रङ्गभेदवद्वृत्तिविशेषणतासम्बन्धेन विशेष्यतासम्बन्धावच्छिन्नरङ्गभेदग्रहाभाव

विशिष्टज्ञानकल्पने गौरवाच्च स्वाविषयेऽपि ज्ञानं प्रवर्त्तक-
मिति कल्पनात्। सर्वैः प्रथममवधारितमपि त्यज्यता-
मिति चेत्। न। प्रथमप्रवृत्तप्रमाणबलेन तत्रापि विशि-

प्रयोजकं हेतुरित्यर्थः, 'तत इति विशेष्यतासम्बन्धावच्छिन्नरजत-
विशेष्यताभावादित्यर्थः, 'दृष्टानिष्टेति रजत-रङ्गविशेष्यक-रजतत्व-रङ्ग-
त्वप्रकारक-प्रवृत्ति-निवृत्ती स्यातामित्यर्थः, 'तत्र तस्यासामर्थ्यादिति
रजत-रङ्गयोः रजत-रङ्गभेदग्रहाभावस्य कारणताघटकसम्बन्धविरहा-
दित्यर्थः।

यदा रजतत्वाभाववद्वृत्तिविशेष्यतासम्बन्धेन रजतत्वप्रकारक-
प्रवृत्त्युत्पत्तौ रजतभेदस्य रङ्गत्वाभाववद्वृत्तिविशेष्यतासम्बन्धेन रङ्गत्व-
प्रकारकनिवृत्त्युत्पत्तौ रङ्गभेदस्य च सहकार्य्यन्तरान्नोक्तापत्ति-
रत्र इत्यभिप्रेत्य भ्रममभ्युपेत्यैव दूषयति, 'मैवमिति, 'प्रवृत्तेरि-
त्यादेरर्थस्तु पूर्ववत्। 'भेदाग्रहो हेतुरिति स्वरूपसम्बन्धेन यथोक्त-
रजत-रङ्गभेदाग्रहो हेतुरित्यर्थः, 'ततः' तन्मात्रात्, 'तत्र तस्यासाम-
र्थादिति रजत-रङ्गयोः रङ्ग-रजतभेदाग्रहस्य रजत-रङ्गभेदात्मक-
प्रकारविरहादित्यर्थः, इत्याहुः।

'आदेतदितिपूर्वपक्षे समाधत्ते, 'अत्र ब्रूम इति, यद्यपि सत्य-
प्यभेदकशरीरलाघवे प्रकृते कार्य्यं प्रति कार्य्य-कारणभावद्वाये
च व्यक्तिकल्पनागौरवं कल्पनागौरवञ्चाकिञ्चित्करमित्येव समाधानं
युक्तं तथापि स्फुटत्वादुपेक्षितं। 'ज्ञानं स्वविषये प्रवर्त्तकमितीति,
'स्वविषये' स्वविषय एव स्वविशेष्य एवेति यावत्, तथा च यज्ज्ञानं

इष्टज्ञानकल्पनात् तत्र बाधकं विना तद्विरोधेन कल्प-
नान्तरानुदयाच्च फलमुखगौरवस्यादोषत्वात्। अन्यथा
प्रथमं सर्व्वैर्गृहीतापि कार्य्यान्विते शक्तिः सिद्धायदग्रं

यत्प्रकारकत्वे सति यदुपादानकप्रवृत्तिजनकं भवति तत् तद्विष्ट-
विशेष्यतानिरूपित-तत्प्रकारताकं भवतीति यत्तद्भ्यां सामान्यो
नियम इत्यर्थः, 'आद्यप्रवृत्तौ' स्तनोपादानकाद्यप्रवृत्तिजनकप्रत्यक्षे,
'संवादिप्रवृत्तौ च' संवाद्याद्यप्रवृत्त्यन्तरजनकप्रत्यक्षे, 'सर्व्वैरिति
बालैरिति शेषः, अवधारणे हेतुमाह, 'लाघवादिति कारणतावच्छे-
दकशरीरलाघवादित्यर्थः, 'बाधकाभावाच्चेति कल्पनागौरवादि-
स्वरूपबाधकास्फुरणाच्चेत्यर्थः। अत्र विशेषणता-विशेष्यतावच्छेदकत्व-
घटकत्वेन प्रकारकत्वं हेतौ निविष्टमतो नेष्टसाधनत्वादिघटकपदार्थ-
मादाय तज्ज्ञाने व्यभिचारः। न च तथापि-उदासीनपदार्थमादाय
तद्विषयकसमूहालम्बन-प्रवर्त्तकज्ञाने हविराद्युपादानकप्रवृत्तिजनके
यागादिनिष्ठे साधनत्वादिज्ञाने च व्यभिचार इति वाच्यं। तदु-
पादानकत्वघटितधर्म्मावच्छिन्नकार्य्यताप्रतियोगिक-कारणतावच्छेदकं
यत्प्रकारकं भवतीति विवक्षितत्वादित्यादि स्वयमूह्यमिति भावः।
'इष्टज्ञानं शुक्तौ प्रवर्त्तकमिति शुक्तौ प्रवर्त्तकमिष्टज्ञानमिति योजना,
शुक्त्युपादानकप्रवृत्तिजनकं रजतत्वप्रकारकं ज्ञानमित्यर्थः, 'तद्वि-
षयकमिति शुक्तिनिष्ठविशेष्यतानिरूपितरजतत्वप्रकारताकमित्यर्थः,
'तद्व्यवहारहेतुत्वादिति रजतप्रकारकत्वे सति शुक्त्युपादानकप्रवृत्ति-
हेतुत्वादित्यर्थः, 'स्वाविषये इति शुक्त्यविशेष्यके ज्ञाने इत्यर्थः, 'तद्व

ात् गौरवाच्च परित्यज्येतेति साधु समर्थितङ्गुरुमतं। ानु स्वविषये ज्ञानं प्रवर्त्तकमिति सत्यं किन्तु विसंवा- ेप्रवृत्ताविदं ज्ञानमेव प्रवर्त्तकं[1] न त्विष्टज्ञानमपि, ाहि ज्ञायमानेष्टभेदाग्रहे कारणतावच्छेदकं लाघवादि- ति दण्डत्ववदन्यथासिद्धं[2]। एवं हि तत्प्रतिबद्धव्यवहारा-

---

ुपादानकप्रवृत्तिजनकत्वस्य, 'असामर्थ्यात्' असत्त्वात्। 'अथेति, ग्रहणं' इदन्त्वरूपेणोपादानप्रत्यक्षं, 'स्मरणं' उपादानेच्छाविषय- ावच्छेदकधर्म्मप्रकारकस्मरणं, 'आवश्यकादिति अवश्यकृप्रनियतपूर्व्व- र्त्तिताकादित्यर्थः, 'विशिष्टज्ञानेति विशिष्टप्रत्यक्षेत्यर्थः, 'स्वावि- ेऽपि ज्ञानमिति स्वोपादानाविशेष्यकमपि प्रत्यक्षमित्यर्थः, 'स्वं' विसंवादिप्रवृत्तिः, 'प्रवर्त्तकं' विसंवादिप्रवृत्तिजनकं, 'अवधारित- ीति, व्याप्यत्वमिति शेषः। 'प्रथमप्रवृत्तेति प्रथमोत्पन्नव्याप्ति- निश्चयबलेनेत्यर्थः, 'तत्रापि' विसंवादिप्रवृत्तिपूर्व्वमपि, 'तत्र बाधकं विनेति प्रथमं व्याप्तिनिश्चयोत्पत्तौ प्रतिबन्धकं विनेत्यर्थः, 'तद्विरोधे- ति तद्विरोधिविषयककल्पनान्तरासम्भवाच्चेत्यर्थः। ननु सर्व्वत्र विसंवादिप्रवृत्तिपूर्व्वं विशिष्टज्ञानकल्पनमपि कथं गौरवज्ञानमेव तत्र प्रतिबन्धकं इत्यत आह, 'फलमुखेति फलान्तरवर्त्तिगौरवस्ये- त्यर्थः, तथाच बालस्य प्रथमं तादृशगौरवस्फूर्त्तिरेव नास्तीतिभावः।

---

(१) 'ज्ञानमेव प्रवर्त्तकं' इत्यत्र 'ज्ञानं प्रवर्त्तकमेव' इत्ययं पाठः टीका- कारसम्मतः।

(२) लाघवात् दण्डत्ववदित्यन्यथासिद्धमिति क०।

नुकूलत्वं तद्विषयत्वं रजतज्ञानस्य शुक्तौ नास्ति। अन्यथा रजतज्ञानस्य शुक्तिविषयत्वापत्तेः। संवादिप्रवृत्तौ

'अन्यथेति सर्व्वैः प्रथमावधारितस्यापि परित्यागे इत्यर्थः, 'कार्य्यान्विते शक्तिरिति पदत्वावच्छेदेन कार्य्यविषयकशाब्दबोधजनकतेत्यर्थः, 'सिद्धार्थदर्शनादिति सिद्धार्थकवाक्यादप्यन्वयबोधानुरोधादित्यर्थः, 'साधु समर्थितमिति, यद्यपि प्रथमगृहीतापरित्यागे सिद्धार्थकस्याप्रामाण्यापत्त्या साधु न्यायमतसमर्थनमिति तैरपि वक्तुं शक्यं, तथापि तत्र प्रथमगृहीतपरित्यागे अनुभवविरोधो बीजं, सिद्धार्थकादप्यन्वयानुभवस्यानुभवसिद्धत्वात् अत्र तु न सोऽस्तीति भावः 'स्वविषय इति पूर्व्ववत् सावधारणं, यज्ज्ञानं यत्प्रकारकज्ञानत्वे सति यदुपादानकप्रवृत्तिजनकं भवति तदवश्यं तन्निष्ठविशेष्यतानिरूपितप्रकारताकं भवतीति सत्यमित्यर्थः, 'प्रवर्त्तकमेवेति एवकारोभिन्नक्रमे इदन्त्वरूपेणोपादानप्रत्यक्षमेव जनकमित्यर्थः,'न त्विष्टज्ञानमपीति न तु उपादानेच्छाविषयतावच्छेदकरजतत्वादिप्रकारकज्ञानमपीत्यर्थः, 'इष्टभेदाग्रह इति उपादानेच्छाविषयतावच्छेदकावच्छिन्नभेदाग्रह इत्यर्थः, 'लाघवादिति उपादानप्रत्यक्ष-भेदाग्रहेष्टतावच्छेदकप्रकारकज्ञानानां त्रयाणां हेतुत्वापेक्षया लाघवादित्यर्थः।

केचित्तु 'लाघवादिति मिथ्याज्ञानकल्पनामपेक्ष्य लाघवात् कल्पनालाघवाच्चेत्यर्थः, इत्याहुः। तदसत्। सिद्धान्ते अन्यथेत्यादिना विनिगमनाविरहाभिधानासङ्गतेः।

(१) अविसंवादिप्रवृत्ताविति ख०।

ष्टज्ञानं प्रवर्त्तकं तस्य विशिष्टज्ञानत्वात्। अभेदेनाव-
च्छेदकत्वाभावादिति मम सिद्धान्तसार इति चेत्।
उच्यते। स्वतन्त्रान्वय-व्यतिरेकादिष्टज्ञानं हेतुरेव न
चेतरहेतुतावच्छेदकमन्यथासिद्धं वा। न हीष्टज्ञान-
मादायैवेष्टभेदाग्रहस्यान्वय-व्यतिरेकौ येन दण्डत्व-
वदवच्छेदकं[१] नापीष्टज्ञानस्य भेदाग्रहगर्भत्वेनान्वय-
व्यतिरेकौ येन दण्डरूपवत्तदन्यथासिद्धं। अन्यथा
गृहीतभेदेष्टज्ञानं हेतुरवच्छेदको भेदाग्रह इत्येव
तं न स्यात् तस्मात्स्वतन्त्रान्वय-व्यतिरेकात् उभयो-
रपि हेतुत्वं। किञ्चेष्टविषयप्रवृत्तिस्थले प्रवृत्तिमात्रं

उपसंहरति, 'एवं हीति, 'तत्प्रतिबद्धेति रजतत्वप्रकारकज्ञान-
जन्यप्रवृत्त्युपादानत्वमित्यर्थः, 'विषयत्वं' उक्तनियमवत्त्वाद्विशेष्यत्वसाधकं,
'रजतज्ञानस्य' रजतत्वप्रकारकज्ञानस्य। 'अन्यथेति विशेष्यतासाधकं
विनापि विशेष्यतासत्त्वे इत्यर्थः, 'रजतज्ञानस्य' रजतज्ञानमात्रस्य सत्य-
रजतज्ञानस्यापीति यावत्। नन्वेवं संवादिप्रवृत्तावपि उपादानेच्छा-
विषयतावच्छेदकधर्म्मप्रकारकज्ञानं न हेतुः स्यात् तस्यापि विशिष्टज्ञा-
नगिष्ठकारणतायामवच्छेदकत्वेनान्यथासिद्धत्वादित्यत आह, 'संवा-
दीति, 'इष्टज्ञानं' उपादानेच्छाविषयतावच्छेदकधर्म्मप्रकारकं ज्ञानं,
एवमग्रेऽपि, सर्व्वत्र 'प्रवर्त्तकं' जनकं, 'तस्य' तस्यैव। 'अन्यथासिद्धं

---

(१) दण्डत्ववदवच्छेदकमिति ख०।

प्रतीष्टज्ञानस्य हेतुत्वादियमपि प्रवृत्तिस्तज्ज्ञान्या कृत-
हेतुं विना कार्य्यानुत्पत्तेः। न चेष्टज्ञानजन्यत्वे इष्ट-
विषयप्रवृत्तित्वमवच्छेदकं गौरवात्। बाधकं विना
सामान्ययोः कार्य्य-कारणभावनियमात्। अत एव
तन्नोपाधिरपि। अथ तत्रापीदं ज्ञानं प्रवर्त्तकं दैवा-
धीनं तस्येष्टविषयत्वमपीति चेत्। तर्हि इष्टे इदमिति
ज्ञानादेव प्रवृत्तिः स्यात्। न ह्यत्रैव तत्रापि ज्ञायमाने-
ष्टभेदाग्रहः प्रवर्त्तकः। एतेन न रजतज्ञानं शुक्तिविष-
यकं तत्प्रतिबद्धव्यवहाराहेतुत्वादिति निरस्तं। असि-
द्धेः। ननु ज्ञानं यथार्थमेवेति व्याप्तिरेव तद्बाधिका

वेति तत एवान्यथासिद्धं वेत्यर्थः। 'इष्टज्ञानमादायैवेति इष्टज्ञान-
विशिष्टत्वेनैवेत्यर्थः, किन्तु भेदाग्रहत्वेनैवेति भावः। 'भेदाग्रहगर्भ-
त्वेनेति भेदाग्रहगर्भेष्टज्ञानत्वेनैवेत्यर्थः, 'दण्डरूपवदिति यथा
लाघवज्ञानात् दण्डत्वेनैव हेतुता दण्डरूपत्वेन दण्डरूपमन्यथासिद्धं
तथा लाघवाद्भेदाग्रहत्वेनैव हेतुतया तदन्यथासिद्धं स्यादित्यर्थः।
'अन्यथा' स्वातन्त्र्येणान्वय-व्यतिरेकसत्त्वेऽप्यन्यनिष्ठहेतुतावच्छेदकत्वे
इत्यर्थः, 'उभयोरपीति, तन्नये इति शेषः। 'इष्टविषयप्रवृत्तिस्वरूप
इति रजतोपादानक-रजतत्वप्रकारकप्रवृत्तावित्यर्थः, अन्वय-व्यतिरेक-
ज्ञानादिति शेषः, 'प्रवृत्तिमात्रं प्रति' रजतत्वप्रकारकप्रवृत्तिमात्रं प्रति,
'इष्टज्ञानस्य' रजतत्वप्रकारकज्ञानस्य, 'हेतुत्वादिति वक्ष्यमाणयुक्त्या

तस्य प्रवृत्तिमात्रे विशिष्टज्ञानमिष्टज्ञानञ्च हेतुर्लाघ-
वात् स्वविषये ज्ञानं प्रवर्त्तकं सर्वैरेवाद्यप्रवृत्तौ तथावग-
मात् अस्तत्यस्थले इष्टज्ञानमपि प्रवर्त्तकं न तु भेदाग्रहे
हेतुतावच्छेदकमित्यन्यथाख्यातिसाधनं न भवतीति
चेत्। न। तेषामन्यथासिद्धान्वय-व्यतिरेकावधारित-
कारणतामूलकत्वेन तैरेव व्याप्तिबाधात्। क्लृप्तहेतुं विना

मानविशेष्यताप्रत्यासत्त्या सामान्यतो हेतुत्वादित्यर्थः, 'इयमपीति
शुक्त्युपादानक रजतत्वप्रकारिकापीत्यर्थः, 'तज्जन्या' समानविशेष्यता-
प्रत्यासत्त्या रजतत्वप्रकारकज्ञानजन्या, 'क्लृप्तहेतुं विनेति क्लृप्तसामान्य-
हेतुं विनेत्यर्थः। 'इष्टज्ञानजन्यत्व इति सामान्यतो रजतत्वप्रकारक-
ज्ञानजन्यत्वइत्यर्थः, 'इष्टविषयकेति रजतत्ववद्विशेष्यकप्रवृत्तित्वमि-
त्यर्थः। ननु तथापि तादृशसामान्यकार्य्य-कारणभावे मानाभाव
इत्यत आह, 'बाधकं विनेति, 'सामान्ययोरिति यद्विशेषयोः कार्य्य-
कारणभावस्तत्सामान्ययोरपीत्यर्थः। 'अत एवेति गौरवेण रजतत्व-
विशेष्यक-प्रवृत्तित्वस्य कार्य्यतानवच्छेदकत्वादेवेत्यर्थः, 'तन्नोपाधि-
रिति रजतत्वप्रकारकप्रवृत्तिहेतुकोक्तानुमाने रजतवद्विशेष्यकत्वं नो-
पाधिरित्यर्थः, साध्यव्यापकताग्राहकानुकूलतर्काभावादिति भावः।

केचित्तु 'अत एवेति यद्विशेषयोरितिन्यायेन सामान्यतः कार्य्य-
कारणभावग्रहादेवेत्यर्थः, तेनैवानुकूलतर्केण हेतोः साध्यव्याप्यत्व-
निश्चयादिति भावः इत्याहुः।

काय्यानुत्पत्तेः विपक्षे बाधकाभावाच्च ज्ञानायथार्थत्वे-
ऽपि निष्कम्पप्रवृत्त्याद्युपायस्य वक्ष्यमाणत्वात्। एतेन
संस्कारेन्द्रियाभ्यां प्रत्यभिज्ञानवच्छब्दाभासादितो वा

उक्तानुमाने दृष्टान्तासिद्धिमाशङ्कते, 'अथेति, 'तत्रापि'
संवादिप्रवृत्तावपि, 'दैवाधीनं' सामग्र्यधीनं, 'इष्टविषयकत्वं' क्वचि-
द्रजतत्वप्रकारकत्वं। 'इष्ट इति वस्तुगत्या रजतविशेष्यकादित्यर्थः
'ज्ञानादेवेत्येवकारेण रजतत्वप्रकारकज्ञानस्य व्यवच्छेदः। 'अन्ये
विसंवादिप्रवृत्तावित्र, 'तत्रापि' संवादिप्रवृत्तावपि, 'ज्ञायमाने
ष्टेति स्वतन्त्रोपस्थितरजतत्वावच्छिन्नप्रतियोगिताकभेदाग्रह इत्यर्थः
'रजतज्ञानमिति विसंवादिप्रवृत्त्यव्यवहितप्राक्कालिकं रजतज्ञान
मित्यर्थः, 'तत्प्रतिबद्धेति तदुपादानकेत्यर्थः, 'असिद्धेः' स्वरूपासिद्धे
'तद्बाधिकेति अन्यथाख्यातौ बाधिकेत्यर्थः। 'अत एव' उक्तयाके
बाधकत्वादेव, 'अन्यथाख्यातिसाधनं न भवतीत्ययेतनेनान्वयः, 'प्रवृत्ति
मात्रे' रजतत्वप्रकारकप्रवृत्तिमात्रे, "यद्विशेषयोरितिन्यायेनेतिशेषः
'विशिष्टज्ञानं' रजतत्ववैशिष्ट्यावगाहिज्ञानं, 'इष्टज्ञानं' रजतत्वप्रकार
ज्ञानं, 'चकारो वार्थे, 'हेतुरिति समानविशेष्यताप्रत्यासत्त्या हेतुरित्यर्थः
'स्वविषय इति सावधारणं, यद्यज्ज्ञानं यत्प्रकारकत्वे सति यदु
पादनकप्रवृत्तिजनकं भवति तत्तन्निष्ठविशेष्यतानिरूपित-तत्प्रकारता
भवतीति सर्वैराद्यप्रवृत्तावावधारितायामित्यर्थः, अत इति शेषः
'असत्यस्थल इति 'इष्टज्ञानमपीत्यपिरत्र योज्यः, तेनासत्यस्थलेऽपी-

रस्परं सम्बन्धविरहिणि एकं ज्ञानं न भवतीति ज्ञानं यथार्थमेवेति व्याप्तिरिति निरस्तं। व्याप्त्याद्यसिद्धेः सामग्रीसत्त्वे कार्य्यावश्यकत्वाच्च।

र्थः, अप्रत्यक्षत्वं शुक्त्यादिकं, 'दृष्टज्ञानं प्रवर्त्तकमिति प्रवर्त्तकं रजतत्वप्रकारकं ज्ञानमित्यर्थः, शुक्त्यादिविषयकमिति शेषः, 'न मिति न वेत्यर्थः, तदिति शेषः, 'इत्यन्यथाख्यातिसाधनमिति इत्युक्त-रजतत्वप्रकारकप्रवृत्तिः समानविशेष्यताप्रत्यासत्त्या रजतत्वप्रकारकज्ञान-त्या रजतत्वप्रकारकप्रवृत्तित्वात् शुक्तौ प्रवर्त्तकं रजतत्वप्रकारकज्ञानं शुक्तिविशेष्यकं रजतत्वप्रकारकत्वे सति शुक्त्युपादनकप्रवृत्तिहेतुत्वा-दित्यन्यथाख्यातिसाधनानुमानानामित्यर्थः, 'व्याप्तिबाधादिति ज्ञानं यथार्थमेवेति व्याप्तिबाधादित्यर्थः। 'कृत्स्नहेतुं विनेति कृत्स्नसामा-ग्रीकारणं विनेत्यर्थः, 'कार्य्यानुत्पत्तेरिति विसंवादिप्रवृत्तिलक्षण-कार्य्योत्पत्तेरसम्भवादित्यर्थः, 'विपक्षे बाधकाभावात्' तज्ज्ञानं यथार्थ-मेवेति व्याप्तिग्रहे विपक्षे बाधकाभावाच्चेत्यर्थः। ननु ज्ञानायथार्थत्वे ज्ञानलक्षणसाधारणधर्मदर्शनात् सर्व्वत्रैव ज्ञाने तच्छङ्कया निष्कम्प-प्रवृत्तिर्न स्यादित्येव विपक्षे बाधकमित्यत आह, 'ज्ञानेति। 'प्रत्यभि-ज्ञानवदिति, 'प्रत्यभिज्ञानवत् संस्कारेन्द्रियाभ्यामिति योजना। 'सामग्रीसत्त्व इति, न हि व्याप्तिभङ्गभियैव सामग्री कार्य्यं नार्जयि-ष्यति, इति भावः।

एकदेशिनस्तु। रजत-रङ्गयोः रजत-रङ्गभेदग्रहाद् युगपत्प्रवृत्ति-निवृत्ती। न चान्यथाख्यातिः, दोषवशात्पुरोवर्त्तिनं विहाय स्मृतरजत-रङ्गाभ्यां पुरोवर्त्तिनि भेदग्रहात्। न च रजतत्वेन स्मृतिः संस्कारगोचर-

---

'एकदेशिनस्त्विति प्राभाकरैकदेशिनस्त्वित्यर्थः, 'नेति, विपरीतचतुष्कादिति शेषः। 'नचान्यथाख्यातिरिति रजते रजतभेदस्य रङ्गे रङ्गभेदस्य च ग्रहे अन्यथाख्यात्यापत्तिरित्यर्थः, 'पुरोवर्त्तिनं विहाय स्मृतेति पुरोवर्त्त्यविषयकस्मृतिविषयेत्यर्थः, 'दोषवशादिति च पुरोवर्त्त्यविषयकत्वे हेतुः। यद्यपि यत्किञ्चिद्रजतादिव्यक्तिभेदग्रहमात्रं न प्रवृत्त्यादिप्रतिबन्धकं इदं रजतं ग्रथितरजतभिन्नमिति ज्ञानेऽपि प्रवृत्तिप्रतिबन्धापत्तेः किन्तु रजतत्वावच्छिन्नप्रतियोगिताकभेदग्रह एव प्रतिबन्धकः स च प्रकृते नास्त्येवान्यथाख्यात्यापत्तेः तथापि प्रतियोग्यंशे रजतत्वस्य शुद्धस्य यत्र प्रकारतया भानं तादृशभेदग्रहः प्रतिबन्धकः तत्र रजतत्वस्य प्रतियोगितावच्छेदकतया भानमावश्यकं तथा च पुरोवर्त्तिनि रजते शुद्धरजतत्वेन रजतान्तरभेदग्रहस्य प्रतिबन्धकत्वान्न प्रवृत्तिः एवं रङ्गेऽपि न प्रवृत्तिरित्यभिमानेनेदं। 'सामान्यप्रत्यासत्तेरिति रजतत्वाविषयकनिर्विकल्पकस्मरणरूपस्य संस्कारव्यापारस्येत्यर्थः, 'तुल्यत्वात्' विषयतासम्बन्धेन सर्व्वरजत एव तुल्यत्वात्। यद्यपि सर्व्वरजतविषयकस्मरणेऽपि प्रकृते न कापि क्षतिः तथापि समाधिसौकर्य्यादाह, 'तत्तांश इति, 'प्रत्यासत्तावपि' निर्व्विकल्पकरूपस्य व्यापारस्य सत्त्वेऽपि, यद्वा

र्वरजतविषया स्यात् सामान्यप्रत्यासत्तेस्तुल्यत्वादिति
ाच्यं। तत्तांशे रजतत्वे च प्रत्यासत्तावपि दोषात्
त्वनुभवप्रतिबन्धवदुपपत्तेः। किञ्च प्रत्यक्षे सामान्यं
त्यासत्तिः, स्मरणे तु मनः करणं संस्कारः प्रत्या-
त्तिः, न तु तस्य सामान्यं प्रत्यासत्तिरकरणत्वात्।
त्र। एकरङ्ग-रजतसाक्षात्कारानानन्तरन्तयोरेव यमज-
र्वा विपरीतचतुष्कोऽतिप्रसङ्गादन्यथाख्यातेर्वा।

ुष्टतत्ताकस्मरणस्थले तत्तांशे निर्विकल्पकस्मरणरूपस्य संस्कारव्या-
रस्य सत्त्वेऽपि सा न स्मर्य्यते दोषात् किन्तु रजतमात्रं, यथा वा
ते शुक्त्यादिभ्रमकाले रजत-रजतत्वे इति निर्विकल्पकरूपस्य
न्द्रियव्यापारस्य सत्त्वेऽपि तत्सत्ता नानुभूयते दोषात् तथात्रापि
षात् पुरोवर्त्ति रङ्गं रजते न स्मर्य्यते इत्यर्थः। 'प्रत्यक्षे' विशिष्ट-
क्षे एव, 'सामान्यं' सामान्यनिर्विकल्पकं, 'प्रत्यासत्तिः' इन्द्रियस्य
ापारः, 'प्रत्यासत्तिः' मनसो व्यापारः, 'तस्य' संस्कारस्य, 'सामान्यं
त्यासत्तिः' सामान्यनिर्विकल्पकं व्यापारः, 'अकरणत्वादित्युपलक्षणं
र्विकल्पकात्मकस्मरणे मानाभावाच्चेत्यपि बोध्यं। यद्येवमपि भेदानु-
स्थितिदशायां रङ्ग-रजते इत्यादिविपरीतात्मकादतिप्रसङ्गो दुर्वार-
त्यापि स्फुटत्वादुपेक्ष्य दोषान्तरमाह, 'एकेति एकरङ्ग-रजतत्व-
ारकसाक्षात्कारानानन्तरमित्यर्थः, तत्र रङ्गाद्यन्तरस्यानुपस्थितत्वेन पुरो-
र्त्तिनि तद्भेदग्रहासम्भवादिति भावः। ननु तथापि पूर्व्वजन्मानु-

अन्ये तु रजते नेदं रजतमिति ज्ञानं रजतत्वासंसर्गासंसर्गाग्रहरूपं रजतभेदासंसर्गाग्रहरूपं प्रवृत्तिप्रतिबन्धकमिति । तन्न । अन्यवृत्तितयोपस्थितस्य रजतत्वासंसर्गस्य रजतभेदस्य च रङ्गे असंसर्गाग्रहान्निवृत्ति

भूतरङ्गाद्यन्तरस्मरणं कल्प्यते बलवशादित्यत आह, 'यमजयोरिति' 'अतिप्रसङ्गादन्यथाख्यातेरिति तत्रैव तद्भेदग्रहे अन्यथाख्यात्यापत्तेरित्यर्थः ।

'रजतत्वासंसर्गासंसर्गाग्रहरूपमिति रजतत्वात्यन्ताभावसंसर्गविशिष्टयकमित्यर्थः, एवमग्रेऽपि, 'प्रतिबन्धकं' विपरीतात्मकादितो रङ्गे रजतत्वप्रकारकप्रवृत्त्युत्पत्तौ प्रतिबन्धकं । नचैवं इदं रजतमिति भ्रमादपि रङ्गे रजतत्वप्रवृत्तिर्न स्यात् रजतत्वासंसर्गादेरसंसर्गाग्रहे रजतत्वरूपस्य रङ्गे ग्रहाभ्युपगमे अन्यथाख्यात्यापत्त्या ततस्तदग्रहसत्त्वादिति वाच्यं । उपस्थितस्य रजतत्वासंसर्गादेरसंसर्गाग्रहस्य प्रतिबन्धकत्वात् संसर्गादिकं नोपस्थितमिति भावः । अत एव दूषणात् 'अन्यवृत्तितया उपस्थितस्येति वक्ष्यति । यद्यप्येवमपि रजतत्वासंसर्गादेरनुपस्थितिदशायां इमे रङ्ग-रजते इति विपरीतधिकात् रजते रजतत्वप्रकारकप्रवृत्तिर्दुर्वारा उपस्थितस्य रजतत्वासंसर्गादेरसंसर्गाग्रहस्यैव प्रतिबन्धकत्वात् तथापि तद्दोषे सत्येव दोषान्तरमाह, 'अन्यवृत्तितयोपस्थितस्येति, निरधिकरणकोपस्थितस्येत्यपि बोध्यं, 'असंसर्गाग्रहात्' असंसर्गाग्रहसत्त्वात्, 'निवृत्तिप्र

तत्रात् रङ्गे च तयोरसंसर्गग्रहेऽन्यथाख्यातिः। रजते
जतभेदासंसर्गासंसर्गस्यासंसर्गाग्रहान्निवृत्तिरितिचेत्।
।। भेदासंसर्गासंसर्गस्य भेदसंसर्गरूपत्वेन रजतभेद-
सर्गासंसर्गाग्रहाद्रङ्गे निवृत्तिप्रसङ्गात्। रजतभेदसंस-
ासंसर्गग्रहे चान्यथाख्यातिः। रजतवृत्तितयोपस्थिते
दे रजतभेदेन सह भेदाग्रहः प्रवृत्तिप्रतिबन्धकः, एवं

ादिति अन्यवृत्तित्वेनाधिकरणान्तर्भावे रजतत्वासंसर्गादेरुपस्थिति-
यां रङ्गे इदं रजतमिति भ्रमाद्रजतत्वप्रकारकप्रवृत्त्यनुत्पाद-
ङ्गादित्यर्थः, 'तयोः' रजतत्वासंसर्ग-रजतभेदयोः। पदार्थाविवे-
ेन भ्रान्तः शङ्कते, 'रजत इति, 'रजतभेदासंसर्गासंसर्गस्य'
जतभेदासंसर्गसम्बन्धव्यतिरेकस्य, 'निवृत्तिः' विपरीतद्विकादितो
ते रजतभेदप्रवृत्त्यनुत्पाद इत्यर्थः। भ्रमं निराकृत्य समा-
ते, 'भेदासंसर्गासंसर्गस्येति रजतभेदासंसर्गसम्बन्धव्यतिरेकस्येत्यर्थः,
निवृत्तिप्रसङ्गादिति इदं रजतमिति भ्रमाद्रजतत्वप्रकारकप्रवृत्त्यनु-
ादप्रसङ्गादित्यर्थः। मतान्तरं शङ्कते, 'रजतवृत्तितयेति, 'भेदे'
ादिप्रतियोगिकभेदे, 'भेदाग्रहः' सतोऽपि भेदस्य दोषादग्रहः,
वृत्तिप्रतिबन्धक इति विपरीतद्विकादितो रजते रजतत्वप्रकारक-
ज्ञानुत्पत्तौ प्रतिबन्धक इत्यर्थः। 'निवृत्तावपीति, रङ्गवृत्तितया
ते भेदे रङ्गभेदेन सह भेदाग्रहः प्रतिबन्धक इति शेषः। न च
ताद्यनिष्ठभेदे इत्येवास्तु किमुपस्थितिगर्भतयेति वाच्यं। एवं सति
तमिदमिति ज्ञानादप्यप्रवृत्त्यापत्तेः तत्र रजतवृत्तिताद्रूपभेदे

रङ्गे निवृत्तावपीति चेत्। न। एवमपि शब्दाभासात् युगपत्प्रवृत्ति-निवृत्त्यापत्तेः प्रवृत्ति-निवृत्तिविषयनिष्ठ-भेदयोः रजत-रङ्ग-भेदयोश्च[1] शब्दादनुपस्थित्या प्रति-बन्धकत्वाभावात्।

अपरे तु पुरोवर्त्तिनिष्ठतया ज्ञाते भेदे इष्टानिष्ट-प्रतियोगित्वाभावग्रहात् प्रवृत्ति-निवृत्ती। तथा हि रङ्गे रजतभेदः सन्नपि दोषान्न भासतेऽन्यस्माद्भासत

रजतभेदेन सह भेदाग्रहस्य सत्त्वात्। एवं रजतादिभेदेऽप्युपस्थितत्वं विवक्षणीयं अन्यथा घटभिन्नमिदं रजतमिति ज्ञानादप्यप्रवृत्ति-प्रसङ्गादिति भावः। 'शब्दाभासादिति इमे रङ्ग-रजते इति शब्दा-भासजन्यरङ्ग-रजतोपस्थितिसहकृतादिदन्त्वरूपेण रङ्ग-रजतप्रत्यक्षा-दित्यर्थः। 'प्रवृत्ति-निवृत्तिविषयेति प्रवृत्ति-निवृत्तिविषयनिष्ठे-त्यर्थः, 'रजत-रङ्गभेदयोः' रजत-रङ्गप्रतियोगिकभेदयोः।

'पुरोवर्त्तिनिष्ठतयेति, 'भेदे' भेदसामान्ये, अन्यथा तद्वृत्ति-घटभेदो न रजतप्रतियोगिक इति ज्ञानकाले रजतभिन्नमिति ज्ञाना-दपि प्रवृत्त्यापत्तेः, अतएव ज्ञातमित्युक्तं, अन्यथा शुक्तिनिष्ठे यावति भेदे रजतप्रतियोगिकत्वाभावग्रहे अन्यथाख्यात्यापत्तेरिति ध्येयं। 'अन्यस्मादिति घट-पटादित इत्यर्थः, 'भेदे' भेदसामान्ये

---

(१) रङ्ग-रजतभेदयोरित्ययं क० पुस्तके पाठः परन्त्वयं न टीका-लारसम्मतः।

त्व। तथाच रङ्गवृत्तितया ज्ञाते भेदे रजतप्रतियोगि-
त्वाभावग्रहाद्यथार्थादेव रङ्गे प्रवृत्तिः, रङ्गप्रतियोगित्वा-
भावः सन्नपि दोषान्न भासते इति तत्र न निवर्त्तते। एवं
रजतनिष्ठतयोपस्थिते भेदे रङ्गप्रतियोगित्वाभावग्रहा-

रङ्गे प्रवृत्तिरिति रङ्गे रजतत्वप्रकारकप्रवृत्तिरित्यर्थः। नन्वत्र रङ्ग-
प्रतियोगिकत्वाभावोऽप्यस्तीति तद्ग्रहाद्रङ्गे रङ्गत्वप्रकारकनिवृत्तिरपि
स्यादित्यत आह, 'रङ्गेति, 'न निवर्त्तते' न रङ्गत्वप्रकारकनिवृत्तिः,
रङ्गत्वप्रकारकप्रवृत्तिर्भवतीति। 'न युगपत्प्रवृत्ति-निवृत्ती इति न
विरोधीतद्विकादितो युगपद्रङ्ग-रजतयोः रजतत्वप्रकारकप्रवृत्ति-रङ्गत्व-
प्रकारकनिवृत्तिरेवेत्यर्थः। लौकिकप्रत्यक्षं प्रत्येव दोषः प्रतिबन्धको
न तु सामान्यलक्षणादिजन्यालौकिकप्रत्यक्षे इत्यभिमानेनाशङ्कते,
न च रङ्गेति, यथाश्रुते रङ्गे रजताभेदः सन्नपि दोषान्न गृह्यते
इति पूर्व्वमेवाभिधानात् पुनराशङ्कासङ्गतेः। 'सामान्यबुद्धेः' सामा-
न्यज्ञानात्मकप्रत्यासत्तेः, 'सर्व्वविषयत्वादिति सकलसामान्याश्रयविष-
यकप्रत्यक्षजनकत्वादित्यर्थः, 'रजतभेदेऽपीति, सामान्यत इति शेषः।
अभिमानं निराकृत्य समाधत्ते, 'प्रत्यासत्तावपीति, तथाच सामान्य-
लक्षणादिजन्यालौकिकप्रत्यक्षेऽपि दोषः प्रतिबन्धक इति भावः।

अपरेषां मतं दूषयति, 'मैवमिति, 'इदं रजतमितीति, तथा
च तन्मते केवलादिदं रजतमितिज्ञानात् प्रवृत्तिर्न स्यात् तदानीं
पुरोवर्त्तिवृत्तितया उपस्थितस्य भेदस्य रजतप्रतियोगिकत्वाभावा-
ग्रहादिति भावः। नन्विदं रजतमिति ज्ञानं प्रवृत्तिजनकमेव

द्रजते निवर्त्तते, रजतप्रतियोगित्वाभावः सत्यपि दोषाव गृह्यते इति न युगपत्प्रवृत्ति-निवृत्ती। न च रङ्गवृत्तिभेदत्वं रजतभेदेऽप्यस्तीति तेन रूपेण सोऽपि भासते सामान्यबुद्धेः सर्वविशेषविषयत्वात्[१] तथा च रजतभेदेऽपि तत्प्रतियोगित्वाभावग्रहेऽन्यथाख्यातिरिति वाच्यं। प्रत्यासत्तावपि रङ्गवृत्तिभेदत्वेन रजतभेदस्य दोषेणाग्रहादिति। मैवं। इदं रजतमिति ज्ञानमन्वय-व्यतिरेकाभ्यां प्रवर्त्तकमित्यनुभवसिद्धं। तच्च सत्यस्यैव विशिष्ट-

---

नेत्यत आह, 'तत्रेति प्रवृत्तावित्यर्थः, 'तज्ज्ञानं' इदं रजतमिति ज्ञानं।

केचित्तु 'तत्र' विवादे, विषयत्वं सप्तम्यर्थः, अन्वयश्चास्य 'तज्ज्ञानमित्यनेन, तथाच विवादविषयीभूतमिदं रजतमिति ज्ञानं प्रवृत्तौ कारणमित्यनुभवबाधितमित्यर्थ इत्याहुः।

'न प्रवर्त्तकं' न जनकं, 'तत्र तज्ज्ञानं प्रवर्त्तकमिति नञ्युक्त-पाठे तु तत्र पुरोवर्त्तिनिष्ठतया ज्ञाते भेदे इष्टप्रतियोगिकत्वाभावज्ञानमेव सर्व्वत्र प्रवर्त्तकमित्यनुभवबाधितमित्यर्थः। 'तदपि हेतुरिति इदं रजतमिति ज्ञानं उक्ताभावज्ञानञ्च द्वयमेव हेतुरित्यर्थः। उभयं किं प्रवृत्तिमात्रे हेतुः विवादिप्रवृत्तौ वा आद्ये आह, 'सत्यस्यैव इति, 'तस्य' पुरोवर्त्तिनिष्ठतया ज्ञाते भेदे इष्टप्रतियोगि-

---

(१) सर्व्वविशेषविषयत्वनियमादिति ख०।

ज्ञानमन्यच्च ज्ञानद्वयमेकं वा ज्ञानमिति विवादः, तत्र तज्ज्ञानं न प्रवर्त्तकमित्यनुभवबाधितं। तदपि हेतुरित्यपि न। तस्य सत्यस्थलेऽसिद्धत्वात्[१] विशिष्टज्ञाना-

---

त्वाभावज्ञानस्य, 'अप्रसिद्धत्वादिति नियमतः पूर्व्वसिद्धत्वाभावादित्यर्थः। नियमांशाभावमुक्त्वा अन्यथासिद्धिमाह, 'विशिष्टेति, तथाच यथा प्रत्यक्षे महत्त्वं कारणं अनेकद्रव्यवत्त्वं अन्यथासिद्धं तथा तादृशरूपमन्यथासिद्धमिति भावः। अन्ये आह, 'शब्दाभासादिति इदं रजतमितिशब्दाभासजन्यरजतोपस्थितिसहकृतात् इदन्त्वरूपेण शुक्तिप्रत्यक्षादित्यर्थः, तत्र भेदाद्युपस्थापकशब्दाभावादिति भावः। 'एवं निवृत्तावपीति, क्वचिदिदं रजतमिति ज्ञानमपि केवलं जनकमित्यनुभवसिद्धमिति शेषः। तच्च अपरेषां मते न स्यादिति भावः। इदमुपलक्षणं, पुरोवर्त्तिवृत्तितया ज्ञाते भेदसामान्ये केन रूपेण इष्टानिष्टप्रतियोगिकत्वाभावस्य ग्रहो हेतुः, किं प्रातिस्विकं तत्तद्व्यक्तित्वेन, तत्पुरोवर्त्तिनिष्ठभेदत्वावच्छेदेन, सामानाधिकरण्येन वा, नाद्यः दुर्ग्रहत्वात्, न द्वितीयः रङ्गवृत्तिभेदत्वावच्छेदेन रजतप्रतियोगिकत्वाभावग्रहे अन्यथाख्यात्यापत्तेः, न तृतीयः तद्वृत्तिघटभेदो न रजतप्रतियोगिक इतिज्ञानकाले न रजतभिन्नमिदमिति ज्ञानादपि प्रवृत्तिप्रसङ्गात्। नापि पुरोवर्त्तिवृत्तितया ज्ञातभेदत्वावच्छेदेन तज्ज्ञानं, ज्ञानाविषयकस्य एतद्वृत्तिभेदसामान्यं न रजतप्रतियोगिकमिति ज्ञानस्याकारणत्वापत्तेः। नापि पुरोवर्त्ति-

---

(१) सत्यस्थले तस्यासिद्धत्वादिति ख०।

पेक्षया गुरुत्वात् शब्दाभासात्प्रवृत्तौ भेदादिज्ञानाभावाच्च। एवं निवृत्तावपि।

अन्ये तु इष्टवृत्तितया गृह्यमाणोऽनिष्टवृत्तितया चागृह्यमाणो धर्मः स्वाश्रये प्रवर्त्तक इति स च धर्मो रजते रजतत्वं रङ्गे रजतसादृश्यं। एवं निवृत्तावपीति न

निष्ठतया ज्ञातयावच्छेदान् किञ्चिद्रूपेणानुगतीकृत्य तदवच्छेदेन रजतज्ञानं, रजतभेदातिरिक्तपुरोवर्त्तिनिष्ठभेदो न रजतप्रतियोगिक इति ग्रहादपि नेदं रजतमिति ज्ञानकाले प्रवृत्त्यापत्तेः इत्यपि दूषणं द्रष्टव्यं।

'इष्टवृत्तितयेति उपादानेच्छाविषयतावच्छेदकरजतत्वादिरूपधर्म्मसमानाधिकरणतयेत्यर्थः, 'अनिष्टवृत्तितया' तादृशधर्म्माभावसमानाधिकरणतया, 'स्वाश्रये' स्वप्रकारकज्ञानविषये, तथाच तादृशधर्म्मप्रकारकं ज्ञानं प्रवृत्तौ कारणमिति फलितं। 'रजते' इति सत्यरजतगोचररजतत्वप्रकारकप्रवृत्तावित्यर्थः, 'रङ्गे' रङ्गगोचररजतत्वप्रकारकप्रवृत्तौ, 'रजतसादृश्यमिति। यद्यपि रजतसादृश्यं न रजतत्वसमानाधिकरणतया गृह्यमाणं, तन्नये सादृश्यस्यातिरिक्तपदार्थत्वेऽपि तस्य भेदनियततद्रजतत्वसामानाधिकरण्यग्रहे अन्यथाख्यात्यापत्तेः। नापि रजतसादृश्यं रङ्गवृत्तिचाकचक्यं तस्यापि रङ्गवृत्तिरूपविशेषात्मकतया तत्रापि रजतत्वसमानाधिकरणत्वेन ग्रहे अन्यथाख्यात्यापत्तेः, तथापि रजतपदं यत्किञ्चिद्रजतपरं, तच्छादृश्यमतिरिक्तपदार्थरूपं रजतत्वसमानाधिकरणमपि। न च रजतत्वा-

युगपत्प्रवृत्ति-निवृत्तौ इति। तन्न। एवं हि इमे रङ्ग-
रजते इति शब्दाभासाद्रङ्ग-रजतयोः प्रवृत्ति-निवृत्तौ
स्यातां रजतवृत्तिधर्म्मस्य च रङ्गे रङ्गवृत्तिधर्म्मस्य
रजते[१] शब्दादनुपस्थितेः। न च शब्दानन्तरं प्रत्यक्षेण
योरुपस्थितिः तत्र हेतुर्न शब्द इति वाच्यं। अन-
भ्यासिद्धशब्दानुविधानात् इमे रजत-रङ्गे इति स्वकीयं

समानाधिकरणमपि भवतीति वाच्यं। वस्तुगत्या तथात्वेऽपि
शाक्तयात्वेनाग्रहसम्भवादित्यदोषः।

केचित्तु 'रजतसादृश्यं' रङ्गनिष्ठचाकचक्यविशेषः। नच स न
रजतसमानाधिकरणतया गृह्यमाण इति वाच्यं। 'दृष्टवृत्तितया
गृह्यमाणेत्यस्य उपादानेच्छाविषयतावच्छेदकधर्म्मसमानाधिकरणजा-
तितया गृह्यमाणेत्यर्थात् रङ्गवृत्तिचाकचक्यविशेषोऽपि तथा गृह्य-
माणः सम्भवतीत्याहुः।

'एवं निवृत्तावपीति उपादानद्वेषविषयतावच्छेदकधर्म्मसमाना-
धिकरणत्वेन गृह्यमाणो योधर्म्मः तत्प्रकारकज्ञानं कारणमित्यर्थः,
च धर्म्मोरङ्गे रङ्गत्वप्रकारकनिवृत्तौ रङ्गत्वं, रजतत्वप्रकारकनिवृत्तौ
यत्किञ्चिद्रङ्गसादृश्यमिति भावः। 'न युगपदिति न विपरीत-
दिशादितो युगपद्रङ्ग-रजतयोरुभयोरेव रजतत्वप्रकारकप्रवृत्तिः
रङ्गत्वप्रकारकनिवृत्तिर्वा इत्यर्थः। रजते रङ्गसमानाधिकरणतया
गृह्यमाणस्य रजतत्वस्य यत्किञ्चिद्रजतसादृश्यस्य च दोषादग्रहादेवं

---

(१) रङ्गे रजतवृत्तिधर्म्मस्य रजते रङ्गवृत्तिधर्म्मस्य चेति ख०।

यथार्थज्ञानमनादृत्य[१] तत्रैवेमे रङ्ग-रजते इति प्रतार-कवाक्ये विश्वासेन प्रवृत्ति-निवृत्तिदर्शनाच्च।

इतरे तु रजते रजतत्वं न गृह्यते दोषात् तथा च रजतवृत्तितया यावदुपस्थितधर्म्मस्य रजतत्वेन भेदाग्रहान्न प्रवर्त्तते रङ्गवृत्तितयोपस्थितस्य च कस्यचिद्धर्म्मस्य रजतत्वेन भेदाग्रहाद्रङ्गे प्रवर्त्तते, एवं निवृत्ता

रङ्गे रङ्गत्वसमानाधिकरणतया गृह्यमाणस्य रङ्गत्वादेरपि दोषाद्ग्रहाच्चेति भावः। 'शब्दाभासादिति, इदन्त्वरूपेण रङ्ग-रजतप्रत्यक्षसहकृतादितिशेषः। 'प्रवृत्ति-निवृत्ती इति रजतत्वप्रकारकप्रवृत्ति-रङ्गत्वप्रकारकनिवृत्ती इत्यर्थः, 'रजतवृत्तिधर्म्मस्येति रजतत्वसमानाधिकरणतया गृह्यमाणधर्म्मस्य रजतसादृश्यादेरित्यर्थः, 'रङ्गवृत्तिधर्म्मस्येति रङ्गत्वसमानाधिकरणतया गृह्यमाणधर्म्मस्य रङ्गसादृश्यादेरित्यर्थः। 'तयोः' रङ्ग-रजतसादृश्ययोः, 'तत्र' शब्दाभासस्वीयविसंवादिप्रवृत्ति-निवृत्त्योः। नन्विष्टतावच्छेदकधर्म्मसमानाधिकरणत्वेन तद्धर्म्मज्ञानार्थमिष्टतावच्छेदकोपस्थितिरपेक्षिता इदञ्च शाब्दानुभवविधानत्वित आह, 'इमे इति।

'न प्रवर्त्तते' इति विपरीतद्विकादितो न रजते रजतत्वप्रकारकं प्रवर्त्तत इत्यर्थः। 'कस्यचित्' कस्यचिदपि, 'रङ्गे प्रवर्त्तते' इति विपरीतद्विकादितो रङ्ग एव रजतत्वप्रकारेण प्रवर्त्तते इत्यर्थः, ए

---

(१) स्वज्ञानं यथार्थमनादृत्येति ख०।

पि। यथा तवाभेदग्रहेऽपि मानान्तरात् भेदग्रहः
प्रवृत्तिप्रतिबन्धकः तथा रजते रजतभेदाग्रहेऽपि रजत-
वृत्तितया यावदुपस्थितस्य रजतत्वेन मम भेदग्रहः
प्रवृत्तिप्रतिबन्धक इति। तन्न। एतदपेक्षया विशिष्ट-
ज्ञानस्य लघुत्वेनान्वय-व्यतिरेकाभ्याञ्च हेतुत्वात्। न
च हेत्वभावः, प्रत्यभिज्ञानवत् संस्कारेन्द्रियाभ्यां विशि-

वृत्तावपीति विपरीतद्विकादितो रङ्गत्वप्रकारकनिवृत्त्युत्पत्तावपि,
प्रवृत्तितयोपस्थितयावद्धर्म्माणां रङ्गत्वेन समं भेदग्रहः प्रतिबन्धक
इत्यर्थः। रजतवृत्तितयोपस्थितस्य च क्वचिद्धर्म्मस्य न तदानीं रङ्गत्वेन
समं भेदग्रह इति रजत एव रङ्गत्वप्रकारेण निवर्त्तत इति भावः।
तु सतीष्टपुरोवर्त्तिभेदाग्रहे तादृशभेदग्रहोऽकिञ्चित्कर इत्यत
आह, 'यथेति यथा तव पीतः शङ्खः इति पीताभेदग्रहेऽपि न शङ्खे
पीतत्वप्रकारकप्रवृत्तिः पीतभेदानुमित्या प्रतिबन्धादित्यर्थः। एतच्चा-
ततः शङ्खः पीत इत्यभेदज्ञानस्य भ्रमत्वेनाज्ञायमानत्वाभावादेव न
प्रवर्त्तकता न तु भेदग्रहस्य प्रतिबन्धकता इत्युक्तत्वादिति ध्येयं।
एतदपेक्षयेति, इदमुपलक्षणं तथापि तादृशभेदविरहदशायां विप-
रीतद्विकादितो युगपत् प्रवृत्ति-निवृत्त्यापत्तेर्दुर्वारत्वाच्चेत्यपि द्रष्टव्यं।
हेत्वभाव इति इदं रजतमिति विशिष्टप्रमोत्पत्तौ हेत्वभाव इत्यर्थः।
न हि बौद्धानामिव तवापि प्रत्यभिज्ञानद्वयमित्यत आह,
'तस्येति, 'अभेदोच्छेदः' पूर्व्वकालवर्त्तिनां समनन्तरकालवर्त्तिनोऽभे-
दस्याप्रामाणिकत्वप्रसङ्गः। 'तस्य तदेकेति, अभेदानुमानादेरपि प्रत्य-

धीसम्भवात्[१]। तस्य ज्ञानद्वयत्वेऽभेदोच्छेदः तस्य तदेकमानत्वात्। नचैकविषयत्वेन तयोः परस्परसहकारिता, नामविशिष्टनामिप्रत्यक्षे तत्तांशे च तदभावात् गौरवाच्च। न चातिप्रसङ्गः, भेदाग्रहस्यापि तद्धेतुत्वात्। अथ प्रत्यभिज्ञाया एकत्वेऽपि तत्तां-

---

भिज्ञानोपजीवकत्वादिति भावः। 'न चेति, 'तयोः' संस्कारेन्द्रिययोः, तद्विशेष्यक-तत्प्रकारकसंस्कारसहकारेणैव इन्द्रियं तद्विशेष्यक-तत्प्रकारकप्रत्यक्षं जनयतीत्यर्थः, प्रकृते तु रजतविशेष्यक-रजतत्वप्रकारकसंस्कारात् कथं शुक्तिविशेष्यक-रजतत्वप्रकारकप्रत्यक्षमित्यर्थः। 'नामिप्रत्यक्ष इति, नामांशे इति शेषः। 'तत्तांशे' तत्ताप्रत्यभिज्ञाने, 'तदभावात्' समानविशेष्यकसंस्कारविरहात्, 'गौरवाच्चेति' तद्विषयकसंस्कारत्वमपेक्ष्य तद्विशेष्यक-तत्प्रकारकसंस्कारत्वेन कारणत्वे गौरवाच्चेत्यर्थः। 'अतिप्रसङ्ग इति सत्यपि भेदग्रहे प्रत्यक्षे संस्कारेन्द्रियाभ्यां विशिष्टभ्रमोदयप्रसङ्ग इत्यर्थः। 'तद्धेतुत्वात्' विशिष्टज्ञानहेतुत्वात् संस्कारद्वारा सविकल्पकजन्यत्वेन साक्षात्त्वादिति भावः। 'पुरोवर्त्यभेदांशे चेति पुरोवर्त्यंशे अभेदांशे चेत्यर्थः। सम्बन्धांशे सन्निकर्षस्याहेतुत्वमिति भावः। जातिसाङ्कर्य्यमाशङ्क्य 'स्मृतित्वमिति, 'अनुभूतित्वञ्चेति अनुभूतित्वादिकञ्चेत्यर्थः। आदिपदात्साक्षात्कारत्वादिपरिग्रहः 'अव्याप्यवृत्तिर्वेत्यादि, तथा च साङ्कर्य्यस्य एकावच्छेदेन सामानाधिकरण्यगर्भतया न साङ्कर्य्यमित्याशयः।

---

(१) विशिष्टज्ञानस्य सम्भवादिति ख०।

न साक्षात्कारित्वं तच्चेन्द्रियासंन्निकर्षात् तज्ज्ञानज-
त्वाच्च। किन्तु स्मृतित्वं। पुरोवर्त्त्यभेदांशे च साक्षात्त्वं
स्मृतित्वमनुभूतित्वञ्च न जातिरव्याप्यवृत्तिर्वेति चेत्।
र्हि संस्कारादसन्निकृष्टमपि भासत इति तवाप्यनु-
तं। तथा च तवैव रीत्या प्रत्यभिज्ञानवदिदं रजत-
मित्येकं ज्ञानमस्तु तत्सामग्रीसत्त्वात्। मम त्विन्द्रिय-
न्यत्वात् जात्यसंस्काराच्च साक्षात्कारित्वमेवेभयत्र।
तु यो यत्साक्षात्कारः स तदिन्द्रियसन्निकर्षजन्यः।
च रजते स इहास्ति इति चेत्। न। प्रत्यभिज्ञाया
न्द्रियजन्यतया साक्षात्कारित्वेन तत्तायां[१] नास्ति च

एकं ज्ञानमिति इदमंशे अनुभवरूपं रजतत्वांशे च स्मृतिरूपमित्यर्थः, जात्यसङ्कराच्चेति परस्पराभावसमानाधिकरणयोर्जात्योरेकाधिकर-वृत्तित्वस्वभावाच्चेत्यर्थः। 'रजते' रजतत्वे वा, 'सः' इन्द्रिय-सन्निकर्षः, 'इह' स्मर्य्यमाणारोपस्थले। स्वमते दूषयति, 'प्रत्यभि-ज्ञाया इति, 'संस्कारस्येति, इदमपि स्वमतेन। 'तदिति रजतत्वप्रकारकप्रत्यक्षमित्यर्थः, 'तस्य' विशेषणलौकिकसन्निकर्षस्य। 'किञ्चेति किञ्चित्यर्थः, 'तयोरसंसर्गाग्रहः', विशिष्टप्रत्यक्षहेतुरितिशेषः। 'किञ्चेत्यस्य मतान्तरत्वे पूर्व्वेण सह पौनरुक्त्यापत्तेः, भ्रमेण हेत्वभाव इति शेषः। ननु मास्तु रजतत्वलौकिकसन्निकर्षाहेतु-

(१) तत्तांशे इति ख०।

व्यभिचारात् संस्कारस्य स्मृतेवा सन्निकर्षत्वाच्च। न च रजतत्वप्रत्यक्षे संयुक्तसमवायस्य प्रत्यासत्तित्वेन हेतुत्वात्तं विना न तदितिवाच्यं। तद्विशिष्टज्ञाने विशेषणज्ञानोपक्षीणत्वेन तस्याहेतुत्वात्। न हि विशिष्टधीसामग्रीसत्त्वे तेन विना तद्विलम्बः। किञ्च विशेषणज्ञानं विशेष्यसम्बन्धस्तयोरसंसर्गाग्रह इति प्रत्यभिज्ञासत्यप्रत्यक्षसाधारणस्य विशिष्टप्रत्यक्षहेतोर्भ्रमेऽपि सम्भवात्। रजतसाक्षात्कारे रजतसंयोगस्य हेतुत्वेऽपि विशेष्यसन्निकर्षत्वेन हेतुता न तु रजतसंयोगत्वेन। यत्सामान्ये यत्सामान्यं हेतुस्तद्विशेषे तद्विशेषस्य हेतुत्व

स्त्वयापि रजतसंयोगस्य रजतत्वविशिष्टसाक्षात्कारहेतुतया तदजनत्वान्नासौ तथेत्यत आह, 'रजतसाक्षात्कार इति रजतत्वविशिष्टसाक्षात्कार इत्यर्थः, 'हेतुत्वेऽपि' क्वचित् फलोपधायकत्वेऽपि, 'विशेष्यसन्निकर्षत्वेनेति रजतविशेष्यकप्रत्यक्षं प्रति रजतसंयोगहेतुत्वावश्यकत्वादित्यर्थः। ननु संयोगो रजतविशेष्यकप्रत्यक्षवत् रजतत्वविशिष्टसाक्षात्कारं प्रत्यपि हेतुः सत्यरजतत्वविशिष्टप्रत्यक्षे तदन्वय-व्यतिरेकानुविधानदर्शनादित्यत आह,'संयोगस्येति रजतसंयोगस्येत्यर्थः, 'विशेष्यभानसामग्र्यन्तरितत्वेनेति रजतविशेष्यक-प्रत्यक्षत्वावच्छिन्नं प्रति कारणत्वेनेत्यर्थः,'अन्यथासिद्धतयेति सत्यरजतत्वविशिष्टप्रत्यक्षे तदन्वय-व्यतिरेकानुविधानस्यान्यथासिद्धतयेत्यर्थः, 'विशेषसामग्र्यन्तरेति रजतसंयोगत्वेन रजत-

नियमात्[1]। संयोगस्य विशेष्यभानसामग्र्यन्तरितत्वेना-
प्रयासिद्धतया विशेषसामग्र्यन्तराकल्पनात् गौरवाच्च।
प्रत्यक्षहेतुत्वेन क्लृप्तविशेष्यसम्बन्धादेव तदुपपत्तेः।
अपिच प्रवृत्तौ स्वतन्त्रोपस्थितेष्टभेदाग्रहकारणत्वापे-
क्षया रजतसाक्षात्कारे विशेष्यसन्निकर्षत्वेन हेतुत्वस्य
लघुत्वात्। वस्तुतस्तु दोषाद्भ्रम इत्युभयसिद्धं, तत्र
भ्रमो नासंसर्गग्रहाभावः, तस्याधिकरणरूपत्वे असा-
ध्यत्वात्, तज्ज्ञानरूपत्वे च तस्य प्रमात्वेन दोषाज-
न्यत्वात्। भ्रमस्यानाभिषिक्तप्रमा दोषजन्यैवेति[2]

विशिष्टसाक्षात्कारत्वेन विशेषकार्य्य-कारणभावान्तरकल्पनादित्यर्थः। 'प्रत्यक्षहेतुत्वेन' शुक्तिविशेष्यक-प्रत्यक्षसामान्यहेतुत्वेन, 'विशेष्यसम्बन्धा-देवेति शुक्तीन्द्रियसन्निकर्षादेवेत्यर्थः, 'तदुपपत्तेरिति शुक्तौ रजतत्वविशिष्टसाक्षात्कारोपपत्तेरित्यर्थः। ननु लाघवात्सामान्यतो रजतविषयक-प्रत्यक्षत्वावच्छिन्नं प्रति रजतसंयोगत्वेन हेतुत्वं रजतविशेष्यकप्रत्यक्षत्वस्य कार्य्यतावच्छेदकत्वे गौरवात् निर्विकल्पकसंग्रहार्थं प्रकारता-संसर्गतातिरिक्तविषयताया एवाच विशेष्यतात्वात् तथा च रजत-चक्षुरादिसंयोगं विना कथं शुक्त्यादौ रजतभेदविशिष्टधीरित्यत आह, 'अपिचेति, 'रजत-साक्षात्कार इति रजतविशेष्यक-साक्षात्कारे रजतसंयोगत्वेन हेतुत्वस्येत्यर्थः, एतच्च समाधिसौकार्य्यादुक्तं। वस्तुतस्तु रजतविषयकप्रत्यक्षत्वमुपेक्ष्य

---

(१) तद्विशेषस्य तद्विशेषहेतुत्वनियमादिति क०।
(२) दोषाभिषिक्ता प्रमैव दोषजन्येतीति ख०।

चेत्। न । तस्याः कृप्तसामग्र्यन्तरजन्यत्वादिति भ्रमोऽसत्यज्ञानमित्यसन्निकृष्टमपि दोषाद्भासत इत्युपेयं। अपि च दोषस्य विशिष्टमेव ज्ञानं व्यापारः प्रवृत्तौ तद्धेतुत्वस्य कृप्तत्वात्। न च भेदाग्रहः, कल्पनीयकारणभावत्वात्।

रजतविशेष्यकप्रत्यक्षत्वमेव लघुशरीरमगृह्यमाणव्यतिरेकञ्च तत्र विशेषणतारूपविषयत्वस्याधिकस्य प्रवेशेन गुरुत्वात् सन्दिग्धव्यतिरेकाच्च। न च निर्विकल्पकसंग्रहार्थं विशेषणतारिक्तविषयताया एवात्र विशेष्यतापदार्थत्वात् लघुशरीरत्वं, अतएव सन्दिग्धव्यतिरेकमप्यकिञ्चित्करं समशरीरार्थमेव तस्य कारणतायां विनिगमकत्वादिति वाच्यं। निर्विकल्पकविषयता-विशेष्यतासम्बन्धेन तद्विशिष्टप्रत्यक्षत्वस्यैव तद्विशेष्यकप्रत्यक्षत्वरूपत्वात् सम्बन्धाननुगमस्यादोषत्वादिति ध्येयं। 'दोषाद्भ्रम इति दोषमध्ये भ्रम इत्यर्थः, 'उभयसिद्धः' उभयवादिसिद्धः सिद्धान्तः, तदनभ्युपगमे चापसिद्धान्त इति भावः। 'अधिकरणरूपत्वे इति अतिरिक्तत्वेऽपि नित्यत्वादित्यपि बोध्यं। 'तज्ज्ञानेति अधिकरणज्ञानेत्यर्थः, 'तस्याः' प्रमायाः, 'कृप्तसामग्र्यन्तरेति दोषाघटितकृप्तसामग्रीत्यर्थः, 'असत्यज्ञानं' असत्यविशिष्टज्ञानं, 'इतीति, अनायत्येति शेषः। ननु 'दोषाद्भ्रम इत्यत्र भ्रमपदं भ्रमजन्यविसंवादिव्यवहारपरं अतो नोक्तदोष इत्यत आह, 'अपिचेति, 'विशिष्टज्ञानमेव' विशिष्टभ्रम एव, 'व्यापारः' विसंवादिप्रवृत्तिजनने व्यापारः, 'प्रवृत्तौ' विसंवादिप्रवृत्तौ, 'तद्धेतुत्वस्य' तेन रूपेण

यत्तु दुष्टात्कार्य्यन्नेति, तत्र बीजेन्द्रियसाधारणं न दुष्टत्वमेकमस्ति। एवं प्रत्यक्षमप्यन्यथाख्यातौ मानं कारणबाधाभावात्[१]। तथाहि इदं रजततया जानामीत्यनुव्यवसायसाक्षिकमेवान्यस्यान्यथा भानं। नहि विषयत्वेऽनुव्यवसायादन्यत्प्रमाणं। न ह्यतद्विषयस्तज्ज्ञानविषयत्वेन, न वा तदविषयकं तद्विषयकत्वेनानुव्यवसीयते। अनुव्यवसायस्य प्रमात्वनियमात्। अन्यथा घटज्ञानेऽपि कदाचित् पटज्ज्ञानामीति स्यात्।

दोषाणां हेतुत्वस्य, भ्रमजनकत्वेनैव रूपेण दोषाणां हेतुत्वस्येति यावत्। अन्यथा दोषाणां नानाविधतया अननुगमापत्तेः इति भावः। इदमुपलक्षणं दोषस्य साक्षात्संवादिप्रवृत्तिहेतुत्वे विनश्यदवस्थदोषाव्यवहितोत्तरक्षणोत्पन्नज्ञानात्तादृशसम्भवाच्चेत्यपि द्रष्टव्यं। 'कल्पनीयकारणभावत्वात् कल्पनीयकारणसत्ताकत्वात्, नित्यत्वादिति यावत्। 'दुष्टादिति, दुष्टे बीजे तथा दर्शनादिति भावः। 'नैकमस्तीति, तथा च दुष्टबीजात् कार्य्यानुदयेऽपि दुष्टादिन्द्रियात् कार्य्यं स्यादिति भावः। 'एवमिति उक्तरीत्या कारणबाधनिरास इत्यर्थः, 'अन्यथाख्यातौ' ख्यातेर्व्यधिकरणप्रकारकत्वे, ख्यातेः शुक्त्यादिविशेष्यकत्वावच्छिन्न-रजतत्वप्रकारकत्वे इति यावत्। 'अनुव्यवसायेति भ्रमानुव्यवसायेत्यर्थः, 'अन्यथान्यथा भानमिति शुक्त्यादिविशेष्यकत्वावच्छिन्न-रजतत्वप्रकारकमि-

---

(१) कारणसद्भावादिति ख०।

न च भेदाग्रहदशायां रजतज्ञानविषयत्वासंसर्गाग्रहः, शुक्तौ भेदग्रहेऽपि शुक्तीरजतत्वेन मया ज्ञाता शुक्तौ रजतज्ञानं मे वृत्तमित्यनुव्यवसायात्। अथ विचारसाध्यासंसर्गग्रहबाध्योऽयमसंसर्गाग्रहस्तेन विचारं विना भेदग्रहेऽप्यवतिष्ठत इति चेत्। न। इदं रजततया जानामीत्यत्र शुक्तिकर्मकरजतत्वप्रकारकज्ञानासंसर्गाग्रहस्यात्मन्यसम्भवात् तादृशज्ञानाप्रसिद्धेः। नचेदं

त्यर्थः। ननु तावदेव यद्यनुव्यवसायो विषयतां गृह्णीयात् न त्वेवमित्यत आह, 'न हीति, विषयानुवसायस्य तत्तदर्थविषयत्वेन तदनुव्यवसायो भ्रम इत्यत आह, 'न हीति। ननु मास्तु अनुव्यवसाये विशिष्टभ्रमः किन्तु भेदाग्रहसहितः शुक्तौ रजतत्वप्रकारत्वावच्छिन्नविशेष्यत्वासंसर्गाग्रह एव स इत्यभिप्रायेणाशङ्कते, 'न चेति, 'भेदग्रहेऽपीति शुक्ति-रजतयोर्भेदग्रहेऽपीत्यर्थः। ननु भेदग्रहे सतीति सत्यं नोपादेयमित्यभिप्रायेण शङ्कते, 'अथेति, 'विचारः' शुक्तिर्न रजतत्वप्रकारकधीविशेष्यः रजतभिन्नत्वादित्यनुमानरूपः, 'तत्साध्यः' तज्जन्यः यः 'असंसर्गग्रहः' शुक्तौ रजतत्वप्रकारकत्वावच्छिन्नज्ञानविशेष्यत्वासंसर्गग्रह इति यावत्, 'तद्बाध्यः' तदभावरूपः, यः 'असंसर्गाग्रहः' शुक्तौ निरुक्तविशेष्यत्वासंसर्गाग्रह इति यावत्। स एवायमिति योजना, 'अयं' अनुव्यवसायः, 'विचारं विना' तादृशविचारसाध्यासंसर्गाग्रहं विनेत्यर्थः, भेदग्रहेऽपि' शुक्ति-रजतयोर्भेदग्रहसत्त्वेऽपि, 'इदं रजत-

जानामीति रजतं जानामीति तदाकारः, तृतीयार्थस्य प्रकारत्वेन प्रकारिणोऽभानेऽभानप्रसङ्गात्। विशिष्टज्ञानञ्च सर्वत्र विशेषण-विशेष्यीयमित्यन्यथा भानमपि

त्या जानामीत्यनुव्यवसायाभिलापः, तत्र च भवन्मते शुक्तिविशेष्यकरजतत्वप्रकारकज्ञानासंसर्गाग्रह एवात्मनिष्ठो हेतुर्न तु निरुक्तासंसर्गाग्रहः। न च सम्भवति, तादृशज्ञानाप्रसिद्धेः इत्यभिप्रायेण दूषयति, इदमिति इत्यभिलापे, भवन्मते जनकीभूतस्येतिशेषः। 'रजतं जानामि' रजतत्वेन जानामि, यथाश्रुते 'तृतीयार्थस्येत्यग्रिमग्रन्थासङ्गतेः। 'तदाकार इति अनुव्यवसायाभिलाप इत्यर्थः, तत्र शुक्तिविशेष्यकरजतत्वप्रकारकज्ञानयोरुभयोरात्मन्यसंसर्गाग्रह एव हेतुस्तत्र च तादृशज्ञानाप्रसिद्धि इति भावः। एतच्चापाततः दोषात् प्रकारिणोऽभानेऽपि प्रकारताभानस्य सुवचत्वात्। एवमिदं रजततया जानामीत्यनुव्यवसायादिकमप्येवमुक्तं तादृशानुव्यवसायेऽपि शुक्तौ रजतत्वप्रकारत्वावच्छिन्न-विशेष्यत्वासंसर्गाग्रहादेरेव हेतुत्वस्य सुवचत्वात्। वस्तुतस्तु संसर्गाग्रहे बाधकाभावान्नासंसर्गाग्रहः, अन्यथा रजतेऽपि तथा ज्ञानं न सिद्ध्येदित्येव तत्त्वं। ननु सिद्ध्यति तदभाववति तद्वैशिष्ट्यावगाहि ज्ञानं, तथापि तस्य विशेषणविशेषणकत्वे मानाभावः इत्यत आह, 'विशिष्टज्ञानञ्चेति, 'विशेषण-विशेष्यीयमिति विषयितासम्बन्धेन विशेष्यसम्बन्धीत्यर्थः, सांसर्गिकविषयितायाः स्वसमानाधिकरणप्रकारिता-विशेष्यितानिरूपितत्वनियमादिति भावः। नन्वेवं ज्ञानस्य रजतत्वसम्बन्धित्वाभ्युपगमे भवतामपि सप्रकारत्वापत्तिरित्यत आह,

तथा। ज्ञाने रजतत्वानभ्युपगमाद्विशेषण-विशेष्य-विषयकत्वाच्च न साकारवादः।

यत्तु ज्ञानमिथ्यात्वे बाध्य-बाधकव्यवस्था न स्यादविशेषादिति। तन्न। अनन्यथासिद्धाया धियोबाधकत्वात्, तथाहि यत्र दुष्टादुष्टेन्द्रियजन्यं परस्परनिरपेक्ष्यमेकविरुद्धं ज्ञानद्वयमुत्पद्यते, तत्र प्रथममनुपजातविरोधित्वान्नानागतं बाधते तस्याप्राप्तत्वात्। उत्तरन्तु स्वकारणादुत्पद्यमानमुपजातविरोधितया नानुपमृद्य पूर्वमुत्पत्तुमर्हतीति पूर्वं बाधात्मकमुत्पद्यते, अन्यथा नोत्पद्येतैव। नचैवमेवेति वाच्यं। अनुभवविरोधात्। यदाहुः। "पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयते। अन्योन्यनिरपेक्षाणां यत्र जन्मधियां भवेत्"। इति। यत्र पूर्वापेक्षमुत्तरं ज्ञानमुत्पत्तुमुन्मुखं तत्रोपजीव्यपूर्वविरोधेनोत्तरं नोत्पद्यते, अतोऽजातं सत्पूर्वं कथं

'ज्ञान इति, 'रजतत्वानभ्युपगमात्' समवायसम्बन्धेन रजतत्वानभ्युपगमात्, 'विशेषण-विशेष्यविषयकत्वाच्चेति तदनभ्युपगमाच्चेत्यर्थः, 'न साकारवादः' न साकारवादित्वं, साकारवादिना सौगतेन सौत्रान्तिकापरनाम्ना रजतज्ञानेऽपि समवायसम्बन्धेन रजतत्वाभ्युपगमात् विषयिताया अनभ्युपगमाच्चेति भावः।

ाधतां[1]। यथा प्रत्यक्षादिविरुद्धानुमितिः। ननु
भ्रमस्य किं बाध्यते। न स्वरूपं तस्य सत्त्वात्। नापि
ाजतत्वप्रकारकत्वं, शुक्तिविषयकत्वं वा तयोरपनेतु-
ाशक्यत्वात्। जातं हि तद्रजतत्वेन शुक्तिं विषयीकृत्य
ापि व्यवहारः, प्रवृत्त्यादेर्दृष्टत्वात्। नाप्यनागत-
व्यवहारजनकत्वं, तस्य कारणाभावादेवासम्भवात्।
ाते। बाधकेन भ्रमस्य भ्रमत्वबुद्धिरेव बाधः।

यत्तु धियामयथार्थत्वे कथमाश्वास इति। तन्न।
ामाण्यग्रहोपायस्य दर्शितत्वात्। सत्यत्वनियमेऽपि
दसंसर्गाग्रहस्याग्रहीतासंसर्गस्य ज्ञानद्वयस्य च बहुषु
शेनात् कथमाश्वासः। अथ सदसंसर्गाग्रहस्य प्रति-
त्यानं विलम्बितं सद्विषयत्वञ्च शीघ्रोपस्थितमित्यौ-

केचित्तु शुक्ताविदं रजतमितिभ्रमस्य शुक्तिविशेष्यकत्वावच्छिन्न-
जतत्वप्रकारकत्वेऽपि शुक्तौ रजतत्ववैशिष्ट्यावगाहित्वे मानाभावः,
ाथाति तादृशज्ञानस्य बाध्यत्वं तदुत्तरोत्पन्नस्य नेदं रजतमिति
शेषदर्शनजन्यज्ञानस्य च बाधकत्वमिति न स्यात् परस्परविरुद्धार्थ-
शिष्ट्यावगाहित्वस्याविशेषाद्विषयिताविशेषरूपयोर्विशेष्यित्व-प्रकारित्व-
ोर्वैशिष्ट्यावगाहित्वं विनापि सम्भवादित्याहुः, तन्मतं निराकरोति,
यत्तिति मित्याशुक्त्यादिविशेष्यक-रजतत्वादिप्रकारकधियां शुक्त्यादौ

---

(१) कथं पूर्वं बाधकमिति ख०।

त्सर्गिकसद्विषयत्वज्ञानाद्विश्वासः। यत्र तु कदाचि
संशयस्तत्र ज्ञानान्तरादेव संशयनिवृत्तिरिति चेत्
समाप्यौत्सर्गिकन्धियां सत्यत्वं बाधकेनापनोद्यत इ
तदनवतारात्सत्यत्वविश्वासः। किञ्च तव ज्ञानान्त
ऽप्यविश्वासः। विशेषदर्शनाद्विश्वासस्तुल्य एव। यथा
तत्रापि न सन्देहस्तथोक्तं परतः प्रामाण्य।

अन्ये तु स्मृतयोर्व्यवैधर्म्याभावोऽधिकरणं तज्ज्ञा
वा तच्च प्रत्यक्षत एव गृहीतं[१] इति युक्तोविश्वासः

रजतत्ववैशिष्ट्यावगाहित्वे इत्यर्थः, 'बाध्य-बाधकव्यवस्थेति तादृशधि
बाध्यत्वं तदुत्तरोत्पन्नस्य नेदं रजतमित्यादिविशेषदर्शनजन्यज्ञान
बाधकत्वमिति न स्यादित्यर्थः, बाध्य-बाधकत्वञ्च स्वयमेवाग्रे निर्वक्ष्य
'अविशेषादिति परस्परविरुद्धार्थवैशिष्ट्यावगाहित्वं स्यादित्यर्थः। 'अ
नन्यथासिद्धायाः' पूर्वोत्पन्नज्ञाने उत्तेजकवैशिष्ट्यं विनानुत्पद्यमानाय
पूर्वोत्पन्नज्ञाने उत्तेजकवैशिष्ट्याधीनाया इति यावत्, उत्तेजक
विशेषदर्शनं, भ्रमत्वज्ञानादिनेत्यर्थः। तदेव विषदयति, 'तथाहीति
'एकत्र' एकस्मिन् धर्मिणि, 'विरुद्धज्ञानद्वयमिति परस्परविरुद्धार्थ
विषयकज्ञानद्वयमित्यर्थः, 'अनुपजातविरोधित्वादिति विरोधिवि
यकज्ञानाव्यवहितपूर्ववर्त्तिकालानुत्पत्तिकत्वेन उत्तेजकाधीनत्वादि
त्यर्थः। ननु नात्र ज्ञानमेव तस्य विरुद्धार्थविषयकमित्यत आ

---

(१) गृह्यते इति ख०।

योग्ये भेदस्योऽधिकरणे च भेदसंशये ज्ञानान्तराद्विश्वास
ति। तन्न। उभयत्रापि ज्ञानान्तराद्विश्वासतुल्यत्वेन
ध्यधन्यनमात्रत्वात्। वस्तुतस्तु भेदाग्रहादेवाभेद-
वहारोपपत्तावभेदविषयत्वं क्वापि न सिद्धमस्तीति
यं सद्विषयत्वसिद्धिः।

यत्तु दोषोन हेतुरिति। तन्न। फलबलेन[१]
यात्वात्।

अथेदं रजतमिति ज्ञानद्वयमयथार्थं इदं-रजतयोः
त्वात्। नच तदुभयतादात्म्यमसत उभयन्तादात्म्य-

र्थेति अनागतज्ञानस्येत्यर्थः, 'अप्राप्तत्वादिति अव्यवहितप्राक्काला-
प्तत्वादित्यर्थः, 'उत्तरन्त्विति, उत्तरन्तु 'उपजातविरोधितया' वि-
धिविषयकज्ञानाव्यवहितपूर्ववर्त्तिकालोत्पत्तिकतया, 'स्वकारणात्'
विशेषदर्शनाद्युत्तेजकघटितात्, 'उत्पद्यमानं पूर्वमनुपमृद्य' पूर्वज्ञान-
बाधकीभूय, 'नोत्पत्तुमर्हतीति, ज्ञानस्य पूर्वज्ञानबाधकत्वनिय-
दिति भावः। ननु विशेषदर्शनादेरुत्तेजकत्वे मानाभाव इत्यत
ह, 'अन्यथेति। तटस्थः शङ्कते, 'न चेति, 'एवमेव' नोत्पद्यत
व। अनुभवमेव दृढयति, 'यदाऊरिति यस्मादाऊरित्यर्थः।

'तथात्वादिति दोषस्यापि ज्ञानहेतुत्वादित्यर्थः, तथाचोक्तयुक्त्या
मे सिद्धे तदन्यथापत्तिरेव दोषाणां हेतुत्वे मानमिति भावः।

---

(१) फलवत्त्वेनेति ख०।

च्चेति, अतोऽधिकस्याभावात् । तयोश्च सत्त्वात् असत्त्वे वा असत्ख्यातिः, एवं संसर्गारोपोऽपीति उच्यते । सन्मात्रविषयत्वेऽपि तदभाववति तत्प्रकारकत्वं प्रकारव्यधिकरणविषयताकत्वं वा अयथार्थत्वं

प्राञ्चस्तु । तादात्म्य-संसर्गयोरसतोरेव मन्यदं विषयत्वं । नचैवमसत्ख्यातिः, सदुपरक्तस्यात्यन्तासत

अमद्विषयकत्वव्याप्यमयथार्थत्वमित्यभिमानेन शङ्कते, 'अथेति इत्थं-ताभ्यामतिरिक्तस्य तदुभयतादात्म्यस्य इदं रजतमिति भ्रमे भानादित्यर्थः, 'अभावादिति आरोपिताभावादित्यर्थः, 'असत्त्वे वा' असत एव तदुभयतादात्म्यस्य विषयत्वे वा, 'संसर्गारोपोऽपीति, कथमयथार्थ-इति शेषः । अभिमानं निराकृत्य समाधत्ते, 'सन्मात्रविषयत्वेऽपीति इदं रजतमितिभ्रमस्य सन्मात्रविषयत्वेऽपीत्यर्थः, 'प्रकारव्यधिकरणेति स्वव्यधिकरणधर्म्मनिरूपितविशेष्यताकत्वमित्यर्थः, स्वं विशेष्यता, तथा च यथार्थत्वं सद्विषयकत्वव्याप्यमिति भावः ।

'तादात्म्य-संसर्गयोः' तादात्म्य-तदतिरिक्त-संसर्गयोः, 'विषयत्वं' संसर्गमर्य्यादया विषयत्वं, 'सदुपरक्तस्येति सतोर्विशेषण-विशेष्ययोः संसर्गमर्य्यादयेत्यर्थः, 'सदनुपरक्तस्येति संसर्गत्वेनेत्यर्थः, 'कारणाभावादिति व्याप्तिज्ञान-शक्तिज्ञान-सादृश्यज्ञान-सन्निकर्षरूपकारणाभावादित्यर्थः । शङ्कते, 'तदनुपपत्तिरिति संसर्गमर्य्यादया ज्ञानेऽपि कारणानुपपत्तिरित्यर्थः, स्वोक्तमतद्वये टीकाकारसंवादमाह, 'तदुक्तमिति, 'यज्ज्ञानमन्यथा सन्तमिति तत्सम्बन्धावच्छिन्नतदभाववन्तमि-

त्यभ्युपगमात् । सदनुपरक्तस्याखण्डस्यात्यन्तासतः
ख्यातिरसत्ख्यातिर्नाभ्युपेयते कारणाभावात् । तदनु-
पत्तिस्तुल्यैवेति चेत् । न । अत्र विशिष्टज्ञानसामग्रया
श्रितत्वात् । तदुक्तं वाचस्पतिमिश्रैः "तस्माद्यदन्यथा
तमन्यथा प्रतिपद्यते । तन्निरालम्बनं ज्ञानमसदा-
लम्बनञ्च तत्" ॥ इति ।

इति श्रीमद्गङ्गेशोपाध्याय-विरचिते तत्त्वचिन्ता-
मणौ प्रत्यक्षखण्डे अन्यथाख्यातिवादः ।

र्थः, 'अन्यथा प्रतिपद्यते' तत्सम्बन्धेन तदुभयाविषयीकरोति,
'निरालम्बनं' निरालम्बनव्यवहारविषयः, अयथार्थव्यवहारविषय इति
यावत्, 'असदालम्बनञ्च' संसर्गमर्य्यादया असद्वैशिष्ट्यविषयकञ्च, अत्र
च इत्यस्वरसोद्भावनं, तद्बीजन्तु भ्रमे संसर्गमर्य्यादया असतोभाने
प्रमाणाभावः ।

केचित्तु संसर्गमर्य्यादया असतोभाने तदुत्तरं विशेषणत्व-विशेष्य-
त्वापि तद्भानं स्यात् संसर्गमर्य्यादया तद्भानस्यैव विशेषणज्ञानत्वात्
निकर्षत्वादित्यस्वरसबीजमाहुः । तदसत् । सांसर्गिकातिरिक्ततद्विष-
यकज्ञानस्यैव तद्विशिष्टबुद्धौ तदुपनीतभाने च हेतुत्वादन्यथा
गौरवापत्तेरित्यन्यत्र विस्तरः ॥

इति श्रीमथुरानाथतर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये
प्रत्यक्षखण्डरहस्ये अन्यथाख्यातिवादरहस्यं ।

अथ सन्निकर्षवादः।

सा च प्रमा चतुर्विधा प्रत्यक्षानुमित्युपमिति-शाब्दभेदात्। एवञ्चतस्तृणान्तासाङ्करणं प्रमाणमपि चतुर्विधं प्रत्यक्षानुमानोपमान-शब्दभेदात्। अन्येषां यथा यथमेष्वेवान्तर्भावात्। तथाच वक्ष्यामः। ननु

अथ सन्निकर्षवादरहस्यं।

लक्षितां तां विभजते, 'सा च प्रमेति तद्वति तत्प्रकारकानुभवरूपा च प्रमेत्यर्थः, 'चतुर्विधा' अनुभवत्वसाक्षाद्व्याप्यजातिचतुष्टयवतीत्यर्थः, अनुभवत्वसाक्षाद्व्याप्यजातिचतुष्टयं तादृशप्रमावृत्ति र्न तु समुदितार्थः। तेन कस्याश्चिदपि प्रमाव्यक्तेः तादृशजातिचतुष्टयवत्त्वविरहेऽपि न क्षतिः। तादृशजातिचतुष्टयस्य परस्परव्याप्य-व्यापकभावानापन्नस्य एकप्रमाव्यक्तिवृत्तित्वे भूतत्व-मूर्त्तत्वसाङ्कर्य्यं स्यादित्यत आह, 'प्रत्यक्षेति प्रत्यक्षानुमित्युपमिति-शाब्दात्मकप्रमाव्यक्तीनां परस्परं भेदादित्यर्थः। तथाचाधिकरणीभूतप्रमाव्यक्तिभेदान्न साङ्कर्य्यमिति भावः। प्रमां विभज्य प्रमाणं विभजते, 'एवमिति, 'चतुर्विधं' प्रमाणविभाजकोपाधिचतुष्टयवत्प्रमाणविभाजकोपाधिचतुष्टयं प्रमाकरणवृत्तीति तु समुदितार्थः। ननु विभाजकोपाधीनां परस्परं भेदविरहेण चतुष्टयत्वमेवासिद्धमित्य

.यक्षन्तावदिन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारि। .ात्मानुमिति-स्मृत्योर्ज्ञानमात्रे चातिव्याप्तेः आत्म-.ार्थस्य मनसेन्द्रियेण संयोगादुत्पत्तेः। ईश्वरप्रत्य-

---

.ह, 'प्रत्यक्षानुमानेति प्रत्यक्षत्वानुमानत्वोपमानत्व-शब्दत्वरूपाणां .भाजकोपाधीनां परस्परं भेदसत्त्वादित्यर्थः। ननु विभागन्यूनत्वमत-.ह, 'अन्येषामिति अनुपलब्ध्यर्थापत्त्यादीनामित्यर्थः। ननु प्रत्यक्ष-.ात्वं दुर्वचमिति ज्ञानेनाशङ्कते, 'नन्विति, 'प्रत्यक्षं' प्रत्यक्षप्रमा, .ानमव्यभिचारीति अव्यभिचारि ज्ञानमिति योजना, यथार्थ-.ानमित्यर्थः, तथाचेन्द्रियार्थसन्निकर्षजन्ययथार्थज्ञानत्वं प्रत्यक्ष-.ात्वमिति भावः। अत्र 'अर्थपदं स्वविषयपरं, स्वं लक्ष्यत्वेनाभिमतं, .यमात्रपरं वा आद्ये आह, 'आत्मानुमितीति, 'अनुमितिपद-.त्र परोक्षानुभवमात्रपरं, तेन नात्मशब्दोपमित्योरपलापः। .तीये त्वाह, 'ज्ञानमात्रे चेति लक्ष्यभिन्नज्ञानमात्रे चेत्यर्थः। .तु जन्यज्ञानत्वानवच्छिन्ना समवायसम्बन्धानवच्छिन्ना वा लौकिक-.यतासम्बन्धावच्छिन्ना वा जन्यता निवेशिता(१) अतोनाति-.प्तिरित्यत आह, 'ईश्वरेति। ननु जन्यप्रत्यक्षमेव लक्ष्यमतो .व्याप्तिरित्यत आह, 'सन्निकर्षस्य चेति। नन्विन्द्रियार्थसंयोगा-.न्यतमत्वेनानुगम इत्यत आह, 'संयोगाद्यन्यतमस्येति संयोगाद्यन्य-

---

(१) आत्म-मनःसंयोगस्य कार्य्यतावच्छेदकं जन्यज्ञानत्वं कार्य्यतावच्छे-.दसम्बन्धस्य समवायः न तु लौकिकविषयत्वमतो नातिव्याप्तिरिति भावः।

क्षाव्याप्तेश्च। सन्निकर्षस्य च संयोगादिरूपत्वेनाननुगमाच्च। संयोगाद्यन्यतमस्य चानिर्द्धारितैकपरत्वे भागासिद्धिरितरभेदसाधने, व्यर्थविशेषणत्वञ्च। इन्द्रियार्थयोरेकजन्यत्वस्य लक्षणत्वे व्यर्थविशेषणत्वं। न च तयोरेकैकजन्यत्वमेव लक्षणं, आत्म-मनोजन्य-

---

तमपदस्य चेत्यर्थः, 'अनिर्द्धारितैकेति संयोगादीनां मध्ये यत्किञ्चिद्व्यक्तिपरत्वे इत्यर्थः, 'भागासिद्धिरितरभेदसाधने' इति चेद् इतरभेदसाधने भागासिद्धिरित्यर्थः, परस्परमव्याप्तत्वादिति भावः। नन्वन्यतमपदं तत्तद्भेदकूटावच्छिन्नप्रतियोगिताकभेदवत्परमतो नाव्याप्तिरित्यत आह, 'व्यर्थविशेषणत्वञ्चेति संयोगादियत्किञ्चिद्व्यक्तिभेदावच्छिन्नप्रतियोगिताकभेदवज्जन्यत्वस्यैव सम्यक्त्वेन तावद्भेदकूटरूपविशेषणानां भागासिद्धिवारणमात्रप्रयोजकानां वैयर्थ्यमित्यर्थः। सन्निकर्षविशेषणमपि व्यर्थमित्याह, 'इन्द्रियेति, 'एकजन्यत्वस्य एकैकजन्यत्वस्य, 'लक्षणत्वे' लक्षणत्वसम्भवे, 'व्यर्थविशेषणत्वमिति जन्यतांशे विशेषणस्य सन्निकर्षभागस्य व्यर्थत्वमित्यर्थः। एतद्व्यर्थविशेषणताद्वयोद्भावनमापाततः, यथासन्निवेशे वैयर्थ्याभावादिति ध्येयं(१)। 'तयोः' व्यर्थयोर्मध्ये, 'आत्मेति आत्मजन्यत्वेन मनोजन्यत्वेन

---

(१) व्यभिचारावारकविशेषणस्य व्यर्थत्वमिति मतेनेदं।

(२) यत्किञ्चिद्व्यक्तिभेदावच्छिन्नप्रतियोगिताकभेदवज्जन्यत्वस्य तत्तद्भेदकूटावच्छिन्नप्रतियोगिताकभेदवज्जन्यत्वाघटकतया, एकैकजन्यत्वस्य इन्द्रियार्थसन्निकर्षजन्यत्वाघटकतया च स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तरघटितत्वरूपव्यर्थविशेषणत्वस्यासम्भवादिति भावः।

त्वेन ज्ञानमात्रे गतत्वात्। इन्द्रियस्य प्रत्यक्षनिरूप्यत्वाच्च। नापि ज्ञातकरणाजन्यत्वे सति सत्योऽनुभवः प्रत्यक्षं, लिङ्गादेरजनकतया ज्ञानस्याज्ञातस्य करणत्वे अनुमित्यादौ गतत्वात्। ज्ञानाजन्योऽनुभवः सत्य-

---

त्वेत्यर्थः, 'ज्ञानमात्रे' जन्यज्ञानमात्रे। ननु जन्यताविशेषस्य प्रवेशान्नायं दोष इत्यत आह, 'इन्द्रियस्येति इन्द्रियत्वस्येत्यर्थः, साक्षात्प्रतीतिसाधनशरीरसंयोगवदतीन्द्रियत्वमिति तल्लक्षणात्। न च तथार्थजन्यत्वं लक्षणं सम्यगेवेति वाच्यं। तस्यापि सर्व्वांशालौकिकप्रत्यक्षाभ्युपगमे तत्राव्याप्तेरिति भावः। अत्र साक्षात्प्रतीतिसाधनत्वे सत्यतीन्द्रियत्वमात्रोक्तौ कालादावतिप्रसङ्गः स्यादतः शरीरसंयोगपदं, काल-शरीरसंयोगश्च न प्रत्यक्षहेतुः क्रियैव कालोपाधिरिति मतेन लक्षणकरणान्महाकालसंयोगस्यापि न कालत्वेन प्रत्यक्षहेतुत्वं। स्वीयस्पर्शसाक्षात्कारकारणेन्द्रियसंयोगमादायातिव्याप्तिवारणाय शरीरपदं स्वेतरशरीरपरं, स्वं लक्ष्यत्वेनाभिमतं, शरीरसंयोगपदं वा शरीरनिरूपितसंयोगपरं तेन न वायवीयशरीरनिष्ठस्पर्शसाक्षात्कारकारणेन्द्रियसंयोगमादाय वायवीयशरीरेऽतिव्याप्तिः, न वा घटादिविषयकपिशाचादिकर्त्तृकसाक्षात्कारकारणपिशाचादिशरीरेन्द्रियसंयोगमादाय पिशाचादिशरीरेऽतिव्याप्तिः। आत्म-शरीरसंयोगस्यापि प्रत्यक्षहेतुतया आत्मन्यतिव्याप्तिवारणाय अतीन्द्रियेति। ज्ञायमानलिङ्गस्य अनुमितिकरण-

इत्यपि न, विशिष्टप्रत्यक्षाव्याप्तेः तस्य विशेषणज्ञान-जन्यत्वात्। नापि सत्यत्वे सति साक्षात्कारित्वं, नियतव्यञ्जकाभावेन ग्रहीतुमशक्यतया तस्य जातित्वा-

---

तानये शरीराकाशादिसंयोगमादायातिव्याप्तिवारणाय साक्षात्प्रवेशः[१]। वस्तुतः[२] अखण्डजातेः प्रवेशान्न वैयर्थ्यशङ्कापि[३]। इन्द्रियावयवशरीरसंयोगश्च न प्रत्यक्षहेतुरतो नेन्द्रियावयवेऽतिव्याप्तिः। अन्त्यावयवित्वेन न विशेषणीयं, चक्षुरादि नान्त्यावयव्येवेति मन्तव्यं। 'नापीति, 'प्रत्यक्षं' प्रत्यक्षप्रमा, 'ज्ञानाजन्य इति, 'अनुभवपदं स्वरूपकथनं सत्यस्मरणस्य ज्ञानजन्यत्वेनैवातिप्रसङ्गविरहात्। 'साक्षात्कारित्वं' साक्षात्कारित्वरूपजातिविशेषः। 'नियतव्यञ्जकेति अनुगतानतिप्रसक्तव्यञ्जकेत्यर्थः। 'सत्त्वे वा' अनुगतानतिप्रसक्ततद्व्यञ्जकस्य सत्त्वे वा, 'लक्षणं' इतरभेदकं, 'व्यवहारनिमित्तं' साक्षात्कारपदप्रवृत्तिनिमित्तं, 'किं जात्येति, साक्षात्कारित्वरूपयेति शेषः। 'साक्षात्कारित्वमिति जातिविशेष इति शेषः। ननु तादृशजातौ मानाभाव इत्यत आह, 'चाक्षुषादिज्ञान इति। यद्यपि साक्षात्करोमीत्यनुव्यवसायस्

---

(१) यत्र शरीराकाशसंयोगरूपलिङ्गेनानुमानं तत्र शरीराकाशसंयोगस्य प्रतीतिसाधनत्वमस्त्येवेति भावः।

(२) ज्ञायमानलिङ्गस्याहेतुत्वनयेऽपि साक्षात्पदस्य व्यावृत्तिमाह वस्तुत इति।

(३) साक्षात्कारत्वस्य साक्षात्करोमीत्यनुव्यवसायसिद्धजातित्वात् साक्षात्कारसाधनशरीरसंयोगवदतीन्द्रियत्वमिन्द्रियत्वमित्येव लक्षणकरणात् न साक्षात्पदस्य वैयर्थ्यशङ्केति भावः।

सिद्धेः। सत्त्वे वा तदेव लक्षणं व्यवहारनिमित्तञ्चास्तु किं जात्या। उच्यते। प्रत्यक्षस्य साक्षात्कारित्वं लक्षणं, चाक्षुषादिज्ञाने साक्षात्करोमीत्यनुगतबुद्धेर्बाधकं विना जातिविषयत्वात्। नचेन्द्रियजन्यत्वं तथा, अन्योन्याश्रयात् इन्द्रियस्यातीन्द्रियत्वाच्च। नच नियतव्य-

---

विषयिताविशेष एव विषयोऽस्तु किं जात्या, सुरभि चन्दनमित्यत्र सौरभं साक्षात्करोमीत्यनुव्यवसायवारणाय विषयिताविशेषस्यावश्यकत्वात्। नचैवमनुमितित्वस्याप्यसिद्ध्यापत्तिः अनुमिनोमीत्यनुव्यवसायस्य विधेयताख्यविषयिताविशेषविषयकत्वेनैवोपपत्तेर्वह्निमनुमिनोमीत्यनुव्यवसायवारणाय विषयिताविशेषस्यावश्यकत्वादिति वाच्यं। तादृशविषयिताविशेषस्य शाब्दबोधेऽप्यनुभवसिद्धतया अनुमितिरूपत्वासम्भवात्। तथाप्यनुव्यवसायसिद्धं साक्षात्कारत्वं लाघवाज्जातिरूपमेव न तु विषयिताविशेषः। तस्यैव जातिविशेषस्य यदंशे लौकिकसन्निकर्षजन्यत्वं ज्ञानस्य तदेव निरूपकं न त्वन्यदतो न सौरभं साक्षात्करोमीत्यनुव्यवसायः, विषयिताविशेषाभ्युपगमेऽपि कस्यचिदेव तादृशविषयितानिरूपकत्वं न तु सर्व्वस्येत्यवश्यं वाच्यत्वादिति भावः। 'तथा' अनुव्यवसायविषयः, 'अन्योन्याश्रयादिति साक्षात्कारत्वस्य जातिरूपस्यानभ्युपगमे पूर्व्वोक्तेन्द्रियलक्षणघटकसाक्षात्कारत्वस्यापीन्द्रियजन्यज्ञानत्वरूपतया इन्द्रियजन्यज्ञानत्वज्ञानेऽन्योन्याश्रयादित्यर्थः। इन्द्रियज्ञानादेव इन्द्रियजन्यज्ञानत्वज्ञानं, तज्ज्ञाने च तद्घटितेन्द्रियत्वज्ञानमिति भावः। ननु स्यादेव इन्द्रियत्वमेतद्घटकं

ञ्जकाभावान्न जातिः, गोत्वादौ साक्षादेरिवाननुगतस्यापि चक्षुःकरणकानुभवत्वादेर्व्यञ्जकत्वात्। न च जातावनुगतव्यञ्जकनियमः, ज्ञानेच्छा-प्रयत्न-सुख-दुःखादेस्तदभावात्। प्रत्युत नियतव्यञ्जकसत्त्वे जात्यसिद्धिरेव। तत एवानुगतबुद्ध्युपपत्तेः। निर्विकल्प-

---

वाच्यमतमाह, 'इन्द्रियस्येति, तथाच व्यवसायानुपनीतस्य तस्यानुव्यवसायविषयता न स्यादिति भावः। 'नियतेति अनुगतानतिप्रसक्तेत्यर्थः, 'न जातिः' निरुक्तानुव्यवसायप्रकारीभूतो न जातिः, 'चक्षुःकरणकानुभवत्वादेरिति चाक्षुषत्वादिजातेरित्यर्थः। आदिपदाद्वाच्यत्वादिपरिग्रहः। एतेन तद्व्यञ्जकत्वं तल्लौकिकसाक्षात्कारजनकज्ञानविषयत्वं स्वविषयत्वावल्लौकिकसाक्षात्कारविषयताकत्वं वा, आद्ये लाघवाच्चाक्षुषत्वादिविषयकज्ञानस्यैव साक्षात्त्वविषयकलौकिकसाक्षात्कारजनकतया चक्षुःकरणकानुभवत्वे तदसिद्धिः, द्वितीये चक्षुष्ट्वादेरतीन्द्रियतया तद्विषयकलौकिकप्रत्यक्षाप्रसिद्धिरिति परास्तं। ननु साक्षादिकमपि साक्षात्वादिना अनुगतमेवेत्यत आह, 'नचेति न वेत्यर्थः, 'ज्ञानेच्छेति, तत्र निर्विकल्पकादिव्यावृत्त-तत्तज्ज्ञानादिव्यक्तेरेव व्यञ्जकत्वादिति भावः। 'तत एव' अनुगतव्यञ्जकत्वादेव। नन्वेवं साक्षात्करोमीत्यनुव्यवसायस्य साक्षात्त्वजातिव्यवस्थापकत्वे अतीन्द्रिये निर्विकल्पकादौ तन्न सिध्येत तत्रोक्तानुगतजात्यभावादित्याशङ्क्याह, 'निर्विकल्पकेति घट-घटत्वादिनिर्विकल्पकेत्यर्थः, 'योगिप्रत्यक्षं योगिनां मोक्षसाधनीभूतचरमतत्त्वसाक्षात्कारः, 'धर्मिग्राहकेति,

ःश्वर-योगिप्रत्यक्षे च प्रत्यक्षत्वं धर्मिग्राहकमानसिद्धं।
ागजधर्माजन्यजन्यत्वविषयकसविकल्पकाजन्यसामा-

ं विशिष्टधीः विशेषणज्ञानजन्या विशिष्टधीत्वादनुमित्यादिवदि-
ाद्यविशिष्टप्रत्यक्षपक्षकानुमानान्निर्विकल्पकसाधकादेवानुमित्यादिबा-
ःहकारेण निर्विकल्पकस्य साक्षात्कारत्वसिद्धिः। तथा चितिः
ादानगोचरसाक्षात्कारजन्या कार्य्यत्वादित्यनुमानादीश्वरज्ञानसाध-
देव साक्षात्कारत्वरूपेण तत्सिद्धिः। तथा इयं मुक्तिस्तत्व-
ाक्षात्कारजन्या मुक्तित्वादित्यनुमानात्तत्त्वज्ञानसाधकात् साक्षात्कार-
रूपेणैव तत्सिद्धिरिति भावः। नच साक्षात्कारत्वं न जातिः
नुमितित्वेन समं साङ्कर्य्यात् आंशिकत्वाच्च, पर्व्वतो वह्निमानित्यनुमि-
नन्तरं पर्व्वतः साक्षात्कृतो वह्निश्चानुमित इत्यनुभवात्तत्र पर्व्वतांशे
ाक्षात्वस्य वह्न्यंशे चानुमितित्वस्य सत्त्वात्तस्माद्विनिगमकाभावात्
ाक्षात्वमनुमितित्वमुभयसेवाखण्डविषयिताविशेष इति वाच्यं। धर्म्मि-
ाहक-प्रमाणेन साक्षात्त्वानुमितित्वयोर्लाघवात् जातिरूपत्वे सिद्धे
ामर्थमादाय तत्र पर्व्वतः साक्षात्कृत इत्यनुभव इतिकल्पनात्, यौगप-
प्रत्ययस्यापि स्थूलकालमादाय सम्भवात्। नचैवं पर्व्वतमनुमिनोमी-
नुव्यवसायापत्तिः, पर्व्वतोवह्निमान् इत्यनुमितौ पर्व्वतस्याविधेयतया
ादृशानुव्यवसायविरहात् विधेयताख्यविषयताविशेषस्यैव तादृशानु-
ावसायविषयत्वात्। अनुमितित्वस्य विषयिताविशेषत्वाभ्युपगमेऽपि
ाशांशिभावलक्षणस्वरूपसम्बन्धविशेषस्य वह्न्यादौ स्वीकर्त्तव्यत्वा-
ेति दिक्। सोऽयं साक्षात्कारोद्विविधः लौकिकस्तदन्यश्च, तत्राद्यस्य

न्यलक्षणप्रत्यासत्त्यजन्य-जन्यप्रत्यक्षस्य लक्षणमनागतो चरसाक्षात्कारहेतुप्रत्यासत्त्यजन्यजन्यसाक्षात्कारत्वं।

लक्ष्यतावच्छेदकं लक्षणञ्चाह, 'योगजेत्यादिना, 'स्वपदं यदीयलौकिक-प्रत्यक्षं लक्षणीयं तत्परं, तथाच योगजधर्म्माजन्य-जन्यतत्तद्विषयकसवि-कल्पकाजन्यतत्तदीयसामान्यप्रत्यासत्त्यजन्य-जन्यतत्तत्साक्षात्कारत्वं लक्ष्य-तावच्छेदकमितिभावः। अत्र योगजन्याज्ञाततत्प्रत्यक्षेऽतिव्याप्तिवारण-'योगजधर्म्माजन्येति। प्राचां नये साक्षात्कारत्वनिरूपितविषयिता-लिप्रत्यक्षसामग्र्या योगजधर्म्मजन्यप्रत्यक्षप्रतिबन्धकतया तज्जन्यप्रत्यक्ष-सर्व्वांश एवालौकिकत्वनियमाद्योगजधर्म्म-तल्लौकिकसन्निकर्षोभयजन्य-तल्लौकिकप्रत्यक्षे नाव्याप्तिः। ज्ञानलक्षणसन्निकर्षजन्य-तदलौकिक-त्यक्षेऽतिव्याप्तिवारणाय 'जन्यतत्तद्विषयकसविकल्पकाजन्येति, सुर-चन्दनमित्याद्युपनीतभानस्य चन्दनाद्यंशे लौकिकप्रत्यक्षत्वमस्यादतः तत्तद्विषयकत्वं सविकल्पकविशेषणं, जन्यतत्तद्विषयकसविकल्पकजन्यत्व-जन्यतत्तद्विषयकसविकल्पकत्वावच्छिन्नकारणताप्रतियोगिक-कार्य्यता-लित्वं, तेन विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वेऽपि तादृशतल्लौकिकप्रत्यक्षे नाव्याप्तिः, न वा धारावाहिक-तल्लौकिकप्रत्यक्षे विशेषणज्ञानविधया पूर्व्वविशिष्टज्ञानजन्ये प्रमेयत्व-सामान्यलक्षणाजन्य-वस्तुमात्रविषयकज्ञानानुव्यवसाये विषयविधया स्वविषयसविकल्पकात्मकव्यवसायजन्ये चातिव्याप्तिः, तत्र तद्विषय-कसविकल्पकत्वेनाहेतुत्वात्। तद्विषयकसविकल्पकत्वञ्च सांसर्गिक-विषयितानिरूपकविषयितासम्बन्धेन तद्वज्ज्ञानत्वं, तादृशी च विष-

न्ये तु सामन्यज्ञान-प्रत्यासत्त्योरिन्द्रियसम्बद्धवि-
पणतान्तर्भावात् तज्जन्यं प्रत्यक्षं संग्राह्यमेवेति। यद्वा
पयत्वेन स्वविशेष्यजन्यं ज्ञानं जन्यप्रत्यक्षं। आत्म-

ता प्रकारिता विशेष्यिता च, ज्ञानलक्षणप्रत्यासत्तेः तादृशसवि-
कल्पकत्वेनैव हेतुत्वात् "नित्यस्य स्वरूपयोग्यस्येति नियमात्।
ानुपहितभगवज्ज्ञानवारणाय जन्यत्वस्य कारणतावच्छेदके प्रवे-
शावश्यकत्वादप्रसिद्धिवारणाय 'जन्यपदं, तल्लौकिकप्रत्यक्षसामग्र्याः
निवन्धकतया न तल्लौकिकसन्निकर्ष-तत्सविकल्पकोभयाभ्यां लौकि-
लौकिकोभयरूपमेकन्तत्प्रत्यक्षं जन्यत इति न तत्राव्याप्तिः।
तयापि विनश्यदवस्थेन्द्रियालोकसंयोगजन्य-घट-घटत्वादिनिर्वि-
कल्पकानन्तरजातजातित्वादिप्रकारकघटत्वाद्युपस्थितितो विशेष्ये विशे-
षमिति न्यायेन स्वरूपतो घटत्वविशिष्टघटविशेषणकभूतलादिप्रत्य-
वारणाय स्वरूपतो जात्युपनीतभाने स्वरूपतस्तत्प्रकारकज्ञानत्वेनैव
प्रासत्तित्वमित्युपेयते तदा स्वरूपतो घटत्वादिप्रकारकोपनीतभाने
तिव्याप्तिस्तत्र यथोक्ततत्सविकल्पकत्वेनाहेतुत्वादिति चेत्, तर्हि
धर्मविशेषावच्छिन्नत्वाविशेषितसांसर्गिकविषयितानिरूपितविषयिता-
सम्बन्धेन तदवच्छिन्ना या ज्ञाननिष्ठकारणता तन्निरूपितजन्यत्वं
विषयतासविकल्पकजन्यपदेन विवक्षणीयं, स्वरूपतो घटत्वादि-
प्रकारकोपनीतभाने च निरवच्छिन्नप्रकारितासम्बन्धेन घटत्वादि-
ज्ञानत्वेन हेतुतया तस्यापि तादृशकारणतानिरूपितजन्यता-
त्वात् विशिष्टवैशिष्ट्यज्ञाने च यादृशसम्बन्धेन विशेषणतावच्छेद-

विशेष्यकानुमिति-शाब्द-स्मृतिषु विशेष्यत्वेन तस्य न
हेतुत्वं। विशेष्यं विनापि तासामुत्पत्तेः। वि
समवायित्वेन। यद्वा इन्द्रियजन्यं ज्ञानं जन्यप्रत्यक्ष

कीभूय भाषते तत्सम्बन्धावच्छिन्नप्रकारितासम्बन्धेन तद्ज्ञान
त्वेनैव हेतुत्वं, उपनीतभाने तु नायं नियमः। अवधारणार्थकमात्र
पदोपादानाद्विशेषणज्ञानविधया कारणत्वस्य व्यवच्छेदः, तत्र निर्वि
कल्पकविषयिताया अपि सम्बन्धविधया कारणतावच्छेदके प्रवेश
सामान्यप्रत्यासत्तिजन्यतन्मुख्यविशेष्यकप्रत्यक्षेऽतिव्याप्तिवारणाय 'स
मान्यप्रत्यासत्त्यजन्येति, तदीयसामान्यप्रत्यासत्तिजन्यत्वञ्च तद्वृत्तिधर्म
प्रकारकज्ञानत्वावच्छिन्नकारणतानिरूपितकार्य्यताशालित्वं, तेन धार
वाहिकघटत्वादिविशिष्टघटादिलौकिकप्रत्यक्षे विशेषणज्ञानविधया घट
त्वादिसामान्यज्ञानजन्ये नाव्याप्तिः। सामान्यलक्षणप्रत्यासत्तेश्च तत्तद्
रूपेण हेतुत्वं, तदलौकिकमुख्यविशेष्यताशालिप्रत्यक्षे तद्वृत्तिधर्मप्रका
रकज्ञानत्वेनैव हेतुत्वोपगमात्। तदलौकिकप्रत्यक्षं प्रति तल्लौकिक
प्रत्यक्षसामग्र्याः प्रतिबन्धकतया तल्लौकिकसन्निकर्ष-तदीयसामान्य
लक्षणसन्निकर्षोभयाभ्यां लौकिकालौकिकोभयरूपमेकं प्रत्यक्षं न
जन्यत इति न तत्राव्याप्तिः। फलीभूतप्रत्यक्षस्यैव लक्ष्यतया भगवत
प्रत्यक्षेऽतिव्याप्तिवारणाय जन्यत्वं तत्तद्विषयकप्रत्यक्षविशेषणं। तत्तद्वि
षयकत्वञ्च सांसर्गिकविषयतातिरिक्ततत्तद्विषयिताशालित्वं, तेन वैशि
ष्ट्यांशे लौकिकालौकिकबहिर्भूतत्वेऽपि न क्षतिः। नचैवं यत्र संसर्गे
समं लौकिकः सन्निकर्षो वर्त्तते तत्रापि संसर्गांशे लौकिकप्रत्यक्षत्वं

इन्द्रियत्वेन जनकत्वं विवक्षितं। जन्यप्रत्यक्षमात्रे इन्द्रियत्वेन चक्षुरादीनां कारणता, अनुगतहेतुं विना

न स्यादिति वाच्यं। सांसर्गिकविषयतातिरिक्तविषयताया लौकिक-सन्निकर्षजन्यताघटकतया तत्र संसर्गस्य विधिविषयत्वाभ्युपगमात्। तस्याणलौकिकत्वं तत्रापीष्यत एवेत्यन्ये। न चाभावलौकिकप्रत्यक्षे प्रतियोगित्वमनुपस्थितमेव प्रतियोग्यंशे प्रकारीभूय भाषत इति नये तदंशे तस्य लौकिकप्रत्यक्षत्वापत्तिरिति वाच्यं। प्रतियोगित्वस्याभावात्मकत्वे पदार्थान्तररूपत्वे वा तदंशे लौकिकत्वस्य तत्रेष्टापत्तेः। प्रतिरिक्तत्वनयेऽपि निरूपकतासम्बन्धेन तस्याभावनिष्ठतया अभावसादायैव तत्रेन्द्रियसम्बद्धविशेषणतात्मकलौकिकसन्निकर्षसम्भवात्। प्रतियोग्यात्मकत्वे तु प्रतियोग्यंश एव तत्राप्यलौकिकत्वमेव प्रतियोग्युपनयस्यैव तद्विषयकसविकल्पकत्वादिति न काप्यनुपपत्तिः। 'अनागतेति, 'जन्यसाक्षात्कारत्वमिति, अत्र योगजधर्मादिजन्य-तदलौकिकप्रत्यक्षे अतिव्याप्तिवारणाय 'अजन्यान्तं, अनागतत्वञ्च स्वफलीभूतज्ञानकालीनप्रागभावप्रतियोगित्वं, तथाच स्वफलकालीनप्रागभावप्रतियोगिविषयकसाक्षात्कारस्वरूपयोग्यप्रत्यासत्त्यजन्यत्वे सति जन्यतत्तद्विषयकसाक्षात्कारत्वं लक्षणमिति फलितं। तादृशप्रत्यासत्त्यजन्यत्वञ्च तत्तद्विषयत्वांशे तादृशप्रत्यासत्त्यजन्यत्वं तादृशप्रत्यासत्तिनिरूपिततत्तद्विषयत्वातिरिक्तविषयत्वानवच्छिन्न-प्रत्यक्षमात्रवृत्तिजन्यतानाश्रयत्वमिति यावत्, तेनांशिकालौकिकप्रत्यक्षात्मके तत्रौकिप्रत्यक्षे नाव्याप्तिः, योगजधर्मनिरूपितजन्यतायाः संग्रहाय

अनुगतकार्य्यस्याकस्मिकतापत्तेः। स्मृत्यनुमित्यादौ च मनसो नेन्द्रियत्वेन हेतुत्वं किन्तु मनस्त्वेन। अन्यथा स्मृत्यादेः साक्षात्कारत्वापत्तेः। इन्द्रियत्वञ्च स्मृत्यज-

---

निषेधद्वयगर्भता, जातिविशेषस्यैव तज्जन्यतावच्छेदकत्वात् अदृष्टत्वा-वच्छिन्नकारणताप्रतियोगिक-कार्य्यत्वावच्छिन्नजन्यतायाः तज्ज्ञानस्य विशेषणज्ञानविधया जन्यतायाश्च वारणाय प्रत्यक्षमात्रवृत्तित्वं जन्यता-विशेषणं। न च तथापि परमाण्वादिनित्यगोचरोपनीतभानेऽतिव्याप्ति तदुपनयस्यानागतगोचरसाक्षात्कारस्वरूपायोग्यत्वात्, जातित्वादिनि-त्यमात्रवृत्तिसामान्यप्रत्यासत्तिजन्यप्रत्यक्षेऽतिव्याप्तिश्च तदलौकिकसुख-विशेष्यताशालिप्रत्यक्षे तद्वृत्तिधर्म्मप्रकारज्ञानत्वेन हेतुतया तत्रापि तादृशसाक्षात्कारस्वरूपयोग्यत्वविरहादिति वाच्यं। तादृशसाक्षात्कार-स्वरूपयोग्यप्रत्यासत्तिपदेन तादृशसाक्षात्कारस्वरूपयोग्यवृत्तिप्रत्या-सत्तिविभाजकोपाध्याश्रयस्य विवक्षितत्वात्, ज्ञानप्रत्यासत्तित्वादिकन्तु तथेति दिक्।

'इन्द्रियसम्बद्धविशेषणतान्तर्भावादिति, स्वजन्यज्ञानप्रकारत्वरूपेन्द्रि-यसम्बन्धाश्रयस्य सामान्यस्य धर्म्मिताख्यविशेषणतायास्तदाश्रयनिष्ठाया सामान्यप्रत्यासत्तित्वेन सामान्यलक्षणायास्तदन्तर्भावः, मनःसंयुक्त-समवेतत्वरूपेन्द्रियसम्बन्धाश्रयस्य ज्ञानस्य विषयतारूपविशेषणताया ज्ञानप्रत्यासत्तित्वाज्ज्ञानलक्षणायास्तदन्तर्भाव इति भावः। 'संयुक्त-मेवेति, तथा च योगजधर्म्माजन्यत्वमात्रं लक्ष्यतावच्छेदके प्रवेशनीय-मिति भावः।

ज्ञानहेतुमनःसंयोगाश्रयत्वं, प्राण-शरीरात्मानश्च
स्मृतिजनकमनःसंयोगवन्तः। शब्देतरोद्भूतविशेषगु-
णाश्रयत्वे सति ज्ञानहेतुमनःसंयोगाश्रयत्वं वा।

लौकिकप्रत्यक्षस्य लक्षणान्तरमाह, 'यद्वेति, विशेष्यपदं विषयमात्र-
परं, स्वपदस्वानादेयं, तथाच विषयत्वेन विषयजन्यं ज्ञानं लौकिक-
प्रत्यक्षमित्यर्थः। एतेन लौकिकप्रत्यक्षे विशेष्यत्वेन न हेतुता योग्य-
ानुमात्रस्यैव लौकिकप्रत्यक्षविशेष्यत्वे मनाभावात् तथाचासम्भवः
प्रत्यक्षटितत्वादननुगमस्येति निरस्तं। अत्रात्मविषयकानुमित्यादावति-
व्याप्तिवारणाय 'विषयत्वेनेति, विषयत्वञ्च लौकिकविषयतासम्बन्धेन
ज्ञानाकारवत्त्वं, तेन गुरुत्वादेरयोग्यस्य न लौकिकप्रत्यक्षमिति भावः।

केचित्तु तज्जन्यप्रत्यक्षसामान्यमेव प्रत्यक्षं तथाच विषयत्वेन
विषयजन्यं ज्ञानं जन्यप्रत्यक्षमित्यर्थः। नचैवं सर्व्वांशे अलौकिक-
प्रत्यक्षस्य विषयाजन्यत्वात् तत्राव्याप्तिरिति वाच्यं। तस्याप्यात्माद्यंशे
लौकिकत्वे बाधकाभावेन विषयजन्यत्वात् प्रत्यक्षमात्रस्यैव यत्किञ्चि-
द्विषयांशे लौकिकत्वनियमात्। अस्तु वा विषयत्वेन विषयजन्यज्ञान-
त्वस्यानुभवत्वाव्यापकजातिमत्त्वे सति जन्यत्वं लक्षणार्थं इत्याहुः।

'विषयत्वेनेत्यस्य प्रयोजनं दर्शयति, 'आत्मविशेष्यकेति आत्म-
विषयकेत्यर्थः, 'विशेष्यत्वेन' विषयत्वेन, 'तस्य' आत्मनः, 'विशेष्यं
नापि' विषयविरहेऽपि, अतीतानागतविषयस्यत्र इति शेषः।
'तेषां' अनुमित्यादीनां, 'समवायित्वेन' जन्यज्ञानत्वावच्छिन्नं प्रति
समवायिकारणतावच्छेदको योधर्म्मस्तेन आत्मत्वेनेति यावत्।

ज्ञानाकरणकं ज्ञानमिति तु वयं। विशिष्टप्रत्यक्षे च विशेषणज्ञानं न कारणं व्यापाराभावात्। विशिष्टवै-

---

जन्यप्रत्यक्षसामान्यस्य लक्षणमाह, 'यद्देति, अनुमित्यादेरपि मनोरूपेन्द्रियजन्यत्वादतिव्याप्तेराह, 'इन्द्रियत्वेनेति, 'अन्यथेति स्मृत्यादावपि इन्द्रियत्वेन मनसो हेतुत्व इत्यर्थः, इन्द्रियत्वेनेन्द्रियजन्यसाक्षात्कारत्वनियामकत्वादिति भावः। ननु इन्द्रियत्वं जन्यसाक्षात्कारत्वावच्छिन्नकार्यता-प्रतियोगिक-कारणताश्रयत्वं, कालादिवारणायावच्छिन्नान्तं, तच्च न जन्यसाक्षात्कारजनकतावच्छेदकमात्माश्रयादित्यत आह, 'इन्द्रियत्वञ्चेति, 'स्मृत्यजनकेति संयोगविशेषणं, तथाच स्मृत्यजनको यो ज्ञानहेतुमनःसंयोगस्तदाश्रयत्वमित्यर्थः। आत्म-मनःसंयोगवच्चक्षुरादि-मनःसंयोगस्यापि चाक्षुषादिप्रत्यक्षहेतुत्वाच्चक्षुरादौ लक्षणसमन्वयः। शरीर-मनःसंयोगमादाय शरीरे आत्म-मनःसंयोगमादायात्मन्यतिव्याप्तिवारणाय स्मृत्यजनकत्वं संयोगविशेषणं, शरीरात्म-मनःसंयोगश्च न स्मृत्यजनकः तस्य ज्ञानमात्रजनकत्वात्। स्मृत्यजनकत्वञ्च स्मृतिस्वरूपायोग्यत्वं, तेनानुभवमात्रोपधायकात्म-मनोयोगव्यक्तिमादाय नात्मन्यतिव्याप्तितादवस्थ्यं। मनसि चक्षुरादि-मनःसंयोगमादायैव लक्षणसमन्वयः संयोगस्य द्विष्ठत्वात्। मनोघटसंयोगादिमादाय घटादावतिव्याप्तिवारणाय 'ज्ञानहेतुरिति संयोगविशेषणं, मनोघटादिसंयोगस्यापि विभागादिहेतुत्वाज्ज्ञानपदं। चक्षुरादिसंयोगमादाय विषये घटादावतिव्याप्तिवारणाय मनःपदं। मनःसमवेततादृशद्रव्यत्वादिकमादाय घटादावतिप्रसङ्ग-

...प्रत्यक्षे च विशेषणज्ञानं हेतुर्न तु विशेषणविशे-
...धीरपि विशेषणधीद्वारा करणं मानाभावात्।

...णाय संयोगत्वेन प्रवेशः। न च यत्र चक्षुषि मनःसंयोगो न जात-
...ताद्यापत्तिरिति वाच्यं। तस्यालक्ष्यत्वात्। न च स्वप्नवहनाड़ी-मनः-
...संयोगमादाय स्वप्नवहनाड्यामतिप्रसङ्गः तस्यापि स्वप्नजनकत्वेन ज्ञान-
...हेतुत्वादिति वाच्यं। तस्य स्वप्नानुभववत् स्वप्नकालीनस्मृतावपि
...कत्वात्। गोलक-मनःसंयोगश्च न ज्ञानहेतुर्मानाभावादतो गोलके
...तिव्याप्तिः। यदि च गोलकावच्छेदेनेन्द्रिय-मनःसंयोगवदिन्द्रिया-
...च्छेदेन गोलक-मनःसंयोगोऽपि ज्ञानहेतुर्विनिगमकाभावादिति
...वाच्यते तदापि शरीर-मनःसंयोगत्वेन गोलक-मनःसंयोगस्यापि
...तिरूपयोग्यत्वादेव नातिव्याप्तिः स्वाश्रयत्वरूपस्य शरीरत्वस्य
...गोलकेऽपि सत्त्वात्, इन्द्रियावयव-मनःसंयोगश्च न ज्ञानजनकस्ते-
...न्द्रियावयवे नातिव्याप्तिः। नच तथापि स्वसमवेतज्ञानाद्यभावसा-
...मग्र्यारणजनकघट-मनःसंयोगवति कालादावतिप्रसङ्ग इति वाच्यं।
...न सन्निकर्षघटकतया कारणतावच्छेदकत्वेऽपि कारणत्वे माना-
...भावात्, भावमात्रविषयकत्वेन वा ज्ञानं विशेषणीयं। ननु तथापि
...व्याप्तिः त्वङ्मनोयोगस्यापि ज्ञानमात्रहेतुतया स्मृत्यजनकत्व-
...रहात्। न च त्वङ्मनोयोगस्य जन्यज्ञानमात्रहेतुत्वे मानाभाव
...इति वाच्यं। तस्य जन्यज्ञानमात्राहेतुत्वे सुप्त्यापोत्पादद्वितीयादिक्षणे-
...पि ज्ञानोत्पत्त्यापत्तेः आत्मनोविभुतया पुरीतति-मनःसंयोगात्म-
...सुप्त्यापत्तिसमये पुरीतत्यवच्छेदेनात्ममनोयोगे तादृशवैजात्याभा-

प्रत्यभिज्ञायान्तु तत्तास्मृतिः कारणं न तु संस्कारद्वारा
अनुभवः कारणं, तस्याः संस्कारजन्यत्वे स्मृतित्वापत्ते

वान्न ज्ञानोत्पत्तिरित्यपि निरस्तं। आत्म-मनःसंयोगस्यासमवायिकारणस्य कार्य्यतावच्छेदके न जन्यज्ञानत्वं, किन्तु लाघवात् ज्ञानेच्छादिफलसाधारणं जन्यात्मविशेषगुणत्वं तथाच सुषुप्तिकालेऽपि श्वासप्रश्वासहेतुजीवनयोनियत्नान्यथानुपपत्त्या विजातीयात्म-मनःसंयोगस्यावश्यकत्वात् त्वङ्मनःसंयोगश्च तदा नास्ति। यदा मनस्त्वचमपि परिहृत्य पुरीततिमनुविशते तदा सुषुप्तिरित्यभिधानात्। न च सुप्तापदशायां ज्ञानोत्पादवारणाय प्राण-मनःसंयोग एव हेतुरुपेयते न तु त्वङ्मनःसंयोग इति वाच्यं। त्वक्त्व-प्राणत्वयोरुभयोरेव जातिरूपतया विनिगमनाविरहेण त्वङ्मनोयोगस्यापि हेतुत्वस्य दुर्वारत्वादिति चेत्। न। सुप्तापदशायां हि कीदृशं ज्ञानमापाद्यते, न तावत् चाक्षुषादि चक्षुरादिमनःसंयोगविरहादेव तदानीं तदनुत्पत्तेः। नापि मित्यादि परामर्षादीनामभावात्। नापि स्मृतिरूपबोधकस्य फलस्य कल्प्यत्वात्। न चात्म-मनःसंयोगसत्त्वादात्मादिमानसापत्तिरिति वाच्यं। ज्ञानाद्यात्मकविशेषगुणाविषयकात्मादिमानसस्याङ्गीकारे सुप्तापोत्पादकाले ज्ञानादिप्रत्यक्षसामग्रीविरहादेव सुप्तापानन्तरमात्मादिमानसानुत्पत्तेः, सुप्तापप्रयोजकमनःक्रियोत्पत्तिकाले तादृशमनःपूर्व्वदेशविभागोत्पत्तिकाले वा जातस्य ज्ञानादेः सुप्तापोत्पादकाले अवस्थानासम्भवात्। न च मनःपूर्व्वदेशे विभागकालोत्पन्नस्यापेक्षाबुद्ध्यात्मकज्ञानस्य सुप्तापोत्पादकाले अवस्था

ृतित्वे लाघवेन संस्कारजन्यत्वस्य तन्नत्वात् तद्धेतुत्वे-
ैव तत्सिद्धेश्च।

ाव इति वाच्यं। तदानीमपेक्षाबुद्ध्यात्मकज्ञानोत्पादे मानाभावात्
पेक्षाबुद्धेरपि क्षणत्रयावस्थायित्वे मानाभावाच्च। न च सुष्वाप-
ोजकमनःपूर्व्वसंयोगनाशकालोत्पन्नज्ञानादेः सुष्वापोत्पाददशाया-
ज्ञानसम्भव इति वाच्यं। असमवायिकारणस्य कार्य्यसह-
ावेन हेतुतया मनःपूर्व्वसंयोगनाशदशायां ज्ञानाद्युत्पादासम्भवात्।
च यस्यासमवायिकारणस्य नाशात् कार्य्यविनाशस्तस्यैव कार्य्यसह-
ावेन हेतुतया आत्म-मनःसंयोगस्य कार्य्यसहभावेन हेतुत्वे मा-
ाव इति वाच्यं। त्वन्मनोयोगस्यातिरिक्तकारणत्वकल्पनापेक्षया
ात्म-मनःसंयोगस्यैव आत्म-मनोयोगत्वेन कार्य्यसहवर्त्तितया हेतुत्व-
ावकल्पनाया लघुत्वात्। न चात्म-मनोयोगत्वेन कार्य्यसहवर्त्तितया
ुत्वेऽपि यत्र मनःक्रियया न पुरीतति-मनःसंयोगात्मकसुष्वापोत्पादः
ात्तु पूर्व्वदेशसंयुक्त एव मनसि पुरीततिसंयोगरूपः सुष्वापस्तत्र
ापोत्पत्तिप्राक्काले ज्ञानाद्युत्पत्तिसम्भव इति वाच्यं। पुरीतति-
ापाराधीनपुरीतति-मनःसंयोगस्य सुषुप्तित्वविरहात्। यदा त्वच-
ापि परिहृत्य मनः पुरीततिमनुविशते तदा सुषुप्तिरित्यभिधानात्।
केचित्तु स्मृत्यजनकत्वं समवायघटितसामानाधिकरण्यप्रत्यासत्त्या
ृतिजनकं यत्तदन्यत्वं स्मृत्यसमानाधिकरणत्वमिति यावत्। तथाच
ज्ञानसमानाधिकरणज्ञानजनकमनःसंयोगाश्रयत्वं फलितमतो ना-
ाप्तिः। शरीर-मनःसंयोगादिश्च न ज्ञानजनक इति शरीरे नाति-
ाप्तिरित्याहुः। तदसत्प्राण-शरीरेत्याद्यग्रिमग्रन्थासङ्गतेः।

प्राभाकरास्तु साक्षाद्धीः प्रत्यक्षं, साक्षात्त्वञ्च न जातिः नियतव्यञ्जकाभावात्। नापि सविकल्पका-

---

अन्ये तु सुप्त्यापानन्तरं ज्ञानोत्पादवारणाय जन्यज्ञानत्वावच्छिन्नं प्रत्यात्म-मनःसंयोगस्यैव सुषुप्तिकालीनमनःसंयोगव्यावृत्तवैजात्येन हेतुत्वमुपेयते न तु त्वङ्मनोयोगस्य। न च विनिगमकाभावात् त्वङ्मनोयोगस्यापि वैजात्येन हेतुत्वं दुर्वारं ज्ञानेच्छादिसाधारणजन्यत्वविशेषगुणत्वावच्छिन्नं प्रत्यात्म-मनःसंयोगस्य पृथक् समवायादिसम्बन्धेन कारणतायास्त्वयाप्यावश्यकत्वादिति वाच्यं। आत्म-मनःसंयोगस्य वैजात्येन हेतुत्वे समवायस्य प्रत्यासत्तितया प्रत्यासत्तिलाघवात् त्वङ्मनोयोगस्य हेतुत्वे अवच्छेदकत्वस्यैव प्रत्यासत्तितया गौरवात् चर्ममनःसंयोगजन्यतावच्छेदकवैजात्यद्वयस्याधिकस्य कल्पनापत्त्या गौरवापत्तेश्चेत्याहुः।

मिश्रज्ञास्तु सुप्त्यापोत्तरं ज्ञानोत्पत्तिवारणाय चर्म-मनःसंयोग एव जन्यज्ञानसामान्ये हेतुरुपेयते न तु त्वङ्मनःसंयोगः। न च विनिगमनाविरहः, जन्यज्ञानसामान्ये त्वङ्मनोयोगस्य हेतुत्वे रसादिसाक्षात्कारकाले त्वचा द्रव्यसाक्षात्कारापत्तेः सामान्यसामग्रीतया त्वङ्मनोयोगस्यावश्यकत्वात्, रसादिसाक्षात्कारसामग्र्याः प्रतिबन्धकत्वोपगमे च गौरवादित्याहुः। तदसत्। रसादिसाक्षात्कारकाले द्रव्येन समं त्वक्सन्निकर्षे मानाभावेन तदभावादेव त्वचा द्रव्यसाक्षात्कारानुपपत्तेः। उक्तक्रमेणैव सुषुप्तिकाले ज्ञानानुत्पादसम्भवेन चर्म-मनःसंयोगस्यापि जन्यज्ञानमात्रहेतुत्वे मानाभावाच्च।

...पेक्षज्ञानत्वं, प्रत्यभिज्ञा-सादृश्य-द्वित्वादिप्रत्यक्षाव्या-
...नात्। किन्तु यज्ज्ञानं यद्विषयत्वे सविकल्पकाजन्यं

केचित्तु सुप्तापोत्तरं ज्ञानोत्पत्तिवारणाय शरीर-मनःसंयोग एव ...ज्ञानसामान्यहेतुरुपेयते न तु त्वङ्मनःसंयोगः शरीरस्य त्वग्-...व्यतया सुप्तापदशायां त्वङ्मनःसंयोगस्याप्यसत्त्वात्। न च शरी-...त्वमपेक्ष्य[1] त्वक्त्वस्य जातिरूपतया लाघवेन त्वङ्मनः-संयोग एव हेतुरुचित इति वाच्यं। शरीर-मनःसंयोगत्व हि न शरीर-मनः-संयोगत्वेन हेतुत्वं येन शरीरस्य प्रवेशः, अपि तु शरीरनिष्ठतया मनः-संयोगत्वेन समवायावच्छेदकत्वघटितसामानाधिकरण्यं प्रत्यासत्तिः कारणदिशि समवायः, कार्य्यदिश्यवच्छेदकत्वं। यद्वा संयोगसम्बन्धेन शरीरनिष्ठतया मनस्त्वेनैव हेतुत्वं कार्य्यतावच्छेदकसम्बन्धश्चावच्छेदकत्वं त्वङ्मनःसंयोगस्य हेतुत्वे च त्वक्त्व-संयोगत्वयोरवच्छेदककोटौ प्रवेश-स्यावश्यकतया गौरवादित्याहुः। तदसत्। मनःसंयोगत्वेन शरीर-मनःसंयोगस्य जन्यज्ञानसामान्यहेतुत्वे चक्षुरादि-मनःसंयोगस्यापि स्म-तिरूपयोग्यत्वादिन्द्रियलक्षणस्यासम्भवापत्तेः। सुप्तापोत्तरं ज्ञानो-त्पादप्रसङ्गस्योक्तक्रमेणैव वारणसम्भवादतिरिक्तज्ञानोत्पादस्य चोक्तक्र-मेणापादयितुमशक्यत्वात् तथा च त्वङ्मनःसंयोगस्य स्मृत्यजनकत्व-मस्त्येव क्व त्वच्व्याप्तिरिति प्राहुः। तदप्यसत्। आत्मादिमानसस्या-प्युक्तक्रमेणापादयितुमशक्यतया मानसत्वावच्छिन्नं प्रत्यपि त्वङ्मनो-योगस्य हेतुत्वे मानाभावादिति दिक्।

(१) शरीरत्वस्य पृथिवीत्वादिना सङ्कर्य्यात् न जातित्वमपि तु चेष्टा-श्रयत्वरूपत्वमेव।

तत् तच्च साक्षाद्धीः, मिति-मातृप्रकाशे च सर्वमेव ज्ञानं प्रत्यक्षं ज्ञानाजन्यत्वात्। जातावनुगतधीरपि

स्मृत्यजनकत्वविशेषणस्य व्यावृत्तिं छलतो दर्शयति, 'प्राणेति, अत्र प्राणेत्यभ्युपगमवादेन, स्वीयप्राण-मनः-संयोगकारणताया अन्यत्र निराकृतत्वात्। 'शब्देतरेति शब्दतरो य उद्भूतविशेषगुणस्तदनाश्रयत्वे सति ज्ञानहेतुमनःसंयोगाश्रयत्वमित्यर्थः। शरीरात्मादिवारणाय सत्यन्तं, चक्षुरादेरप्यनुद्भूतरूपादिमत्त्वादव्याप्तिवारणाय 'उद्भूतेति, उद्भूतत्वं रूप-रस-गन्ध-स्पर्शमात्रवृत्त्यनुद्भूतत्वाख्यजात्यवच्छिन्नः, तद्वांश्च ज्ञानादिरपीति नात्मन्यतिव्याप्तिः। अतएव तादृशोद्भूतत्ववान् परिमाणादिरपीत्यसम्भववारणाय विशेषपदं। तादृशोद्भूतत्वं शब्देऽपीत्यतः शब्दसादाय श्रोत्रेऽव्याप्तिवारणाय 'शब्देतरेति। कालादावतिव्याप्तिवारणाय विशेष्यदलं। इन्द्रियावयवार्थसन्निकर्षोऽपि प्रत्यक्षहेतुरिति इन्द्रियावयवेऽतिव्याप्तिवारणाय 'मनःपदं, इन्द्रियावयव-मनःसंयोगश्च न ज्ञानहेतुर्मानाभावात्। दिक्कालनिष्ठोद्भूतरूपाभावप्रत्यक्षहेतुचक्षुःसंयोगवतोस्तयोर्वारणाय मनःपदमित्यपि कश्चित्। न चानुद्भूतस्पर्शवति वायवीयशरीरे शरीर-मनःसंयोगमादायातिव्याप्तिरिति वाच्यं। तादृशवायवीयशरीरे मानाभावादिति भावः।

केचित्तु प्रत्यक्षत्वसाक्षाद्व्याप्यजात्यवच्छिन्नकार्यतापतियोगिककारणताश्रयत्वमिन्द्रियत्वं चाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुरादिना हेतुत्वात् सर्वत्र लक्षणसमन्वय इत्याहुः। तदसत्। मनस्यव्याप्तेः जन्यज्ञानत्वावच्छिन्नं प्रत्येव मनसो हेतुतया मानसत्वस्य तत्कार्य-

प्रत्यक्षा जाति-व्यक्तिनिर्विकल्पकजन्यत्वात्। साद्दश्यादिविशिष्टवैशिष्ट्यप्रत्यक्षे च न विशेषणज्ञानं हेतुः

तावच्छेदकत्वे मानाभावात्। न च मानसत्वस्य कार्य्यमात्रवृत्तिजातितया कार्य्यतावच्छेदकत्वावश्यकतया मनस एव तदवच्छिन्नं प्रति हेतुत्वमिति वाच्यं। तथा सति विनिगमनाविरहेणात्मत्वेनापि हेतुतया आत्मन्यतिव्याप्तेरिति दिक्।

नित्यानित्यसकलप्रत्यक्षसाधारणलक्षणमाह, 'ज्ञानेति, प्रत्यक्षे चक्षुरादिकमेव करणं न तु ज्ञानं अनुमित्यादौ च लिङ्गादिज्ञानमेव करणमिति भावः। कारणत्वमपहाय करणत्वपर्य्यन्तानुधावनस्य प्रयोजनं फलतोदर्शयति, 'विशिष्टप्रत्यक्षे चेति, तथाच करणत्वपर्य्यन्तस्याप्रवेशे विशिष्टप्रत्यक्षेऽव्याप्तिः स्यादिति हृदयं। ननु किमिदं ज्ञानाकरणकत्वं, न तावज्ज्ञानजन्यत्वे सति ज्ञानजन्यजन्यो यस्तद्भिन्नत्वं, जन्यप्रत्यक्षमात्रस्यैव भगवज्ज्ञानजन्यतया तज्जन्यसन्निकर्षादिजन्यतया चाव्याप्तेः धारावाहिकविशिष्टप्रत्यक्षे क्रमोत्पन्नसौरभज्ञानद्वयानन्तरोत्पन्नसुरभिचन्दनमित्युपनीतप्रत्यक्षे चाव्याप्तेश्च तत्र विशेषणज्ञानविधया उपनयविधया च प्रथम-द्वितीयज्ञानयोरुभयोरेव जनकत्वादिति। मैवं। स्वावच्छिन्नकार्य्यताप्रतियोगिक-कारणताश्रयज्ञानजन्यमात्रवृत्तिधर्म्मावच्छिन्नकारणताप्रतियोगिक-कार्य्यतावच्छेदकं यत्तद्भिन्नत्वस्य तत्त्वात्। तादृशकार्य्यतावच्छेदकञ्च धूमलिङ्गक-वह्न्यनुमितित्वादिकमेव प्रसिद्धं, तस्य स्वावच्छिन्नकार्य्यताप्रतियोगिक-कारणताश्रयव्याप्तिज्ञानादिजन्यपरामर्षमात्रवृत्तिधर्म्मावच्छि-

तेन विनापि युगपदिन्द्रियसन्निकृष्टे विशिष्टप्रत्ययोदयात्। दीर्घादिप्रत्यक्षे च न ह्रस्वादिज्ञानापेक्षा, किन्तु

न्नकारणता-प्रतियोगिककार्य्यतावच्छेदकत्वात्। कार्य्यतावच्छेदकत्वञ्च तत्कोटिप्रविष्टं, तेन व्याप्तिज्ञानस्य कार्य्यतावच्छेदकं धूमलिङ्गकवह्न्यनुमितित्वं न परामर्षकार्य्यतावच्छेदकं, धूमलिङ्गकपर्व्वतपक्षकवह्न्यनुमितित्वस्यैव परामर्षकार्य्यतावच्छेदकत्वादित्यनुमितावधिव्याप्तिरिति निरस्तं। न च तथापि परामर्षत्वस्य भगवज्ज्ञानवृत्तितया तादृशव्याप्तिज्ञानजन्यमात्रावृत्तित्वादतिव्याप्तितादवस्थ्यमिति वाच्यं। तादृशकारणताश्रयजन्यवृत्तित्वं हि तादृशकारणताश्रयज्ञानाजन्यजन्यज्ञानावृत्तित्वे सति तादृशकारणताश्रयजन्यवृत्तित्वं, सत्यन्ते च तादृशकारणताश्रयज्ञानं जन्यत्वेन विशेषणीयं अन्यथा जन्यज्ञानमात्रस्यैव तादृशकारणताश्रयपरमेश्वरज्ञानजन्यतया तादृशकारणताश्रयज्ञानाजन्य-जन्यज्ञानाप्रसिद्धेः। संशयोत्तरप्रत्यक्षे च व्याप्तिज्ञानस्याकारणत्वात्। विशेषदर्शनहेतुत्वस्य निरस्तत्वाच्च नाव्याप्तिः। न च तथाप्यात्मसाक्षात्कारेऽव्याप्तिः आत्मसाक्षात्कारत्वस्य स्वावच्छिन्नकार्य्यताप्रतियोगिक-कारणताश्रयश्रवणजन्यमननमात्रवृत्तिधर्म्मावच्छिन्नकारणताप्रतियोगिक-कार्य्यतावच्छेदकत्वादिति वाच्यं। स्वावच्छिन्नकार्य्यताप्रतियोगिक-कारणताया ज्ञानत्वघटितधर्म्मावच्छिन्नत्वेन विशेषणीयत्वात्। आत्मसाक्षात्कारं प्रति च श्रवणस्य श्रुतिवाक्यजन्यशाब्दत्वेन हेतुत्वात्। असति बाधके श्रौतधर्म्मावच्छेदेनैव कारणतायाः कल्पयितुमुचितत्वात्। यद्वा स्वावच्छिन्नकार्य्यताप्रतियोगिक-

तद्व्यवहारे। अनुमित्यादेर्मेयांशे प्रत्यभिज्ञायाश्च तत्तांशे ज्ञानजन्यत्वान्न प्रत्यक्षत्वं किन्तु परोक्षत्वमेव, मितिमात्रांशे इदन्तांशे च द्वयोरेव प्रत्यक्षत्वं।

कारणता ज्ञानत्वन्यूनवृत्तिजात्यनियतत्वेन विशेषणीया, श्रवणनिष्ठकारणता च श्रुतिजन्यज्ञानत्वावच्छिन्नापि शाब्दत्वनियतैव।

केचित्तु श्रवणं मनने, मननं निदिध्यासने, निदिध्यासनं साक्षात्कारे, साक्षात्कारश्च मुक्तौ, न तु साक्षात्कारे श्रवणादेर्हेतुत्वं मानाभावादिति नाव्याप्तिरित्याहुः।

केचित्तु ज्ञानाकरणकज्ञानमात्रवृत्त्यनुभवत्वसाक्षाद्व्याप्यजातिरहितज्ञानत्वमुक्तलक्षणार्थः। मोक्षजनकतावच्छेदकात्मतत्त्वसाक्षात्कारमात्रवृत्तिजातिमादायात्मतत्त्वसाक्षात्कारेऽव्याप्तिवारणाय व्याप्यान्तं जातिविशेषणं। यद्वा ज्ञानाजन्यज्ञानवृत्त्यनुभवत्वाव्यापकजातिमात्रे तात्पर्य्यं, निर्विकल्पकं ज्ञानं आदाय सर्व्वत्र लक्षणसङ्गतिः। अखण्डाभावतया ज्ञानाजन्येत्यत्र न ज्ञानपदवैयर्थ्यं। 'विशिष्टप्रत्यक्षे' इत्यादिवक्ष्यमाणग्रन्थस्तु यथाश्रुताभिप्रायेणेत्याहुः।

ननु विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रति विशेषणतावच्छेदकज्ञानत्वेन विशेषणतावच्छेदकप्रकारकज्ञानत्वेन च हेतुता एवञ्च विशिष्टवैशिष्ट्यबोधत्वस्य स्वावच्छिन्नकार्य्यताप्रतियोगिक-कारणताश्रयो विशेषणतावच्छेदकज्ञानं तज्जन्यमात्रवृत्तिधर्म्मो विशेषणतावच्छेदकप्रकारकज्ञानत्वं तदवच्छिन्नकारणताप्रतियोगिक-कार्य्यतावच्छेदकत्वा-

यत्तु तत्ताप्रकाशे न तत्तासविकल्पकत्वेन कारणता किन्तु तत्ताज्ञानत्वेन। तन्न। अनुमित्यादावपि लिङ्गादिज्ञानत्वेनानुमेयादितुल्यत्वादिति। अत्रोच्यते। यदि तत्तायां प्रत्यभिज्ञा परोक्षानुभवरूपा तदा नोत्पद्येत तद्धेतुलिङ्गादेरभावात्। तत्ताज्ञानसहितं

त्तदाश्रयप्रत्यक्षेऽव्याप्तिरित्यत आह, 'विशिष्टवैशिष्ट्यप्रत्यक्ष' इति विशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्ने प्रत्यक्षे इत्यर्थः, 'विशेषणज्ञानं' विशेषणतावच्छेदकप्रकारक-विशेषणज्ञानं, 'विशेषणविशेषणधीः' विशेषणतावच्छेदकधीः, 'विशेषणधीद्वारा', तथाच विशिष्टवैशिष्ट्यबोधत्वस्वावच्छिन्नकार्यतापतियोगिक-कारणताश्रयो न विशेषणतावच्छेदकज्ञानमिति नाव्याप्तिरिति भावः। ननु संयोगाद्यजन्यतत्तत्प्रत्यक्षेत्वं कार्यता तत्ताज्ञानत्वेन तत्तासंस्कारत्वेन च हेतुता एवञ्च तत्तप्रत्यभिज्ञायामव्याप्तिरित्यत आह, 'प्रत्यभिज्ञायामिति, 'लाघवेनेति अनुभवसामग्र्यसमवहितसंस्कारजन्यत्वमपेक्ष्य लाघवेनेत्यर्थः। ननु तत्त्वं कारणत्वच्छेदसम्भवः, व्यापकत्वच्छेत् न क्षतिः, व्याप्यत्वच्छेदिशिष्टस्याप्यस्तीति किन्तु गौरवेणेत्यस्वरसादाह, 'तद्धेतुत्वेनैवेति स्मृतिहेतुत्वेनैव, 'तत्सिद्धेश्च' संस्कारज्ञानाच्चेत्यर्थः, तथाच स्मृतिं प्रति पूर्ववर्त्तित्वे गृहीत एव प्रत्यभिज्ञां प्रति पूर्ववर्त्तित्वग्रहोभवियतीति "अन्यं प्रति" इत्याद्यन्यथासिद्धिरिति भावः। इदमुपलक्षणं व्यभिचारादपि संस्कारो न हेतुरित्यपि बोध्यं।

इन्द्रियं जनयतीति चेत्। तर्हि इन्द्रियजन्यत्वात् तच्च साक्षात्कारेव स्यात्। न च ज्ञानानपेक्षेन्द्रियजन्यत्वं तत्र तत्त्वं, गौरवात् ज्ञानसहितेन्द्रियजन्यत्वेनेदन्तांशेऽप्यप्रत्यक्षत्वप्रसङ्गाच्च। न ह्येकस्मिन् ज्ञाने जनयितव्ये तदपेक्षा तदनपेक्षा च सम्भवति। अंशे तदुभयमपीति

ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति लक्षणं प्राभाकरमते न सम्भवति, अनुमित्यादेरपि साक्षात्यंशे प्रत्यक्षतया तत्राव्याप्तेरतस्तन्मते लक्षणमाह, 'प्राभाकरास्त्विति, 'नियतेति अनुगतानतिप्रसक्तेत्यर्थः, 'सविकल्पकानपेक्षज्ञानत्वमिति, साक्षात्त्वमिति शेषः। सविकल्पकत्वं सप्रकारकज्ञानत्वं। यद्यपि तन्मते निर्विकल्पकाप्रसिद्ध्या सप्रकारकपदस्याव्यावर्त्तकत्वं, तथापि तन्मते विशिष्टबुद्धौ विशेषणज्ञानस्याहेतुत्वेऽपि विशिष्टबुद्धौ विशेषणतावच्छेदकविषयकज्ञानमात्रस्य विशेषणतावच्छेदकविशेष्यकज्ञानसाधारणस्य हेतुतया विशिष्टवैशिष्टप्रत्यक्षेऽव्याप्तिवारणाय सविकल्पकत्वेन प्रवेशः। न च तथापि तद्दोषतादवस्थ्यमिति वाच्यं। सविकल्पकत्वघटितधर्म्मावच्छिन्नकारणताप्रतियोगिककार्य्यतानाश्रयत्वस्य विवक्षितत्वात्। सविकल्पकत्वघटितत्वं प्रकारिताघटितत्वं। विशिष्टबुद्धौ च शिशेषेणतावच्छेदकविषयकज्ञानत्वेनैव हेतुत्वं न तु विशेषणतावच्छेदकप्रकारकज्ञानत्वेनेति भावः। 'प्रत्यभिज्ञेति अभेदप्रत्यभिज्ञेत्यर्थः। तत्र तत्ताप्रकारकज्ञानत्वेन, प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानत्वेन, एकत्वत्वप्रकारक-नाने-

चेत्। न। ज्ञाने अंशस्य विषयत्वेन तदजन्यत्वात्। एवं मिति-मात्रांशे च सर्वं ज्ञानं न प्रत्यक्षं इन्द्रियाजन्यत्वात् साक्षात्कारे तस्य कारणत्वात्। मनोजन्यत्वे अनुमेयांशेऽपि तत्त्वप्रसङ्गः। न च ज्ञानमात्र-

---

कत्वगोचरज्ञानत्वेन च हेतुत्वादिति भावः[१]। इदमुपलक्षणमनुमित्यादेरपि मिति-मात्रांशे प्रत्यक्षरूपतया तत्राव्याप्तेश्चेत्यपि बोध्यं। 'किन्त्विति, 'यद्विषयत्वे' यद्विषयत्वांशे, प्रत्यभिज्ञायास्तेदन्तांशे तत्तासविकल्पकाजन्यत्वान्नाव्याप्तिः। सविकल्पकाजन्यत्वञ्च सविकल्पकत्वघटितधर्मावच्छिन्नकारणताप्रतियोगिक-कार्यतानाश्रयत्वं, तेन विशिष्टवैशिष्ट्यप्रत्यक्षे विशेषणतावच्छेदकप्रकारकादिज्ञानजन्ये नाव्याप्तिरादवस्थ्यं। तथाच सविकल्पकत्वघटितधर्मावच्छिन्नकारणतानिरूपित-यन्निष्ठकार्यतायाः विषयतया तदनवच्छेदकं तद्वैशिष्ट्यप्रत्यक्षमिति फलितं। न च तथापि सादृश्य-द्वित्वादिप्रत्यक्षेऽव्याप्तिः तदवस्थेति वाच्यं। सादृश्य-द्वित्वादिव्यवहार एव प्रतियोगिज्ञानापेक्षाबुद्ध्यपेक्षा न तु तत्प्रत्यक्षे इत्यभ्युपगमादिति भावः। 'मितिमात्रप्रकाशे चेति मिति-मात्रांशे चेत्यर्थः, 'ज्ञानाजन्यत्वादिति तदंशे

---

(१) तत्ताप्रकारकज्ञानत्वेन हेतुत्वात् प्रत्यभिज्ञायां, प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानत्वेन हेतुत्वात् सादृश्यप्रत्यक्षे, एकत्वप्रकारकनानैकत्वज्ञानत्वेन हेतुत्वात् द्वित्वप्रत्यक्षे सविकल्पकानपेक्षत्वरूपं प्रत्यक्षलक्षणमव्याप्तमिति भावः।

सामग्रीजन्यत्वं प्रत्यक्षत्वे तन्त्रं, गौरवात् ज्ञानमात्रञ्च न ज्ञानत्वं तस्याजन्यत्वात्। नापि सर्वं ज्ञानं प्रत्यक्षज्ञाने, प्रत्येकं सर्वज्ञानसामग्रीजन्यत्वात् सर्वज्ञानसामग्रीप्रसिद्धेश्च। अपि च ज्ञाने अवयवाभावेनांशो

ज्ञानमात्रस्यैवाजन्यत्वादित्यर्थः, तथाच सुतरां सविकल्पकाजन्यत्वमिति भावः। इदमापाततः तथापि स्वात्मविषयकानुमित्यादेस्तदंशे प्रत्यक्षत्वानुपपत्तेर्दुर्वारत्वादिति ध्येयं। नन्वेतस्य लक्षणत्वे विशिष्टबुद्धौ विशेषणधियो हेतुत्वसत्त्वे अयं गौरयं गौरित्यादिधारावाहिकविशिष्टप्रत्यक्षेऽव्याप्तिरित्यत आह, 'जातावनुगतधीरिति जातिधारावाहिकविशिष्टधीरपीत्यर्थः, विशिष्टबुद्धौ विशेषणधियो हेतुत्वसत्त्वेपीति शेषः। 'जाति-व्यक्तीति विशिष्टबुद्धौ विशेषणधियो हेतुत्वनये आद्यविशिष्टप्रत्यक्षस्य जाति-व्यक्तिनिर्विकल्पकजन्यत्वादित्यर्थः, तथाच व्यभिचारेण सविकल्पकत्वघटितधर्मेण कारणत्वाभावान्नाव्याप्तिरिति भावः। नन्वन्यत्र विशिष्टवैशिष्ट्यबुद्धौ सामान्यतोविशेषणतावच्छेदकविषयकज्ञानत्वेन हेतुत्वेऽपि सादृश्यत्वादिविशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानत्वेनैव हेतुत्वात् सदृशोऽयमित्यादिसादृश्यत्वविशिष्टसादृश्यादिवैशिष्ट्यप्रत्यक्षेऽव्याप्तिरित्यत आह, 'सादृश्यादिविशिष्टवैशिष्ट्यप्रत्यक्षे चेति सादृश्यादि यद्विशिष्टं तद्वैशिष्टप्रत्यक्षेऽपीत्यर्थः, तेन सादृश्यत्वादिविशिष्ट-वैशिष्ट्यप्रत्यक्षलाभः। सादृश्यादिपदं सादृश्यत्वादिपरमित्यपि केचित्। 'न विशेषणज्ञानं हेतुरिति न

विषय एव विषये च ज्ञानं न कारणं अतोऽनुमिति-प्रत्यभिज्ञयोः स्वविषयेऽनुमेये तत्तायाञ्च प्रत्यक्षत्वं स्यात् विषयस्य सविकल्पकाजन्यत्वात्। अथ प्रत्यभिज्ञायां

सादृश्यत्वप्रकारकसादृश्यज्ञानं सादृश्यत्वप्रकारकज्ञानत्वेन हेतुरित्यर्थः, 'तेन विनापीति सादृश्यत्वप्रकारक-सादृश्यज्ञानं विनापीत्यर्थः, 'युगपदिन्द्रियसन्निकृष्ट इति सादृश्यत्वे सादृश्ये च युगपदिन्द्रिय-सन्निकृष्टे सति तयोः खण्डशो ज्ञाने च सतीत्यर्थः, 'विशिष्ट-प्रत्ययोदयादिति सदृशोयमित्याकारकप्रत्ययोदयादित्यर्थः। 'दीर्घा-दीति दीर्घत्वादीत्यर्थः, आदिपदेन सादृश्य-द्वित्वादिपरिग्रहः, 'ह्रस्वादिज्ञानं' ह्रस्वत्वादिप्रकारकज्ञानं, आदिना प्रतियोगि-नानै-कत्वादिपरिग्रहः। ननु तथापि अनुमित्यादेः साध्यांशे प्रत्यभि-ज्ञायास्तत्तांशे प्रत्यक्षव्यवहारो न स्यादित्यत्रेष्टापत्तिमाह, 'अनुमि-त्यादेरिति, 'सेयांशे' साध्यांशे, 'ज्ञानजन्यत्वात्' सविकल्पकत्वघटित-धर्मेण तज्जन्यत्वात्, 'प्रत्यक्षत्वं' प्रत्यक्षव्यवहारविषयत्वं, 'परोक्षत्वं' परोक्षव्यवहारविषयत्वं, 'द्वयोरेवेति, एवकारो भिन्नक्रमे तथाच-मिति-मात्रांशे इदन्त्वांश एव चेत्यर्थः, 'प्रत्यक्षत्वं' प्रत्यक्षव्यवहार-विषयत्वं।

तत्तांशेऽपि प्रत्यभिज्ञायाः प्रत्यक्षव्यवहारविषयत्वमेवेति मीमां-सकैकदेशिमतमपाकर्त्तुं शङ्कते, 'यत्त्विति, 'तत्ताप्रकाशे' तत्ता-विशिष्टाभेदप्रत्यभिज्ञायां, 'तत्तासविकल्पकत्वेन' तत्ताप्रकारकज्ञानत्वेन,

तत्ताविषयत्वेन तज्ज्ञानं कारणं, एवमनुमित्यादौ
ज्ञेयविषयत्वेऽपि। मिति-साचिदन्ता-धर्मिविषयत्वे च
न ज्ञानं कारणं किन्तु ज्ञानसामग्रीति चेत्। न। त-

[illegible]ति, तथाच तत्तांशेऽपि प्रत्यक्षव्यवहारविषयत्वमेवेति भावः। प्रतिबन्धिमुखेन दूषयति, 'अनुमित्यादावपीति तत्तासविकल्पकादेव तत्ताप्रकाशो न तु तत्ताज्ञानमात्रात्तथापि यदि तत्ताज्ञानत्वेन हेतुत्वन्तदा अनुमित्यादावपि लिङ्गादिज्ञानत्वेन हेतुत्वेन तुल्यत्वादिति व्याप्तिरित्यर्थः, तत्र यदि लिङ्गादिज्ञानमात्रादनुमित्यनुत्पत्तेर्न लिङ्गादिज्ञानत्वेन हेतुत्वं किन्तु व्याप्यत्वादिप्रकारकज्ञानत्वेन तदाऽपि तथेति भावः। प्राभाकरमतं दूषयति, 'अत्रोच्यत इति, 'परोक्षानुभवरूपा' परोक्षानुभवव्यवहारविषया, 'तदेति, यावद्विशेषकारणबाधेन सामान्यकार्य्यानुत्पत्तेरिति भावः। 'इन्द्रियजन्यत्वात्' इन्द्रियत्वेनेन्द्रियजन्यत्वात्, 'साक्षाद्धीरेवेति साक्षात्कारव्यवहारएवेत्यर्थः। 'ज्ञानानपेक्षेति सविकल्पकत्वघटितधर्मेण ज्ञानानपेक्षेत्यर्थः तेन विशिष्टवैशिष्ट्यप्रत्यक्षे नाव्याप्तिः, 'तत्र' साक्षात्कारव्यवहारे। तज्जत्वं कारणत्वं व्याप्यत्वं वा आद्य आह, 'गौरवादिति, अन्य आह, 'ज्ञानरहितेन्द्रियजन्यत्वेनेति ज्ञानानपेक्षेन्द्रियजन्यत्वाभावादिति शेषः। 'अप्रत्यक्षत्वं' प्रत्यक्षव्यवहाराविषयत्वं, 'चकारेण गौरवमपि समुच्चितं। ननु ज्ञानानपेक्षेन्द्रियजन्यत्वाभावोनास्ति किन्तु ज्ञानसापेक्षेन्द्रियजन्यत्व-ज्ञाननिरपेक्षेन्द्रियजन्यत्वोभयमेवास्तीत्यत आह, 'न हीति।

विषयत्वं हि ज्ञाने स्वकारणाधीनन्तदीयस्वभावत्वं स्वरूपविशेषः स च ज्ञानाजन्य एव[१]। दण्डिज्ञानादौ चाव्याप्तिः तस्यानुमित्यादिवद्विशिष्टज्ञानत्वेन विशेषण-

---

'न प्रत्यक्षं' न प्रत्यक्षव्यवहारविषयः। ननु मानोऽपेन्द्रियजन्यत्व-मस्त्येवेत्यत आह, 'मनोजन्यत्वे इति, साक्षात्कारत्वव्यवहारप्रयोजक इति शेषः। 'अनुमेयांशेऽपि साध्यांशेऽपि। ननु सर्व्वस्यैव ज्ञानस्य मिति-मात्रंशे प्रत्यक्षत्वात् ज्ञानमात्रसामग्रीजन्यत्वमप्यपरं मिति-मात्रंशे प्रत्यक्षव्यवहारप्रयोजकं व्याप्यमित्याशङ्कते, 'न च ज्ञानमात्र-सामग्रीजन्यत्वमिति, 'प्रत्यक्षत्वे' मिति-मात्रंशे प्रत्यक्षव्यवहारे, यथा-श्रुते अनुमयांशेऽपि प्रत्यक्षव्यवहारापत्तेस्तादवस्थ्यात्। अत एव 'गौरवादित्यपि सङ्गच्छते, एतस्यापि प्रत्यक्षव्यवहारप्रयोजकत्वे गौर-वादित्यर्थः, अन्यथा इन्द्रिय-शरीरनिर्वचने इन्द्रियजन्यत्वस्यैव गुर-त्वात्। यद्यपि ज्ञानत्वावच्छिन्नकार्य्यतानिरूपितकारणताश्रयसामग्री-जन्यत्वमेव ज्ञानमात्रसामग्रीजन्यत्वं सुवचं तथाप्याशयमविज्ञा स दूषणान्तरमाह, 'ज्ञानमात्रञ्चेति। 'अनुमिति-प्रत्यभिज्ञयोरिति, 'अनुमितिपदं परोक्षज्ञानमात्रोपलक्षणं। 'अथेति, 'तज्ज्ञानं' तत्ता-प्रकारकज्ञानजन्यं, तथाच यज्ज्ञानस्य यद्विषयत्वं सविकल्पकत्व-घटितधर्मेण तदजन्यं तज्ज्ञानं तस्य प्रत्यक्षमिति लक्षणं वाच्यमि-

---

(१) ज्ञानजन्य एवेति ख०।

ज्ञानजन्यत्वात्। न च परोक्षत्वमुपाधिः, प्रत्यभिज्ञायां प्रयोगोत्पन्नजाति-व्यक्तिज्ञाने जन्ये जातेरनुगतप्रत्यक्षे प साध्याव्यापकत्वात्। पूर्व्वव्यक्तिवृत्तित्वे सत्येतद्व्यक्तिवृत्तित्वमनुगतत्वमिति तच्च पूर्व्वानुभूतव्यक्तेर्विशेषणत्वेन तच्च ज्ञानस्यानुगतत्वप्रत्यक्षे कारणत्वात्।

ति भावः। 'स्वकारणाधीनं' स्वाश्रयकारणस्य कार्य्यतावच्छेदकमिति यावत्, 'तदीयस्वभावत्वं' स्वरूपसम्बन्धेन ज्ञाननिष्ठमिति यावत्, 'स्वरूपविशेषः स चेति स्वरूपसम्बन्धेन वर्त्तमानः स च धर्म्मइत्यर्थः, 'ज्ञानाजन्य एव' तत्तादिज्ञानाजन्य एव, तथाच तत्ताद्यंशेऽपि प्रत्यक्षत्वं स्यादिति भावः।

यद्वा 'स्वकारणाधीनं' स्वकारणजन्यं, 'तदीयस्वभावत्वं' ज्ञानीयविषयस्वरूपः, 'स्वरूपविशेषः स चेति विषयस्वरूपः स च धर्म्मइत्यर्थः। क्वचिच्च 'ज्ञानजन्य एवेति पाठः, तत्र 'स्वकारणाधीनं' ज्ञानकारणजन्यं, 'तदीयस्वभावत्वं' ज्ञानस्वरूपं, 'स्वरूपविशेषः स च' ज्ञानस्वरूपः स च धर्म्मः, 'ज्ञानजन्य एव' तत्तादिज्ञानजन्य एव, तथाचेदन्त्याद्यंशेऽपि प्रत्यक्षत्वं न स्यादिति भावः। ननु यज्ज्ञाननिष्ठं यद्विषयकत्वं सविकल्पकत्वघटितधर्म्मावच्छिन्नकारणताप्रतियोगिककार्य्यतानवच्छेदकं तत्तस्य प्रत्यक्षमिति विवक्षितं सविकल्पकत्वघटितधर्म्मावच्छिन्नकारणताप्रतियोगिक-कार्य्यतानवच्छेदकतद्विषयिताशालिज्ञानत्वं तस्य प्रत्यक्षत्वमिति तु निष्कर्षः। अनवच्छेदकान्तं विष-

अन्यथा प्रथममप्यनुगतधीप्रसङ्गः। अत एव ज्ञानसाक्षादन्यं ज्ञानं प्रत्यक्षं प्रत्यभिज्ञायां संस्कार एव साक्षाज्जनकः, जातावनुगतधीरपि संस्कारजन्या, एवं सादृश्यादिप्रत्यक्षेऽपि प्रतियोगिसंस्कार एव कारणमिति निरस्तं। दण्डानुभवजन्यदण्डिप्रत्यक्षे धारावाहिकप्रत्यक्षे चाव्यापनात्। उत्तरविशिष्टज्ञाने पूर्वविशिष्टानुभवस्यैव विशेषणज्ञानत्वेन हेतुत्वात् संस्का-

---

यिताविशेषणमतो न कोऽपिदोष इत्यखरसादाह, 'दण्डीत्यादिज्ञानेचेति दण्डत्वादिविशिष्टवैशिष्ट्यप्रत्यक्षे चेत्यर्थः। 'विशिष्टज्ञानत्वेनेति विशिष्टवैशिष्ट्यज्ञानत्वेन हेतुनेत्यर्थः, विशेषणज्ञानजन्यत्वादिति विशेषणतावच्छेदकप्रकारकज्ञानत्वेन विशेषणज्ञानजन्यत्वसाधनादित्यर्थः। 'परोक्षत्वमिति साक्षात्कारभिन्नत्वमित्यर्थः, 'प्रत्यभिज्ञायामिति सोऽयमित्यभेदप्रत्यभिज्ञायामित्यर्थः। 'तत्र ज्ञानस्य' तत्र तत्ताप्रकारकज्ञानस्य, 'प्रथममपि' पूर्व्वव्यक्तिज्ञानं विनापि। न च तथाप्रयोजकमिति वाच्यं। सामान्यतो विशेषणतावच्छेदकज्ञानत्वेन हेतुत्वे विशेष्ये विशेषणमितिन्यायात् जन्यज्ञानमात्रस्यैव तादृशविशेषणविषयत्वापत्तेरिति भावः। 'अतएवेति विशिष्टप्रत्यक्षेऽव्याप्तत्वादेवेत्यर्थः, 'ज्ञानेति, प्रथमज्ञानपदं सविकल्पकपरं तेनाद्यविशिष्टप्रत्यक्षे नाव्याप्तिः, चरमज्ञानपदमनुभवपरं तेन स्मरणव्यवच्छेदः, 'संस्कार एव' तत्ताप्रकारकसंस्कार एव, क्षणविलम्बस्तु अन्यथानुपपत्त्या कुत्रचित्

स्य स्मरणेतराजनकत्वाच्च। अन्यथा प्रत्यभिज्ञादेः संस्कारजन्यत्वेन स्मृतित्वं स्यादित्युक्तत्वात्। इतिप्रत्यक्षलक्षणं।

लौकार्थ इति भावः। हेत्वन्तरमाह, 'दण्डानुभवेति, 'दण्डिप्रत्यक्षे' दण्डविशिष्टप्रत्यक्षे, धारावाहिकप्रत्यक्षेऽव्याप्तिमुपपादयति, 'उत्तरेति। 'संस्कारखेति, 'स्मरणेतराजनकत्वात्' इति स्मरणेतरज्ञानाजनकत्वात्। इति प्रत्यक्षपरिच्छेदरहस्ये प्रत्यक्षलक्षणरहस्यं।

इन्द्रियसन्निकर्षजन्यत्वं प्रत्यक्षत्वमिति यौक्तलक्षणं तच्च न सम्भवति सन्निकर्षाणामननुगततया परस्परव्यभिचारेण प्रत्यक्षहेतुत्वासम्भवादिति पूर्व्वमुक्तं तत्राह, 'प्रत्यक्षविशेष इति, 'अनुगत एव' अव्यभिचार्य्येव, तथाच यौक्तमपि लक्षणं प्रत्यक्षस्य सम्भवतीति भावः। इत्थञ्च यौक्तलक्षणोपोद्घातसङ्गत्या सन्निकर्षनिरूपणमिति मन्तव्यं।

केचित्तु ननु सन्निकर्षाणां परस्परव्यभिचारेण प्रत्यक्षहेतुत्वासम्भवात् तद्धारकमिन्द्रियाणामपि प्रत्यक्षहेतुत्वमसम्भवि तत्कथमिन्द्रियजन्यत्वं प्रत्यक्षलक्षणमिति यौक्तलक्षणोपोद्घातसङ्गत्याह, 'प्रत्यक्षविशेष इतीत्याहुः।

ननु कोऽसौ विशेष इत्यत आह, 'संयोगेनेति चक्षुरादिसंयोगेनेत्यर्थः, 'द्रव्यग्रहः' द्रव्यचाक्षुषादिः, तथाच चक्षुःसंयोगत्वं त्वक्संयोगत्वं मनःसंयोगत्वञ्च कारणतावच्छेदकं, द्रव्यचाक्षुषत्वं द्रव्यत्वाक्षत्वं द्रव्यमानसत्वञ्च यथाक्रमं कार्य्यतावच्छेदकं कार्य्यदिशि विषयत्वं कारणदिशि समवायः प्रत्यासत्तिः, द्रव्यचाक्षुषत्वञ्च लौकिकविषयत्वा-

प्रत्यक्षविशेषे सन्निकर्षविशेषो हेतुरनुगत एव। संयोगेन द्रव्यग्रहः, संयुक्तसमवायेन रूप-कर्मणोर्ग्रहणं[1],

---

वच्छिन्नाधेयतासम्बन्धेन द्रव्यविशिष्टचाक्षुषत्वं तेन चक्षुःसंयोगं विनापि द्रव्यचाक्षुषस्य गुणादिविषयकस्य विषयतासम्बन्धेन गुणादावणुत्पादेऽपि न व्यभिचारः विशिष्टस्य द्रव्यमात्रवृत्तित्वात्। सामान्यतो विषयतावच्छिन्नाधेयतासम्बन्धेन द्रव्यविशिष्टत्वाभिधाने चक्षुःसंयोगं विनाऽतीतानागतद्रव्ये द्रव्यविशिष्टालौकिकचाक्षुषोदयाद्व्यभिचारापत्तिरतो लौकिकत्वरूपविषयताविशेषणानुधावनं। नचेदं रजतमिति स्मर्यमाणाभेदारोपस्यापि रजतांशे तादृशविषयताया अनुभवसिद्धतया व्यभिचार इति वाच्यं। तादृशविषयकानुभवस्यापि तत्र भ्रमत्वात् एवं द्रव्यमानसत्वमपि निर्वाच्यं। वस्तुतस्तु चाक्षुषत्व-त्वाचत्व-मानसत्वमेव सामान्यतः कार्यतावच्छेदकं न तु द्रव्यविशिष्टत्वप्रवेशः, द्रव्यविशिष्टस्य वस्तुगत्या द्रव्यनिरूपितस्य वा लौकिकविषयत्वस्य कार्यतावच्छेदकसम्बन्धतया च न समूहालम्बनमादाय गुणादौ अलौकिकचाक्षुषमादायातीतादिद्रव्ये व्यभिचार इति मणिकृतोनिगर्भः[2]।

स्वतन्त्रास्तु चक्षुःसंयोगत्वादिना हेतुत्वे गौरवात् संयोगसम्बन्धेन चक्षुष्ट्वादिनैव हेतुत्वं लाघवात् चक्षुषा घटं पश्यामीत्यादिप्रत्ययबलेन चक्षुरादेः कारणत्वस्यावश्यकत्वाच्च। कार्यतावच्छेदकञ्च पूर्ववदेव। न चैवं संयोगसन्निकर्षस्य कारणत्वविलोप इति वाच्यं। दृष्टत्वात्।

---

(१) रूप-कर्म्म-गोत्वादेर्ग्रहणमिति क०-ख०चिह्नितपुस्तकद्वयपाठः, परन्त्वयं टीकाकृदम्मतत्वात् न समीचीनः।

(२) निगर्व्व इत्यपि पाठान्तरम्।

संयुक्तसमवेतसमवायेन रूपत्वादेः, समवायेन शब्दस्य,

व्यापारिणा व्यापारस्य नान्यथासिद्धिरिति चेत्। न। व्यापार-व्यापारिभावस्यैवासिद्धेरसम्भवात्। संयोगसन्निकर्षस्य कारणत्वानुरोधेन सामान्यतः संयोगत्वेनैव द्रव्यविशिष्टत्वाच्छिन्नं प्रति तस्य कारणत्वं द्रव्यविशिष्टत्वञ्च लौकिकविषयत्वावच्छिन्नाधेयतासम्बन्धेन द्रव्यविशिष्टत्वं न तु चक्षुःसंयोगत्वादिनेत्याहुः।

'संयुक्तसमवायेनेति चक्षुरादिसंयुक्तसमवायेनेत्यर्थः, 'रूप-कर्म्मणोरिति, 'रूप-कर्म्मपदं सामान्यतो द्रव्यसमवेतपरं, तेन संख्यादेः द्रव्यवृत्तिजातेश्च परिग्रहः, 'ग्रहणं' चाक्षुषादि, तथा च चक्षुःसंयुक्तसमवायत्व-त्वक्संयुक्तसमवायत्व-मनःसंयुक्तसमवायत्व-घ्राणसंयुक्तसमवायत्व-रसनसंयुक्तसमवायत्वेन कारणत्वं, यथाक्रमं द्रव्यसमवेतचाक्षुषत्व-द्रव्यसमवेतत्वाचत्व-द्रव्यसमवेतमानसत्व-गन्धघ्राणजत्व-रसनजत्वेन च कार्य्यत्वं, कार्य्यदिशि विषयत्वं कारणदिशि विशेषणताविशेषः प्रत्यासत्तिः। द्रव्यसमवेतचाक्षुषत्वञ्च लौकिकविषयतासम्बन्धावच्छिन्नाधेयतासम्बन्धेन द्रव्यसमवेतविशिष्टचाक्षुषत्वं तेन रूपादिचाक्षुषस्य रूपत्वादिविषयकस्य रूपत्वादौ विषयतासम्बन्धेनोत्पादेऽपि न व्यभिचारः विशिष्टस्य द्रव्यसमवेतमात्रवृत्तित्वात्। द्रव्यसमवेतविशिष्टालौकिकचाक्षुषमादायातीतानागतादिषु द्रव्यसमवेतेषु व्यभिचारवारणाय लौकिकात्मकविषयताविशेषानुधावनं। न च तथापि संयुक्तसमवेतसमवायसन्निकर्षेण रूपादौ सत्ताचाक्षुषमादाय सत्तायां व्यभिचार इति वाच्यं। रूपादौ चक्षुःसन्निकर्षदशायां तदा-

समवेतसमवायेन शब्दत्वादेः, विशेषणतया शब्दाभा-

श्रयद्रव्येऽपि चक्षुःसंयोगस्यावश्यकतया द्रव्यमादायैव चक्षुःसंयुक्तसमवायस्य सत्तायां सत्त्वान्न व्यभिचारः। अतएव संयोगसन्निकर्षेण घटादिचाक्षुषेऽपि न व्यभिचारः घट-चक्षुःसंयोगदशायां कपाल-चक्षुःसंयोगस्यावश्यकतया तदादायैव संयुक्तसमवायस्य तत्र सत्त्वात् त्रसरेणुप्रत्यक्षे च द्व्यणुकमादायैव तत्सम्भवः। न चैवं द्व्यणुकरूपादेरपि चाक्षुषापत्तिरिति वाच्यं। घटादिवृत्तिगुरुत्वादिवदयोग्यत्वेनैव तत्प्रत्यक्षासम्भवात्। एवं द्रव्यसमवेतत्वाचत्वं द्रव्यसमवेतमानसत्वं गन्धघ्राणजत्वं रसरासनत्वञ्च निर्व्वाच्यं। वस्तुतस्तु लाघवादत्रापि सामान्यतः चाक्षुषत्व-त्वाचत्व-मानसत्व-घ्राणजत्व-रासनत्वसेव कार्य्यतावच्छेदकं न तु द्रव्यसमवेतविशिष्टत्व-गन्धविशिष्टत्वादिप्रवेशः, द्रव्यसमवेतत्वविशिष्टस्य वस्तुगत्या द्रव्यसमवेतनिरूपितस्य वा लौकिकविषयत्वस्य गन्धत्वविशिष्टस्य वस्तुगत्या गन्धनिरूपितस्य वा लौकिकविषयत्वस्य रसत्वविशिष्टस्य वस्तुगत्या रसनिरूपितस्य वा लौकिकविषयत्वस्य कार्य्यतावच्छेदकसम्बन्धत्वान्न व्यभिचारः, कारणतावच्छेदकमपि चक्षुःसंयोगत्व-त्वक्संयोगत्व-मनःसंयोगत्व-रसनसंयोगत्वसेव न तु समवायत्वादिप्रवेशः, स्वसमवायिसमवेतत्वञ्च कारणतावच्छेदकसम्बन्धः तेन गुणादौ न व्यभिचार इति मणिकृतो निगर्भः(१)।

स्वतन्त्रास्तु चक्षुःसंयुक्तसमवायत्वादिना न कारणत्वं गौरवात् अपि तु स्वसंयुक्तसमवेतत्वसम्बन्धेन चक्षुष्ट्वादिनैव हेतुत्वं लाघवात्

---

(१) अत्रापि 'निगर्भः' इत्यत्र 'निगर्व्वः' इति पाठान्तरम्।

त्य, इन्द्रियसम्बन्धविशेषणतया समवाय-घटाभावादे-

स्तुया रूपं पश्यामीत्यादिप्रत्ययबलेन चक्षुरादेः कारणत्वस्यावश्यक-त्वाच्च। कार्यतावच्छेदकञ्च यथोक्तमेव। न चैवं चक्षुरादिसन्निकर्षस्य हेतुत्वविलोपः मम तु संयोगरूपसन्निकर्षस्यैव सम्बन्धभेदेन सर्व्वत्र हेतुत्वमिति वाच्यं। दृष्टत्वात्। अस्तु वा सन्निकर्षकारणत्वानुरोधेन सामान्यतः समवायत्वेनैव द्रव्यसमवेतविशिष्टत्वावच्छिन्नं प्रति तस्य हेतुत्वं न तु चक्षुःसंयुक्तसमवायत्वादिनेत्याहुः।

'संयुक्तसमवेतसमवायेनेति चक्षुरादिसंयुक्तसमवेतसमवायेनेत्यर्थः। 'रूपत्वादेरिति, 'ग्रहणमित्यनुषज्यते, आदिपदाद्द्रव्यसमवेतसमवेतमात्रग्रहः, तथाच चक्षुःसंयुक्तसमवेतसमवायत्व-त्वक्संयुक्तसमवेतसमवायत्व-मनःसंयुक्तसमवेतसमवायत्व-घ्राणसंयुक्तसमवेतसमवायत्व-रसनसंयुक्तसमवेतसमवायत्वेन कारणत्वं, यथाक्रमं समवेतचाक्षुषत्व-समवेतत्वाचत्व-द्रव्यसमवेतसमवेतमानसत्व-समवेतघ्राणजत्व-समवेतरासनत्वेन च कार्य्यत्वं, विषयत्व-विशेषणत्वाभ्यां सामानाधिकरण्यं प्रत्यासत्तिः। समवेतादिसमवेतद्रव्यचाक्षुषादावपि परमाण्वाद्यवयवावयवचक्षुःसंयोगादिमादायैव तत्सम्भवः। नचैवं द्व्यणुकनिष्ठरूपादेरपि प्रत्यक्षापत्तिः परमाणुमादायैव चक्षुरादिसंयुक्तसमवेतसमवायस्य तत्र विद्यमानत्वादिति वाच्यं। गुरुत्वादिवदयोग्यत्वादेव तदप्रत्यक्षतोपपत्तेः। द्रव्यसमवेतगुणादिचाक्षुषादावपि द्रव्यावयवमादायैव तत्सम्भवः। समवेतचाक्षुषत्वञ्च लौकिकविषयतासम्बन्धावच्छिन्नाधेयतासम्बन्धेन समवेत-

योग्यसन्निकर्षादेव ग्रहो न सन्निकर्षमात्रात्।

विशिष्टचाक्षुषत्वं तेन रूपत्वादिचाक्षुषस्याभावादिलौकिकचाक्षुषात्मकस्य विषयतासम्बन्धेनाभावादावुत्पादेऽपि न व्यभिचारः विशिष्टस्य समवेतमात्रवृत्तित्वात्। अलौकिकचाक्षुषमादायातीतानागतेषु घटादिसमवेतरूपादिषु व्यभिचारवारणाय लौकिकात्मकविषयताविशेषानुधावनं, त्रसरेणुघटितसन्निकर्षेण सत्ताचाक्षुषस्थलेऽपि द्व्यणुकमादाय त्रसरेणुनिष्ठरूपादिमादाय वा चक्षुःसंयुक्तसमवेतसमवायस्य विद्यमानत्वान्न व्यभिचारः। एवं समवेतविशिष्टत्वाचत्व-द्रव्यसमवेतसमवेतविशिष्टमानसत्व-समवेतविशिष्टघ्राणजत्व-समवेतविशिष्टरासनत्वमपि निर्वाच्यं। वस्तुतस्तु लाघवादत्रापि चाक्षुषत्व-त्वाचत्व-मानसत्व-घ्राणजत्व-रासनत्वमेव कार्यतावच्छेदकं न तु समवेतविशिष्टत्व-द्रव्यसमवेतसमवेतविशिष्टत्वप्रवेशः, समवेतत्वविशिष्टस्य वस्तुगत्या समवेतनिरूपितस्य वा लौकिकविषयत्वस्य द्रव्यसमवेतसमवेतत्वविशिष्टस्य वस्तुगत्या द्रव्यसमवेतसमवेतनिरूपितस्य वा लौकिकविषयत्वस्य कार्यतावच्छेदकसम्बन्धत्वान्न व्यभिचारः। कारणतावच्छेदकमपि चक्षुःसंयोगत्वत्वक्संयोगत्व-मनःसंयोगत्व-घ्राणसंयोगत्व-रसनसंयोगत्वमेव न तु समवेतसमवायत्वादिप्रवेशः। स्वसमवायिसमवेतत्वञ्च कारणतावच्छेदकसम्बन्धः तेन रूपत्वादौ न व्यभिचार इति मणिकृतोनिगर्भः।

अत्रापि स्वतन्त्राः चक्षुःसंयुक्तसमवेतसमवायत्वादिना स्वसमवायिसमवेतसमवेतत्वसम्बन्धेन चक्षुःसंयोगत्वादिना वा न हेतुत्वं गौरवादपि तु स्वसंयुक्तसमवेतसमवायसम्बन्धेन चक्षुष्ट्वादिनैव हेतुत्वं

कार्य्यतावच्छेदकञ्च यथोक्तमेव। न चैवं चक्षुरादिसन्निकर्षस्य हेतुत्व-विलोप इति वाच्यं। दृष्टत्वादित्याहुः।

'शब्दस्येति ग्रहणमित्यनुषज्यते, तथाच श्रोत्रसमवायत्वेन कारणता शब्दश्रावणत्वेन कार्य्यता, कार्य्यदिशि विषयत्वं कारणदिशि च विशे-षणताविशेषः प्रत्यासत्तिः, पुरुषान्तरीयकर्णस्थशब्दस्य प्रत्यक्षवारणाय कारणतावच्छेदके श्रोत्रप्रवेशः, श्रोत्रत्वं तत्तत्पुरुषीयकर्णावच्छिन्नं, शब्दश्रावणत्वञ्च लौकिकविषयत्वावच्छिन्नाधेयतासम्बन्धेन शब्दविशिष्टं श्रावणत्वं, तेन शब्दलौकिकप्रत्यक्षस्य शब्दाभावांशेऽपि लौकिकप्रत्य-क्षतावकस्य(१) विषयतासम्बन्धेन शब्दाभावे उत्पादेऽपि न व्यभिचारः विशिष्टस्य शब्दमात्रवृत्तित्वात्। अलौकिकप्रत्यक्षमादायातीतानाग-तादिशब्दे व्यभिचारवारणाय लौकिकत्वानुधावनं। वस्तुतस्तु श्राव-णत्वमेव कार्य्यतावच्छेदकं शब्दत्वविशिष्टं वस्तुगत्या शब्दनिरूपितं वा लौकिकविषयत्वं कार्य्यदिशि प्रत्यासत्तिरिति निगर्भः।

स्वतन्त्रास्तु श्रोत्रसमवायत्वेन न हेतुत्वं गौरवादपि तु स्वसमवाय-सम्बन्धेन श्रोत्रत्वेनैव हेतुत्वं, कार्य्यतावच्छेदकञ्च यथोक्तमेव। न चैव-मिन्द्रियसन्निकर्षस्य न हेतुत्वमिति वाच्यं। दृष्टत्वादित्याहुः।

'शब्दत्वादेरिति 'ग्रहणमित्यनुषज्यते, आदिपदाच्छब्दसमवेत-त्वपरिग्रहः, तथाच श्रोत्रसमवेतसमवायत्वेन कारणता शब्दसमवेत-

---

(१) अत्र शब्दाभावपदेन शब्दविशेषाभावपरिग्रहः, अन्यथा शब्दे श्रो-त्रसन्निकर्षदशायां शब्दसामान्याभावे श्रोत्रसन्निकर्षो न सम्भवति, एक-मप्येतीति ध्येयम्।

श्रावणत्वेन कार्य्यता कार्य्यदिशि विषयत्वं कारणदिशि च विशेषणता-विशेषः प्रत्यासत्तिः, शब्दसमवेतश्रावणत्वञ्च लौकिकविषयत्वावच्छिन्ना-धेयतासम्बन्धेन शब्दसमवेतविशिष्टश्रावणत्वं तेन शब्दत्वलौकिकप्रत्य-क्षस्य शब्दाभावांशेऽपि लौकिकप्रत्यक्षात्मकस्य विषयतासम्बन्धेन शब्दा-भावेऽप्युत्पादेऽपि न व्यभिचारः। विशिष्टस्य शब्दसमवेतमात्रवृत्ति-त्वात्। अलौकिकप्रत्यक्षमादायातीतानागतादिशब्दे व्यभिचारवार-णाय लौकिकत्वरूपविषयताविशेषणानुसरणं। वस्तुतस्तु श्रावणत्वमेव कार्य्यतावच्छेदकं शब्दसमवेतत्वविशिष्टं वस्तुगत्या शब्दसमवेतनिरूपितं वा लौकिकविषयत्वं कार्य्यदिशि प्रत्यासत्तिरिति मणिकृतोनिगर्भः।

स्वतन्त्रास्तु अत्रापि श्रोत्रसमवेतसमवायत्वं न कारणतावच्छेदकं अपि तु श्रोत्रत्वमेव स्वाश्रयसमवेतत्वं कारणदिशि प्रत्यासत्तिः कार्य्य-तावच्छेदकञ्च यथोक्तमेवेत्याहुः।

'शब्दाभावस्येति शब्दसमवायस्याप्युपलक्षकं, तथाच नभोवृत्ति-श्रावणत्वेन श्रोत्रविशिष्टविशेषणतात्वेन हेतु-हेतुमद्भावः, विषयत्व-स्वरूपसम्बन्धघटितसामानाधिकरण्यं प्रत्यासत्तिः, नभोवृत्तित्वञ्च स्वरूपसम्बन्धेन नभोवृत्तित्वं, तच्छ्रावणत्वञ्च लौकिकविषयितासम्बन्धेन तद्विशिष्टश्रावणत्वं, तेनातीतानागतयोः शब्दप्रागभाव-प्रध्वंसयो-र्लौकिकश्रावणप्रत्यक्षमादाय न व्यभिचारः। वस्तुतस्तु श्रावणत्व-मेव कार्य्यतावच्छेदकं नभोवृत्तिनिरूपितलौकिकविषयत्वं कार्य्यदिशि प्रत्यासत्तिः देशान्तरवृत्तिशब्दप्रागभावादौ श्रोत्रवृत्तित्वप्रत्ययाभावेन श्रोत्रविशिष्टविशेषणत्वाभावान्न साक्षात्कार इति भावः।

केचित्तु विशेषणताया विशेषणतात्वेनैव हेतुत्वं तादृशविषय-

तासम्बन्धेन तत्तत्पुरुषीयश्रावणोत्पत्तौ तत्तत्पुरुषीयकर्णविवरस्यापि विशेषणतासम्बन्धावच्छिन्नाधेयतासम्बन्धेन हेतुतया न देशान्तरवृत्ति-शब्दप्रागभावादेर्ग्रहणमित्याहुः।

'इन्द्रियसम्बद्धविशेषणतयेति, इन्द्रियसम्बन्धः संयोगादिसन्निकर्ष-रूपोग्राह्यः अन्यथा यथाकथञ्चित्सम्बन्धेनेन्द्रियसम्बद्धत्वाभिधाने देश-मात्रवृत्तिप्रागभावादेरपि प्रत्यक्षापत्तेः, तथाच इन्द्रियसंयुक्तविशेषणता, इन्द्रियसंयुक्तसमवेतविशेषणता, इन्द्रियसंयुक्तसमवेतसमवेतविशेषणता, इन्द्रियसमवेतविशेषणता, इन्द्रियसमवेतसमवेतविशेषणता, इन्द्रियवि-शेषणविशेषणता, इन्द्रियसंयुक्तविशेषणविशेषणतादिभेदे इन्द्रियसम्बद्ध-विशेषणतैव नानाविधा, उदाहरणन्तु भूतलादिघटितसन्निकर्षेण घटाभावादिप्रत्यक्षमिन्द्रियसंयुक्तविशेषणतायाः, रूपादिघटितसन्नि-कर्षेण नीलादिभेदप्रत्यक्षमिन्द्रियसंयुक्तसमवेतविशेषणतायाः, रूप-त्वादिघटितसन्निकर्षेण नीलत्वादिभेदप्रत्यक्षमिन्द्रियसंयुक्तसमवेतसम-वेतविशेषणतायाः, शब्दघटितसन्निकर्षेण ककारादिभेदप्रत्यक्षमिन्द्रि-यसमवेतविशेषणतायाः, शब्दत्वादिघटितसन्निकर्षेण कत्वादिभेदप्रत्यक्ष-मिन्द्रियसमवेतसमवेतविशेषणतायाः, शब्दप्रागभाव-शब्दसमवायादि-घटितसन्निकर्षेण शब्दादिभेदप्रत्यक्षमिन्द्रियविशेषणविशेषणतायाः, भूतलादिनिष्ठघटाभावादिघटितसन्निकर्षेण घटत्वाद्यभावप्रत्यक्षमि-न्द्रियसंयुक्तविशेषणविशेषणतायाः, अभावेऽप्यतिरिक्ताभावस्वीकारात् रूपादिनिष्ठघटाभावादिघटितसन्निकर्षेण घटत्वाद्यभावप्रत्यक्षमिन्द्रि-यसंयुक्तसमवेतविशेषणविशेषणतायाः, इत्यादि। एतासामसङ्करस्त जातिभिन्नभेदस्यातिरिक्तत्वे तत्रैव ध्येयः। कार्यतावच्छेदकञ्च

एतासां तत्तत्प्रत्यासत्तिमत्प्रत्यक्षत्वं मतुबर्थोऽव्यवहितोत्तरत्वं अन्यथा दुर्वचं एकस्यैवाभावस्य एकेनैवेन्द्रियेण कदाचित् कयाचिन्निरुक्तप्रत्यासत्त्या ग्रहेण परस्परं व्यभिचारात्। सामान्यलक्षणा-ज्ञानलक्षणयोर्हेतु-हेतुमद्भावश्चानुमानदीधितावेव विवेचितः। योगजधर्मस्य तु मानसत्वव्याप्यजातिविशेष एव जन्यतावच्छेदकः, शब्दानेव शृणोतीत्यादौ श्रुवादिधातूनां साक्षात्कारमात्रे लक्षणा, चाक्षुषत्वादिव्याप्या नानाजातय एव वा जन्यतावच्छेदिकाः, सति च लौकिकसन्निकर्षे आर्षः समाज इति बोध्यं। नन्वेवं घटत्वादिवद्घटादिनिष्ठगुरुत्वादेरपि लौकिकप्रत्यक्षापत्तिः संयुक्तसमवायादेः सन्निकर्षस्य तेन सम्बन्धेन चक्षुरादेश्च तत्रापि विद्यमानत्वादित्यत आह, 'योग्यसन्निकर्षादिति योग्यविषयनिष्ठसन्निकर्षादित्यर्थः। तथाच लौकिकप्रत्यक्षं प्रति योग्यत्वेन गुरुत्वादिव्यावृत्तधर्मेण विषयस्यापि तादात्म्यसम्बन्धेन विषयनिष्ठकारणतया गुरुत्वादौ तादात्म्यसम्बन्धेन तादृशविषयाभावादेव न प्रत्यक्षत्वं, योग्यत्वञ्च लौकिकविषयतासम्बन्धेन साक्षात्कारत्वं। न चैतावता अतीन्द्रियव्यावृत्तावपि चक्षुषा स्पर्शादेः, घ्राणेन रसादेः, रसनेन गन्धादेः श्रुतो न लौकिकप्रत्यक्षं तेषां योग्यत्वादिति वाच्यं। चाक्षुषादिप्रत्यक्षं प्रति विषयस्य चक्षुरादियोग्यत्वेन हेतुत्वात् चक्षुरादियोग्यत्वञ्च लौकिकविषयतासम्बन्धेन चाक्षुषादिमत्त्वमिति भावः।

केचित्तु लौकिकप्रत्यक्षसामान्ये तादात्म्यसम्बन्धेन गुरुत्वादेः प्रतिबन्धकत्वान्न गुरुत्वादेरतीन्द्रियस्य लौकिकप्रत्यक्षं, एवं लौकिकचाक्षुषादिसामान्ये स्पर्शादेरपि तादात्म्यसम्बन्धेन प्रतिबन्धकतया न तेषामपि चक्षुरादिना लौकिकप्रत्यक्षमित्याहुः।

अथ सूक्ष्मावयवावच्छेदेनावयविसंयोगेऽपि न तद्ग्रह इति महावयवावच्छेदेन संयोगो हेतुः तथा चावयवे-

---

'सूक्ष्मावयवावच्छेदेनेति परमाण्वाद्यवच्छेदेनेत्यर्थः, 'अवयविसंयोगेऽपि' अवयवि-चक्षुरादिसंयोगेऽपि, 'संयोगः' स्वनिष्ठचक्षुरादिसंयोगः, 'हेतुः' अवयविचाक्षुषादौ हेतुः, त्वया वाच्य इति शेषः। 'अवयवेन्द्रियसंयोग एवेति महावयवेन्द्रियसंयोग एवावयविचाक्षुषादौ हेतुरस्त्वित्यर्थः, महावयवावच्छिन्नस्वनिष्ठचक्षुरादिसंयोगापेक्षया सूक्ष्मावयवचक्षुरादिसंयोगस्य लघुत्वादिति भावः। महावयवसंयोगानामतिप्रसक्ततया स्वनिष्ठसंयोगाधारतावच्छेदकमहत्संयोगो हेतुर्वाच्यस्तथाच गौरवं तदपेक्ष्य स्वनिष्ठसंयोगस्य लघुत्वादित्याशङ्कते 'न चेति ग्राह्यसंयोगावच्छेदकेति स्वनिष्ठसंयोगाधारतावच्छेदकमहत्संयोगापेक्षयेत्यर्थः, 'ग्राह्यसंयोगस्य' स्वनिष्ठसंयोगस्य, 'तस्येति स्वनिष्ठसंयोगमात्रस्य, 'स्वावयवसंयोगापेक्षयेति स्वसमवायिमहत्संयोगापेक्षयेत्यर्थः, पूर्व्वं स्वनिष्ठसंयोगावच्छेदकत्वेन प्रवेशोऽत्र तु स्वसमवायित्वेनेति भेदः। आशयमविद्वानाशङ्कते, 'नापीति, 'तत्रापि' महावयवसंयोगेऽपि, अत्र स्वनिष्ठसंयोगाधारतावच्छेदकमहदवच्छिन्नसंयोगत्वेनैव त्वयापि हेतुत्वं वाच्यं, तथाच तदपेक्ष्य स्वनिष्ठसंयोगाधारतावच्छेदकमहत्संयोगत्वमेव लघु। 'हेतुरेव न स्यादिति, स्वतोग्राह्यनिष्ठसंयोगहेतुरिति शेषः। आशयमुद्घाटयति, 'अन्यतरत्वेनेति, 'संयोगस्य' ग्राह्यनिष्ठसंयोगस्य, तथाचावच्छेदकसंयोगेनान्यथासिद्ध्या ग्राह्यनिष्ठसंयोगो न हेतुरिति न पूर्व्वपक्षि-

न्द्रियसंयोग एव हेतुः। न च ग्राह्यसंयोगावच्छेदकावयवसंयोगापेक्षया ग्राह्यसंयोगस्य लघुत्वात्स एव हेतुः, तस्यातिप्रसक्तत्वात्। एतेन स्वावयवसंयोगापेक्षया स्वसं-

---

णामाशयः, अपि तु ग्राह्यनिष्ठसंयोगमात्रस्य हेतुत्वे अतिप्रसङ्गात्तद्वारणाय स्वीयमहावयवावच्छिन्नसंयोग एव हेतुर्वाच्यः, तथाच लाघवात् स्वीयमहावयवसंयोग एव हेतुरस्त्वित्येव तस्याशय इति भावः। यद्यपि पूर्व्वपक्षिणापि स्वल्पावयवावच्छेदेनोत्पन्नमहावयवसंयोगस्याग्राहकतया स्वीयमहावयवसंयोग एव हेतुर्वाच्यः, प्रथमस्वपदं महावयवपरं, द्वितीयस्वपदं ग्राह्यव्यक्तिपरं, तथाच तदपेक्षया लाघवात् स्वीयमहावयवावच्छिन्नसंयोग एव हेतुरित्येव समाधानं सुकरं तथापि स्फुटतरं दोषमाह, 'नैवमिति, 'द्रव्यग्रहे' द्रव्यमात्रग्रहे, 'स्थूलावयवावच्छेदेन संयोग इति स्थूलविषयकनिष्ठः संयोग इत्यर्थः, 'त्रसरेणुसूक्ष्मभागग्रह इति त्रसरेणुसूक्ष्मावयवकद्रव्यग्रह इत्यर्थः, 'स हेतुरिति तदभिमत इति शेषः। 'आत्मादीत्यादिना द्रव्यवत्परिग्रहः, 'स्वग्राह्यसंयोगजन्य इति स्वग्राह्यनिष्ठसंयोगजन्य इत्यर्थः। लाघवाद्विषयत्व-समवायघटितसामानाधिकरण्यप्रत्यासत्त्या सामान्यत एव द्रव्यलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति इन्द्रियसंयोगत्वेन हेतुत्वकल्पनादिति भावः। 'तस्मिन् सत्यपीति परमाण्वादिसूक्ष्मावयवावच्छेदेनेन्द्रियसंयोगे सत्यपीत्यर्थः,। वस्तुतस्तत्रापि घटादिग्रहोभवत्येव किन्तु सूक्ष्मावयवाच्छिन्नेन्द्रियसंयोगाद्यात्मकदोषवशात् उत्पन्नेऽपि तज्ज्ञानेऽप्रामाण्यसंशयात् कदाचित् कस्यचिद्विषयसंशयः। न चैवं

योगस्य लघुत्वात् स एव हेतुरिति निरस्तं। नाप्यवच्छेदक-संयोगेनान्यथासिद्धौ तथाप्यवच्छेदकान्तरसंयोगेनान्यथासिद्धिरिति संयोगो हेतुरेव न स्यादिति वाच्यं। अल्पतरतमभागावच्छेदेन संयोगस्य हेतुत्वे अतिप्रसङ्गा-

---

परमाण्वाद्यवच्छेदेन चक्षुरादिसंयोगेऽपि घटादिसाक्षात्कारापत्तिरिति वाच्यम्। महावयवावच्छेदेनेन्द्रियसंयोगाभावदशायां केवलपरमाण्वाद्यवच्छेदेनेन्द्रियसंयोगे मानाभावादित्यभिप्रायो यदिशब्देन सूचितः। 'स्थूलावयवसंयोगेति। यद्यपि घटादिचाक्षुषत्वाद्यवच्छेदेन त्र्यणुकाद्यवच्छेदेन वा चक्षुरादिसंयोगेऽपि घटादिप्रत्यक्षापत्तिर्दुर्वारा तथापि यादृशयादृशापकर्षाश्रयपरिमाणकावयवावच्छेदेन चक्षुरादिसंयोगे सत्यपि यादृशजन्यग्रहो न भवति तादृशद्रव्यचाक्षुषादौ तादृशापकर्षाश्रयेतरपरिमाणकावयवावच्छिन्नाधारतासम्बन्धेन चक्षुरादिसंयोगः तादृशावयवावच्छिन्नसंयोगसम्बन्धावच्छिन्नाधारतासम्बन्धेन चक्षुरादिर्वा हेतुरित्यननुगत एव कार्य्य-कारणभावः। न च तथापि चसरेणुरादिसूक्ष्मभागावच्छिन्नघटादिनिष्ठसंयोगस्य चसरेणुरादिसमवेतमहावयवेनाप्यवच्छिन्नत्वादतिप्रसङ्गतादवस्थारमिति वाच्यं। तद्देशव्यापकसंयोगस्यैव तद्देशावच्छिन्नत्वनियमेन सूक्ष्मभागावच्छिन्नसंयोगस्य स्थूलावच्छेद्यत्वाभावात्। न चैवंरूपेण विशेषतो हेतुत्वे यत्रावयवनाशदशायां घटादौ चक्षुःसंयोगस्तदनन्तरमवयवसंयोगनाशाद्घटनाशः तत्र घटनाशक्षणेऽवयवसंयोगनाशक्षणे च घटप्रत्यक्षं न स्यात् विनश्यतोऽवयवस्यावच्छेदकत्वासम्भवादिति

दिति। नैवं। द्रव्यग्रहे अवयविमात्रग्रहे वा स्थूलाव-
यवावच्छेदेन संयोगो न हेतुः आत्म-चसरेणुसूक्ष्मभा-
गग्रहे व्यभिचारात्। किन्तु घटादिग्रहे स हेतुः। एव-
ञ्चात्मादिद्रव्यग्रहोग्राह्यसंयोगजन्य इति घटादिग्रहोः

वाच्यं। तदाऽवयवरूपादिवद्घटस्याप्यप्रत्यक्षत्वस्येष्टत्वादिति भावः। 'तत्सं-
योगोऽपि वेति स्थूलावयवसंयोगोऽपि वेत्यर्थः, 'हेतुः' घटादिचाक्षुष-
त्वाद्यवच्छिन्नं प्रति हेतुः। न चैवं घटस्योत्पत्तिप्राक्क्षणे कपाले न
चक्षुःसंयोगस्तच्च घटोत्पत्त्यनन्तरं घट-चक्षुःसंयोगोत्पत्तिकालेऽपि घट-
प्रत्यक्षं स्यादिति वाच्यं। ग्राह्यनिष्ठसंयोगस्यापि सामान्यसामग्रीतया
तदभावादेव तदानीं प्रत्यक्षानुत्पादादिति भावः। अत्र वाशब्दोऽस-
रसूचनाय, तद्बीजन्तु स्थूलावयवसंयोगस्य हेतुत्वे कारणतावच्छे-
दकगौरवं स्वसमवायिसमवेतत्वस्य प्रत्यासत्तितया प्रत्यासत्तिगौरवञ्च
सूक्ष्मविभागावच्छेदेन स्थूलावयवसंयोगेऽपि साक्षात्कारप्रसङ्गश्च। न
च स्थूलभागावच्छिन्नस्थूलावयवाधारताकसंयोगो हेतुरिति वाच्यं।
तथासति स्थूलावयवावच्छिन्नाधारतासम्बन्धेनैव चक्षुरादिसंयोगस्य
हेतुताया लाघवेनोचितत्वादिति बोध्यं।

अत्र स्वतन्त्राः स्थूलावयवावच्छिन्नसंयोगत्वेनावयविभेदेन विशे-
षतः प्रयोजकत्वेऽनन्तकार्य्य-कारणभावापत्तिः सूक्ष्मभागावच्छेदेन
चक्षुरादिसंयोगादपि कदाचित् पटादिप्रत्यक्षोदयेन व्यभिचारश्च।
तस्माच्चक्षुरादिसंयोगस्य साक्षात्कारानुपधायकसंयोगव्यावृत्तत्वेनात्मत्वे
सामान्यतो द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव हेतुत्वं तेन सूक्ष्मभागा-

च्छेदेन चक्षुरादिसंयोगान्न कदाचित् पटादिग्रहः वैजात्यस्य फलबलकल्पनात् । नचैवं सूक्ष्मभागावच्छिन्नचक्षुरादिसंयोगः कदाचिदालोपधायकः कदाचिच्च नेति वाच्यं । तत्र फलबलेन संयोगभेदकल्पनात् । इत्यचापरमपि लाघवं, चक्षुरादिसंयोगस्य वैजात्येनाहेतुत्वे आलोकसंयोगावच्छिन्नत्वं एकावच्छिन्नत्वसम्बन्धेनालोकसंयोगविशिष्टत्वं वा चक्षुःसंयोगस्य चक्षुषो वा विशेषणमावश्यकमन्यथा आलोकसंयुक्त एव पटे अन्धकारावच्छेदेनैव चक्षुःसंयोगेऽपि प्रत्यक्षापत्तेः, वैजात्येन हेतुत्वे च तस्याप्यनुपादेयत्वात् वैजात्यस्य फलबलकल्पनात् । एवं चक्षुरादिसंयोगस्य वैजात्येनाहेतुत्वे त्रसरेणुचाक्षुषं प्रति गवाक्षविवरवर्त्त्यालोकसंयोगावच्छिन्नचक्षुःसंयोगत्वेन हेतुत्वं वाच्यं। आलोकान्तरसंयोगावच्छिन्नचक्षुःसंयोगे त्रसरेणुचाक्षुषानुदयात्, वैजात्येन हेतुत्वे तस्याप्यकल्पनात् वैजात्यस्य फलबलकल्पनात् । तच्च वैजात्यं सर्व्वपुरुषसाधारणमेकमेव, तत्तत्पुरुषीयचक्षुःप्रतियोगिकत्वविशिष्टत्वस्य वैजात्यविशेषणतया कारणतावच्छेदककोटिप्रवेशादेगतिप्रसङ्गभङ्गात् । विशिष्टत्वञ्च सामानाधिकरण्येन । वस्तुतस्तु तद्वैजात्यं प्रतिपुरुषं विभिन्नमेव, अन्यथा तत्तत्पुरुषीयचक्षुरादिप्रतियोगिकत्वविशिष्टत्वस्यावच्छेदककोटिप्रवेशे गौरवात् तत्तत्पुरुषीयचक्षुःप्रतियोगिकत्वविशिष्टत्व-वैजात्ययोर्विशेष्य-विशेषणभावे विनिगमकाभावेन प्रतिपुरुषं कार्य्य-कारणभावद्वयप्रसङ्गाच्च । कार्य्यतावच्छेदकन्तु तत्तत्पुरुषीयचाक्षुषत्वादिकमेव तत्तत्पुरुषीयचाक्षुषादिमात्रवृत्ति वैजात्यमेव वा । एतेन चक्षुःसंयोगस्य वैजात्येन हेतुत्वे आलोकसंयोगस्यापि हेतुत्वे मानाभावः वैजात्यस्य फलबलकल्पनया अन्ध-

कारे विजातीयचक्षुःसंयोगविरहादेव घटादेरप्रत्यक्षतोपपत्तेः, आलोकसंयोगावच्छिन्नचक्षुःसंयोगत्वेन हेतुत्वे विनिगमकाभावाच्चक्षुःसंयोगावच्छिन्नालोकसंयोगत्वेनापि हेतुत्वं। नचैकस्यैव चक्षुःसंयोगस्य आलोकसमवधानासमवधानाभ्यां ज्ञापकत्वाज्ञापकत्वसत्त्वादालोकसंयोगस्य हेतुत्वमावश्यकमिति वाच्यं। तत्र फलबलेन संयोगभेदस्य सुवचत्वात्। नच जनकतावच्छेदकवैजात्यमालोकसंयोगावच्छिन्नचक्षुःसंयोगे चक्षुःसंयोगावच्छिन्नालोकसंयोगे वा कल्प्यत इत्यत्र विनिगमकाभावादुभयोरेव हेतुत्वमिति वाच्यं। आलोकसंयोगनिष्ठवैजात्यकल्पने एकस्य पुरुषस्य चक्षुःसंयोगावच्छिन्नालोकसंयोगवति पटे तत्पुरुषीयचाक्षुषवदन्धकारावच्छिन्नचक्षुःसंयोगवतः पुरुषान्तरस्यापि चाक्षुषापत्तेः। न हि चक्षुरिवालोकोऽपि पुरुषभेदेन विभिन्नो येन तत्तत्पुरुषीयालोकप्रतियोगिकत्वविशिष्टत्वविशेषणदानादतिप्रसङ्गभङ्गः स्यादिति कस्यचिद्दूषणमपि परास्तं। उक्तयुक्त्याचक्षुःसंयोगेऽपि वैजात्यस्य प्रतिपुरुषं विभिन्नतया आलोकसंयोगेऽपि पुरुषभेदेन वैजात्यभेदस्य सुवचत्वाद्विनिगमकाभावेनालोकसंयोगस्यापि हेतुत्वात् एकस्यैवालोकसंयोगस्य नानापुरुषीयचाक्षुषजनकत्वञ्चासिद्धं फलबलेन संयोगभेदकल्पनात्। नचैवमालोकसंयोगचक्षुःसंयोगयोरेकरूपेण हेतुत्वेप्यालोकसंयोगस्य पृथक् हेतुत्वं भग्नमेवेति वाच्यं। दृष्टत्वात्। न हि पार्थक्येनापि तद्धेतुताऽनुभवसिद्धा। नचैवं विनिगमकाभावाद्वाय्वादिसंयोगस्यापि हेतुत्वापत्तिरिति वाच्यं। वाय्वादिसंयोगसाधारणधर्म्मेण चक्षुःसंयोगस्य हेतुत्वेऽपि क्षतिविरहात्। नच कर्म्मादिजन्यतावच्छेदकवैजात्येन

साङ्कर्य्यान्न चक्षुरादिसंयोगनिष्ठवैजात्यसम्भव इति वाच्यं। कर्मादि-जन्यतावच्छेदकवैजात्यस्य नानात्वात् कार्य्यतावच्छेदकाननुगमस्या-दोषत्वात्। नच तथाप्यभिघातत्वादिना साङ्कर्य्यमिति वाच्यं। तत्राभिघातत्वादिसत्त्वे मानाभावेन तस्याभिघातत्वादिविरुद्धत्वात्। ननु तथापि चक्षुःसंयोगस्य फलबलकल्प्यवैजात्येन हेतुत्वे उद्भूत-रूप-महत्त्वयोः कारणत्वे मानाभावः पिशाच-परमाण्वादेर्विजातीय-चक्षुःसंयोगविरहादेवाचाक्षुषतोपपत्तेः। नच पिशाचनिष्ठचक्षुः-संयोगे वैजात्यानभ्युपगमे पिशाचे उद्भूतरूपाभावचाक्षुषं न स्यात् विजातीयचक्षुःसंयोगाश्रयविशेषणताश्रयताया एवाभावग्राहकत्वात्। एवं परमाणुनिष्ठचक्षुःसंयोगे वैजात्यानभ्युपगमे परमाणौ महत्त्वा-भावचाक्षुषं न स्यादिति वाच्यं। पिशाचघटितसन्निकर्ष-परमाणुघ-टितसन्निकर्षयोस्तत्राहेतुत्वेऽपि क्षतिविरहात् तदानीं आलोक-चक्ष-रेखादियत्किञ्चिन्महत्त्वोद्भूतरूपवच्चक्षुःसंयोगस्यावश्यकतया तद्वृत्तिरू-पादिघटितसन्निकर्षेणैव पिशाचे उद्भूतरूपं नास्ति परमाणौ महत्त्वं नास्तीति चाक्षुषोपपत्तिरिति चेत्। न। वैजात्येन हेतुत्वेऽपि संयोगस्य द्विष्ठतया चक्षुषश्चाक्षुषतावारणाय उद्भूतरूपहेतुत्वस्यावश्य-कत्वात्। वस्तुतस्तु वैजात्येन संयोगस्य हेतुत्वे संयोगस्य द्विष्ठतया चक्षुषः चाक्षुषतावारणाय उद्भूतरूपस्य हेतुत्वावश्यकत्वेऽपि विजा-तीयसंयोगसम्बन्धेन चक्षुर्विशिष्टत्वेन हेतुत्वे उद्भूतरूपहेतुत्वं विनापि चक्षुषश्चाक्षुषतावारणसम्भवादुभयोरकिञ्चित्करतया महत्त्वोद्भूतरूपयो-रुभयोरेव प्रामाणिकव्यवहारबलात् कारणत्वसिद्धिः, तदनादरे साकारणत्वमिष्टमेव, अन्यथा सामान्यतश्चक्षुःसंयोगत्वादिना हेतुत्वे-

पि तद्वदेव स्वग्राह्यसंयोगजन्य इति। तस्मिन् सत्यपि घटादिग्रहो नास्तीति यदि तदा स्थूलावयवसंयोगावच्छेदकोऽस्तु तत्संयोगोऽपि वा हेतुः, न तु कृप्तहेतुपरित्यागः। ननु संयुक्तसमवायेनावयविग्रहोऽस्तु न तु संयोगादिस्तत्र हेतुः तस्य रूपादिग्रहे कृप्तत्वात्। न च लाघवात्संयोग एव तथा, तस्य कल्पनीयकारणत्वात्[1]

ऽप्युद्भूतरूप-महत्त्वयोः कारणत्वे मानाभावः लौकिकप्रत्यक्षं प्रति विषयस्य योग्यत्वेन हेतुत्वादेव परमाणु-पिशाचादेरप्रत्यक्षतोपपत्तेः। 'कृप्तत्वादिति द्रव्यसमवेतचाक्षुषत्वाद्यवच्छिन्नं प्रति कारणत्वेन कृप्तत्वादित्यर्थः। 'न चेति, 'लाघवादिति संयुक्तसमवायत्वमपेक्ष्य संयोगत्वस्य कारणतावच्छेदकस्य लघुत्वादित्यर्थः, 'तथा' अवयविप्रत्यक्षे हेतुः, 'तस्य' संयोगस्य। 'इन्द्रियसंयोगस्य' इन्द्रियसंयोगत्वावच्छिन्नस्य, 'कारणत्वादिति द्रव्यसाक्षात्कारत्वावच्छिन्नं प्रति कारणत्वादित्यर्थः, 'अन्यत्रापि' अवयविसाक्षात्कारेऽपि। 'न चेति, आत्ममानसत्वस्यैव मनःसंयोगकार्यतावच्छेदकत्वादिति शेषः। 'बहिरिन्द्रियजद्रव्यग्रह इति मानसेतरद्रव्यसाक्षात्कारे इत्यर्थः, 'अवयविग्रहे' अवयविसाक्षात्कारे, 'संयुक्तसमवाय इति, कृप्तत्वादितिशेषः, 'लाघवेन' सामान्यरूपतालाघवेन, 'संयोगस्य' मनःसंयोगस्य, एवकारपूर्वं

---

(१) कल्पनीयकारणभावादिति ख०।

इति चेत्। न। आत्मग्रहे इन्द्रियसंयोगस्य कारणत्वादन्यत्रापि द्रव्यसाक्षात्कारत्वेन तथा कल्पनात्। न च बहिरिन्द्रियजद्रव्यग्रहे अवयविग्रहे वा संयुक्तसमवायः कारणं, लाघवेन संयोगस्यैव कारणत्वेन कल्पनात्। ननु संयुक्तसमवायो न गन्धग्राहकः

द्रव्यसाक्षात्कारणत्वावच्छिन्नं प्रतीति पूरणीयं, 'कारणत्वेन कल्पनादिति इन्द्रियसंयोगत्वेन कारणत्वेन कल्पनादित्यर्थः।

अत्र केचित् गुणादिसाक्षात्कारानुरोधेन द्रव्यसमवेतचाक्षुषत्व-द्रव्यसमवेतत्वाचत्वावच्छिन्नं प्रति चक्षुस्त्वक्संयुक्तसमवाययोः स्वसमवायिसमवेतत्वसम्बन्धेन चक्षुस्त्वक्संयोगयोर्वा स्वसंयुक्तसमवेतत्वसम्बन्धेन चक्षुस्त्वचोर्वा हेतुत्वावश्यकत्वात्तत एव घटादेरपि चाक्षुषत्वाचोपपत्तेः किं समवायसम्बन्धेन चक्षुःसंयोग-त्वक्संयोगयोः संयोगसम्बन्धेन चक्षुस्त्वचोर्वा द्रव्यचाक्षुषत्व-द्रव्यत्वाचत्वावच्छिन्नं प्रति हेतुत्वेन। नचात्मप्रत्यक्षे समवायसम्बन्धेन मनःसंयोगस्य इन्द्रियसंयोगत्वेन, संयोगसम्बन्धेन मनसो वा इन्द्रियत्वेन द्रव्यसाक्षात्कारत्वावच्छिन्नं प्रति हेतुत्वात् द्रव्यचाक्षुषादावपि समवायसम्बन्धेन चक्षुःसंयोगादेः, संयोगसम्बन्धेन चक्षुरादेर्वा हेतुत्वमावश्यकमिति वाच्यं। तथापि द्रव्यचाक्षुषत्वाद्यवच्छिन्नं प्रति तेषां हेतुत्वे मानाभावात् आत्मप्रत्यक्षस्थाने लाघवान्मानसत्वावच्छिन्नं प्रत्येव मनःसंयोगत्वादिना हेतुत्वकल्पनाच्च। शरीरसाम्य एव सामान्यरूपतालाघवाभ्युपगमात्।

किन्त्वाश्रयसंयोगः। एवं गन्धत्वग्रहोऽप्याश्रयाश्रय-संयोगादिति संयुक्तसमवेतसमवायोऽपि न हेतुः। न च गन्धे सति गन्धसमवायं विना गन्धाग्रहोऽस्ति। न चैवं संयुक्तघटे भाविगन्धग्रहः स्यात्, गन्धस्यापि स्वग्रहे

न च द्रव्यचाक्षुषादिकं प्रति चक्षुःसंयोगादेरहेतुत्वे यत्र पटस्योत्पत्ति-प्राक्क्षणे तन्तुना चक्षुःसंयोगस्तत्र पटोत्पत्त्यनन्तरं पटचक्षुःसंयोग-स्योत्पत्तिकालेऽपि पटप्रत्यक्षं स्यादिति वाच्यं। दृष्टत्वात्। क्षणवि-लम्बस्य शपथनिर्णेयत्वात्। अथ चक्षुःसंयुक्तसमवायमात्रस्य ग्राहकत्वे द्व्यणुकादेरपि रूपप्रत्यक्षप्रसङ्गात् चक्षुःसंयुक्तमहत्त्वोद्भूतरूपवत्समवाय एव तथा वाच्यः, कार्य्यतावच्छेदकमपि महत्समवेतविशिष्टचाक्षुषत्व-मन्यथा विषयत्व-विशेषणताभ्यां सामानाधिकरण्यस्य प्रत्यासत्तितया त्रसरेणौ व्यभिचारापत्तेः, महच्चाक्षुषत्वमेव वा कार्य्यतावच्छेदकं महत्समवेतत्वविशिष्टं वस्तुगत्या महत्समवेतनिरूपितं वा लौकिक-विषयत्वं कार्य्यदिशि प्रत्यासत्तिः। इत्थञ्च त्रसरेणुचाक्षुषानुरोधेन चक्षुःसंयोगस्य सन्निकर्षत्वमावश्यकं तत्कार्य्यतावच्छेदकञ्च द्रव्यविशि-ष्टचाक्षुषत्वं विषयत्वं कार्य्यदिशि प्रत्यासत्तिः। चाक्षुषत्वमेव वा कार्य्य-तावच्छेदकं द्रव्यत्वविशिष्टं वस्तुगत्या द्रव्यनिरूपितं वा लौकिकवि-षयत्वं प्रत्यासत्तिः, न त्रसरेणुविशिष्टचाक्षुषत्वं कार्य्यतावच्छेदकं न वा चाक्षुषत्वमेव कार्य्यतावच्छेदकं त्रसरेणुत्वविशिष्टं वस्तुगत्या त्रस-रेणुनिरूपितं वा लौकिकविषयत्वं प्रत्यासत्तिः गौरवात् घटादा-वपि त्रसरेणुविशिष्टचाक्षुषस्य त्रसरेणुत्वविशिष्टविषयतासम्बन्धेन चाक्षु-

हेतुत्वात्। न च गन्धस्य प्रत्यक्षत्वेनेन्द्रियसन्निकर्षा-प्रयत्नानुमेयं शब्दप्रत्यक्षहेतोः समवायस्य गन्धेऽपि सत्त्वात्, गन्धेन्द्रियसन्निकर्षसाधने साध्याप्रसिद्धेः। मैवं। गन्धसमवायिसंयोगस्य हेतुत्वे हि यदि गन्ध-

---

स्य वा उत्पादप्रसङ्गाच्च। अत एव चाक्षुषत्वमेव कार्य्यतावच्छेदकं वस्तुगत्या त्रसरेणुनिरूपितं लौकिकविषयत्वं प्रत्यासत्तिरिति न तेन सम्बन्धेन घटादावपि चाक्षुषापत्तेः त्रसरेणुत्वविशिष्टसमवायस्य कारणतावच्छेदकसम्बन्धत्वे च गौरवात्। एवन्त्वक्संयुक्तसमवायमात्रस्य प्रत्यासत्तित्वे द्व्यणुकस्पर्शादेः त्रसरेण्वादेश्च त्वाक्प्रसङ्गात् त्वक्संयुक्तप्रकृष्टमहत्त्वाश्रयसमवाय एव तथा वाच्यः, कार्य्यतावच्छेदकमपि प्रकृष्टमहत्त्ववत्समवेतविशिष्टत्वाक्त्वं अन्यथा विषयत-विशेषणताभ्यां सामान्याधिकरण्यस्य प्रत्यासत्तितया चतुरणुके व्यभिचारापत्तेः। यद्वा त्वाक्त्वमेव कार्य्यतावच्छेदकं प्रकृष्टमहत्त्वसमवेतत्वविशिष्टं वस्तुगत्या तत्समवेतनिरूपितं वा लौकिकविषयत्वं प्रत्यासत्तिः, इत्यच्च चतुरणुकत्वाक्त्वानुरोधेन त्वक्संयोगस्य सन्निकर्षत्वमावश्यकं तत्कार्य्यतावच्छेदकञ्च द्रव्यविशिष्टत्वाक्त्वं विषयत्वं प्रत्यासत्तिः, त्वाक्त्वमेव वा कार्य्यतावच्छेदकं द्रव्यत्वविशिष्टं वस्तुगत्या द्रव्यनिरूपितं वा लौकिकविषयत्वं प्रत्यासत्तिः, न तु चतुरणुकविशिष्टत्वाक्त्वादिकमुक्तयुक्तेः। न च सामान्यतश्चक्षुःसंयुक्तसमवाय—त्वक्संयुक्तसमवाययोरेव सन्निकर्षत्वमेकार्थसमवायसम्बन्धेन

समवायस्य विशेषणता तदा स हेतुरेव। उपलक्षणत्वे च संयुक्तद्रव्यमात्रमुपलक्ष्यं तथा च घटसंयोगात्पटगन्धग्रहप्रसङ्गः। अथ स्वसमवायिसंयोगो हेतुः तत्र

महत्त्वस्य द्रव्यान्यद्रव्यसमवेतचाक्षुषं प्रति, प्रकृष्टमहत्त्वस्य तादृशत्वाचं प्रति पृथक्हेतुतया न द्व्यणुकरूपादेः न त्रसरेणुस्पर्शादेश्च ग्रह इति वाच्यं। पृथक्कारणतान्तरकल्पने गौरवात् परमाण्वादिघटितसन्निकर्षेण पृथिवीत्वादिग्रहप्रसङ्गाच्च पृथिवीत्वादेर्घटादौ महत्यपि सत्त्वेन तदानीमपि पृथिवीत्वादौ सत्त्वात्। एतेन सामान्यतः चक्षुःसंयुक्तसमवाय एव सन्निकर्षः न तु तत्र महत्त्वस्य प्रवेशः। नचैवं द्व्यणुकरूपादेरपि चाक्षुषापत्तिरिति वाच्यं। द्रव्यान्यसचाक्षुषत्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसम्बन्धेन चाक्षुषत्वाभेदस्य निरवच्छिन्नस्वाधिकरणताश्रयसमवेतत्वसम्बन्धेन चाक्षुषात्यन्ताभावस्य वा प्रतिबन्धकत्वादेव द्व्यणुकरूपादेरचाक्षुषतोपपत्तेः, गगनादिमादाय स्वाश्रयसमवेतत्वसम्बन्धेन चाक्षुषत्वाभेदादेः सर्व्वदैव सत्ता-द्रव्यत्वादौ सत्त्वात्तदप्रत्यक्षतापत्तिवारणाय प्रतिबध्यतावच्छेदककोटौ समवेतत्वमपहाय सत्त्वेन प्रवेशः, पूर्व्वं घटादिचाक्षुषं विनापि तद्वृत्तिरूपादेश्चाक्षुषोदयान्निरवच्छिन्नेति स्वाधिकरणताविशेषणं। न चातिरिक्तप्रतिबध्य-प्रतिबन्धकभावकल्पनामपेक्ष्य सन्निकर्षमध्ये महत्त्वप्रवेश एव लघीयानिति वाच्यं। परमाणु-घटवृत्तिद्वित्व-गगन-घटवृत्तिद्वित्वादेः चाक्षुषतावारणाय व्यासज्यवृत्तिर्धर्म्मचाक्षुषं प्रति तादृशप्र-

समवायोऽवच्छेदक इति चेत्। तर्हि संयोगिसमवा-
यस्य हेतुत्वे संयोगोऽवच्छेदकः समवायो हेतुरिति

तिबन्धकताकल्पनस्य तवाप्यावश्यकत्वात्। न च पटासन्निकर्षदशाया-
मपि घटसन्निकर्षमात्राद् घट-पटवृत्तिद्वित्वादेश्चाक्षुषवारणाय व्याप-
ज्यवृत्तिधर्मचाक्षुषं प्रति यावदाश्रयलौकिकसन्निकर्षस्य हेतुत्वावश्य-
कत्वात्तद्विरहादेव परमाणु-घटद्वित्वादेर्न चाक्षुषमिति वाच्यं। चक्षुः-
संयोगत्वेन लौकिकसन्निकर्षस्य परमाण्वादावपि सम्भवादिति
केषाञ्चित् प्रलपितमप्यपास्तं। परमाण्वादिघटितसन्निकर्षेण पृथिवी-
त्वादिग्रहवारणाय चक्षुःसंयुक्तमहत्समवायस्यैव प्रत्यासत्तित्वावश्यकत्वात्
विजातीयचक्षुःसंयोगस्यैव लौकिकसन्निकर्षतया यावदाश्रयलौकिक-
सन्निकर्षविरहादेव परमाणु-घटवृत्तिद्वित्वादेरचाक्षुषतोपपत्तेस्तादृ-
शातिरिक्तप्रतिबध्य-प्रतिबन्धकभावकल्पने गौरवाच्च। अपिच परमाणु-
घटवृत्तिद्वित्वादेश्चाक्षुषवारणाय द्रव्यान्यसचाक्षुषं प्रति स्वाश्रय-
समवेतत्वसम्बन्धेन चाक्षुषत्वभेदादेः प्रतिबन्धकत्वं, एकाश्रयमात्रसन्नि-
कर्षाद्घट-पटद्वित्वादेश्चाक्षुषवारणाय व्याप्यवृत्तिधर्मचाक्षुषं प्रति
यावदाश्रयसन्निकर्षस्य च यावत्स्वाश्रयसन्निकर्षत्वेन हेतुत्वकल्पना-
मपेक्ष्य लाघवादनुगतत्वाच्च व्याप्यवृत्तिधर्मचाक्षुषं प्रति सामा-
न्यतः स्वाश्रयसमवेतत्वसम्बन्धेन चाक्षुषात्यन्ताभावस्यैव प्रतिबन्धकत्वं
कल्प्यते यावदाश्रयप्रत्यक्षं विना व्याप्यवृत्तिधर्मप्रत्यक्षाभ्युप-
गमात्। न च तस्यैव प्रतिबध्यतावच्छेदकं द्रव्यान्यसचाक्षुषत्वमिति
वाच्यं। तथासति पूर्वं घटादिचाक्षुषं विना तद्वृत्तिद्वित्वादेरिव तद्वृत्ति-

तुल्यं। तद्धेतत्परिवर्त्त्य क्षौमपरिधानमित्युच्यते। ननु संयुक्तसमवायो न संयोगः, न वा समवायः, न उभौ वा गन्धे इन्द्रिये चावृत्तेः। न चेन्द्रियेण गन्धस्य पर-

---

रूपादेरप्यप्रत्यक्षत्वापत्तेः किन्तु उभयसमवेतगुणचाक्षुषत्वं तत्प्रतिबध्यतावच्छेदकं तथाच द्व्यणुकरूपादेः प्रत्यक्षवारणाय सन्निकर्षे महत्त्वप्रवेश आवश्यक इति चेत्। न। द्व्यणुकरूपादेः त्रसरेणुस्पर्शादेश्चायोग्यत्वादेव घटादिवृत्तिगुरुत्वादिवदप्रत्यक्षतोपपत्तेः महत्त्वस्य तत्रानन्तर्भावात्। न चैवं द्रव्यचाक्षुषादिकं प्रत्यपि महत्त्वादेर्हेतुत्वं विनापि नाति प्रसङ्गः अयोग्यत्वादेव परमाण्वादेरप्रत्यक्षोपपत्तेरिति वाच्यं। प्रामाणिकव्यवहारानादरे तत्र तदहेतुत्वस्यापीष्टत्वात्। न च महत्त्वस्य तत्रानन्तर्भावे परमाण्वादिघटितसन्निकर्षेण पृथिवीत्वादिप्रत्यक्षापत्तिरिति वाच्यं। परमाणुसन्निकर्षदशायां महदवयविसन्निकर्षस्याप्यावश्यकत्वेनेष्टापत्तेः। अपिच त्रसरेणुचाक्षुषस्थले त्रसरेणुनिरूपितेन लौकिकविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नोत्पत्तौ त्रसरेणुत्वविशिष्टसमवायसम्बन्धेन गवाक्षविवराच्छिन्नालोकसंयोगावच्छिन्नचक्षुःसंयोगत्वेन विशेषतो हेतुत्वमावश्यकं आलोकान्तरसंयोगावच्छिन्नचक्षुःसंयोगात् त्रसरेणोरग्रहात् तथाच सामान्यतो द्रव्यचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयोगस्य हेतुत्वे मानाभावः। अथ चक्षुःसंयुक्तसमवायादेर्द्रव्येतरद्रव्यसमवेतचाक्षुषत्वादिकमेव कार्यतावच्छेदकं न तु सामान्यतो द्रव्यसमवेतचाक्षुषत्वादिकं, एवावयवनाशदशायां

वरासम्बन्धः, परम्परा हि संयोग-समवायावेव तत्र विरोध एव नाधिकोऽपसिद्धान्तादिति चेत्। न। इन्द्रिय-तत्संयोग-तदाश्रयसमवायानामेव परम्परास-

---

घटे न चक्षुरादिसंयोगस्यदनन्तरमवयवसंयोगनाशाद्घटनाशस्तत्र घटनाशक्षणोत्पन्ने अवयवसंयोगनाशक्षणोत्पन्ने वा घटप्रत्यक्षे व्यभिचारापत्तेः तत्रावयवेन्द्रियसंयोगाभावेन संयुक्तसमवायाभावादिति चेत्। न। तदावयवरूपादिवद्घटस्यापि प्रत्यक्षानभ्युपगमात्। अथवा प्रागुक्तस्थूलावयवावच्छिन्नसंयोगकारणतायामपि तत्र व्यभिचारापत्तेः। अथ चक्षुरादिसंयुक्त समवायस्य द्रव्यग्राहकत्वे यदवच्छेदेन द्रव्यारम्भकसंयोगो नास्ति तदवच्छेदेनावयवेन समं चक्षुरादिसंयोगेपि च द्रव्यचाक्षुषादिप्रसङ्गः। न चेष्टापत्तिः, दशाद्यवच्छेदेन तन्तुना चक्षुरादिसंयोगे पटाप्रत्यक्षात्। तथाच द्रव्यचाक्षुषादौ आरम्भकसंयोगावच्छेदेन चक्षुरादिसंयोगस्य विशेषतो हेतुत्वमावश्यकं। न च तदनुरोधादारम्भकसंयोगावच्छेदेन यत्र चक्षुरादिसंयोगस्तद्वत्समवाय एव विशिष्टद्रव्यचाक्षुषादौ हेतुरस्तिति वाच्यं। तदपेक्ष्य तदवच्छेदेन चक्षुरादिसंयोगस्यैव चक्षुत्वादिति चेत्। न। व्याप्यवृत्तिगुण-कर्मप्रत्यक्षानुरोधेन चक्षुरादिसंयोगावच्छेदकावच्छिन्नानुयोगितासम्बन्धेन चक्षुरादिसंयुक्तविशिष्टस्य समवायस्यैव द्रव्यसमवेतचाक्षुषादिं प्रति हेतुतया आरम्भकसंयोगानवच्छेदकावच्छेदेनावयवसंयोगाद्द्रव्यायथात्। यदवच्छेदेनारम्भकसंयोगो नास्ति तदवच्छेदेन द्रव्यस्य वृत्तौ मानाभावेन द्रव्यस्यापि समवायसम्बन्धेनाव्याप्यवृत्ति-

न्धत्वात्। अन्यथा जीवत्वजातेः परम्परासम्बन्धेन वस्त्र-चर्म-कम्बलेष्वनुगतव्यवहारोच्छेदः। ननु संयुक्तसमवेतसमवायान्न रूपत्वादिग्रहः तदभावादिति चेत्। न। तदनभ्युपगमेऽपि रूपादिसादृश्यस्य ततो ग्रहात्।

त्वात्। न चैतादृशसंयुक्तसमवायस्य हेतुत्वे द्रव्यसमवेतजात्यादेः प्रत्यक्षे व्यभिचारः व्याप्यवृत्तेरवच्छेदकविरहादिति वाच्यं। प्रत्ययवद्भेन व्याप्यवृत्तेरप्यवच्छेदकाभ्युपगमात् द्रव्यसमवेताव्याप्यवृत्तिचाक्षुषत्वादेर्वा तादृशसंयुक्तसमवायस्य कार्यतावच्छेदकत्वात्। द्रव्यसमवेताव्याप्यवृत्तित्वञ्च द्रव्ये समवायसम्बन्धेन किञ्चिदवच्छिन्नवृत्तित्वं, तस्य चक्षुःसंयोग-त्वक्संयोगयोः प्रत्यासत्तित्वे मानाभावः। वस्तुतस्तु चक्षुःसंयुक्तसमवाय-त्वक्संयुक्तसमवाययोरपि सन्निकर्षत्वे मानाभावः, एवं घ्राणसंयुक्तसमवाय-रसनसंयुक्तसमवाययोरपि न सन्निकर्षत्वं, गुण-कर्मवृत्तिजातिप्रत्यक्षानुरोधेन चक्षुःसंयुक्तसमवेतसमवायादेः प्रत्यासत्तित्वावश्यकतया तत एव गुणादिप्रत्यक्षोपपत्तेरिति। अथोच्यते परमाणोर्नित्यत्वे तन्नित्यत्वानुरोधेन चक्षुःसंयोगस्य, तद्वृत्तिरूपादिप्रत्यक्षानुरोधेन चक्षुःसंयुक्तसमवायस्य च प्रत्यासत्तित्वावश्यकत्वात्। 'न गन्धग्रह इति न गन्धादिग्राहक इत्यर्थः, 'आश्रयसंयोग इति स्वसमवायिसंयोग इत्यर्थः, 'गन्धत्वग्रहः' गन्धत्वादिग्रहः, 'आश्रयासंयोगादिति स्वसमवायिसमवायिसंयोगादित्यर्थः, 'अन्यथ-व्यतिरेकरूपग्राहकाभावमाह, 'न चेति मद्धीत्यर्थः, 'गन्धे सतीत्यस्य इति

न च द्रव्यसादृश्यादेव तद्व्यपचारः, बाधकं विना प्रतीत्यविशेषाद्वैपरीत्यापत्तेः। आश्रयवैसादृश्येऽपि रूप-

---

सम्बन्धयोग इति शेषः। 'न चैवमिति, अस्मन्नये सामानाधिकरण्य-प्रत्यायत्तिनिर्वाहकतयैव गन्धस्य तदानीमावश्यकत्वादेवेति भावः। 'इन्द्रियसन्निकर्षाश्रयत्वमिति साक्षात्कारकारणेन्द्रियसन्निकर्षाश्रयत्व-मित्यर्थः, यथाश्रुते घ्राणसंयुक्तसमवायमादायैव सिद्धसाधनापत्तेरिति दिक्। 'अन्यप्रत्यक्षेति समवायस्य त्वन्मते ऐक्यादिति भावः। नन्वयं नियमः साक्षात्कारकारणेन्द्रियसन्निकर्षाश्रयः प्रत्यक्षगन्धत्वादिति व्यति-रेकसिद्धमित्यत आह, 'गन्धेन्द्रियसन्निकर्षसाधने चेति गन्धसाक्षात्कार-कारणेन्द्रियसन्निकर्षाश्रयत्वसाधने चेत्यर्थः, 'साध्याप्रसिद्धिरिति, आश्र-यत्वं हि न यथाकथञ्चित्सम्बन्धेन, स्वाश्रयसंयोगमादायैव सिद्धसा-धनापत्तेः। नापि समवायेन, बाधात्। किन्तु समवायनिरूपित-विशेषणतावैशिष्ट्येण, तथाच साध्याप्रसिद्धिरित्यर्थः। नच यत्प्रत्यक्ष-विषयो यो भवति स तत्प्रत्यक्षकारणेन्द्रियसन्निकर्षाश्रयो भवति गन्धवदिति यत्तन्त्रां सामान्यतोव्याप्तिरस्तु तथाच साध्याप्रसिद्धावपि न क्षतिरिति वाच्यं। यत्तदर्थयोरननुगमात्। न च समवायनि-रूपितविशेषणतावैशिष्ट्येण सम्बन्धेन तादृशेन्द्रियसन्निकर्ष एव साध्योऽस्तु तथाप न साध्याप्रसिद्धिरिति वाच्यं। तथाप्यप्रयोजकत्वादिति भावः।

केचित्तु ननु गन्धप्रत्यक्षं गन्धेन्द्रियसन्निकर्षजन्यं गन्धप्रत्यक्षत्वादिति व्यतिरेकसिद्धमित्यत आह, 'गन्धेन्द्रियेति गन्धेन्द्रियसन्निकर्षजन्यत्वसाधने चेत्यर्थ इत्याहुः।

रसादेः सादृश्यानुभवाच्च। रसत्व-मधुरत्व-गन्धाद-सुरभित्वादिश्च जातिः अनुगतप्रत्ययात्। रूपे च

'गन्धसमवायिसंयोगस्येति स्वसमवायिसंयोगस्येत्यर्थः, 'हेतुत्वेऽपि' हेतुत्वाभ्युपगमेऽपि, 'गन्धसमवायस्य' स्वसमवायस्य, 'विशेषणता' विशेषणीभूयावच्छेदकता, 'तदेति, विशेष्यान्वयिनोऽन्वयिन एव विशेषणत्वादिति भावः। 'उपलक्षणत्वे चेति अवच्छेदकाघटकत्वे चेत्यर्थः, 'संयुक्तद्रव्यमात्रं' द्रव्यमात्रस्य संयोगत्वं, 'उपलक्ष्यं' कारणत्वेनाभिमतं। 'अवच्छेदक इति दण्डत्वादिवद्विशेषणतया अवच्छेदक इत्यर्थः 'इतितुल्यमिति इत्यपि सुवचमित्यर्थः, तथाच विनिगमकाभावादुभयोरेव हेतुत्वमिति भावः। एतच्चापाततः स्वसमवायिसंयोगस्य हेतुत्वे स्वत्वस्य तत्तद्व्यक्तिविश्रान्ततया अनन्तकार्य्य-कारणभावापत्तेः। न च तवापि घ्राणादिसंयुक्तस्वसमवायस्य हेतुतया स्वत्वघटितत्वेनानन्तकार्य्य-कारणभाव इति वाच्यं। मम घ्राणादिसंयुक्तसमवायमात्रस्य हेतुत्वात् न तु स्वत्वप्रवेशः, गन्धनिरूपितलौकिकविषयत्व-विशेषणताभ्यां सामानाधिकरण्यस्य प्रत्यासत्तितया चातिप्रसङ्गविरहादिति ध्येयं।

अत्र केचित्संयुक्तसमवायस्य हेतुत्वे कालान्तरीनचक्षुःसंयोगस्यापि घटे घटरूपादिप्रत्यक्षप्रसङ्गः। न च तत्तत्कालीनसंयोगस्यसमवायस्तत्तत्कालाव्यवहितोत्तरकालीनप्रत्यक्षे हेतुरिति वाच्यं। कालभेदेनानन्तकार्य्य-कारणभावप्रसङ्गात्तस्मात् संयुक्तसमवायो न हेतुः किन्तु तन्माचसमवेतचाक्षुषं प्रति तच्चक्षुःसंयोगो हेतुः तद्व्यक्तिचक्षुः-

तथापीदं नीलमित्यनुभवेन त्विदं रूपमिदं रूपमिति तथापि पीतोवर्णः नीलोवर्ण इति वर्णाकारानुगत-

---

संयोगं विनापि व्यक्त्यन्तरसंयोगेन तद्व्यक्तिसमवेतजाति-द्रव्ययोश्चाक्षुषोत्पत्तेर्भावपदं, सत्त्वादिजातिचाक्षुषे च तच्चाक्षुषं प्रति तदाश्रयसंयोगत्वेन हेतुत्वं, द्रव्यचाक्षुषे च लाघवात् सामान्यतो द्रव्यचाक्षुषं प्रति चक्षुःसंयोगत्वेनैव हेतुत्वं, त्वाच-मानसयोरप्येवमेव, रासनादौ च तत्समवेतरसप्रत्यक्षं प्रति तद्रसनसंयोगः, तत्समवेतगन्धप्रत्यक्षं प्रति तद्घ्राणसंयोगो हेतुः, एवं दण्डादिगतजातिप्रत्यक्षेऽपि संयुक्तसमवेतसमवायो न हेतुः यदाकदाचिच्चक्षुरादिसंयोगसमादायातिप्रसङ्गात् किन्तु तत्तद्विषयकचाक्षुषादिकं प्रति तत्तत्समवायिसमवायिसंयोगो हेतुरित्याहुः। तदसत् व्यक्तिभेदेनानन्तकार्य्य-कारणभावापत्त्या चक्षुःसंयुक्तसमवायत्वादिनैव हेतुत्वात्। न च यदाकदाचिच्चक्षुरादिसंयोगसमादायातिप्रसङ्ग इति वाच्यं। अन्यत्र कारणतावच्छेदकाक्रीड़मात्रस्य पूर्व्वसत्ताया अपेक्षितत्वेऽप्यत्र कारणतावच्छेदकविशिष्टस्य पूर्व्वसत्ताया अपेक्षितत्वादेव चक्षुरादिसंयोग-तदाश्रययोः कारणतावच्छेदकयोः पूर्व्वकाले सत्त्वं विना कार्य्योत्पत्तेरसम्भवात्। न च तथापि समवायस्यैक्याद्घटचक्षुःसंयोगेऽपि पटवृत्तिरूपादिग्रहप्रसङ्ग इति वाच्यं। चक्षुःसंयुक्तविशिष्टसमवायत्वादिना हेतुत्वात् पटवृत्तिरूपं घटसमवेतमित्यादिप्रत्ययाभावेन घटविशिष्टसमवायस्य च पटवृत्तिरूपादावभावात्। वस्तुतस्तु चक्षुरादिसंयुक्तसमवायत्वे तत्समवेतसमवायत्वेऽपि च लाघवात् चक्षुःसंयोगत्वादिनैव

बुद्धिरस्ति[१] रूपत्वे मानं। न च चक्षुराद्येकैकसाक्षा-
त्त्वं रूपत्वादिनां, बाधकं विनानुगतबुद्धेर्जातिविषय-

हेतुत्वं स्वसमवायिसमवेतत्वं स्वसमवायिसमवायिसमवेतत्वञ्च कारण-
तावच्छेदकप्रत्यासत्तिः तेन यदाकदाचिच्चक्षुरादिसंयोगमादायापि
नातिप्रसङ्ग इति तत्त्वं ॥

केचित्तु घ्राणसंयुक्तसमवाय-रसनसंयुक्तसमवायस्थले समवायसम-
न्धेनैव घ्राणादिसंयोगत्वेन हेतुत्वं, कार्य्यतावच्छेदकप्रत्यासत्तिस्तु लौक-
लौकिकविषयताश्रयगन्धवत्त्वं तादृशविषयताश्रयरसवत्त्वञ्चेत्याहुः।

'नन्विति, 'संयोगः' चक्षुरादिना संयोगः, 'समवायः' यत्रेन्द्रियस्य
संयोगस्तत्समवायः। 'गन्ध इति चक्षुरादिसंयोगो न गन्धे यत्र
चक्षुरादिसंयोगस्तन्निरूपितसमवायो नेन्द्रिय इत्यर्थः। 'परम्परासम-
न्धत्वादिति संयुक्तसमवायरूपपरम्परासम्बन्धघटकत्वादित्यर्थः, 'परम्प-
रासम्बन्धेनेति स्वसमवायिसमवायिसमवेतत्वरूपपरम्परासम्बन्धेनेत्यर्थः,
तत्राणुत्वविकल्पेन परम्परासम्बन्धत्वासम्भवादिति भावः। 'रूपत्वादि-
ग्रहः' रूपादिपदप्रवृत्तिनिमित्तस्य ग्रहः, 'तदभावादिति तत्र
रूपादिपदप्रवृत्तिनिमित्तस्योपाधिरूपतया समवेतत्वाभावादित्यर्थः।
'तदनभ्युपगमेऽपि' तस्य समवेतत्वानभ्युपगमेऽपि, 'रूपादिसादृश्य-
स्येति रूपादिनिष्ठसादृश्यस्येत्यर्थः, सादृश्यस्य तत्र समवेतपदार्था-
न्तरत्वादिति भावः। 'तद्व्यवहारः' परम्परासम्बन्धेन रूपादि
सादृश्यव्यवहारः, 'प्रतीत्यविशेषादिति साक्षात्सम्बन्धेन प्रतीत्यो

---

(१) इत्यनुगताकारा बुद्धिरस्तीति ख०।

कालाविशेषादित्यर्थः, 'वैपरीत्येति गुणादिसादृश्यादेव तदाश्रये तथा सादृश्यव्यवहार इत्येव किन्न स्यादित्यर्थः। न चाश्रितानामनेकत्वान्न वैपरीत्यमिति वाच्यं। पूर्व्वापरकालोत्पन्नसहश्रादिसंज्ञायाः सादृश्यस्य चाश्रयवृत्तित्व एव गौरवात् आश्रयाणामनेकत्वादिति भावः। ननु ग्राह्यकान्तरकल्पनाभिया आश्रयवृत्तित्वं कल्प्यत इत्यत आह, 'आश्रयेति। ननु परनये सादृश्यवैरूप्यादेव न प्रत्यक्षमित्यत आह, 'रसत्वेति। रूपत्वस्यापि जातित्वं साधयति, 'रूपे चेति, 'इत्येवानुभव इति द्रव्यनिष्ठेदन्त्वस्य नीलरूपाद्यधिकरणतावच्छेदकावगाह्येवानुभव इत्यर्थः, 'न त्विदं रूपं नीलमिति रूपपदप्रवृत्तिनिमित्तनिष्ठनीलरूपाद्यधिकरणतावच्छेदकत्वावगाह्यनुभव इत्यर्थः, बाधादिति भावः। 'वर्णाकारानुगतबुद्धिरिति रूपपदप्रवृत्तिनिमित्तस्य नीलत्वादिजात्यधिकरणतावच्छेदकत्वावगाहिनी बुद्धिरित्यर्थः, 'रूपत्वे मानं' रूपपदप्रवृत्तिनिमित्तस्य जातित्वे मानं, यथाश्रुतन्तु न सङ्गच्छते। 'चक्षुराद्येकैकेति 'चक्षुर्मात्रग्राह्यगुणत्वादिकमित्यर्थः, रूपादिपदप्रवृत्तिनिमित्तं तदेव न 'रूपत्वादिकं', आदिपदात्त्वङ्मात्रग्राह्यगुणत्व-रसनग्राह्यगुणत्व-घ्राणग्राह्यगुणत्वादीनां स्पर्श-रस-गन्धादिपदप्रवृत्तिनिमित्तानां परिग्रहः, नीलोवर्णः पीतोवर्ण इत्याद्यनुगतबुद्धिविशेष्यतावच्छेदकमिति शेषः। अत्र चक्षुरन्यतरमात्रग्राह्येषु संख्या-परिमाणादिषु तादृशत्वेऽद्रव्यत्वादिषु अतिव्याप्तिवारणाय मात्रपदं, तद्व्यवच्छेद्यञ्च त्वगिन्द्रियं, तेन त्वगग्राह्यत्वे सति चक्षुर्ग्राह्यगुणत्वमिति फलितं। घ्राणादावतिव्याप्तिवारणाय विशेष्यदले चक्षुःपदं, चक्षरेणु-तत्कर्मादीनां

त्वात्। इन्द्रियातीन्द्रियत्वेन चक्षुराद्यग्रहेऽपि रूपत्वादिप्रतीतेः। न ह्यननुसंहितोपाधेरुपहितप्रत्ययः। अतीन्द्रियरूप-रस-गन्धाननुमानापत्तेश्च। योग्यताया रूपत्वादिजातिनिरूप्यत्वात्। यद्यपि तज्जन्ये नील-पी-

---

वारणाय गुणपदं, गुणत्वञ्च शक्तिविशेषसम्बन्धेन गुणपदवाच्यं न तु जातिः, तेन तद्ग्रहार्थमपि न संयुक्तसमवेतसमवायस्य प्रत्यासत्तितावश्यकीति भावः। 'अनुगतबुद्धेः' नीलो वर्णः पीतो वर्ण इत्यनुगतबुद्धेः, 'रूपत्वादिप्रतीतेरिति रूपादिपदप्रवृत्तिनिमित्तप्रकारकप्रतीतेरित्यर्थः, अतीन्द्रियरूपादावव्याप्तिमपाह, 'अतीन्द्रियेति अतीन्द्रियरूप-रस-गन्धेषु रूपादिपदप्रवृत्तिनिमित्तेन हेतुना रूपादिपदवाच्यत्वानुमानानुपपत्तेश्चेत्यर्थः, ग्राह्यत्वघटितस्य प्रवृत्तिनिमित्तस्य तत्र विरहादिति भावः। ननु ग्राह्यत्वं ग्रहणयोग्यत्वं वाच्यमित्यत आह, 'योग्यताया इति, 'रूपत्वादिजातिनिरूप्यत्वादिति चक्षुर्ग्राह्यवृत्तिगुणत्वव्याप्यधर्मसमवायित्वस्य चक्षुर्ग्राह्यो यो गुणत्वव्याप्यो धर्मस्तत्समवायित्वस्य वा योग्यतात्वादिति भावः। गुणत्वविशिष्टनीलादिभेदस्य वारणाय समवायित्वप्रवेशः। इदमुपलक्षणं त्वरेणुपरिमाणादौ दैवाच्चक्षुर्ग्राह्यत्वेऽ-द्रवत्व-संयोगादौ चातिव्याप्तिः। न च त्वग्ग्राह्यत्वं त्वग्ग्रहणयोग्यत्वं तच्च त्वग्ग्राह्यगुणत्वव्याप्यधर्मशून्यत्वं परिमाण-स्नेहादौ परिमाणत्व-स्नेहत्वादेस्तादृशधर्मस्य सत्त्वान्नातिव्याप्तिः, तैः रूपत्व-रसत्वादेरनभ्युपगमेऽपि परिमाणत्व-स्नेहत्वा-

तावदेकैकमेव नित्यं नातीन्द्रियं, तथापि चक्षुर्घ्राणादि-रूपस्यालोक-पृथिव्यादिरूपाभिन्नत्वेन प्रत्यक्षत्वप्रसङ्गः। नचैकमेव रूपमुद्भूतमनुद्भूतञ्चेति, विरोधात्। रूप-त्वादिना परस्परव्यावृत्ततया ज्ञातस्य रूपादेरुपलब्ध्या

देरखण्डोपाधिरूपत्वाभ्युपगमादिति वाच्यं। गुणत्वविशिष्टगीतादि-भेदस्य तादृशधर्मस्य नीलादावपि सत्त्वेनासम्भवापत्तेः, समवायसम्बन्धेन तादृशधर्मशून्यत्वाभिधाने चोक्तातिव्याप्तितादवस्थ्यात् परिमाणत्वादे-रखण्डोपाधिरूपतया समवेतत्वाभावादन्यथा तद्ग्रहार्थमेव संयुक्त-समवेतसमवायस्य प्रत्यासत्तित्वावश्यकत्वादित्यपि बोध्यं। अतीन्द्रिय-रूपे व्याप्तिमुद्धरति, 'यद्यपीति, 'प्रत्यक्षत्वप्रसङ्ग इति चक्षुरादेरपि प्रत्यक्षत्वप्रसङ्गदित्यर्थः, उद्भूतरूप-रसत्वादिति भावः। ननु तन्नये अनुद्भूतरूपत्वादौ मानाभावेन चक्षुरादेर्नीरूपत्वान्न प्रत्यक्षत्वं। अस्तु वा अनुद्भूतरूपादिर्व्यक्त्यन्तरमित्यस्वरसादाह, 'रूपत्वेति, 'परस्परव्या-वृत्तचक्षुराद्यनुमितिरिति चक्षुरादौ घ्राणादिभिन्नत्वानुमितिरित्यर्थः। अन्यथा रूपादि-गन्धाद्योरभेदज्ञानाद्घ्राणादावेव व्यभिचारज्ञानापत्ते-रिति भावः। 'परस्परव्यावृत्तचक्षुराद्यनुमिताविति चक्षुरादेर्घ्राणादिभि-न्नत्वानुमितावित्यर्थः। 'रूपादिपरस्परव्यावृत्तधीरिति रूपादौ गन्धा-दिभिन्नत्वधीरित्यर्थः। अन्यथा चक्षुरादि-घ्राणाद्योरभेदभ्रमाद्गन्धा-दावेव व्याभिचारज्ञानापत्तेरिति भावः। ननु नीलोपलब्धिः सकारका कार्यत्वाद्घटवदित्याद्यनुमित्या नील-पीताद्युपलब्धीनां

तत्करणत्वेन परस्परव्यावृत्तचक्षुराद्यनुमितिः, परस्परव्यावृत्तचक्षुराद्यनुमितौ च चक्षुर्ग्राह्यत्वादिना रूपादिपरस्परव्यावृत्तधीरित्यन्योन्याश्रयाच्च। नील-पीतादिप्रतीतौ भिन्न-भिन्नकरणत्वसिद्धावपि तत्तत्करण-

---

घ्राणाद्यकरणकत्वेन विलक्षणकरणसिद्धौ तत्करणग्राह्यत्वं रूपत्वं वाच्यमतो नान्योन्याश्रय इत्यत आह, 'नीलेति। 'गन्ध-रसेति, गन्धादीनां प्रत्येकमेव प्रवेशो न तु मिलितानां, तथाच गन्धाव्यञ्जकत्वे सति नीलव्यञ्जकत्वादित्यादिहेतुत्रये तात्पर्यं, नातो निष्प्रयोजनत्वं। आत्म-मनःप्रभृतिषु व्यभिचारवारणाय सत्यन्तं, पार्थिवादिपरमाण्वादौ व्यभिचारवारणाय विशेष्यदलं। न चालोकस्यापि विषयविधया स्वविषयकसमूहालम्बनगन्धप्रत्यक्षजनकतया दृष्टान्तासिद्धिरिति वाच्यं। गन्धाव्यञ्जकत्वपदेन गन्धविषयकलौकिकप्रत्यक्षाजनकत्वस्य विषयतातिरिक्तरूपेण गन्धव्यञ्जकत्वाभावस्य वा विवक्षितत्वात्। न चैवं नीलचश्मरेणौ नीलघटादौ च व्यभिचारः तस्य विषयविधया स्वीयनीलव्यञ्जकत्वादिति वाच्यं। नीलव्यञ्जकताया अपि विषयतातिरिक्तरूपेण विवक्षितत्वात्। न च तथापि नीलचश्मरेणौ व्यभिचारस्तत्र सन्निकर्षघटकतया स्वीयव्यञ्जकत्वसत्त्वात् गन्धाव्यञ्जकत्वसत्त्वाच्चेति वाच्यं। सन्निकर्षस्य जनकत्वे मानाभावात् द्रव्यत्वेन विशेषणाच्च सन्निकर्षे न व्यभिचारः, गोलकस्य प्रत्यक्षजनकत्वे मानाभावान्न चक्षुर्गोलके व्यभिचारः। न च तथापि लुप्ताचरमश्रीनीलिमाभिव्यञ्जकजले व्यभिचार इति वाच्यं। तस्य नवग्रावग-

ग्राह्यत्वस्य सर्वरूपेष्वसिद्धिः। ननु नील-पीताद्युपलब्धिकरणेषु गन्ध-रस-स्पर्शाव्यञ्जकत्वे सति नीलादिव्यञ्जकत्वादालोकवदिति तैजसत्वं प्रसाध्य तैजसेन्द्रियग्राह्यत्वेन नीलादौ[1] रूपाकारानुगतधीरेवं गन्धादा-

---

भिव्यक्तिरूपयोग्यत्वात्। न च तथापि पीतव्यञ्जकत्वगर्भहेतौ सुवर्णपीतरूपव्यञ्जके निकषोपले व्यभिचार इति वाच्यं। तस्य न सुवर्णपीताभिव्यञ्जकत्वं तेन विनापि सुवर्णपीतिमोपलब्धेः, किन्तु पीतद्वारा गुरुवैलक्षण्यव्यञ्जकत्वमेव तस्य तच्च वैलक्षण्यं परनयेऽखण्डोपाधिरूपमिति भावः। 'तैजसेन्द्रियग्राह्यत्वेन' तैजसेन्द्रियमात्रग्राह्यगुणत्वेन, वायवीयेन्द्रियाग्राह्यत्वे सति तैजसेन्द्रियग्राह्यगुणत्वेनेति यावत्। 'एवं गन्धादावपीति तत्रापि सौरभाद्युपलब्धिकरणेषु रसाव्यञ्जकत्वे सति सौरभादिव्यञ्जकत्वात् कुङ्कुमगन्धाभिव्यञ्जकतैलवदित्यनुमानेन पार्थिवत्वं प्रसाध्य पार्थिवेन्द्रियग्राह्यगुणत्वेन गन्धाकारानुगतधीरित्यर्थः। 'एवंप्रणालीज्ञानाभावेऽपीति एवं प्रणाल्या ज्ञानाभावेऽपीत्यर्थः, तथाच नीलं रूपं पीतं रूपमित्याद्यनुगतप्रत्ययबलादेव रूपत्वजातिसिद्धिः। न च रूपत्वमखण्डोपाधिरेव तस्य विषय इति वाच्यं। समवायसम्बन्धविषयकत्वे बाधके सत्येव सम्बन्धान्तरविषयकत्वकल्पनादिति मणिकृतो निष्कर्षः।

मिश्रास्तु चाक्षुषजनकतावच्छेदकतया रूपत्वजातिसिद्धिः। न च

---

(१) नील-पीतादाविति ख०।

वपीति चेत्। न। एवं प्रणालीग्रानाभावेऽपि रूप-रसादावनुगतप्रत्ययात् नीलाकारानुगतबुद्धेश्च नीलत्वं जातिः। न च चक्षुर्ग्राह्यत्वं तत्, पीतादौ गतत्वात्। नन्वेकैका एव नीलारुणादिव्यक्तयः, नानामसीनी-

---

तावता रूपत्वजातिसिद्धावपि तस्य नीलादिवृत्तित्वे मानाभावः एकत्वादिवृत्तित्वेऽप्युपपत्तेरिति वाच्यं। रूपत्वजातिसिद्धौ लाघवात्तस्यैव रूपपदप्रवृत्तिनिमित्तत्वादन्यत्र रूपव्यवहाराभावादेव नीलादिवृत्तित्वसिद्धेः। एवं त्वाचसाक्षात्कारजनकतावच्छेदकतया स्पर्शत्वादिसिद्धिरित्याहुः।

'नीलाकारेति, नीलत्वं नीलपदप्रवृत्तिनिमित्तं, तथाच नीलत्वग्राहकतयैव संयुक्तसमवेतसमवायसिद्धिरिति भावः। 'यद्यपीत्यादिना पूर्वं दूषितमपि दूषणान्तरदानाय पुनः शङ्कते, 'नन्विति, तथाचैकव्यक्तिवृत्तित्वान्नीलत्वं न जातिरिति भावः। 'असीभेदग्रहेऽपीति, एतेनाग्रयाभेदनिबन्धनाभेदभ्रमोनिराकृतः। 'तत्त्वेन प्रत्यभिज्ञानादिति तदेवेदं नीलं रूपमिति तद्व्यक्तित्वेनाभेदप्रत्यभिज्ञानादित्यर्थः, 'अनेकव्यक्तिवृत्तित्वेनेति एकस्या एव नीलरूपव्यक्तेः सकलनीलद्रव्यवृत्तित्वेनेत्यर्थः, 'नित्यत्वे इति, अनित्यत्वे तन्नाशवत्तत्समवेतनाशं प्रति तन्नाशस्य हेतुतया घटादिनाशादेव तद्वृत्तिनीलनाशाद्गत एवानीलत्वापातादेकनीलरूपव्यक्तेः सकलवृत्तित्वं न सम्भवतीति भावः। 'जातित्वापत्तिः' जातिव्यवहारविषयत्वापत्तिः द्रव्या-

त्रिषु समीभेदग्रहेऽपि तत्त्वेन प्रत्यभिज्ञानात्। न चानेकव्यक्तिवृत्तित्वे नित्यत्वे जातित्वापत्तिः, जातेः संस्थानमात्रव्यङ्ग्यत्वात् अवयवावयविवृत्तित्वात् गोत्वादिना परापरभावानुपपत्तेश्च। नीलतरादिप्रतीतिश्च

दिपञ्चकान्यभावत्वापत्तिर्वा[१]। यथाश्रुते आपाद्यापादकयोरविशेषप्रसङ्गात्। स्वमते संस्थानव्यङ्ग्यत्वं अवयवावयविवृत्त्यन्यत्वञ्च उपाधिमाह, 'जातेरिति जातिव्यवहारविषयस्य द्रव्यादिपञ्चकान्यभावस्येति शेषः। एतेन साध्यव्यापकता दर्शिता, साधनाव्यापकत्वञ्च पक्ष एवेति भावः। 'अवयवावयविवृत्तित्वादिति नीलादेरवयवावयविवृत्तित्वादित्यर्थः। एतेनावयवावयविवृत्त्यन्यत्वस्योपाधेः पक्षे साधनाव्यापकता दर्शिता, साध्यव्यापकत्वञ्च घटत्वादावेव। अवयवावयविवृत्त्यन्यत्वञ्च यत्रैवावयवे वर्त्तते तस्मिन्नेवावयविनि यद्वर्त्तते तदन्यत्वं, स्वसमवायिसमवायिवृत्त्यन्यत्वमिति यावत्। तेन कपालत्व-तन्तुत्वादौ न साध्याव्यापकता, पृथिवीत्व-द्रव्यत्वसत्त्वादिकमपि तन्मते जातिरेवं मृत्तिकात्व-पाषाणत्व-दण्डत्वादेः संस्थानव्यङ्ग्यस्यापि न जातित्वं तन्मते संस्थानव्यङ्ग्यस्याप्यवयवावयव्यवृत्तेरेव जातित्वादिति न तत्रापि साध्याव्यापकता। जातिलक्षणञ्च गुणान्यत्वेन विशेषणीयं, तेन नीलादौ नातिव्याप्तिरिति भावः। स्वमतेनोपाधिमभिधाय उभयमतेनासङ्कीर्णत्वमुपाधिमाह, 'गोत्वादिनेति नीलादेरित्यादि, 'गो-

---

(१) नित्यत्वे सति अनेकसमवेतत्वस्यैव जातित्वरूपत्वादिति भावः।

तदन्यरूपासम्भेदादिति चेत्। न। पाकेन श्यामकृष्टं रक्तमुत्पन्नमिति प्रत्ययात्[१]। न चासौ भ्रमः, बाधकाभावात्। न चोत्पाद-विनाशप्रत्ययस्य समवायो विषयः,

---

त्वादिना' स्वसमानाधिकरणगोत्वादिजात्या, 'परापरभावानुपपत्ते' व्याप्य-व्यापकभावविरहात्। एतेन स्वसमानाधिकरणजातिव्याप्य-व्यापकभावविरहात्तदर्थेतरत्वरूपासङ्कीर्णत्वस्य पक्षे साधनाव्यापता दर्शिता। ननु नीलादिव्यक्तीनां नानात्वविरहात् अयं घटो नीलतरः अयं घटो नीलतम इत्यादिप्रत्ययः कथं स्यादित्यत आह 'नीलतरादीति, 'असम्भेदात्' स्वसामानाधिकरण्यात्। यद्यपुत्कृष्टा नीलव्यक्तिरेकापकृष्टा चापरेति स्वीकारेऽपि तारतम्यधीरुपपद्यते एव तथाप्युत्कृष्टापकृष्टनीलरूपव्यक्तेर्भेदे तदधिकरणयोर्द्वयोरेव घटो नीलोऽयञ्च घटो नील इत्यनुगतप्रतीत्यनुरोधादेव नीलत्वजातिसिद्धिप्रसङ्ग इति तदुपेक्षितं। 'बाधकाभावादिति। न च गौरवमेव बाधकं, तथासति सुखादेरपि नित्यत्वापत्तेः। न च प्रत्यभिज्ञैव बाधिका, तज्जातीयत्वावगाहितयैव तदुपपत्तेरिति भावः। समवायस्य प्रत्यक्षत्वमभ्युपेत्याह, 'न चेति, 'समवायोविषय इति नीलादिसमवाय एव उत्पत्ति-विनाशांशे विशेष्य इत्यर्थः, नीलादेर्नित्यत्वेऽपि तत्समवायस्यानित्यत्वात्। न च तत्समवेतनाशं प्रत्येव तन्नाशस्य हेतुत्वात् कथमाश्रयनाशानन्तरं तद्वृत्तिनीलादिसमवा-

---

(१) इत्यनुभवादिति ख०।

तदनुल्लेखात्। एवञ्च मधुरादिरसानां[१] सौरभासौरभाणाञ्च गन्धानामेकैकत्वं स्यात् नीलादितुल्यत्वात्। एवमस्त्विति चेत्। न। तेषामुत्पादविनाशानुभवात्।

दनाम् समवायस्यासमवेतत्वादिति वाच्यं। समवायस्यापि स्वात्मकसमवेतत्वेन वर्त्तमानतया समवेतत्वात्। एतेन भावकार्य्यस्य समवायिकारणत्वनियमात् समवायस्यासमवेतत्वेन समवायिकारणाभावात् कथमुत्पाद इत्यपि निरस्तं। नीलादिसमवायिन एव तत्समवायस्य समवायिकारणत्वात्। न च तथापि जात्यादेराश्रयनाशान्नाशवारणाय ध्वंसत्वावच्छिन्नं प्रति सत्त्वेन हेतुत्वस्यावश्यकत्वात् कथं समवायस्य नाश इति वाच्यं। प्रागभावव्यावृत्तस्यैव प्रतियोगित्वस्य कार्य्यतावच्छेदकत्वेन सुवचत्वात् सत्त्वस्याकृत्यव्यङ्गतयाऽवयवावयविवृत्तितया च तन्मते जातित्वासम्भवात्समवायसाधारणस्यापि तस्य सुवचत्वाच्चेति भावः। 'तदनुल्लेखादिति प्रतियोगित्वेन नीलादेरेवावगाहनान्न तु तत्समवायस्येत्यर्थः, प्रतिबन्धिमप्याह, 'एवञ्चेति, प्रत्यभिज्ञायास्तत्रापि सत्त्वादिति भावः। 'एवमस्त्विति, अन्यथानुगतप्रत्ययानुरोधे तत्रैव जातिस्वीकारे तद्वहार्थमेव संयुक्तसमवेतसमवायस्य प्रत्यासत्तिताखीकारापत्तेरिति भावः।

केचित्तु तन्नाशत्वेन तत्समवेतनाशत्वेन नाश्य-नाशकभावाद्घटादिनाशेन नीलादिनाशस्य दुर्वारत्वात्तद्वृत्तिनीलादेर्नित्यत्वासम्भवः। न च

---

(१) मधुराम्ल-लवण-कटु-तिक्त-कषायाणामिति ख०।

एवैकत्वे मधुरतरत्वाद्यनुपपत्तेश्च। ननु श्रोत्रेण समवायेन शब्दग्रहे सर्वशब्दोपलब्धिः स्यात्। न च कर्णशष्कुल्यवच्छेदेनोत्पन्नो गृह्यते, अवच्छेद्यस्याकाशत्वेनाविशेषात्। तदन्यत्वे शब्दस्य तत्रासमवायात्। तस्माद्यः शब्दो यं प्रति योग्यः स तेन गृह्यते

जात्यादेर्नाशवारणाय स्वप्रतियोगिजन्यत्वस्यैव नाशकतावच्छेदकसम्बन्धत्वेन नीलादेर्नित्यत्वे स्वप्रतियोगिजन्यत्वविरहादेव न नाश इति वाच्यं। लाघवेन स्वप्रतियोगिसमवेतत्वस्यैव नाशकतावच्छेदकसम्बन्धत्वात् अनन्तनीलादिव्यक्तिकल्पनायाश्च फलमुखत्वात् सत्त्वेन ध्वंसत्वेन नाश्य-नाशकभावान्तरादेव नाशोपपत्तेः, अनन्तस्थले स्वप्रतियोगिजन्यत्वस्य नाशकतावच्छेदकसम्बन्धत्वकल्पनामपेक्ष्यातिरिक्तैकव्यक्तिनाश्य-नाशकभावकल्पनाया लघुत्वादित्याहुः।

'समवायेन शब्दग्रह इति यत्पूर्वमुक्तं तत्र शङ्कते, 'नन्विति, 'सर्वत्रेति सर्वस्मिन् पुरुष इत्यर्थः, आकाशात्मकश्रोत्रसमवायस्याविशेषादिति भावः। 'कर्णशष्कुल्यवच्छेदेनेति कर्णशष्कुल्यवच्छिन्नइत्यर्थः, 'तस्मादिति, तथाच तद्ग्रहार्थं न समवायप्रत्यासत्तिरपेक्षेति भावः। 'न चेति 'वाच्यमित्यग्रेतनेनान्वितं। 'न स्वरूपमिति न तु तद्व्यक्तिस्वरूपमित्यर्थः, 'न च जातिरिति। न च पुरुषद्वयगृहीतैकशब्दे जातिद्वयशङ्कर इति वाच्यं। स्व-स्वकर्णावच्छेदेनोत्पन्नस्यैव शब्दस्य ग्रह इत्यभ्युपगमादुभाभ्यामेकशब्दाग्रहादिति भावः। 'तस्मा'

नात्यः। न च पुरुषविशेषं प्रति योग्यत्वं न स्वरूपं, अननुगमात्। न च जातिः, तस्याः निष्प्रतियोगिकत्वात्। न हि गौः कश्चित्प्रत्यगौरिति वाच्यं। सप्रतियोगिकत्वं हि न सावधित्वं दीर्घत्वादिवत्। नापीतरधीनिरूप्यत्वमभाववत्। किन्तु शब्दग्रहे सा जातिः कारणं तदवच्छेदिका वा। अत एव न कुर्व्द्रूपत्वप्रवेशः सहकारितास्वीकारात्। सर्व्वसा-

---

जातेः, 'निष्प्रतियोगिकत्वादिति, तथाच सा जातिर्यत्पुरुषप्रतियोगिका तस्य साक्षात्कारं जनयतीति न वक्तुं शक्यमित्यर्थः। 'दीर्घत्वादिवदिति, व्यतिरेके दृष्टान्तः, एवं 'अभाववदित्यपि। 'शब्दग्रह इति पुरुषविशेषस्य ककारादिग्रह इत्यर्थः, 'कारणमिति, यत्र कत्वादिविशिष्टेन वस्तुगत्या कादिनिष्ठानुगतेन वा लौकिकविषयत्वेन तत्पुरुषीयश्रावणं तत्र समवायेन सा जातिसामानाधिकरण्यप्रत्यासत्तिरिति भावः। जातेः कारणत्वे तज्जातित्वस्य कारणतावच्छेदकतया गौरवापत्तिरत आह, 'तदवच्छेदिका वेति कारणतावच्छेदिका वेत्यर्थः, इत्यत्र तादात्म्यं कारणतावच्छेदकप्रत्यासत्तिरिति भावः। एतेन प्रत्यासत्त्यादिनियामकं विनापि कश्चिदेव शब्दः कस्यचिद्विषयविधया प्रत्यक्षजनक इति स्वीकारे कुर्व्द्रूपत्वस्वीकार इति परास्तमित्याह, 'अत एवेति, 'सहकारितास्वीकारादिति जातिविशेषस्य नियामकतास्वीकारादित्यर्थः। ननु तत्तत्पुरुषीयशब्दप्रत्य-

धारणत्वमिष्टमेव सर्व्वैस्तथा व्यवह्रियमाणत्वात्। गोत्वेऽपि तदेव तत्। शब्दमात्रस्य योग्यत्वमननुगतमेव गुणयोग्यत्ववदिति। मैवं। शब्दस्य प्रत्यक्षत्वेन प्रत्यासत्तिसाधनात्। न च समवायोऽतिप्रसक्तोऽन्यो-

---

घनियामकस्य तस्य जातिरूपत्वे सर्व्वसाधारण्यापत्तिरित्यत आह, 'सर्व्वेति, 'सर्व्वैः' बहुभिः पुरुषैः, 'तथा' तज्जातिप्रकारेण, 'तदेव' बहुतरपुरुषव्यवहारविषयतावच्छेदकत्वमेव, 'तत्' सर्व्वसाधारणत्वं। ननु तज्जातीनां ककारादिभेदेन नानात्वाच्छब्दमात्रनिष्ठमेकं योग्यत्वमनुगतं दुर्निरूपमेवेत्यनेष्टापत्तिमाह, 'शब्दमात्रस्येति, 'अननुगतमेवेति। 'शब्दस्येति शब्दः साक्षात्कारजनकतावच्छेदकावच्छिन्नेन्द्रियनिरूपितधर्म्माश्रयः प्रत्यक्षत्वादित्यनुमानेन श्रोत्रप्रत्यासत्तेः शब्दसाक्षात्कारजनकत्वसाधनादित्यर्थः, तथाच श्रोत्रसन्निकर्षस्यैव शब्दग्राहकत्वं न तु जातेरिति भावः। अत्र प्रत्यक्षजनकत्वं विषयतातिरिक्तरूपेण विवक्षितं तेन पिशाचभेदवदिन्द्रियान्योन्याभावस्यापि प्रत्यक्षतया न तमादायार्थान्तरं। नच तथापि मनःसंयुक्तसमवायेन सिद्धसाधनं गगनस्यापि मनःसंयुक्तत्वादिति वाच्यं। मनःसंयुक्तात्मसमवायत्वेन हेतुत्वात्। मानसेतरत्वेन वा साक्षात्कारस्य विशेषणीयत्वादतो न कोऽपि दोषः।

केचित्तु 'प्रत्यक्षत्वेन' प्रत्यक्षगुणत्वेन, 'प्रत्यासत्तिसाधनात्' समवायजन्यप्रत्यक्षविषयत्वसाधनादित्यर्थः, संयुक्तसमवायस्यापि समवायानतिरेकादिति भावः इति प्राञ्चः।

नाभ्युपगत इति वाच्यं। कर्णसंयोगावच्छिन्नस-
मवायस्य प्रत्यासत्तित्वात्। कर्णसंयोगो हि सम-
वायवृत्त्या शब्दाधारतायां परिचायकः एवञ्चेह शब्दो
नेह शब्द इत्यनुभवात् शब्दस्याव्याप्यवृत्तित्वे सिद्ध

'अतिप्रसक्त इति देशान्तरवृत्तिशब्दे अतिप्रसक्त इत्यर्थः 'कर्ण-
संयोगावच्छिन्नेति, तत्तत्पुरुषीयकर्णसंयोगावच्छिन्नत्वं कर्णसंयोग-
विशिष्टत्वं तच्च समवायसम्बन्धेन विवक्षितं यथाकथञ्चित् सम्बन्धेन वा
आद्ये बाधः समवायसम्बन्धेन संयोगस्यावृत्तेः, अन्त्ये स एवातिप्रसङ्ग-
स्यत आह, 'कर्णसंयोगो हीति, 'परिचायकः' स्वरूपसम्बन्धविशेषा-
त्मकावच्छेदकताश्रयः, तथाचावच्छिन्नत्वमात्रस्वरूपसम्बन्धविशेषः कपि-
संयोगे शाखावच्छिन्नत्ववदिति भावः।

केचित्तु ननु कर्णसंयोगविशिष्टाकाशनिष्ठाधारत्वमप्यतिप्रसक्तं वि-
शिष्टस्याकाशस्यानतिरिक्तत्वादित्यत आह, 'कर्णसंयोगो हीति, 'शब्दा-
धारतायां' शब्दसमवेततायामेव, 'परिचायकः' स्वरूपसम्बन्धविशे-
षात्मकावच्छिन्नतासम्बन्धेन विशेषणीभूतः, न तु कर्णसंयोगावच्छिन्न-
स्याकाशस्य विशेषणमित्यर्थः, तथाच 'कर्णसंयोगावच्छिन्नसमवायेत्यत्र
कर्मधारयसमासइति भाव इत्याहुः।

उपसंहरति, 'एवञ्चेति, 'कर्णसंयोगेन' यत्पुरुषीयकर्णसंयोगेन,
'स गृह्यते' स तेन गृह्यते, 'स न गृह्यते' स तेन न गृह्यते, 'संयो-
गस्येति शरीरसंयोगस्येत्यर्थः, 'समवायेनाधारतेति वृक्षादिनिष्ठा

यस्य शब्दस्य समवायवृत्त्या आधारता कर्णसंयोगेनावच्छिद्यते स गृह्यते, यस्य तु तदत्यन्ताभावेनावच्छिद्यते स न गृह्यते तथा संयोगस्य समवायेनाधारता हस्तसंयोगेनावच्छिद्यते न तदभावेनेति हस्तसंयो-

---

समवायेनाधारतेत्यर्थः, 'गृह्यते' शरीरसंयोगो गृह्यते, 'नान्यत्र' नान्यावच्छेदेन, 'सर्वमिदमिति हस्त-चरणादिविशिष्टसर्वं शरीरमित्यर्थः, 'तुल्यं'(१) अभिन्नं, 'संयोगस्यापि' शरीरसंयोगस्यापि, 'सर्वत्रेति चरणावच्छेदेन संयुक्तसमवायेनापीत्यर्थः । ननु समवायवृत्त्या शब्दाधारत्वस्याव्याप्यवृत्तित्वे तद्वत्समवायोऽप्यव्याप्यवृत्तिरस्त्वित्याशङ्कते, 'न चैवमिति, 'एवं' समवायवृत्त्या शब्दाधारत्वस्याव्याप्यवृत्तित्वे, 'अव्याप्यवृत्तिरित्यस्त्विति शेषः । 'तस्य' समवायस्य । न च तथापि विशेषणतया तस्याव्याप्यवृत्तित्वमस्त्विति वाच्यं । विशेषणतया तस्य स्वाधिकरणे अभावविरहेण तथाप्यव्याप्यवृत्तित्वविरहादिति भावः । ननु समवायस्य समवायसम्बन्धेनावृत्तित्वे तेन सम्बन्धेन तदभावस्य व्याप्यवृत्तित्वं स्यादित्यनेष्टापत्तिमाह, 'अभावस्त्विति समवायसम्बन्धावच्छिन्नसमवायाभावस्त्वित्यर्थः । भावार्थोपरि शङ्कते, 'न चैवमिति, 'एवं' विशेषणतया यदि शब्दसमवायो व्याप्यवृत्तिः, 'सर्वत्रेति सर्वस्य पुरुषस्येत्यर्थः, 'सर्वशब्दोपलब्धिः' सर्वशब्दोपलब्धिप्रसङ्गः, समवायसम-

---

(१) इदं 'समानमित्यत्र 'तुल्यमिति कस्यचिन्मूलपुस्तकस्य पाठमनुरुत्येति बोध्यम् ।

गावच्छेदेन गृह्यते नान्यत्र अन्यथा हस्तसंयोगस्या-
वच्छेदकत्वे सर्व्वमिदं समानमिति संयोगस्यापि सर्व-
त्रोपलब्धिः स्यात्। न चैवं समवायोऽप्यव्याप्यवृत्तिः, स-
मवायेन वृत्त्या तस्याधारावृत्तित्वात्। अभावस्तु विशे-

त्यावच्छिन्नाधारत्वस्य समवायसम्बन्धानतिरिक्तत्वादिति भावः। 'शब्द-
समवायस्य सत्त्वेऽपीति सर्व्वस्मिन्नेव कर्णे सर्व्वेषां शब्दानां समवायस्य
सत्त्वेऽपीत्यर्थः, 'अन्यत्रेति यत्र शब्दोत्पत्तिस्तद्भिन्नकर्ण इत्यर्थः, 'शब्दा-
त्यन्ताभावेति शब्दाधारत्वात्यन्ताभावेत्यर्थः, तथाचाधारत्वमति-
रिक्तमिति भावः। यद्वा शब्दात्यन्ताभावेति समवायसम्बन्धावच्छि-
न्नशब्दात्यन्ताभावेत्यर्थः, तथाच शब्दाधारत्वं शब्दस्वरूपमिति
भावः। इत्थञ्च तत्तत्पुरुषीयकर्णसंयोगावच्छिन्नाधारत्वं शब्दग्रहे
सन्निकर्ष इति मणिकृतोनिष्कर्षः। स च न सद्युक्तः कर्णसंयोगस्य
शब्दाधारत्वावच्छेदकत्वे मानाभावात् कर्णे शब्द इत्येव हि प्रत्ययो
न तु कर्णसंयोगे इति, तावता आधारत्वस्य प्रत्यासत्तित्वेऽपि समवा-
यस्य प्रत्यासत्तित्वानिर्वाहाच्च। वस्तुतस्तु तत्तत्पुरुषीयकर्णविवरावच्छि-
न्नव्योमविशिष्टः समवायः प्रत्यासत्तिः तेन न देशान्तरवृत्तिशब्दग्रहः।
यथा समवायस्यैकत्वेऽपि रूपं वायुसमवेतमिति प्रत्ययाभावाद्वायु-
विशिष्टसमवायो न रूपे तथा देशान्तरस्थशब्दे तत्तत्पुरुषीयश्रोत्र-
समवेतत्वप्रत्ययाभावात्तादृशनभोविशिष्टसमवायोऽपि न देशान्तर-
वृत्तिशब्दे।

षणतया व्याप्यवृत्तिरेव। न चैवं सर्वत्र सर्वशब्दोप-
लब्धिः स्यात्, शब्दसमवायस्य सत्त्वेऽपि अन्यत्र शब्दा-

केचित्तु तत्तत्पुरुषीयकर्णावच्छिन्नत्वविशिष्टः समवायः प्रत्यास
त्तिः तेन न देशान्तरवृत्तिशब्दग्रहः। यथाहि पुरुषस्यैकत्वेऽपि दण्डा-
पनयनदशायां तदधिकरणे देशे दण्डिमानिति प्रत्ययाभावान्न दण्ड-
विशिष्टपुरुषवत्त्वं तथा समवायस्यैकत्वेऽपि देशान्तरस्थशब्दे तत्तत्-
पुरुषीयकर्णावच्छेदेन समवेत इति प्रत्ययाभावेन तादृशसमवाय-
स्यापि तत्र विरहात्। नच समवायस्य व्याप्यवृत्तितया कथं कर्णाव-
च्छिन्नत्वमिति वाच्यं। समवायस्य स्वरूपतोऽव्याप्यवृत्तितया कर्णा-
वच्छिन्नत्वसम्भवादित्याहुः।

स्वतन्त्रास्तु तत्तत्पुरुषीयकर्णसंयोगावच्छिन्नाधारत्वस्य, तादृश-
कर्णावच्छिन्नभेदविशिष्टसमवायस्य, तादृशकर्णावच्छिन्नत्वविशिष्टसम-
वायस्य वा न हेतुत्वं गौरवात् किन्तु तत्तत्पुरुषीयकर्णविवर एवाव-
च्छिन्नतासम्बन्धेन शब्दनिष्ठतया शब्दप्रत्यक्षे हेतुर्लाघवात्। नचोक्तानु-
मानेन श्रोत्रसन्निकर्षस्य शब्दनिष्ठस्य शब्दप्रत्यक्षजनकत्वसाधनात्तेषां
कारणत्वमावश्यकं तदनुरोधेन श्रोत्रसमवायस्यापि सामान्यतः सम-
वायत्वेन हेतुत्वाभ्युपगमे तु कारणान्तरकल्पनमपेक्ष्य यथोक्तगुरुरूपेण
समवायस्य कारणत्वकल्पनाया एव लघुत्वादिति वाच्यं। कर्णेन
शब्दं शृणोमीतिप्रत्ययबलेन तवापि कर्णस्य पृथक् हेतुताया
आवश्यकत्वात्तदनुमानस्याप्रयोजकत्वाच्च। न हीन्द्रियसन्निकर्षत्वेन
प्रत्यक्षत्वेन सामान्यतो हेतु-हेतुमद्भावोऽस्तीति प्राहुः।

त्वाभावसत्त्वात्। अथ वीणादौ शब्द इत्यबाधितानुभवपक्षात् तदवच्छिन्नं नभः श्रोत्रं न तु कर्णावच्छिन्नमेव, कर्णे न शब्दः किन्तु वीणायामित्यनुभवात्। अन्य-

---

केचित्तु अवच्छिन्नतासम्बन्धेन तत्तत्पुरुषीयकर्णोऽपि न हेतुः पुरुषभेदेनानन्तकार्य्यकारणभावापत्तेः, किन्तु तत्तद्विलक्षणशब्दोत्पत्तिनिमित्तस्य तत्तद्विलक्षणवायुसंयोगस्यैव तत्तद्विलक्षणशब्दप्रतीतावपि कर्णावच्छेदेन शरीरनिष्ठतया हेतुत्वं नातो व्यवहितशब्दग्रहः तदुत्पादकविलक्षणवायुसंयोगस्य कर्णावच्छेदेनाभावात्। तत्त्वे शब्दस्यैव कर्णावच्छेदेनोत्पत्त्यापत्तेरित्याहुः। तदसत् तत्तत्पुरुषप्रयोजकत्वादिव्याप्यनानाजात्यवच्छिन्नप्रत्यक्षं प्रतितदुत्पादकतत्तद्विलक्षणवायुसंयोगानां प्रत्येकहेतुत्वे प्रतिपुरुषमनन्तकार्य्य-कारणभावापत्त्या तदपेक्ष्य तत्तत्पुरुषीयकर्णत्वेन हेतुत्वस्यैव लघुत्वात्। कदम्बगोलकन्यायेन शब्दोत्पत्तिनये यत्रैकजातीयमेव शब्दद्वयं चैत्र-मैत्रयोरुभयोः कर्णे उत्पद्यते तत्र तदुत्पादकवायुसंयोगस्याविशिष्टतया परस्परं तदुभयोरुभयकर्णावच्छिन्नशब्देऽयं शब्द इति प्रत्यक्षापत्तेश्चेति दिक्।

प्रसङ्गात् श्रोत्रपदार्थं विवेचयितुं शङ्कते, 'अथेति, 'तदवच्छिन्नं' तदवच्छिन्नमपि, शब्दजनकीभूतवीणाद्यवच्छिन्नमपीति यावत्, 'श्रोत्रं' श्रोत्रपदशक्यं, यद्यदवच्छेदेन तत्तत्पुरुषगृह्यमाणशब्दाधारता तदवच्छिन्नभूतस्यैव श्रोत्रपदशक्यतावच्छेदकत्वात् तथाच तत्तत्पुरुषीयकर्णशष्कुल्यवच्छिन्नाकाशमेव श्रोत्रमिति सिद्धान्तव्याघात इति

या कर्णे शब्द इति धीः स्यात्। न चानन्तवीणाद्यव-च्छेदकत्वेनानन्तश्रोत्रस्वीकारे गौरवं शब्ददेशत्वेनैक-त्वे चातिप्रसङ्गः सर्वदेशानां शब्दावच्छेदकत्वादिति

भावः। ननु 'वीणादावित्यत्र जन्यत्वं न सप्तम्यर्थः, अपि तु अवच्छे-दकत्वं, अवच्छेदकस्तु तत्रापि कर्ण एवेत्यत आह, 'कर्णे न शब्द इति, 'कर्णे' कर्णावच्छेदेन, 'न शब्दः' नायं शब्दः, 'वीणायां' वीणावच्छेदेन, 'इत्यनुभवादिति वीणावच्छेदेन गृह्यमाणशब्दानुभ-वात्, 'अन्यथेति तत्रापि कर्णस्यावच्छेदकत्वे इत्यर्थः, 'इति धीः स्यात्' इत्येव तादृशशब्दधीः स्यात्। 'नचेति 'वाच्यमित्यग्रेतनेनान्वयः, 'अनन्तवीणाद्येति अनन्तानां वीणादीनां गृह्यमाणशब्दाधारतावच्छे-दकत्वेनेत्यर्थः, 'अनन्तश्रोत्रस्वीकार इति अनन्तानां श्रोत्रपदशक्य-तावच्छेदकत्वस्वीकार इत्यर्थः, 'शब्ददेशत्वेनेति शब्दावच्छेदकत्वेनेत्यर्थः, 'एकत्वे' अनुगमे, 'अतिप्रसङ्ग इति शब्दजनकीभूतवीणादिभिन्नस्यापि देशस्य श्रोत्रपदशक्यतावच्छेदकत्वप्रसङ्ग इत्यर्थः। 'शब्दावच्छेदकत्वा-दिति शब्दजशब्दावच्छेदकत्वादित्यर्थः, एतच्च स्वमतेन, पूर्वपक्षिणा शब्दजशब्दानभ्युपगमात्। 'देशतायाश्चेति वीणादौ शब्द इत्यवच्छे-दकतायाश्चेत्यर्थः, 'प्रमाणत्वेन' अवच्छेदकतांशे प्रमात्वेन, 'गौरवस्य' शक्यतावच्छेदकानन्त्यगौरवस्य, 'अन्याय्यत्वादिति, एतच्च समाधिसौ-कर्य्यादुक्तं। वस्तुतस्तु तत्तत्पुरुषगृह्यमाणशब्दावच्छेदकत्वेन वीणादी-नामनुगमान्न शक्यतावच्छेदकानन्त्यं। सामान्यतः शब्दावच्छेदकत्वेना-नुगमे चैत्रस्य श्रोत्रमित्यादावनन्वयापत्तेः, गृह्यमाणत्वस्य षष्ठ्यर्थत्व-

वाच्यम्। वीणादिदेशताग्रहस्य बाधकं विना प्रमाणत्वे गौरवस्य न्याय्यत्वात्। प्रत्युत सर्वतो दिक्खनन्तशब्द-सन्तानोत्पादक्रमेण कर्णोत्पादे कल्पनागौरवं माना-

---

क्षेऽपि एकदेशान्वयस्याव्युत्पन्नत्वात्। अत एव सिद्धान्तिमतेऽपि तत्तत्पुरुषीयत्वं कर्णविशेषणं, श्रोत्रपदस्य नानार्थत्वञ्च दृष्टमेवेति ध्येयं। ननु वीणादेर्गृह्यमाणशब्दावच्छेदकत्वेऽपि न तद्विशिष्टनभसः श्रोत्रपदशक्यत्वं, तत्तत्पुरुषगृह्यमाणशब्दावच्छेदकविशिष्टनभस्त्वापेक्षया लाघवात् तत्तत्पुरुषीयकर्णविशिष्टनभस्त्वस्यैव श्रोत्रपदशक्यतावच्छेद-कत्वात् कर्णेन समं तत्तत्पुरुषस्य सम्बन्धः न समवायः कर्णस्य साक्षाच्छरीरावयवत्वाभावादपि तु तत्तत्पुरुषनिष्ठसमवायसम्बन्धाव-च्छिन्नाधारतावच्छेदकत्वमेव सम्बन्धः, तस्यावयव-तदवयवादिसाधार-णत्वादवयव-तदवयवादेरेवावयविनिष्ठसंयोगाद्याधारतावच्छेदकत्वादि-त्यभिप्रायादाह, 'प्रत्युतेति, कर्णावच्छिन्ननभस एव श्रोत्रत्वे इति शेषः। 'सर्वतोदिक्खेति वीणाद्यभिघातजन्यशब्दस्थलेऽपि सर्वदिग्वृत्तिशब्द-सन्तानोत्पादक्रमेण कर्णे शब्दोत्पादकल्पनायां गौरवमित्यर्थः। तदकल्पने वीणादिप्रभवविलक्षणशब्दस्य प्रत्यक्षानुपपत्तेः, भवन्मते तद्देशविशिष्टस्य नभसः श्रोत्रत्वं तद्देशावच्छिन्नाधारत्वादावेव प्रत्या-सत्तित्वात् अवच्छिन्नतासम्बन्धेन तद्देशस्यैव वा शब्दनिष्ठतया शब्दग्राह-कत्वाद्येति भावः। ननु प्रामाणिकत्वाद्गौरवं न दोषायेत्यत आह, 'मानाभावादिति। न चैवं कर्णावच्छिन्ननभसोऽपि कथं श्रोत्रत्वं कर्णस्य शब्दाधारतानवच्छेदकत्वादिति वाच्यं। तत्र कर्णस्यावच्छेदक-

भावात्। न च दूर-सन्निधानयोः शब्दानामबाधि-ततार-मन्दत्वादिवैधर्म्यप्रतीत्या भेदसिद्धेः सन्तान-सिद्धिः, दूरत्वादिदोषात्तारत्वाग्रहे[१] मन्दत्वारोपात्त-

---

त्वादिति भावः। शब्दजशब्दे युक्तिमाह, 'दूर-सन्निधानयोरिति दूरस्थ-समीपस्थपुरुषयोरित्यर्थः, 'शब्दानां' वीणादिशब्दानां। नन्वेवं समीपस्थवीणादिशब्दव्यवहितवीणादिशब्दस्याप्युपलम्भप्रसङ्गः कर्णाव-च्छिन्नाधारत्वाभावस्याविशिष्टत्वादित्यत आह, 'व्यवहितकर्ण इति, भवन्मत इति शेषः। 'शब्दानुत्पादवत्' वीणादिशब्दानुत्पादवत्, 'व्य-वहितशब्दस्य व्यवहितवीणादिशब्दस्य, 'निमित्तवायुसंयोगाभावादिति विलक्षणवायूनां संयोगाभावादित्यर्थः, तथाच तत्तद्विलक्षणशब्द-प्रत्यक्षं प्रति तत्तद्विलक्षणवायुसंयोगस्य संयोगसम्बन्धेन तत्तद्विल-क्षणवायोर्वा शरीरनिष्ठतया हेतुत्वं, त्वयाप्यवच्छेदकतासम्बन्धेन तत्त-द्विलक्षणशब्दोत्पत्तावच्छेदकनिष्ठतया तस्य हेतुत्वाभ्युपगमात्। न च शरीरनिष्ठतया हेतुत्वे इत्याद्यवच्छेदेन शरीरे तादृशवायोः संयोगे-ऽपि शब्दोपलम्भापत्तिः कर्णनिष्ठतया हेतुत्वे च कार्यतावच्छेदक-सम्बन्धस्य दुर्वचत्वं कर्णस्य ज्ञानानवच्छेदकत्वादिति वाच्यं। कर्णाव-च्छिन्नसमवायस्य कारणतावच्छेदकत्वात् तादृशवायोः संयोगस्य फल-बलकल्प्यतया शब्दानुपलम्भदशायां इत्याद्यवच्छेदेन तादृशवायो: संयोगे मानाभावाच्चेति भावः। कस्यचित्समाधानं दूषयति, 'नन्विति,

---

(१) तदग्रहे इति ख०।

दुपपत्तेः। व्यवहितकर्णे शब्दानुत्पादवद्व्यवहितशब्दानुपलब्धिः निमित्तवायुसंयोगाभावात्। ननु व्यवधानाभावस्य हेतुत्वात् तस्य सन्निध्युपक्षीणत्वात् कर्णानु-

---

'तस्य' व्यवधानाभावस्य, 'सन्निध्युपक्षीणत्वादिति इन्द्रियसन्निकर्षरूपत्वादित्यर्थः, तस्य च समवायरूपस्य व्यवहितशब्देऽप्यविशेषादिति भावः। 'कर्णानुपघातोऽपीति कर्णनिष्ठदोषाभावोऽपीत्यर्थः, 'तदुपघाते' कर्णस्य दुष्टत्वे, एतच्च प्रौढ़िवादमात्रं, वस्तुतस्तु व्यवहितकर्णे विलक्षणवायोः संयोगस्य फलबलकल्प्यस्याभावादेव न शब्दग्रहः, अत एव शब्दोत्पत्तिं प्रत्येव विलक्षणवायुसंयोगस्य हेतुत्ववादिनः सिद्धान्तिनो नयेऽपि कर्णानुपघातो न शब्दग्रहे हेतुः। उपहतकर्णे तत्तद्विलक्षणवायुसंयोगाभावावच्छिन्नस्यैवानुत्पत्तेः। न चैतावद्विशिष्टकर्णस्य हेतुत्वे वीणाद्यभिघातजन्यशब्दप्रत्यक्षोपपादनेऽपि कर्णाभिघातजन्यविलक्षणाद्यशब्दस्याप्रत्यक्षतानुपपत्त्या सिद्धान्तिनये कर्णानुपघातस्य हेतुत्वमावश्यकं पुरुषान्तरेण तच्छब्दजशब्दग्रहणात्तत्र शब्दानुत्पादस्य वक्तुमशक्यत्वात् इति वाच्यं। सिद्धान्तिनये आद्यशब्दस्य गुरुत्वादिवदयोग्यत्वस्य सुवचत्वादित्येव तत्त्वं। 'आवश्यकत्वादिति उभयवादिसिद्धत्वादित्यर्थः। ननूभयवादिसिद्धत्वेऽपि तत्तत्पुरुषगतश्रमाणशब्दावच्छेदकविशिष्टनभस्त्वस्य शक्यतावच्छेदकस्य वीणाद्यवच्छिन्ननभःसाधारणतया तन्नाचस्य शक्यत्वमसङ्गतमित्यत आह, 'लाघवादिति तत्तत्पुरुषगतश्रमाणशब्दावच्छेदकविशिष्टनभस्त्वापेक्षया तत्तत्पुरुषीयकर्णविशिष्टनभस्त्वस्य शाक्यतावच्छेदकस्य लघुत्वादित्यर्थः। हेत्व-

पघातेऽपि हेतुरिति न तदुपघाते शब्दग्रह इति। मैवम्। कर्णावच्छेदेनापि शब्दग्रहात्। कर्णशष्कुल्य-प्यवच्छेदिकेति कर्णावच्छिन्नमेव नभः श्रोत्रं श्राव-

---

न्तरमाह, 'शब्दमात्रग्रह इति, 'तदनुविधानादिति कर्णपिधानाभावस्यानुविधानादित्यर्थः, कर्णावच्छिन्ननभस एव श्रोत्रत्वे यद्देशावच्छिन्ननभसः श्रोत्रत्वं तद्देशावच्छिन्नाधारत्वादेः सन्निकर्षतया सर्वत्र कर्णावच्छिन्नाधारत्वादेरसन्निकर्षत्वेन तन्निर्वाहार्थमेव नियमतः तदनुविधानात् पिहितकर्णे निमित्तवायुसंयोगासम्भवेन शब्दोत्पत्तेरसम्भवात्तादृशाधारत्वानिर्वाहादिति भावः। ननु तावता कर्णावच्छिन्नाधारत्वादेरेव सन्निकर्षत्वसिद्धावपि तदवच्छिन्नस्यैव नभसः श्रोत्रपदशक्यत्वे मानाभावः। न हि यदवच्छिन्नाधारत्वं सन्निकर्षस्तदवच्छिन्नमेव नभः श्रोत्रपदशक्यमिति नियमः, मानाभावादित्यत आह, 'शरीरसंयुक्तस्येति साक्षात्प्रतीतिसाधनशरीरसंयोगविशिष्टस्यैव इन्द्रियपदशक्यत्वादित्यर्थः, तथाच वीणादिसंयोगविशिष्टस्य कथमिन्द्रियपदशक्यत्वमिति भावः। अत्र शरीरत्वं शरीर-तदवयवसाधारणं, तेन कर्णसंयोगविशिष्टस्यापि नेन्द्रियपदशक्यत्वासम्भव इति ध्येयं। ननु वीणादिसंयोगविशिष्टस्येन्द्रियपदाशक्यत्वेऽपि श्रोत्रपदशक्यत्वे न बाधकं, न हि यत्संयोगविशिष्टस्येन्द्रियपदशक्यत्वं तत्संयोगविशिष्टस्यैव श्रोत्रादिपदशक्यत्वमिति नियमः, घ्राणादिपदे व्यभिचारात् मानाभावाच्चेत्यत आह, 'कर्णेनेति, 'तत्करणत्वेनेति कर्ण-

ज्ञानत्वात् लाघवाच्च। शब्दमात्रग्रहे तदनुविधानात्। शरीरसंयुक्तस्य सतः साक्षात्प्रतीतिसाधनस्येन्द्रियत्वात्[1] कर्णेन वीणाशब्दं शृणोमीति तत्करणत्वेना-

---

स्वावच्छिन्नतासम्बन्धेन शब्दनिष्ठतया शब्दप्रत्यक्षकरणत्वेनेत्यर्थः। यद्यप्येतावता कर्णस्यैव शब्दप्रत्यक्षहेतुत्वसिद्धावपि तत्संयोगविशिष्टस्यैव श्रोत्रपदशक्यत्वं नायाति, तथापि वीणाद्यवच्छिन्ननभसोऽपि श्रोत्रविशिष्टकारणताग्राहकप्रमाणेन विशेषणीभूतस्य वीणादेरपि कारणताग्रहात्तादृशानुभवापत्तेरिति भावः। उक्तहेतूनां व्यतिरेकं वीणादौ दर्शयति, 'न त्विति न तत्तत्पुरुषगृह्यमाणशब्दावच्छेदकत्वेन वीणादिकं शक्यतावच्छेदकमित्यर्थः, 'अनन्तत्वादिति। न च तथापि प्रत्येकमादाय विनिगमकाभावाद्वीणात्वादिरूपेण वीणादेः शक्यतावच्छेदकत्वं दुर्वारमिति वाच्यं। चैत्रस्य श्रोत्रमित्यादावनन्वयापत्तेः, अवच्छेदकतासम्बन्धेन प्रयोजकतासम्बन्धेन वा वीणादावन्वितस्य गृह्यमाणशब्दस्य षष्ठ्यर्थत्वसम्भवेऽप्येकदेशान्वयस्यानुपपन्नत्वात् तत्तत्पुरुषगृह्यमाणशब्दावच्छेदकवीणात्वादिना तादृशशब्दप्रयोजकवीणात्वादिना वा शक्यतावच्छेदकत्वे च गौरवात्। किञ्च एकदेशान्वयस्वीकारेऽपि कर्णावच्छिन्ननभस्त्वमेव शक्यतावच्छेदकं न तु वीणाद्यवच्छिन्ननभस्त्वं, खण्डशक्तिस्वीकारेऽपि कर्णत्वं नभस्त्वमेव शक्यतावच्छेदकं न तु वीणात्वादिकं, येन पुरुषेण वीणाशब्दो न श्रुतः तस्य श्रोत्रव्यवहारानुरोधेन कर्णविवरावच्छिन्ननभस्त्वस्य

---

(१) साक्षात्प्रतीतिसाधनस्य शरीरसंयुक्तस्य सत इन्द्रियत्वादिति ख०।

बाधितानुभवाच्च। न तु वीणादिकमनन्तत्वात् शब्द-
मात्रग्रहे तदननुविधानात्। वीणाद्यवच्छिन्नस्य नभसः
शरीरासंयुक्तत्वेनानिन्द्रियत्वात् वीणया शब्दं शृणो-
मीत्यननुभवाच्च। कथन्तर्हि वीणायां शब्द इति ज्ञानं
श्रूयमाणस्य शब्दस्य तदनधिकरणत्वादिति चेत्। न।

कर्णत्व-नभस्त्वयोर्वाशक्यतावच्छेदकत्वावश्यकतया प्रत्येकमादाय विनि-
गमनाविरहादिति भावः। 'शब्दमात्रग्रह इति क्वचिदपि शब्दग्रहे
इत्यर्थः। 'वीणयेति, वीणावच्छिन्ननभसः श्रोत्रत्वे विशिष्टकारणता-
ग्रहात्तादृशानुभवापत्तेरिति भावः।

अत्र नव्याः श्रोत्रपदस्य सामान्यतो नभस्त्वमेव शक्यतावच्छेदकं
लाघवान्न तु कर्णावच्छिन्नत्वस्य प्रवेशः, श्रोत्रपदात्कर्णावच्छिन्नत्व-
कारेण स्वारसिकबोधस्यासिद्धत्वात्। न चैवं चैत्रस्य श्रोत्रमिति कथं
व्यवहारः यथाकथञ्चित् संयोगेनैव तादृशव्यवहारे घटस्य श्रोत्रमित्यपि
व्यवहारापत्तिरिति वाच्यं। कर्णावच्छिन्नत्वस्यावच्छिन्नतासमत्वेन
कर्णस्य वा वाक्यार्थत्वात्। कारणत्वमपि तस्य नभस्त्वेन न तु कर्ण-
वच्छिन्ननभस्त्वेन गौरवात्। अकारणत्वमेव वा उक्तरूपेण सन्निक-
र्षाणां, कर्णानाञ्च हेतुत्वादेव अतिप्रसङ्गभङ्गात् श्रोत्रेण शब्दं शृणो-
मीतिप्रत्ययस्य च कर्णविषयत्वात्। न च नभोमात्रस्याश्रोत्रत्वे चाक्षु-
षादिज्ञानकालेऽपि श्रोत्र-मनःसंयोगसत्त्वाच्छब्दग्रहप्रसङ्ग इति वाच्यं।
कर्णशष्कुल्यवच्छेदेनाकाश-मनःसंयोगस्य हेतुत्वात्, विशिष्टस्य श्रोत्र-
पदशक्यत्वेऽपि तथैव वाच्यत्वात् विशिष्टस्यानतिरिक्तत्वात्। वस्तुतस्

न हि सर्व्वत्र शब्दे मृदङ्गाद्यधिकरणग्रहनियमः,(१) अन्यथा क्वचिदपि देशे सन्देह-विपर्य्यय-तदनुल्लेखाना-मनुपपत्तेः। यत्राप्यस्ति तत्र शरीरे सुखमिति वदुत्पत्तये परम्परया वीणाद्यपेक्षणात् तदधिकरणत्वं। तवापि वीणायाः शब्दानाश्रयत्वेन तथैवाधिकरणत्वात्। नन्वेवं

कर्णविवरत्वमेव श्रोत्रपदप्रवृत्तावच्छेदकं कर्णविवरत्वस्यावयवविशेष-वृत्तिजातिरूपतया नभस्त्वमपेक्ष्य लघुत्वात्। अत एव तत्तत्पुरुषीय-कर्णविवरावच्छिन्ननभसः परस्परं विभिन्नत्वाभावेऽपीदं चैत्रश्रोत्रमिति व्यवहारोऽप्युपपद्यते। न च कर्णशष्कुलीविवरस्येन्द्रियत्वे समवायरूपे-न्द्रियसन्निकर्षात् कथं शब्दग्रह इति वाच्यं। संयुक्तसमवायप्रत्यासत्त्या अवच्छिन्नतालक्षणविशेषणताप्रत्यासत्त्या वा शब्दग्रहात् अवच्छिन्नता-सम्बन्धेन तस्यैव हेतुतया सन्निकर्षस्य शब्दग्राहकत्वे मानाभावाच्च। न चैवं कर्णशष्कुलीविवरत्वस्य पृथिवीत्व-जलत्वादिव्याप्यनानाजातिरूप-तया श्रोत्रपदस्य नानार्थत्वापत्तिरतो नभस्त्वमेव शब्दतावच्छेदकमुचि-तमिति वाच्यं। नभस्त्वस्य शब्दतावच्छेदकत्वेऽपि कवत्त्वादिप्रत्येकमादाय विनिगमनाविरहेणानन्तशक्तेरावश्यकतया तदपेक्ष्य पृथिवीत्वादि-व्याप्यजातिचतुष्टयस्यैव शब्दतावच्छेदकतौचित्यात् कर्णशष्कुलीवि-वरस्य कर्णजन्यतावच्छेदकजातिव्याप्यसंस्थानविशेषवृत्तिजातिरूपतया नानार्थत्वविरहाच्चेति प्राहुः॥

---

(१) वीणाद्यधिकरणग्रहनियम इति ख०।

कर्णेऽनेकगकारोत्पादेऽनेकग्रहणप्रसङ्गः। नचैकग्रहेऽन्यग्रहसामग्री प्रतिबन्धिका, कोलाहले तथा अदर्शनादिति चेत्। न। तारेण मन्दाभिभवात्। तुल्यत्वे वानेकग्रहस्येष्टत्वात्। भेदाग्रहस्त्वत्यन्तसारूप्यात्। एवञ्च वीणादेरश्रोत्रत्वे मैत्रेणाहमनुवाकमध्यापितो यद्गीत-

---

ननु तथापि तत्तत्पुरुषीयकर्णावच्छिन्नाधारत्वादेः सन्निकर्षत्वऽवच्छिन्नतासम्बन्धेन शब्दनिष्ठतया शब्दग्राहकत्वे वा वीणायां शब्द इति कथमनुभवः कर्णावच्छेदेन वर्त्तमानस्य शब्दस्य वीणानवच्छिन्नत्वात् वीणावच्छिन्नस्य च कर्णावच्छेदेनावर्त्तमानत्वादित्याशङ्कते, 'कथं तर्हीति कथं तथापीत्यर्थः, 'श्रूयमाणशब्दस्य' कर्णावच्छिन्नशब्दस्य, 'तदनधिकरणत्वात्' तदनवच्छिन्नत्वात्। 'शरीरे सुखमिति वदिति शरीरे सुखमिति यथा मानसज्ञानं तथेदमप्यलौकिकमानसज्ञानमित्यर्थः, तथाच वीणावच्छिन्नशब्द एव तद्विषय इति भावः। ननु वीणायां शब्दं शृणोमीत्यनुव्यवसायान्न तस्य मानसत्वसम्भवइत्यस्वरसात् प्रकारान्तरेणोत्पादयति, 'उत्पत्तय इति, पक्षान्तरसूचको वाशब्दः पूरणीयः, 'अपेक्षणात्' कर्णावच्छिन्नशब्दापेक्षणात्, तथाच वीणाजन्यजातीयत्वं वीणाप्रयोज्यत्वं वा विषय इति भावः। 'शब्दानाश्रयत्वेन' शब्दासमवायित्वेन, 'तथैवेति परम्परयैवेत्यर्थः। यद्यप्यवच्छेदकत्वं साक्षात्सम्बन्ध एव तथापि संयोग-समवायसम्बन्धभिन्नस्यैव परम्परासम्बन्धत्वाभ्युपगमान्नासङ्गतिः। 'नचेवमिति, 'एवं' एवंक्रमेण, शब्दजशब्दसन्तानक्रमेणेतियावत्। यदा 'एवं' एवमपि,

न्यथा श्रुतनान्नयापीत्यादिप्रतीतीनां तदुच्चारणादि-
प्रयोज्यजातीयत्वं विषयः। शब्दे हि कारणविशेष-
प्रयोज्या जातिरवश्यं वाच्या। अन्यथा शब्दविशेषेण
पुनाद्यनुमानं न स्यात् जातिं विना विशेषान्तरा-
भावात्। एवञ्च कर्णावच्छिन्नस्य नभसः श्रोत्रत्वे तेन

वीणायां शब्द इत्यस्य प्रयोज्यत्वादिविषयकत्वेनोपपादनेऽपीति यावत्। इयञ्च तटस्थशङ्का न तु 'अथ वीणादादित्युक्तपूर्व्वपक्षिणः, तन्मतेऽपि समानकालीनानेकगकारोच्चारणादेकगकारप्रत्यक्षदशायामनेकगकार-प्रत्यक्षस्य दुर्व्वारत्वात् व्यञ्जकवायुसंयोगसत्त्वादिति ध्येयं। 'तथा अदर्शनात्' प्रतिबन्धकत्वादर्शनात्। 'भेदाग्रहस्त्विति विजातीयतुल्य-नानावर्णोत्पादस्थले भेदाग्रहस्यापीष्टत्वादिति भावः। तत्र नानागका-रोत्पत्तौ मानाभाव इति तु ज्यायः। ननु शब्दजनकदेशमात्रस्य श्रोत्रपदशक्यतानवच्छेदकत्वे तदवच्छिन्नाधारत्वमपि न सन्निकर्षः यद्देशविशिष्टनभः श्रोत्रपदशक्यं तदवच्छिन्नाधारत्वस्यैव सन्निकर्षत्वेन तत्तत्पुरुषीयकर्णावच्छिन्नाधारत्वस्यैव तत्तत्पुरुषीयशब्दग्रहे सन्निकर्ष-त्वात्तथा च मैत्रेणाहमनुवाकमध्यापित इत्यादिप्रत्ययः कथं स्यात् मैत्रोदीरितस्यानुवाकस्य शिष्यश्रावणप्रत्यक्षविषयतायामेव तादृशप्र-त्ययनिर्व्वाहात् तस्य मैत्रोदीरितशब्दे मैत्रीयकण्ठाद्यवच्छेदेन वर्त्तमाने शिष्यकर्णावच्छिन्नाधारत्वविरहेणासम्भवादित्यत आह, 'एवमिति, 'वीणादेः' शब्दजनकदेशमात्रस्य, 'अश्रोत्रत्वे' श्रोत्रपदशक्यतानवच्छे-दकत्वे, 'अनुवाकः' वेदभागविशेषः, 'अध्यापित इति तदुदीरितानु-

वीणादिप्रभवशब्दग्रहो न तत्र सन्तानक्रमेणोत्पादं विनेत्यनन्यगतिकतया तत्कल्पनापि प्रामाणिकी। शब्देन चाव्यवहितपरमाणुदेशोत्पादक्रमेण न शब्दारम्भो येन मेघगर्जादिशब्दानां भूलोकप्राप्तिर्युगान्तरेऽपि न स्यात्। किन्तु मेघाद्यभिहतं सर्वतोगामि महा-

---

वाकविषयकाक्षप्रत्यक्षवानस्मित्यर्थः। 'तदुच्चारणादीति मैत्रोच्चारणादिप्रयोज्यमात्रवृत्तिजातित्वमित्यर्थः, 'मैत्रोच्चारणादीत्यादिपदात् 'गीतमित्यादौ गायकोच्चारणपरिग्रहः, एवञ्च 'मैत्रेणेत्यादेर्मैत्रोच्चारणप्रयोज्यमात्रवृत्तिजातिमदनुवाकविषयकाक्षप्रत्यक्षवानित्यर्थः, 'यद्गीतमित्यादेर्गायकोच्चारणप्रयोज्यमात्रवृत्तिजातिमद्गीतं त्वया श्रुतं, 'तत् तादृशजातिमद्गीतं मयापीत्यर्थ इति भावः। इदमुपलक्षणं, 'मैत्रेणेत्यादेर्मैत्रप्रयोज्यानुवाकविषयकाक्षप्रत्यक्षवानित्यर्थः, 'यद्गीतमित्यादेर्गायकप्रयोज्यगीतं, तत्प्रयोज्यं मयापीत्यर्थः, इत्यपि सुवचं। ननु मैत्रोच्चारणादिप्रयोज्यमात्रवृत्तिजातौ मानाभावः। न हि मैत्रादिजन्यतावच्छेदकतया तत्सिद्धिः, श्रूयमाणशब्दस्य मैत्राद्यहेतुकतया तत्साधारण्यानुपपत्तेः। नापि मैत्रादिजन्यशब्दजन्यतावच्छेदकतया, वीणादिशब्देऽपि सत्त्वादित्यत आह, 'शब्दे चेति, 'कारणविशेषप्रयोज्यजातिः' कारणविशेषप्रयोज्यमात्रवृत्तिजातिः, प्रयोज्यश्च कार्य्य-तत्कार्य्यादिसाधारणं, 'शब्दविशेषेण' शब्दनिष्ठवैलक्षण्येन, 'पुत्रायनुमानमिति अयं शब्दो मम पुत्रप्रयोज्यः विलक्षणशब्दत्वादित्यनुमानं न स्यादित्यर्थः, इदमुपलक्षणं, वीणादिकारणविशेषप्रयोज्य-

वायोर्मइति देशे संयोगनिमित्तमासाद्याद्यशब्देन सर्व-
दिग्वर्त्ती शब्द एक एव जन्यते निमित्तसंयोगानुरो-
धित्वाद्विशुकार्य्याणां उत्तरोत्तरेणाप्यधिकाधिकदेशतः
सर्वत्र एकैक एव शब्दो वीची-तरङ्गवदुत्पाद्यते। अत-
एव सर्वैरेकशब्दग्रहः। वायोश्च नयनवन्महावेगतया

प्रमाणवृत्तिवैलक्षण्यस्य तत्तत्पुरुषोच्चारणप्रयोज्यशब्दमात्रवृत्तिवैल-
क्षण्यस्य च सर्व्वानुभवसिद्धतया दुरपह्नवत्वाच्चेत्यपि बोध्यं॥

केचित्तु तत्कारणविशेषप्रयोज्यतावच्छेदकतया तादृशजातिसि-
द्धिरित्याहुः। तदसत् कार्य्यतावच्छेदकतया हि जातिसिद्धिर्न तु
प्रयोज्यतावच्छेदकतयापि तथासति पित्रादिप्रयोज्यतावच्छेदकतयापि
पुत्र-पौत्रसाधारणजातिसिद्ध्यापत्तेः॥

ननु तवाप्यनुभवसिद्धा सा जातिः कस्य कार्य्यतावच्छेदिका कार्य्य-
मात्रवृत्तिजातेः कार्य्यतावच्छेदकत्वनियमात्, न हि सा जातिर्वीणा-
दिजन्यतावच्छेदिका, वीणाद्यहेतुकेऽपि शब्दे सत्त्वात् वीणादिनाशे-
ऽपि तादृशशब्दोत्पादाच्चेति चेत्। न। परस्परविलक्षणवायुसंयो-
गानामेवावच्छेदकतासम्बन्धेन तदवच्छिन्नोत्पत्तिं प्रति समवाय-
सम्बन्धेन हेतुत्वात् सैव तज्जातिर्वीणादिशब्दजशब्दं प्रति शब्दनिष्ठस-
मवायिकारणतावच्छेदिका वीणादिजन्याद्यशब्देऽपि तत्सत्त्वात्, अत-
एव वीणादिशब्दजशब्दजनकतावच्छेदकतया तादृशजातिसिद्धिरि-
त्यपि सुवचं॥

शीघ्रगामित्वेनाग्रिमशब्दारम्भादाद्यशब्दानन्तरमचिरेणैव शब्दोपलम्भः। वायोरेव च मन्द-तर-तमादिक्रमेण मन्दादिशब्दोत्पत्तिः। यद्वा आद्यशब्देन कदम्बगोलकवद्दशदिशि दश शब्दा आरभ्यन्ते तैश्च दश शब्दसन्ताना इति। नन्वेकशब्देन कथमनेकशब्दारम्भः

केचित्तु सा जातिः स्वजन्यशब्दसम्बन्धेन वीणादेरेव जन्यतावच्छेदिका, वीणादिजन्याद्यशब्द तत्सत्त्वे मानाभावात्। न चैवं तादृशजात्यवच्छिन्नं वीणादिशब्दजशब्दं प्रति शब्दस्य केन रूपेणासमवायिकारणत्वमिति वाच्यं। शब्दत्वेनैव तत्सम्भवात् स्वजन्यशब्दसम्बन्धेन वीणादेः कारणत्वादेवातिप्रसङ्गभङ्गादित्याहुः। तदसत् स्वजन्यशब्दसम्बन्धेन वीणादेः कारणत्वकल्पने गौरवात् अवच्छेदकतासम्बन्धेन तादृशजात्यवच्छिन्नोत्पत्तौ वायुसंयोगहेतुतायास्तस्यावश्यकत्वादिति दिक्।

पूर्वोक्तशब्दबाधककल्पनागौरवमुद्धरति, 'एवञ्चेति, यद्देशावच्छिन्ननभसः श्रोत्रत्वं तदवच्छिन्नाधारत्वस्यैव शब्दग्रहे सन्निकर्षत्वादिति भावः। 'वीणाप्रभवशब्दग्रह इति वीणाद्यनुमापकवैलक्षण्याश्रयशब्दग्रह इत्यर्थः, 'उत्पादं विना' शब्दजशब्दोत्पादं विना, 'तत्कल्पनापीति धारावाहिकशब्दकल्पनापीत्यर्थः। ननु तादृशाधारत्वं न प्रत्यासत्तिः, किन्तु समवायत्वेन समवायमात्रं प्रत्यासत्तिः, विलक्षणवायुसंयोगस्य व्यञ्जकत्वाभ्युपगमादेवातिप्रसङ्गविरहात्। तथाच वीणावच्छिन्नाद्यशब्दस्यैव श्रोत्रेण ग्रहसम्भवात् किं शब्दजशब्दधाराकल्पनेन। न च वायु-

सामग्रीभेदादिति चेत्। न। सर्व्वतोऽनेकवाय्वादिसह-
कारात् प्रागभावभेदाद्वा। न च तदितरहेतुसाकल्ये
तद्भेदान्न कार्य्यभेदः तथा अदर्शनादिति वाच्यं।
कार्य्यभेदो हि सामग्रीभेदात्। स च हेत्वन्तरभेदादिव

त्ययोगातिरिक्तकारणत्वकल्पनामपेक्ष्य तादृशाधारत्वस्य सन्निकर्षत्वकल्प-
नैव लघीयसी शब्दजशब्दधाराकल्पनं शब्दं प्रति शब्दानामसमवायि-
कारणत्वकल्पनञ्च फलमुखमिति वाच्यं। तवापि शब्दजशब्दाभ्युपगमे
तस्य देशविशेषनियमान्यथानुपपत्त्या अवच्छेदकतासम्बन्धेन तत्तद्विल-
क्षणशब्दोत्पत्तिं प्रत्यवच्छेदकनिष्ठतया वायुसंयोगस्य कार्य्यतावच्छेदक-
गौरवेऽपि तवापि सन्निकर्षकारणतावच्छेदकगौरवेण तुल्यत्वात् शब्द-
त्वेन प्रत्यासत्तिविरहेऽपि क्षतिविरहाच्च वायुसंयोगेनैवातिप्रसङ्गभङ्गा-
दिति चेत्। न। तथापि कर्णे वीणाशब्द इति कर्णेऽपि वीणाप्रभवशब्दा-
वच्छेदकत्वप्रत्ययाच्छब्दजशब्दधाराकल्पनाया आवश्यकत्वादिति भावः।

अत्र केचित् वीणादिजन्याद्यशब्दस्यैव वीणाद्यवच्छेदेनैव कर्णा-
वच्छेदेनाप्युत्पत्तिरस्तु किं शब्दजशब्दधाराकल्पनेन, कर्णावच्छिन्नाधा-
रत्वादिसन्निकर्षेणावच्छिन्नतासम्बन्धेन कर्णेन वा आद्यशब्दस्यैव ग्रहस-
म्भवात् तव शब्दजशब्दोत्पादे देशनियमस्येव ममापि तदुत्पादे
देशविशेषस्य वायुसंयोगादेव सम्भवात्। न च वीणाजन्यतावच्छे-
दकजात्यवच्छिन्नं प्रति वीणाहेत्वभिघातस्य समवायसम्बन्धेनावच्छे-
दकनिष्ठतया हेतुत्वात् कर्णावच्छेदेन कथं तदुत्पाद इति वाच्यं।
तादृशजात्यवच्छिन्नं प्रति तदनुविधानस्य वायुप्रेरणेनानुपक्षीणत्वे

प्रागभावभेदादपि। अन्यथा समवाय्यादिभेदेऽपि कार्य्यवैजात्यं न स्यात्। घटव्यक्तिषु तथा अदर्शनात्। पाकजे रूपादौ हेत्वन्तराभेदेऽपि प्रागभावपूर्व्वरूपादिध्वंसभेदेन भेदाच्च। अथ रूपाद्येकैकप्रागभावध्वंसयोः सर्व्वत्र तुल्यत्वे किं विनिगमकं, गन्धादिप्राग-

---

कालिकसामानाधिकरण्यमात्रस्य प्रत्यासत्तित्वेन तत्र सुवचत्वात् अवच्छेदकनियमस्य वायुसंयोगादेव सम्भवात्। एतेनाद्यशब्दमात्रवृत्तिवैजात्यावच्छिन्नं प्रति तादात्म्यसम्बन्धेनावच्छेदकनिष्ठतया वीणादिकं हेतुः इत्यपि निरस्तं। वीणादेरन्यथासिद्धत्वात् कालिकसामानाधिकरण्यमात्रस्य प्रत्यासत्तित्वेन सुवचत्वाच्च। न च दूरस्थस्य मन्दत्वेन समीपस्थस्य च तारत्वेनानुभवाच्छब्दभेद आवश्यक इति वाच्यं। 'दूरत्वादिदोषेण मन्दत्वारोप इति मूल एव पूर्व्वमुक्तत्वात्। अथ वीणाद्याकाशाभिघातानन्तरं तन्नाशेन बहुकालव्यापी शब्दः श्रूयते। नचासावेकः, शब्दस्य क्षणद्वयमात्रावस्थायित्वात्। न च नानैवाभिघातजन्या, तस्य नाशात् वायुसंयोगस्य च निमित्तकारणत्वादतः शब्दासमवायिकारणिका शब्दधारा कल्प्यते इति चेत्। न। स्वप्रतियोगिजन्यत्वसम्बन्धेन निमित्तवायुसंयोगस्यैव शब्दनाशकतया तस्य च फलबलकल्प्यत्वादभिघातजन्यशब्दस्यैव तावत्कालस्थायित्वात्। न च ज्ञानादिस्थले क्षणनाशनाशकभावादेवोपपत्तावतिरिक्तनाश्य-नाशकभावकल्पने गौरवमिति वाच्यं। शब्दजशब्दं प्रति तत्तद्विलक्षणशब्दानामन्तरालसमवायि-

भावानां रसादौ व्यभिचारेऽपि गन्धादौ रसादिप्रागभावानामव्यभिचारादिति चेत्। न। वायुस्पर्शे गन्ध-रस-रूपप्रागभाव-प्रध्वंसानान्तेजोरूपे गन्ध-रसा-

---

कारणत्वकल्पनामपेक्ष्यातिरिक्ताया एवं नाश्य-नाशकभावकल्पनाया एव लघुत्वादिति पूर्वपक्षयन्ति। तदसत्, दूर-निकटवर्त्तिनोर्मन्द-तारभावप्रत्ययस्य प्रमात्वेनानुभवसिद्धस्य भ्रमत्वकल्पनापत्तेः कर्णे मे वीणाशब्द इतिलौकिकप्रत्यक्षवत् पुरुषान्तरकर्णेष्वपि चैत्रस्य कर्णे वीणाशब्द इतिलौकिकप्रत्यक्षापत्तेश्च शब्दभेदाभावेन सामग्र्यविशेषात्। न च तत्रापि वीचि-तरङ्गन्यायेन शब्दोत्पादादेव दोषो दुर्वार इति वाच्यं। एतदस्वरसादेव 'यद्वेति कृत्वा कदम्बगोलकन्यायेनैव शब्दोत्पत्तेर्मलिनता वक्ष्यमाणत्वात्। किञ्च सन्निहितस्य पुंसः शीघ्रं वीणादिशब्दग्रहः, व्यवहितस्य मध्ये शब्दान्तराग्रहेऽपि विलम्बेन वीणादिशब्दग्रह इति शब्दजशब्दधाराकल्पनावश्यकी मध्ये शब्दान्तरग्रहानुरोधेन श्रवण-मनःसंयोगस्यावश्यकतया तद्विलम्बेनापि विलक्षणत्वात् विलक्षणवायुसंयोगस्य शब्दोत्पत्तावेव हेतुत्वेन व्यञ्जकत्वविरहादन्यथा स्वप्रतियोग्यजन्यत्वसम्बन्धेन तन्नाशस्य शब्दनाशकत्वाभावात् उत्पादकत्ववद्व्यञ्जकत्वस्याभ्युपगमेऽपि शब्दोत्पत्त्यनुरोधेन तत्त्वविशिष्टतया तद्विलक्षणविलम्बासम्भवात् तत्तत्पुरुषीयकर्णानां व्यञ्जकत्वमपेक्ष्य पूर्वोक्तक्रमेण गौरवाच्च। एतेन वायुसंयोगसहकृतादीणाद्याकाशाभिघातादाद्यशब्दसमय एव कदम्बगोलकन्यायेन प्रति-

भावयोर्जलरसे गन्धप्रागभावस्य व्यभिचारेणाहेतुत्वं स्वप्रागभावहेतुताया आवश्यकत्वात् पाकजेषु रूप-रस-स्पर्शेषु गन्धादिप्रागभावानामन्यथासिद्धत्वाच्च।

कर्णे विभिन्नशब्दा जायन्ते तेन दूर-निकटवर्त्तिनोर्मन्द-तारप्रत्ययस्य न भ्रमत्वकल्पनं, न वा पुरुषान्तरीयकर्णान्तर्भावेन शब्दलौकिक-प्रत्यक्षं। न चैवमनन्तशब्दस्वीकारात् किं लाघवमिति वाच्यं। शब्दं प्रति शब्दस्यासमवायिकारणत्वाकल्पनादेव लाघवादित्यपि निरस्तं। तथापि निकटवर्त्त्यपेक्षया दूरवर्त्तिनो विलम्बश्रवणानुपपत्तेः॥

केचित्तु शब्दजशब्दानभ्युपगमे भेर्य्याद्यभिघातोत्पत्त्यनन्तरं यस्य पुरुषस्य कर्णोत्पत्तिस्तस्य भेर्य्यादिशब्दग्रहो न स्यात् भेर्य्याद्यभिघात-समये तस्य कर्णाभावेन तत्कर्णावच्छेदेन भेर्य्याद्यभिघातात्शब्दोत्पत्ते-रसम्भवात्। न च वायुसंयोगमात्रात् कर्णावच्छेदेनापि शब्दोत्पत्तिरिति वाच्यं। भावकार्य्यस्य समवायिकारणकत्वनियमादित्याहुः। तदसत्, यथाहि पूर्व्वोत्पन्नस्यापि घटस्यानन्तरोत्पन्नदेशे संयोगसम्बन्धेन सत्त्वं, यथा वा पूर्व्वोत्पन्नचक्षुःसंयोगादेरप्युत्तरकालोत्पन्नालोकसंयो-गावच्छेदेन सत्त्वं तथा पूर्व्वोत्पन्नस्यैव भेर्य्यादिशब्दस्य तदुत्तरोत्पन्नकर्णे अवच्छेदकतासम्बन्धेन वृत्तौ बाधकाभावात् अवच्छेदकतासम्बन्धे-नोत्पत्तेरेव कारणनियम्यत्वात्। न च तेन सम्बन्धेन स्थितिरपि कारणनियम्या अन्यत्रापि तत्सत्त्वप्रसङ्गादिति वाच्यं। अन्यत्र तत्सत्त्वे मानाभावादिति दिक्॥

रूपादिषु तथादर्शनात्। गन्धेऽपि स्वप्रागभावस्यावश्य हेतुत्वादभावान्तराणामन्यथा सिद्धत्वं। यद्वा रूप-रस-स्पर्शतुल्यत्वेऽप्यग्निसंयोगविशेषात् क्वचित्सौरभमसौर-

---

'मेघजादिशब्दानामिति मेघजादिशब्दप्रयोज्यशब्दानामित्यर्थः, 'श्रोत्रप्राप्तिः' तत्स्थानां साक्षात्कारविषयता। 'सर्व्वदिग्वर्त्तीति, 'विभुकार्य्याणां' विभुसमवेतजन्यविशेषगुणानां, 'वीचि-तरङ्गवदिति यथा एकया रीत्या सकलदिग्वर्त्त्येकसेव मण्डलाकारं तरङ्गान्तर-मुत्पद्यते तथा पूर्व्वशब्देनापि समानदेशावस्थितसकलपुरुषकर्णेष्वेक-एव द्वितीयशब्दः उत्पद्यत इत्यर्थः। 'सर्व्वैः' समानदेशावस्थितैः सर्व्वैः। 'वायोरेवेति परस्परविलक्षणवायुसहकारादेवेत्यर्थः, 'मन्दा-दिशब्दोत्पत्तिरिति मन्दादिशब्दाच्छब्दोत्पत्तिरित्यर्थः। ननु वीचि-तरङ्गन्यायेन नानापुरुषकर्णेष्वेकशब्दोत्पादे कर्णे मे वीणाशब्द इति लौकिकप्रत्यक्षवत् पुरुषान्तरकर्णेऽपि चैत्रस्य कर्णे वीणाशब्द इति लौकिकप्रत्यक्षापत्तिः शब्दभेदाभावेन सामग्र्यविशेषादित्यस्वरसादाह, 'यद्वेति, 'कदम्बगोलकवदिति। 'अनेकवाय्वादीति तत्तद्वाय्वादि-व्यक्तिरूपसहकारिणो भेदादित्यर्थः, तत्तच्छब्दव्यक्तिं प्रति तत्तद्वा-य्वादिव्यक्तीनां विशिष्य हेतुत्वादिति भावः। आदिना वायु-संयोगव्यक्तीनां परिग्रहः। 'तदितरेति अभावेतरसकलकारणाभेदे अभावात्मकहेतुभेदान्न कार्य्यभेद इत्यर्थः, तेन 'पूर्व्वरूपादिध्वंसभेदा-देवाग्निसंयोगस्य नासङ्गतिरिति ध्येयं। 'अन्यथा' अन्यथादृष्टत्वा-

भ्यो॑त्पद्यते। नचाग्निसंयोगो रूपादिमात्रे कारणं, व्यभिचारात्। एवं रसादावपि। ननु कार्य्यमात्रे प्रागभावमात्रं न हेतुः तयोर्व्यतिरेककालानवगमात्।

देवाकल्पने इत्यर्थः, 'कार्य्यवैजात्यमिति घट-पटादिलक्षणकार्य्यवैजात्यं न स्यादित्यर्थः। 'घटव्यक्तिष्विति घटव्यक्तिसमवायादिभेदेऽपि वैजात्यादर्शनादित्यर्थः। अन्यत्रादृष्टत्वमपि नास्तीत्याह, 'पाकजरूपादाविति, 'सर्व्वत्रेति पाकजेषु रूप-रस-गन्ध-स्पर्शेषु सर्व्वेष्वित्यर्थः, 'तुल्यत्वे' तुल्यन्यायव्यतिरेकानुविधायित्वे, 'किं विनिगमकमिति स्वप्रागभाव-स्वसमानजातीयध्वंसावेव हेतू न त्वन्यावित्यत्र किं विनिगमकमित्यर्थः।

ननु रूपादिमात्रेषु व्यभिचारेणाहेतुत्वेऽपि पाकजेषु रूपादिषु तत्यादित्यत आह, 'पाकजेष्विति। 'रूपादिष्विति जलीयरूपादिष्वित्यर्थः, 'तथा दर्शनादिति गन्धादिप्रागभावानामहेतुत्वदर्शनादित्यर्थः। ननु व्यभिचाराभावाद्गन्धे रूपादिप्रागभावो हेतुरस्त्वित्यत आह, 'गन्ध इति, 'स्वप्रागभावस्येति यत्र कार्य्योत्पत्तिः तत्र प्रागभाव इति सामान्यतः कारणत्वावधारणादित्यर्थः, 'अभावान्तराणां' रूपादिप्रागभावानां। गन्धे रूपादिप्रागभावानां व्यभिचारमथाह, 'यद्वेति, 'तुल्यत्वेऽपि' अपरावृत्तावपि। नन्वग्निसंयोगत्वेन रूपादिकं प्रति हेतुत्वात् कथं तत्र रूपाद्यन्तरोत्पत्तिरित्यत आह, 'न चाग्नीति, 'मात्रपदं भिन्नक्रमे, अग्निसंयोगमात्रं रूपादौ कारणमित्यर्थः,

सर्व्वोत्पत्तिरहेत्वभावादेव कार्य्यानुत्पादादिति चेत्। न। हेत्वन्तरसत्त्वेऽप्युत्पन्नस्य पुनरनुत्पादेन प्रागभावस्य हेतुत्वात्। एका सामग्र्येकमेव कार्य्यं जनयति स्वभावादिति चेत्। न। कार्य्यानुत्पादस्य सामग्रीविर-

---

'व्यभिचारात्'। न च गन्धनाशकतावच्छेदकस्यैव लाघवात् रूपादिनाशकतावच्छेदकतया गन्धपरावृत्तौ रूपादिपरावृत्तिरप्यावश्यकीति वाच्यं। अनन्तव्यक्तिकल्पनगौरवेण प्रत्यभिज्ञायाः प्रामाण्यानुरोधेन वह्निसंयोगे तत्तन्नाशकतावच्छेदकजातिचतुष्टयकल्पनाया एव न्याय्यत्वात् अन्यथा प्रतियोगिमात्रस्य लाघवान्नाशकत्वमुपगम्य क्षणिकत्वमेव ततः स्वीक्रियतामिति ॥

मिश्रास्तु 'तुल्यत्वेऽपि' पूर्व्वविलक्षणत्वेऽपि। ननु तवापि पूर्व्वरूपादिपरावृत्त्या सजातीयरूपाद्यन्तरमुत्पद्यते इत्यत आह, 'न चेति, 'रूपादिमात्रे' पूर्व्वविलक्षणेऽपि रूपादौ, 'व्यभिचारात्' अन्वयव्यभिचारात्, अग्निसंयोगे सत्यपि पूर्व्वसजातीयरूपाद्यनुत्पादादिति यावत्। न हि पाके सति पूर्व्वसजातीयं रूपं क्वचाप्युत्पन्नं दृष्टमिति भावस्याशङ्कः।

केचित्तु ननु गन्धजनकाग्निसंयोगस्य रूपादिजनकत्वनियमात् रूपादिपरावृत्त्यभावे गन्धोत्पत्तिरसिद्धैवेत्यत आह, 'न चेति, 'अग्निसंयोगः' गन्धजनकाग्निसंयोगः, 'रूपादिमात्रे' रूपादिषु सर्व्वेषु, 'कारणं' नियमतः कारणं, 'व्यभिचारादिति यत्राग्निसंयोगाद्गन्धप-

इप्रयोज्यत्वनियमात्। न च कार्य्यसहभावेन कारणत्व, गौरवात्। न च विनश्यदवस्थे समवायिनि कार्य्यानुत्पत्तेस्तथात्वमिति वाच्यं। तावता समवायिकारणस्यैव तथात्वात् कारणमात्रे मानाभावेन तस्याप्रयोजक-

---

रावृत्तावपि मन्त्रादिप्रयोगेन रूपाद्यपरावृत्तिस्तदेवेदं रूपमिति प्रत्यभिज्ञा सिद्धा तत्र तन्निपसस्य व्यभिचारादित्यर्थः, इति प्राञ्चः॥

'एवं रसादावपीति एवं सत्यामपि रसादिपरावृत्तौ रूपाद्यपरावृत्तेरानुभविकतया रसादावपि प्रागभावः कदापि व्यभिचारान्न हेतुरित्यर्थः। नन्वस्तु रूपादौ प्रागभावोहेतुर्न तु कार्य्यमात्रे येन शब्देऽपि ततो भेदः स्यादित्याशयेनाशङ्कते, 'नन्विति, 'तयोरिति प्रागभावेतरसकलकारणसत्त्वे प्रागभावव्यतिरेकेण कार्य्यव्यतिरेकादर्शनादित्यर्थः। 'सर्व्वसुकाविति, जातायामिति शेषः। 'एकमेवेति एकं कार्य्यं एकदैव जनयतीत्यर्थः, यथाश्रुते तस्यैव कार्य्यस्य पुनर्जननापत्तेरनुद्धारात्। 'कार्य्यसहभावेनेति कार्य्यसहवर्त्तिन एवेत्यर्थः, तथाच प्रागभावस्य कार्य्यासहवर्त्तित्वात् कथं कारणत्वमिति भावः। 'तथात्वं' कार्य्यसहवर्त्तिन एव कारणत्वं। 'तावतेति विनश्यदवस्थे समवायिनि कार्य्यानुत्पत्तेरित्यर्थः, 'समवायिकारणस्यैवेति। न च क्वचिदसमवायिकारण-प्रतिबन्धकाभावयोरपि कार्य्यसहभावेन हेतुत्वादेवकारोऽयमसङ्गत इति वाच्यं। विनश्यदवस्थे समवायिनि कार्य्यानुत्पत्तिबलेन कार्य्यसहवर्त्तितया हेतुत्वं समवायिकारणस्यैव

त्वात्। ननु समवेतसमवायो न ग्राहकः शब्दत्वादि-जातेरभावादिति चेत्। न। रूपत्वादिन्यायेन तत्सा-धनात्॥

इति श्रीमन्महेशोपाध्याय-विरचिते तत्त्वचिन्ता-मणौ प्रत्यक्षखण्डे सन्निकर्षवादः।

न बन्धेति तत्सङ्गतेः। 'रूपत्वादिन्यायेनेति अनुगतप्रत्ययनादित्यर्थः। अत्र नव्याः तत्तत्पुरुषीयकर्णावच्छिन्नगगनसमवायविशिष्टसमवायत्वेन कारणत्वकल्पनामपेक्ष्य लाघवात् स्वावच्छिन्नशब्दसमवायेन तत्तत्पु-रुषीयकर्ण एव शब्दसमवेतश्रावणे हेतुः। वस्तुतस्तु एतदपि न, शब्दाविषयकशब्दसमवेतश्रावणस्वीकृतया शब्दप्रत्यक्षसामग्रीविरहा-देव श्रोत्रे शब्दविरहदशायां शब्दसमवेतश्रावणानुत्पादसम्भवादिति प्राहुः।

इति श्रीमथुरानाथ-तर्कवागीशविरचिते प्रत्यक्षखण्डरहस्ये सन्निकर्षवादरहस्यं॥

अथ समवायवादः ।

ननु[१] समवायासिद्धेर्न सा प्रत्यासत्तिः । विप्रतिपत्तिश्च शुक्लः पट इति प्रतीतिः विशेषण-विशेष्यसम्बन्धविषया न वेति । अथ जाति-गुण-क्रिया-तद्वन्तौ मिथः सम्बद्धावनुभूयेते । न ह्यसम्बद्धस्वरूपद्वये विशिष्टधीव्यपदेशाविति चेत् । न । सम्बद्धानुभवेन हि सम्बन्धो न विशेषणं भासते तस्य प्रथममज्ञानात् संयोगिनाविमाविति वत् समवायिनावित्यननुभवाच्च । नापि विशेष्यः, अनयोः समवाय इत्यननुभवात् । नापि स्वरूपेण भासते, समवायं जानामीति विषयतानुभवात् । ननु नीलोघट इत्याद्यनुभवो विशेषण-

---

अथ समवायवादालोकः ।

'नन्विति शब्द-रूपादेराश्रयसम्बन्धाभावान्न तत्साक्षात्कारः प्रत्यासत्तिजन्य इत्यर्थः । यथाश्रुते सिद्धसाधनव्याघातादिति । 'विशेष-

---

(१) परिच्छेदचतुष्टयात्मकतत्त्वचिन्तामण्यन्तर्गतप्रत्यक्षपरिच्छेदस्य सन्निकर्षवादान्तोभागः मथुरानाथतर्कवागीशविरचितरहस्यनामकव्याख्यया सह मुद्रितः, अवशिष्टभागस्य वङ्गाक्षरेणापि तादृशव्याख्यायुक्तस्य दुष्प्राप्यत्वेन तत्त्वचिन्तामण्यभिधानमूलग्रन्थस्य व्याख्यासाहाय्यं विना दुर्बोधत्वेन चागत्यातिप्रामाणिकजयदेवमिश्रविरचितालोकनामकव्याख्यया सह मुद्रणे प्रवृत्तमस्माभिरित्थं पल्लवितेन ।

विशेषसम्बन्धविषयः विशिष्टप्रतीतित्वात् दण्डिज्ञान-वदिति[1] चेत् । न । अघटं भूतलं ज्ञातमिष्टं ज्ञातश्चे-त्यत्र व्यभिचारात् । सम्बन्धविषयत्वे बाधकं विनेति विशेषणमिति चेत् । न । बाधकाभावस्यैव समर्थत्वे शेष-वैयर्थ्यात् साधकाभावेन सत्प्रतिपक्षाच्च । बाधकाभावस्य साधकत्ववत् साधकाभावस्य बाधकत्वात् । तस्मादु-भयाभावे संशयः स्यात् । न च प्रतीतिरेव समवाय-साधिका, तस्यास्तद्विषयत्वासिद्धेः अन्यथान्योन्याश्र-

---

रेति, सम्बन्धविषयत्वे सिद्धसाधनं प्रतियोग्यनुयोगिभावसम्बन्धविष-यत्वस्य समूहालम्बनवारणाय दण्ड-पुरुषयोरेव विशेषणत्व-विशेष्यत्व-प्रतीतिनियमाय च सर्व्वसम्मतत्वात्, अत उक्तं 'विशेषण-विशेष्येति । न च प्रतियोगित्वादेरुभयनिरूप्यत्वं, विशेषणे प्रतियोगित्वस्य विशेष्ये चानुयोगित्वस्य भानात्, संयोगादेस्तदुभयनिरूप्यत्वमिति भावः । प्रत्यक्ष एवोपोद्बलकन्तर्कमाह, 'न हीति । 'समवायिनाविति नीलोघट इत्यादिप्रतीतौ तथाकारानुभवादित्यर्थः । एवमग्रेऽपि, स्वातन्त्र्येण तादृशानुभवो नोभयसम्मतो येन तौ प्रमाणीक्रियेता-मिति भावः । 'स्वरूपेणेति, स्वरूपेण वैशिष्ट्यविधया न विशेषण-त्वेन न वा विशेष्यत्वेनेत्यस्मदभिमतं, तत्तु न सम्भवत्येव, उभयस्यैव ज्ञानेन विषयीकरणादिति स्वाभिसन्धिना स्वरूपेणेति

---

(१) विशिष्टप्रत्ययत्वात् दण्डीतिप्रत्ययवदितीति ख० ।

यात्। अथाघटं भूतलं ज्ञातमित्याद्यपि विशिष्टधीः सम्बन्धविषया, किन्तु भ्रान्तावाधकासत्त्वादिति चेत्। तर्हि भूतलेऽघटत्वस्य ज्ञातत्वादेश्चाभावः स्यात्। तथाच व्यवहारविलोपः। सम्बन्धश्च न संयोगः समवायो वान्यतरो वा बाधादसिद्धेर्वा। नापि सम्बन्धमात्रं, ज्ञापकत्वादिना सिद्धसाधनात्। नाप्यविशिष्टव्यावृत्त-विशिष्टज्ञाननियामकः, अभावज्ञानादाविव स्वरूप-सम्बन्धेनार्थान्तरत्वात्। न च सम्बन्धिभिन्नत्वं साध्ये

असदाक्षेपस्य स्वरूपेण विशेषणाद्यनुपधानेनेत्यर्थं कल्पयित्वा दूषयति, 'समवायमिति, 'स्वरूपेणेत्यस्यार्थान्तरासम्भवादित्यभिमान परस्येति। 'विशिष्टबुद्धित्वादिति[१] विशेषणधीजन्यबुद्धित्वात् अतद्व्यावृत्तधीजनकबुद्धित्वादित्यर्थः, वस्तुतो विशेषणत्वगोचरबुद्धित्वादिति हेत्वर्थः। प्रतियोगित्वलक्षणस्य विशेषणत्वस्य समूहालम्बनभेदाय विशिष्टज्ञानविषयत्वस्वीकारात्। दृयांस्तु परं विशेष-सम्बन्धविषयत्वेऽपि तत्प्रतियोगित्वं तदवच्छिन्नविशेष्यनिरूपितमेव। अत एव वायौ समवायसत्त्वेऽपि न रूपवानिति धीस्तन्निरूपित-विशेषणत्वस्य रूपे तन्निरूपितविशेष्यत्वस्य च वायावभावादेतदभावे विवक्षितहेत्वोरप्यवच्छेदकाज्ञानादज्ञानापत्तेरिति भावः। अतद्व्यावृ-

---

(१) 'विशिष्टप्रतीतित्वादित्यत्र 'विशिष्टबुद्धित्वादिति पाठधारणं कस्य-चित् मूलपुस्तकस्य तादृशपाठमनुरुध्येति ध्येयं।

विशेषणम्, अभावज्ञानादिना व्यभिचारात्। बाधकाभावस्य च विशेषणत्वं हेतौ निरस्तमेव विनापि भिन्नसामग्र्यभावज्ञानादाविव विशिष्टधीसम्भवेनाप्रयोजकत्वाच्च। विशेषणताविशेषरूपः प्रकारादिकृतो वा विशेषः सम्बन्धाविषयत्वेऽपि तुल्यः। स्यादेतदवयव-गुण-क्रिया-जाति-तद्वतामिह तन्तुषु घट इह पटे शौक्लमिह चलनं पटत्वञ्चेतीहप्रत्यय आधाराधेय-

---

त्तधीजनकत्वमुक्तावच्छेदेन, हेतुस्तु तदेव, तत्रैव तर्कसम्भवेन व्याप्तिग्रहात् तथाहि अतद्व्यावृत्तिः संसर्गविशेषावच्छिन्नविशेषणाभाववद्व्यावृत्तिः, सा च तदा विशिष्टज्ञानेन जन्येत यदि विशिष्टधीस्तत्संसर्गगोचरा स्यात्(१), तत्संसर्गविषया धीस्तद्विशेषणसंसर्गाभाववद्व्यावृत्तिबुद्धिं जनयतीत्येवानतिप्रसक्तस्य नियामकस्य सम्भवादिति सारम्(२)। 'दण्डिज्ञानवदिति, यद्यपि दण्डो नेह विशेषणं, किन्तु मतुबर्थसम्बन्धः, स च संयोगरूप इति तद्विशिष्टबुद्धिः पक्षसमा न दृष्टान्त इति, तथाप्येतच्छब्दाभिलप्यमाना प्रत्यक्षप्रतीतिर्दण्डप्रकारिका दृष्टान्तो द्रष्टव्या अन्या अन्यथा प्रतिपादनासम्भवेनोक्तवाक्येनैव प्रतिपादनात्। यद्वा उपलक्षणतया द्रव्यविशेषणिका पश्वादिशब्दजन्या धीर्दृष्टान्ततया विवक्षिता, तत्र लाङ्गूलादेः प्रवृत्तिनिमित्तत्वं न तत्सम्बन्धस्य गौरवादिति गोपदाद्गोत्वस्यैव प्रकारत्वादिति द्रष्टव्यं

---

(१) तत्संसर्गविषया स्यादिति ख०।
(२) इति ध्येयमिति ख०।

सम्बन्धनिमित्तकः यथार्थेऽप्रत्ययत्वात् इह कुण्डे बदरमिति प्रत्ययवदिति चेत् । न । इह भूतले घटाभावो घ्राणश्चेत्यादौ व्यभिचारात् बाधकं विनेत्यस्य निरस्तत्वात् तथैवाधाराधेयभावादेवोपपत्तेश्च । उत्पत्तये स्थितये घ्रप्तये चापेक्षणीयस्याधारत्वात् ।

अन्ये तु शब्द-जाति-रूपादिरिन्द्रियसम्बद्धः प्रत्यक्षत्वात् घटवदित्यनुमानात् संयोगबाधे इन्द्रियसम्बन्ध-

---

'तद्विषयकत्वासिद्धेरिति परेण तथात्वासिद्धेः तं प्रति तस्याः प्रमाणीकरणात्तमत्वादित्यर्थः । 'अन्यथेति अन्यतरासिद्धविषयिताकायाः प्रसाध्याङ्गिकायास्तस्या एव तत्र मानत्व इत्यर्थः, 'अन्योन्येति तस्याः समवायविषयत्वसाधनं समवायसिद्ध्यधीनन्तत्साधने च सिद्धे तस्यास्तद्विषयत्वे ततः समवायसिद्धौ साध्यप्रसिद्धिरित्यन्योन्याश्रय इत्यर्थः । यथाश्रुते क्वाप्येवं प्रत्यक्षं नार्थं साधयेदित्यन्योन्याश्रयानवकाशादिति । 'सम्बन्धमात्रं' उभयनिरूप्यधर्ममात्रम् । 'नाप्यविशिष्टेति, 'अविशिष्टपदं अविशिष्टधीपरं, अविशिष्टस्यासम्बद्धवचनस्य यथाश्रुतस्यान्योन्याश्रयग्रासात् अविशिष्टधियस्तु विशेषणत्वागोचरबुद्धित्वेन[1] निर्वचनात्, तथा च तद्ग्राह्यत्वं तदजनकत्वं तद्विषयकत्वे साध्ये नीलविषयकत्वेनैव सिद्धसाधनं नीलस्य नीलाविशिष्टधीरूपनीलाभावज्ञाने अजनकस्य नीलविशिष्टज्ञाने विषयत्वात्, एवञ्च तदजनकं

---

(१) विशेषणत्वागोचरार्थत्वेनेति क० ।

घटकतया समवायसिद्धिः इन्द्रियस्य सम्बद्धग्राहकत्वात्। अत एव समवायो न प्रत्यक्ष इन्द्रियेणासम्बन्धात्। न च सम्बन्धत्वेन तत्सिद्धिः, अनवस्थानात् स्वभावादेव ज्ञानवत् स्वसम्बद्धव्यवहारकारित्वाच्च। समवायो हि सम्बन्धं विनैव स्वभावादेव कस्यचित्। न च जात्यादेरपि स्वभावादेव स्वसम्बद्धव्यवहारकारित्वे समवायविशेषः, जात्यादेरिन्द्रियासम्बन्धे समवायवदप्रत्यक्ष-

---

सद्विशिष्टधीनियामकं यत् तद्विषयकत्वं साध्यमिति साध्यतावच्छेदकनिरुक्तिरियं द्रष्टव्या न तु सम्बन्धनिरुक्तिः, येनातीन्द्रियसम्बन्धाव्याप्त्यादिदूषणावसरः। तथाच प्रत्यक्षनीलादिविशिष्टबुद्धिं पक्षयित्वा तादृशदण्ड्यादिबुद्धिं दृष्टान्तयित्वा समवाये साधिते विशेषणविशेष्यान्यविशिष्टधीविषयत्वेन सम्बन्धसामान्यं निर्वाच्यमिति नैतत् सम्बन्धनिर्वचनभ्रमनिबन्धनं सामानाधिकरण्यप्रविष्टसम्बन्धगर्भतया व्याप्त्यादिलक्षणे चक्रकप्रसङ्गनमित्यवधेयं। नियामकत्वन्तु जनकत्वमेव तेनाविशिष्टज्ञानाजनकं सद्विशिष्टधीजनकं तदसाधारणकारणमुच्यत इति तद्विषयत्वं साध्यं। न चाग्रे 'सम्बन्धनिमित्तकः' इति साध्ये विशिष्टज्ञानासाधारणकारणनिमित्तकः इति पर्य्यवसितोऽर्थः स्यात् तथाच सिद्धसाधनमिति वाच्यम्। विषयत्वे साध्ये निमित्तत्वस्य, निमित्तत्वे साध्ये विषयत्वस्य नियामकपदेन विवक्षितत्वात्। यद्वा व्यापकत्वमेव नियामकत्वं यथाश्रुते त्वविशिष्टत्वस्यासम्बद्धपर्य्यायतयान्योन्याश्रयादित्युक्तम्। ननु सम्बन्धाविषयत्वे समूहालम्बनावि-

त्वापातादिति । तन्न । समवायस्वीकारेऽपि स्वरूप-सम्बन्धस्यावश्यकत्वात् । घट-ज्ञानयोर्भूतलाभावयोरिव वा द्रव्येण गुण-जात्यादिभिः स्वरूपमेव सम्बन्धोऽस्तु, तथा च शब्दस्येन्द्रियविशेषणतया, शब्दत्वस्य विशेषण-विशेषणतया, रूपादि-जात्यादेरिन्द्रियसम्बद्धविशेषण-तया, रूपत्वादेरिन्द्रियसम्बद्ध-विशेषण-विशेषणतया स्वभावसम्बन्धरूपया ग्रहणसम्भवे किं समवायेन। द्रव्ये स्वभावसम्बन्धात्मेन्द्रियेण ग्रहणमिति कथं गुणादेस्तेन

शेषापातो विशिष्टज्ञानस्येत्यत आह, 'विशेषणतेति सम्बन्धविषयक-समूहालम्बनवारणाय सम्बन्धविषयत्वे विशिष्टज्ञानस्य स्वीकृतेऽपि विशेषणतादिकृत एव विशेषो वाच्य इत्यर्थः। 'अत एवेति, यद्यपि प्रत्यक्षत्वेनेन्द्रियसम्बन्धसाधने सम्बन्धाभावादप्रत्यक्षत्वसाधनम-शक्यमन्योन्याश्रयात् तथाप्यतिरिक्तसम्बन्धाभावे समवाये सर्वथा प्रमिते स एवाप्रत्यक्षत्वे तन्त्रं। अत एव सम्बन्धत्वेनातिरिक्तसम्ब-न्धसाधनसेवाशङ्कानवस्थया परिजहार। न चैवमभावस्याप्रत्यक्षत्वम्, भावविशेषणतायाः सम्बन्धान्तरनियतत्वात् अभावे तु तदभावेऽपि विशेषणतायाः सत्त्वादिति तेषामभिसन्धिः। ननु प्रामाणिकत्वनवस्थेत्यत आह, 'स्वभावादिति, अन्यथोपपत्त्या प्रामाणिकत्वाभावादिति भावः। ननु सम्बन्धाव्यवहारकारित्वं स्वभावादसम्भवि सम्बन्धान्तरमन्तरेण रूपाद्यसम्बन्धे तस्य रूपादीयत्वेनानुपस्थित्या केवलस्य च कदाचिदग्रहेण

ग्रह इति चेत्, समवायेनापि न द्रव्यग्रहणमिति तुल्यम् ।

अपरे त्वेकत्र घटे आमपाकदशायां क्रमेण श्याम-रक्तरूपोपलम्भोऽस्ति, स च न तदुभयनिबन्धनः, रूपस्य नित्यत्वेनैकदोपलम्भापत्तेः । नित्यत्वादेव च न तयोरुत्पाद-विनाशौ, तस्मात्तयोः सम्बन्धस्य तौ स्यातां, स एव समवाय इति । तन्न । श्यामन्नष्टं रक्तमुत्पन्नमित्यबाधितानुभवात् समवायस्योत्पाद-विनाशानुल्ले-

---

रूपादिषु समवायीतिप्रतीत्यभावादित्यत आह, 'समवायोऽपीति, यथा स्वभावादाश्रये सम्बन्धस्तथा स्वभावादेव रूपादीयोऽपि इति प्रतियोगित्यनुयोगिनि च स्वभाव एव शरणमिति भावः । अत्र भावानामित्यादिनियमस्याप्रयोजकत्वाद्व्यभिचाराच्च नैतदित्यभिसन्धायाभाववद्विशेषणतयैवोपपत्तेरनुमाने सिद्धसाधनमित्याह, 'समवायेति । अत एव 'घट-ज्ञानयोरिवेतिव्यभिचारस्थानमेव दृष्टान्तत्वेनादावुदाजहार । ननु घट-ज्ञानयोर्न्न विशेषणतेन्द्रियप्रत्यासत्तिरसन्निकृष्टस्यैव घटादेर्म्मनसा ग्रहाद्विशेषणसन्निधेरहेतुत्वादित्यस्वरसादाह, 'भूतलेति यथा तत्रेन्द्रियसम्बद्धविशेषणता तथाऽत्रापीत्यर्थः । 'समवायेनापीति, समाधिसौकर्य्यादिदमुक्तम् । वस्तुतः प्रमाणसिद्धतया तत्र संयोगाभ्युपगमो न सा प्रत्यासत्तिः, कृत्नविशेषणताया एव सर्व्वत्र प्रत्यासत्तित्वमित्यभ्युपगमेऽपि तस्य क्षत्यभावादिति । 'अनुल्लेखादित्युपलक्षणमसम्भवाच्चेत्यपि द्रष्टव्यम् । समवाय्यसमवाय्यादिभावानुत्पत्तेः विनाशकाभावाच्च

खाच। त्वन्मते तस्यातीन्द्रियत्वात्। अन्यथावयविघ्राण-गन्ध-रसादेरपि नित्यत्वं समवायस्योत्पाद-विनाशाविति किन्न रोचयेत्। न ह्युत्पाद-विनाशप्रतीतिरप्रामाणिकी बाधकं विनेति।

उच्यते। गुण-क्रिया-जातिविशिष्टबुद्धयो विशेषण-सम्बन्धविषयाः विशिष्टबुद्धित्वात् दण्डीतिबुद्धिवत्। न च व्यभिचारः, अभावादिविशिष्टबुद्धेरपि स्वरूपसम्बन्धविषयत्वात्। न चैवमत्रापि तेनैवार्थान्तरं, यतो गुण-

---

नाशानुत्पत्तेः(१) इत्युक्तत्वादिति। 'लाघवादिति, ननु यत्रैव माने लघु-गुरुविषयता सम्भवति तत्रैव लाघवं सहकारि, इह तु न तथा, तथा हि तावतीर्बुद्धीः पचयित्वैव समवायसाधनानियमात्(२) गुणादि-विशिष्टबुद्धिमात्रपक्षतायामुक्तलाघवानवतारात् तथाभावे वा द्रव्यविशिष्टबुद्धिमपि पचयित्वा तदन्तर्भावेनापि समवायसिद्ध्यापत्तेः। न च तत्र बाधः, उक्तलाघवसहकृतोक्तानुमानात्समवायस्य तत्र स्यात् संयोगस्येत्यत्राविरोधात्, तथाच पक्षवाऽऽख्यावाऽऽख्यघटितं लाघवमनादेयमनियतत्वात् नियतसिद्धिहेतौ नियतलाघवस्यैव सहकारित्वात्। लाघवप्रतिसन्धानस्यैवं यथा नानाकार्ये कर्त्रैक्यं कार्यनानात्वं दृष्टमित्युभयोरुपस्थितौ कर्त्रैक्ये लाघवादेकः कर्त्ता, तथा नानावि-

---

(१) नाशाभावादिति क०।
(२) समवायसाधनानावश्यकत्वादिति ख०।

क्रिया-जातिविशिष्टबुद्धीनां पक्षधर्मतावशेन विषयः सम्बन्धः सिध्यन् लाघवादेक एव सिध्यति, स एव समवायः, न तु स्वरूपसम्बन्धः, तत्तत्स्वरूपाणामनन्तत्वात् सम्बन्धत्वेनाकृप्तत्वाच्च। अथवा विशेषणसम्बन्धनिमित्तका इति साध्यं हेतौ तु सत्यत्वं विशेषणं, विशे-

---

षणसम्बन्धे एकत्वानेकत्वदर्शनादेकत्वे लाघवमिति। न चैतत् क्वापि दृष्टम्, विशेषणभेदेन सम्बन्धभेदादिति कुतो लाघवावतार इति। अत्राहुः प्रत्येकविशिष्टबुद्धेरेव पक्षभूतायाः सम्बन्धविषयत्वे साध्यमाने सम्बन्धत्वावच्छिन्नस्यानेकत्वे गौरवादेक एव तथा सिद्ध्यति, स्वरूपसम्बन्धस्य सम्बन्धिद्वयात्मकत्वेन गौरवादिति तदुक्तं। 'तत्तत्स्वरूपाणां' सम्बन्धिद्वयस्वरूपाणामित्यर्थः, न त्वन्यविशिष्टबुद्धिविषयीभूतस्वरूपाणामिति, तत्पक्षानुपस्थितौ समवायासिद्धिप्रसङ्गादिति। नन्वभावस्थले सम्बन्धिद्वयात्मनः स्वरूपसम्बन्धस्य कल्पनाद्विपरीतं लाघवमत आह, 'सम्बन्धत्वेनेति, अभावस्य सम्बन्धत्वं क्लृप्तमन्यस्य गुण-गुणात्मकस्वरूपस्य सम्बन्धत्वेनाकल्पनात् इहैव तत्कल्पनायां धर्मकल्पनालाघवमपि नादरणीयम्, उभयत्र सम्बन्धत्वधर्मकल्पनस्योभयकल्पनात्वेन तदवच्छिन्नैककल्पन एव लाघवादिति भावः। ननु प्रतीतेर्विषयनियमोऽनुभवाद्वा सामग्रीभेदाद्वा व्यवस्थाप्यते न लाघवात् अन्यथा विशेषण-विशेष्यमात्रविषयत्वे लाघवात् सविषयत्वानुमानात् सम्बन्धाविषयत्वमेव स्यादिति विपरीतमेव लाघवमाप-

षणसम्बन्धश्च कारणत्वेनैक एव सिध्यति लाघवात् अनुगतकार्यस्यानुगतकारणनियम्यत्वाच्च। न तु स्वरूप-सम्बन्धः, तेषामननुगतत्वादनन्तत्वाच्च। न चोभयमप्य-प्रयोजकं, विशिष्टसाक्षात्कारस्य सम्बन्धाविषयत्वे तद्-जन्यत्वे वा गवाश्वादावपि विशिष्टबुद्धिप्रसङ्गात्।

तितमित्यस्वरसात् साध्यान्तरमाश्रित्य तत्साधनमाह, 'अथवेति, अत्र पक्ष-हेतु-दृष्टान्तेषु बुद्धिपदं प्रत्यक्षपरतया द्रष्टव्यम्, अन्यथा व्यभिचाराद्यापत्तेः। नन्वेवं लाघवानुरोधाद्यद्येकत्वं तर्हि संयोगि-न्यपि समवायापत्तिः। न चानुभवसिद्धसंयोगाद्बाधः, प्रमाणसमा-हारे प्रमेयसमाहराविरोधादिति। मैवम्। अनुगतसंयोगत्वाव-च्छेदेन सम्बन्धत्वस्य कृप्तत्वादन्यसम्बन्धकल्पने लाघववैपरीत्यात्। न च गुण-गुणादिद्वयेष्वप्येवमनुगतमस्ति धर्मान्तरम्, येन कृप्तता-लाघववैपरीत्यं स्यादिति भावः। ननु माभूल्लाघवमितोऽप्यनु-गततत्सिद्धिरित्याह, 'अनुगतेति, गुण-कर्मादिविशिष्टबुद्धीनामेव तेन विषयेणानुगतानां विशेषणसमवायमन्तरेणानुगतस्य नियामकस्याभावात्। न च विशेषणसम्बन्धत्वेनैवानुगमः, सम्बन्धत्वस्य विषयत्वादिगर्भस्य जनकतानवच्छेदकत्वेन द्रव्यविशिष्टप्रत्यक्षे संयोगत्वे-नानुगतस्येव गुणादिविशिष्टप्रत्यक्षे समवायस्यैव नियामकत्वात्[1]।

---

(१) सम्बन्धत्वस्य विषयत्वादिगर्भस्य जनकतानवच्छेदकत्वेन संयोग-समवायत्वादिनैव तत्तद्विशिष्टबुद्ध्यनुगतहेतुत्वादिति ख०।

नव्यास्तु गुण-क्रिया-जातिविशिष्टबुद्धिः सम्बन्धि-भिन्नविशेषणसम्बन्धविषया निर्विषयकाभावविशेषणक-विशिष्टबुद्धित्वात् इतरनिरूपणानिरूप्यविशेषणकविशि-ष्टबुद्धित्वाद्वा अतोऽभावादिविशिष्टबुद्धौ न व्यभिचारः।

अभावविशिष्टप्रत्यक्षे त्वभावत्वेनानुगतस्य तस्यैव(१) स्वरूपसम्बन्धरूपत्वात् गुणादौ च तथानुगतस्याप्येकस्याभावादिति भावः।

अन्ये तु अनुगतस्य भावकार्य्यादेरनुगतसमवायिकारणादिहेतु-कत्वादपि समवायसिद्धेः अभिमतसमवाये मानान्तरमनेन सूचितं, स्वरूपसम्बन्धेन चान्यथासिद्धौ ध्वंसस्थलेऽपि भावोत्पत्तेराश्रयनाशे ध्वंसनाशादिरापद्येतेति वदन्ति।

गुणादिविशिष्टबुद्धयो विशेषणसम्बन्धविषया इत्येव साध्यं हेतुस्तु विशिष्टज्ञानत्वादित्येव। न चाभावज्ञानादौ व्यभिचारः, तदा तत्सत्त्वेऽपि तत्प्रतिसन्धानानियमेन(२) तत्साधारणसमवायसिद्धौ क्रमेण बाधाव-तारात्तदंशे समवायबाधात् स्वरूपसम्बन्धकल्पनात्। अत एव न तेन तदार्थान्तरं समवायबाधोत्तरकालकल्प्यस्य स्वरूपसम्बन्धस्य तदानीमकृप्तत्वात्। न च व्यभिचारिलिङ्गजन्यत्वादनुमितेर्भ्रमत्वापत्तिः, साध्यवति कूटलिङ्गकानुमितेरपि प्रमात्वात्। वस्तुतो व्यभिचारो

---

(१) अभावविशिष्टबुद्धेरभावत्वेनैवानुगतस्य तस्येति ख०।

(२) तदप्रतिसन्धाननियमेनेति ख०।

न चाप्रयोजकं, निरुपाधिसम्बन्धशालित्वात्। सम्बन्धश्चा-विशिष्टव्यावृत्तविशिष्टधीनियामकः। यद्वेन्द्रियप्रत्यास-त्तित्वेन समवायसिद्धिः। तथाहि गुण-क्रिया-जाति-साक्षात्कार इन्द्रियसम्बन्धसाध्यः जन्यप्रत्यक्षत्वाद्दण्ड-ज्ञानवदित्यतः साक्षात्सम्बन्धबाधकारणत्वेनेन्द्रियसंयुक्ते सम्बन्धः सिध्यन् पक्षधर्मताबलाल्लाघवेनानुगतः सम-वाय एक एव सिध्यति अनुगतकार्य्यस्यानुगतकारण-

---

नाख्येव सम्बन्धविषयत्वस्य सत्त्वात् तदानीं स्वरूपसम्बन्धमादाय सम्बन्धविषयत्वाग्रहेऽपि साध्यसत्त्वात् इति समवायसाधनन्निष्प्रत्यूह-मिति ध्येयम्। 'नव्याख्यित्यस्वरसोद्भावनं[१]; तद्बीजन्तु उक्तलाघ-वादरे वृथा विशेषणोपादानप्रयासः, तदनादरे विशेषणोपादानेऽपि न फलसिद्धिरप्रयोजकत्वात् समवायसिद्ध्यनन्तरं तेनैव हेतुना तदतिरिक्तसम्बन्धसाधनञ्च स्यादिति प्रतिकूलतर्कपराहतत्वाच्चेति। 'निर्विषयेति निर्विषयकभावमात्रविषयकविशिष्टबुद्धित्वात्, एवं उत्त-रत्रापि, यथाश्रुते भूतले घटाभाव इत्यादिबुद्धौ व्यभिचारात्, ज्ञाना-दिविशिष्टबुद्धेश्च पक्षे नान्तर्भावो येनैवं भागासिद्ध्यापत्तिः। वने सिंहनाद इत्यादिबुद्धेर्वनावच्छिन्नस्यातिरिक्तस्य नभोभागस्यापि विष-यत्वान्न व्यभिचारः, तदविषयत्वे भ्रान्तित्वमेव बुद्धित्वेन प्रमात्वस्यैव हेतौ विवक्षणादिति सर्वं सुस्थम्।

---

(१) 'नव्याख्यित्यस्वरसाविष्कार इति ख०।

जन्यत्वात्। न तु संयुक्तविशेषणतारूपस्वरूपसम्बन्धः, तस्य च तत्तद्रूपादिरूपत्वेनाननुगतत्वात्। एवं रूपत्व-रसत्वसाक्षात्कारेऽपि कारणत्वेनेन्द्रियसम्बन्धः समवाय स्वानुगतः सिध्यति लाघवात्, न त्विन्द्रियसम्बद्ध-विशेषणता तस्या रूपत्वादिस्वरूपत्वेनाननुगतत्वात्। अत एव संयोगो विशेषणता च प्रत्यासत्तिरस्तु न तु समवायादिचतुष्टयमिति निरस्तम्। तस्यास्तत्तत्स्वरू-पत्वेनाननुगतत्वात्। प्रत्यासत्तित्वेनाभ्युपगते च सम-वाये प्रत्यक्षता सम्बन्धिद्वयप्रत्यक्षत्वात्। नन्वेवम-भावविशिष्टप्रत्यक्षेऽपि विशिष्टबुद्धित्वात् संयोग-सम-वायवाधेऽनुगतं वैशिष्ट्यं सम्बन्धो विषयः निमित्तञ्च भवेदिति चेत्। न। तस्य हि समवायवदेकत्वे घटा-भाववति पटवति पटाभावधीप्रसङ्गः घटाभाववैशिष्ट्य-मेव हि पटाभाववैशिष्ट्यं। पटाभाववैशिष्ट्यसत्त्वेऽपि पटाभावो नास्ति ततः तस्य भिन्नत्वादिति चेत्। न। पटाभावाभावस्याभावत्वे सोऽपि वैशिष्ट्येन सम्बन्धेन तत्रास्ति वैशिष्ट्यस्यैकत्वात्, पटाभावाभावस्य भावत्वे

उक्ततर्कसहकारपुरस्कारेण वैशेषिकानुमानमपि सम्यगिति मत्वा तदुपन्यस्यति, 'यद्वेति, 'पटाभावस्येति प्रतिबन्धकाभावमात्रहेतुत्वेऽति-प्रसङ्गात्तत्सम्बन्ध एव हेतुर्वाच्यः, स चास्त्येव, तथासत्यपि कार्य्याभावे

च पट एव प्रतिबन्धको वाच्यः। एवं पटाभावः पटाभावधीहेतुः स्यात्। पटाभावस्य वैशिष्ट्येन सम्बन्धेन तत्रास्त्येव। वैशिष्ट्यस्य प्रत्यभावव्यक्तिनानात्वे चाभावविशिष्टबुद्धौ नैकः सम्बन्धः कारणं विषयो वेति तदभावप्रत्यक्षेऽननुगतमेव वैशिष्ट्यं विषयः कारणञ्च वाच्यं तथाचाननुगततत्तत्स्वरूपरूपा विशेषणतैवास्तु कृतत्वात् किमनन्तवैशिष्ट्येन, समवायस्य वैशिष्ट्यस्य च प्रत्यक्षत्वे त्वयापीन्द्रियसम्बद्धविशेषणतास्वीकारात्। ननु समवायस्यैकत्वे कथं रूपि-नीरूपव्यवस्था। घटेन सह रूपसम्बन्धरूपत्वं समवायस्य न वायुनेति चेत्। न। रूपसम्बन्धरूपत्वं हि समवायस्य स्वरूपमेव यदि तदा रससम्बन्धरूपत्वं न स्यात् तयोर्विरोधात् अन्यच्च दुर्वचमिति चेत्। उच्यते। वायौ रूपसमवायसत्त्वेऽपि रूपा-

---

न पटस्य प्रतिबन्धकतैव नैकवैशिष्ट्यपक्षे, सा हि तदा भवति यदि पटवति देशे[१] पटाभावसम्बन्धो न स्यादित्यर्थः। समवायस्यातीन्द्रियत्वपक्षमाश्रित्य 'वैशिष्ट्यस्य चेत्युक्तं। प्रतिबन्धिमाशङ्कते, 'समवायेति, 'रूपसम्बन्धरूपत्वमित्यत्र विशेषणत्वपक्षे दोषमाह, 'रूपेति, प्रकारान्तरेण विशेषणत्वं दुर्वचं। उपलक्षणत्वपक्षे स एवातिप्रसङ्ग इत्याह,

---

(१) यदि घटाभाववति पटवति देशे इति ख०।

त्वनाभावोऽस्ति न घटे । कथमेवं, अधिकरणस्वभावात् अबाधितरूपि-नीरूपप्रतीतेश्च । नन्वेवं ज्ञातो घट इति प्रतीतेर्ज्ञातताऽपि स्यात् वर्त्तमाने बाधकाभावात्, अतीतानागतयोश्च तद्धीर्भ्रान्तेति चेत् । न । अतीतानागतयोर्ज्ञातताया अभावे व्यवहाराभावापत्तेः तस्य ज्ञातताऽसाध्यत्वात् । न च ज्ञातताज्ञानमेव व्यवहारहेतुः, गौरवात् अतीतादौ ज्ञान-तद्विषयावेव ज्ञातताधीगोचराविति चेत्, तर्हि वर्त्तमाने तावेव तद्विषयौ । न अतीत-वर्त्तमानयोर्ज्ञातताप्रतीत्योर्विषयवैलक्षण्य-

---

'अन्यचेति । 'अधिकरणेति, न चाभावेऽप्येवं वक्तुं शक्यं । स्वभावो हि वस्तूनां यावद्द्रव्यभावी, तथाच यदि भूतलस्य घटाभावाद्यधिकरणत्वं रूप-तदभावाधिकरणत्ववत्स्वभावः स्यात्तदा सदा तथाभावापत्तिरित्येकमधिकरणं कालभेदेनाप्युभयाधिकरणं न स्यात् । न ह्यभावाधिकरणवदुभयोरप्यधिकरणे द्विरूपतास्ति येनाधिकरणस्वाभाव्यं न व्यवस्थाप्येत । नन्वेवं पाकरक्ते घटे श्यामाधिकरणताप्रत्ययप्रसङ्गस्य श्यामाधिकरणस्वभावत्वाद्रक्ताधिकरणत्वाप्रत्ययश्चैकस्य विरुद्धानधिकरणस्वभावत्वादिति(१) चेत् । न । तादृशोपनीतभानस्येष्टत्वात् । अतादृशप्रत्यक्षस्य तदधिकरणत्वेऽपि तदभावादेवाभावात्तत्र विषयस्यापि हेतुत्वात् । अभावस्थले तु घटाभावस्य स्थानान्तरे तस्यैव

---

(१) एकस्य विरुद्धद्वयाधिकरणस्वभावत्वविरोधादितीति ख० ।

मीमांसामहे[१]। ननु रूप-घटयोर्न समवायः किन्त्वभेदः, दण्डी पुरुष इत्यत्र दण्डि-पुरुषयोरिव नीलो घट इत्यत्रापि नील-घटयोरबाधिताभेदानुभवात्। नीलो घटो दण्डी पुरुष इति बुद्धेर्विशेषणसम्बन्धमात्रगोचरत्वे नीलो घटइतिवद्दण्डः पुरुषः, दण्डी पुरुष इतिवत् नीली घट इत्यपि स्यात्। तस्मादेकत्राभेदो विषयः, अपरत्र विशेषणसम्बन्धः, विषयेणैव धियां विशेषात्।

मत्वेन विषयाभावस्यात्रैव वक्तुमशक्यत्वात्। उभयाधिकरणतायाश्चैकत्राविरोधात् श्याम-रक्तयोरेव तथा विरोधात्। नन्वयं स्वभाव एव कथं अवधारित इत्यत आह, 'अबाधितेति, तस्मान्नेयं प्रतिबन्धिर्व्यत्समवायसत्त्वादेव रूपप्रतीतिरिति। वस्तुतस्तु परमते दण्डीत्यादावपि दण्डवैशिष्ट्यं विषयो न तु दण्डादिरपि, अत एव क्षणानामनाकलनेऽपि तदाहितवैशिष्ट्यमादायाग्रहीतग्राहित्वं धारावहनबुद्धीनां तैरेवाशङ्कितं कुसुमाञ्जलौ। समूहालम्बनव्यावृत्तये विशिष्टज्ञानस्याकृप्तवैशिष्ट्यं धर्मिग्राहकमानाद्विशिष्टज्ञानमात्रगोचरस्य च विशेषणं न विषय एवेति लीलावतीप्रकाशे स्फुटं। अतस्तं प्रति प्रतिबन्धिः पटाभावाभावेऽपि पटाभाववैशिष्ट्यगोचरात्मनः पटाभावविशिष्टज्ञानस्यापत्तिः। अस्माकन्तु सत्यपि समवाये रूपाभावेन रूपविशिष्टज्ञानस्यानुत्पत्तिरिति[२] वैषम्येण प्रतिबन्ध्युद्धारात्। अत

---

(१) विषयवैलक्षण्यमेवमीमांसामहे इति ख०।
(२) रूपविशिष्टप्रत्ययस्यानुपपत्तिरितीति ख०।

अथवा विशेषणता-विशेष्यतावच्छेदकयोर्नीलत्व-घटत्वयोरेकवृत्तित्वं ज्ञायते, दण्डित्व-पुरुषत्वयोरिव पुरुषे। एवं नील-घटपदयोः शाब्दमपि सामानाधिकरण्यं युज्यते, नीलत्व-घटत्वाभ्यां भिन्नप्रवृत्तिनिमित्ताभ्यां तयोरेकप्रवृत्तेः। न च मतुपोरोपादभेदोपचाराद्वा नीलपदं नीलवत्परमिति वाच्यं। न हि प्रयोगं साधकं ब्रूमः, किन्तु नील-घटयोरभेदप्रतीतिं। पक्षेऽपि नोपचारादिकल्पना गौरवात् मुख्ये बाधकाभावाच्चेति। उच्यते। शुक्ल-पटशब्दयोरेकार्थत्वे घटः कुम्भ इतिवत् शुक्लः पट इति सहप्रयोगो न स्यात्। घटस्य पटग्रहवत् रूपग्रहः, रूपाग्रहवत् पटाग्रहोऽपि

वयम् रूपसमवायसत्त्वे कथं रूपाभावः संसर्गावच्छिन्नप्रतियोगिताकस्य तस्य सति संसर्गेऽसत्त्वात्। अन्यथा घटवति भूतले संयोगावच्छिन्न-घटाभावापत्तेः। न च तथा प्रत्ययाभावात् मास्तु घटाभाव इह तु प्रतीत्यनुरोधाद्रूपसमवाये सत्यपि रूपाभावः स्यादिति वाच्यम्। इह रूपमिति प्रतीतेः। न चेदमसिद्धं, अभावप्रत्ययानुरोधेन तथापि तादृशप्रतीतेर्वाच्यत्वात्। न च सारोपरूपेति वाच्यम्। अभावप्रतीतेः सत्यत्वे तस्यास्तथात्वस्य वक्तव्यत्वात्तथाच तत्प्रमात्वेन वैपरीत्यस्यापत्तेः। प्रत्युत येन सम्बन्धेन यद्यत्रास्ति तत्सम्बन्धपुरस्कारेण तत्र तज्ज्ञानं प्रमेति रूपवत्त्वधीरेव प्रमा स्यात्, यत्संसर्गाव-

वा स्यात्। महारजतरक्ते पटग्रहवत् शुक्लग्रहः शुक्लाग्रहवत् पटाग्रहोऽपि भवेत्। पटमानयेत्युक्ते यत्कञ्चिच्छुक्लमानयेत्। अपटः पट इति वदशुक्लः पट इति विरुध्येत, पट-शुक्लयोरभेदात्। अग्निसंयोगादेकत्र श्यामरक्तयोर्विनाशोत्पादे घटस्य तौ स्यातां। घटसत्त्वे वा तयोरपि[1] न स्यातां। अथ शुक्लत्वादीनां द्रव्यभेदात् तद्बोधार्थं सह प्रयोगः। अन्धादिना शुक्लादिग्रहे शुक्लत्वादीनामग्रह उपपद्यते। शुक्लत्वादिजातेश्च द्रव्येणाभेदो न समवायः, किन्तु स्वरूपसम्बन्ध इति चेत्। न। शुक्लत्व-मधुरत्व-सुरभित्वोष्णत्वादीनां द्रव्यवृत्तित्वे द्रव्यग्राहकत्वगादिभिर्ग्रहणप्रसङ्गात्। रूपत्वादीनां प्रतिनियतेन्द्रियग्राह्यत्वनियमान्नैवमिति चेत्, रूपत्वादीनां द्रव्यवृत्तित्वे प्रतिनियतेन्द्रियग्राह्यतैव न स्यात् योग्यवृत्तित्वेन जातेर्ग्रहणयोग्यत्वात्। तत्तज्जातित्वे-

---

च्छिन्नो योऽभावः स तत्संसर्गविरहवत्येवेति सोऽभावप्रत्यय एव च भ्रमः स्यात्तस्मादविद्यमानसंसर्गावच्छिन्न एव संसर्गाभाव इति रूपाभावोऽप्येवं, न तु समवायावच्छिन्नः। किन्तु तद्धर्मतालक्षण-

---

(१) अनयोरपीति ख०।

न योग्यत्वेऽननुगमात्। तस्मात् रूपत्वादीनां प्रतिनियतेन्द्रियग्राह्यतापि गुण-गुणिभेदे मानं। अभेदे च कथं पटस्य शुक्लं रूपमिति भेदबुद्धिः। पटो नीलमेति बुद्धिप्रसङ्गश्च। नन्वेकान्ताभेदे सर्वमिदन्दूषणं, वयन्तु भेदाभेदवादिनः। तथाच भेदमादायापौनरुक्त्यादि, भेदाभेदे चोक्तमेव प्रमाणं प्रत्यक्षम्। अथवोभयसिद्धभेदे सामानाधिकरण्यधीरभेदे प्रमाणम्। यद्वा अत्यन्ताभेदे भेदे च न सामानाधिकरण्यमिति तत एव भेदाभेदसिद्धिः। न च भेदाभेदयोः परस्परविरहरूपतया विरुद्धयोः कथमेकत्र समावेश इति वाच्यं। संयोगतदभावयोरिवाविरोधात्। पाकानन्तरं रक्तोऽयं न श्याम इत्यबाधितानुभवबलाच्चैव तदन्योन्याभावविशेषत्वयापि भेदाभेदस्वीकारात्। अन्योन्याभावत्व-

---

स्वरूपसम्बन्धावच्छिन्नः(१) स तु वायौ रूपसमवायसत्त्वेऽपि नास्ति विशिष्टज्ञाने तदेव हि तन्त्रं तद्विषयत्वादेव समूहालम्बनाद्विशिष्टज्ञानमिच्छत इत्युक्तम्। एवं सति समवायसिद्धेः कारणतामात्रेण विशिष्टबुद्धिव्यापकतया परैरप्यवश्याभ्युपेयत्वात्। अन्यथा समूहालम्बनाद्विशिष्टज्ञानस्य विशेषो न स्यादिति धर्म्मसाकाङ्क्षधर्म्मीत्यादितद्विशिष्ट-

---

(१) स्वरूपसम्बन्धविशेषावच्छिन्न इति ख॰

मव्याप्यवृत्तिवृत्ति नित्याभावत्वन्यभावत्वसाक्षाद्व्याप्य-धर्मत्वात् अत्यन्ताभावत्ववत्, नित्येति वा न विशेषणं अव्याप्यवृत्तिप्रतियोगिकप्रागभाव-प्रध्वंसयोरप्यव्याप्य-वृत्तित्वात्। इत्यतोऽपि भेदाभेदसिद्धिः। उच्यते। तस्यैव तत्राभावोऽवच्छेदभेदेन वर्त्तते ज्ञायते च यथा संयोगाद्यभावः, श्यामावच्छिन्नस्य तस्यैवान्योन्याभाव-स्तथैव रक्तावच्छिन्ने, तदन्योन्याभावाभावश्च श्यामा-वच्छेदेन। तदिहापि नीलस्यान्योन्याभावो घटत्वाव-च्छेदेनेति नीलात् घटस्य भेदोऽस्तु, अभेदस्तु नीलान्यो-न्याभावाभावरूपो न घटे घटत्वावच्छेदेनैव विरोधात्। एतावच्छेदेन भावाभावयोरेकत्रावृत्तेरज्ञानाच्च। नाप्य-वच्छेदकान्तरेण, घटत्वावच्छिन्ने घटे तदभावात् तद-

---

ज्ञानलक्षणविवरणे प्रामाण्यवाद एव व्यक्तमुक्तम्। सर्वाणि लक्षणा-नि अतिव्यापकानि इत्याक्षेपप्रकरणे द्रव्यप्रकाशेऽप्ययमर्थः कण्ठरवेण स्फुटीकृतोऽस्ति। तथाच समवायवद्व्यापकत्वेनाभावविशिष्टबुद्धीनां वैशिष्ट्यं सिद्धमेव पटाभाववैशिष्ट्यसत्त्वेऽपि तद्धर्मतावच्छिन्नपटाभावा-भावसत्त्वान्न पटाभावविशिष्टबुद्धिः। तथाभावविशिष्टबुद्धौ व्यापक-वैशिष्ट्यमात्रस्य समवायवदतन्त्रत्वादिति प्रतिबन्धौ सुदृढायामपि वाच्यम् ध्वंसनाशे घटोन्मज्जनमेवोत्तरं द्रष्टव्यम्। न च समवाय-स्वीकारे तदापादनं समवायिनाशस्य समवेतनाशहेतुत्वादिति

ज्ञानेऽपि नीलो घट इत्यनुभवाच्च। न चान्योऽन्याभाव-
रूपो भेदोऽस्तु, अभेदस्तु न भेदाभावः किन्त्वन्य एवेति
वाच्यम्। अभेदव्यवहारे तस्याहेतुत्वात्। तस्मान्नीलो-
घट इत्यत्र नीलसम्बन्ध एव भासते। तथा सति नीली
घट इति धीः स्यादित्युक्तमिति चेत्। नीली घट इत्यत्र
बुद्धौ यदि सम्बन्धविषयत्वमापद्यते तदिष्यत एव। अथ
नीलो घट इतिप्रयोगे सम्बन्धवाचकपदत्वं, तदपी-
यत एव मतुपोलोपादगेदोपचाराद्वा नीलपदमेव
नीलपत्यरमिति। ननु शब्द-रूपादिषु विशेषणता इन्द्रि-
यसम्बन्धविशेषणता वा ग्राह्यकास्तु किं समवायादिना।

वाच्यम्। लाघवेन नित्यसम्बन्धिकारणनाशत्वेन तद्धेतुत्वकल्पनात्
न तु तद्विशेषसमवायिकारणनाशत्वेन। किञ्च समवायत्वं न
जातिरिति वैशिष्ट्यान्यनित्यसम्बन्धत्वेनैव तन्निर्वाच्यम्। तथाच
सारां तथा कारणत्वे गौरवमिति व्यापकत्वेनापि नाभाववैशिष्ट्य-
सिद्धिरिति सङ्क्षेपः। 'उक्तमेव प्रमाणं प्रत्यक्षमिति पटस्य शुक्लं रूपं
शुक्लः पट इत्युभयमित्यर्थः। नन्वत्यन्तभिन्नाभिन्नाभ्यां व्यावृत्तं सदर्था-
पत्तिविधया भेदं साधयेत्तच्च भेदाभेदरूपं वा साध्यं साधयेत्
प्रत्येकं वा, आद्ये अप्रसिद्धिः, अन्त्येऽसाधारणम्। न चासाधारणं सत्-
प्रतिपक्षविधया दोषः स च साध्ययोर्विरोधे, इह च रक्तोऽयं श्याम-
इति दर्शनाद्विरोध एव नास्तीति वाच्यम्। भिन्नकालावच्छेदेना-

अथ विशेषणतायां समवायः, इन्द्रियसम्बद्धविशेषणतायाञ्च संयुक्तसमवायादिरुपजीव्यः तैर्विना तयोरभावादिति चेत्। विशेषणतास्वरूपे तेषामुपजीव्यत्वं न तु तस्याः प्रत्यासत्तित्वेऽपि। तैर्विनापि समवायाभावयोर्विशेषणतासत्त्वात्। संयुक्तसमवायादिरपि तत्रास्तीति चेत्, आस्तां न तु प्रत्यासत्तिः, किन्तु विशेषणतैवक्लृप्तत्वात्। संयुक्तसमवायादिकं विना विशेषणता रूपादौ न ज्ञायत इति चेत्, माज्ञायि। न हि सा प्रत्यासत्ति-

---

विरोधदर्शनेऽपि प्रकारान्तरेणापि विरोधदर्शनादिति। तत्र मानान्तरमाह, 'अन्योन्याभावत्वमिति, 'अव्याप्येति स्वकालावच्छिन्नस्वात्यन्ताभावसमानाधिकरणवृत्तीत्यर्थः, तेन नोक्तस्थलमादाय सिद्धसाधनम्। 'साक्षादिति अभावविभाजकोपाधित्वादित्यर्थः, चतुर्द्धैवाभावविभजनात्, अन्यथा यथाश्रुतेऽत्यन्ताभावत्वे दृष्टान्ते साधनवैकल्यं स्यादिति भावः[१]। अत्र सिद्धसाधनमाह, 'तस्यैवेति। यद्वा पृथगवच्छेदकावच्छिन्नसाक्षवृत्तिवृत्तित्वमुपाधिमाह, 'तस्यैवेति, भेदाभेदवादिमते भेदस्य विरोध एव नास्ति क्वचिदप-

---

(१) यदि अभावविभाजकं संसर्गाभावत्वं अन्योन्याभावत्वञ्च, न त्वत्यन्ताभावत्वं तस्य संसर्गाभावविभाजकत्वात् तदा अत्यन्ताभावत्वरूपदृष्टान्ते अभावविभाजकोपाधित्वरूपसाधनविरहितं स्यादिति भावः।

र्ता, अपि तु स्वरूपसती । नैवम् । शब्दादीनां सा-
क्षात्कारविषयत्वेनेन्द्रियसम्बन्धानुमितौ शब्दादौ सम-
वायादिकं ज्ञात्वैव विशेषणताग्रह इत्यवश्यं प्रथमोप-
स्थितत्वात् समवायादिरेव विषयो न विशेषणता चर-
मोपस्थितत्वात्। ननु अभावग्रहे नेन्द्रियसम्बद्धविशेषणता
प्रत्यासत्तिः चक्षुषा संयुक्ते परमाण्वादौ योग्यस्य जलत्वा-

भावेऽभावादिति नाशङ्कनीयं, गवाश्वादेर्भेद-तदभेदाभावेऽपि
तैरपि स्वीकारात् । न चोभयोर्ब्रह्माभिन्नत्वेन तदभिन्नाभिन्नतया
अभेदसत्त्वात्तत्राप्युभयसमावेश इति वाच्यम् । तैरपि गोत्वादिना
भेदो ब्रह्मत्वेनाभेद इत्यवच्छेदकभेदेनैव तदुभयसमावेशस्वीकारात्,
तदुक्तं 'अवच्छेदभेदेनेतीति भावः । 'नीलो घट इति । न च यदि
समन्धप्रकारिका धीस्तदा तद्वाचकमतुप्प्रयोगापत्तिः, इह च
नीलप्रकारेण वैशिष्ट्यविधया सम्बन्धो विषय इति कथं मतुप्प्रयो-
गापादनमिति(१) वाच्यम् । प्रातिपदिकार्थयोरभेदान्वयस्यैव व्युत्पत्ति-
सिद्धत्वात् । अन्यथा दण्डः पुरुष इत्यपि दण्डप्रकारकं संयोग-
वैशिष्ट्यविषयकं प्रत्ययमादध्यात् । अत एव घटः कर्मत्वमानयनं
क्रतिरित्यादिक्रिया-कर्मभावेन नान्वयं बोधयति, अभेदे चायोग्यमिति
वक्ष्यामः । 'विशेषणतासत्त्वादिति विशेषणताप्रत्यासत्तिसत्त्वादित्यर्थः ।

---

(१) मतुप्प्रसङ्गापादनमितीति ख० ।

देरभावग्रहप्रसङ्गात्, किन्तु स्वग्राह्यसम्बन्धविशेषणता, महति वायावुद्भूतरूपाभावस्य, कुसुमे सौरभाभावस्य, गुडे तिक्तत्वाभावस्य वा न चक्षुरादिना ग्रहोऽपि तु योग्यानुपलब्ध्या सोऽनुमीयते। इन्द्रियविशेषणतापि न प्रत्यासत्तिः, चक्षुरादिना स्वविशेषणजलत्वाद्यभावग्रहप्रसङ्गात्। यदि शब्दाभावः प्रत्यक्षः तदा प्रत्यासत्त्यन्तरं

'शब्दादीनामिति, कर्मसम्बद्धस्यैव करणस्य क्रियाजनकत्वदर्शनादिति सामान्यतो हेतुत्वग्रहोऽत्र मूलम्। इन्द्रियविशेषे संयोगादिसम्बन्धग्रहस्य व्यापारतयापि सत्त्वादिति भावः। 'ज्ञात्वैवेति वस्तुगतिमनुरुध्योक्तं। वस्तुतः पूर्वाज्ञानेऽपि लाघवादनुगमादपि तदानीं तद्विषय एवानुमानप्रवृत्तेरित्युक्तम्। 'चरमेति, तथा प्रथमोपस्थितावपि गौरवेणैव तन्निरसनसम्भवात्। न च कृप्तत्वेन लाघवम्, विशेषणतायाः प्रतिखन्नानात्वेन समवायादिविशेषणतायाः प्रत्यासत्तित्वकल्पनेऽप्येतद्विशेषणतायास्त्वाकल्पनादित्युक्तप्रायम्। 'अपि त्विति[1], रूपाभावो वायुवृत्तिर्योग्यप्रतियोगिकत्वे सति वायुवृत्तित्वेनानुपलभ्यमानप्रतियोगिकत्वादित्यनुमानं द्रष्टव्यम्। अन्यथाऽनुमानेन वायौ रूपाभाव इति वायुविशेषणकरूपाभावविशेष्यकबुद्धेरसिद्धेरिति। 'तदभाव इति शब्दाभाव इत्यर्थः। क्वचित् 'तदभावे' इति पाठस्तत्र 'तद-

---

(१) किन्त्विति ख०।

त्वं। तदभावे प्रत्यक्ष एव न भवतीति चेत्। मैवं। तथापीन्द्रियसम्बद्धविशेषणतैव प्रत्यासत्तिः। न चैवं समवाये ब्राह्मणत्वाद्यभावग्रहप्रसङ्गः, यत्र हि यत्सम्ब-

---

भावे' प्रत्यासत्त्यन्तराभाव इत्यर्थः। 'लाघवादिति। न च लाघवादनुमानमात्रं ग्राहकं, अतिप्रसङ्गश्च स्वग्राह्यसम्बद्धविशेषणताप्रत्यासत्तित्वेनैव निर्वाहसिद्धेति वैपरीत्यमेवास्त्विति वाच्यम्। विशुद्धमातापितृसंनिधानादिव्यञ्जकधीविरहकाले ब्राह्मणत्वाद्यभावग्रहप्रसङ्गेन तादृशयोग्यानुपलम्भस्यावश्यंवाच्यत्वात् स्वग्राह्येत्यादिना तदतिप्रसङ्गवारणादिति। अत एव सम्बद्धत्वं प्रत्यासन्नत्वं तच्चाननुगतमिति तदपेक्षयेन्द्रियग्राह्यत्वमेव लघु इति तद्विशेषणतैव प्रत्यासत्तिरिति प्राञ्चः। ब्राह्मण्याद्यभावग्रहानुरोधेन(१) तादृशयोग्यानुपलब्धेरवश्यं वाच्यतया वायौ रूपाभावप्रत्यक्षतानुरोधेनेन्द्रियसम्बद्धविशेषणतायाः एव प्रत्यासत्तित्वौचित्यात् योग्यानुपलब्धिविषयत्वेनैवाभावस्य योग्यत्वमिति अनुपदमेव वक्ष्यमाणत्वादिति भावः। 'यत्र हीति। ननु वैपरीत्यमेवास्तु, प्रतियोग्युपलम्भविरोधिनी अभावविशेषणता अभावग्राहिका, एवं तादृशविशेषणतास्वीकारे अनुपलब्धिहेतुत्वमेव दुर्लभमुतो वैपरीत्यमिति यदि तदान्यदपि सहदनुकूलं लाघवातिरेकात्, अपिचेत्थं विशेषणतास्वीकारेऽनुगमोऽपि, अन्यथा क्वचित् सम्बद्धविशेषणता, क्वचिदिन्द्रियविशेषणतेत्यननुगमेन तत्तदभावप्रत्यक्षं

---

(१) ब्राह्मण्याद्यभावग्रहप्रसङ्गेनेति ख०।

मनुपलब्धिविरोधि तच्च तस्याभाव इन्द्रियसन्निकर्षेण गृह्यते। न च परमाण्वादौ जलत्वादिसत्त्वमनुपलब्धिविरोधि, योग्यसंयुक्तसमवायाभावेन पृथिवीत्ववदनुप-

---

प्रत्येव तस्यास्तस्या हेतुत्वं स्वीकरणीयम्। षोढा विभागश्च प्रत्यासत्तेः कथञ्चित्पारिभाषिकोपाधिना निर्व्वाच्य इति महान् प्रयास इति।

अत्राहुः यथाश्रुतविशेषणतायाः पृथिवीपरमाणौ जलत्वाभावेऽपि गतत्वेन यावत्प्रतियोगिग्राहकसत्त्वेऽपि यस्यां विशेषणतायां सत्यान्न प्रतियोग्युपलम्भ इति प्रतियोग्युपलम्भविरोधित्वं निर्व्वाच्यम्। तथाचाचार्य्ययोग्यानुपलब्धिरेव पर्य्यवसितेत्यनुपलब्धेः प्रकारान्तरनिर्व्वचनं न विशेषणतायाः। न च तदपि निर्व्वहतीति वक्ष्यते। प्रतियोगिसत्त्वविरोधित्वमनुपलम्भस्य तत्प्रसञ्जितप्रतियोगिकत्वं तेन यत्रैव प्रतियोगिसत्त्वेनापादकेन प्रतियोग्युपलम्भापादनन्तत्रैव तदभावः प्रत्यक्षः(१)। अत एव प्रतियोगिसत्त्वं तर्कितमिति वक्ष्यति, तेन यादृशप्रतियोगिसत्त्वेन देशावच्छिन्नेन कालावच्छिन्नेन वा तदुपलम्भापादनन्तदवच्छिन्नस्तदभावः प्रत्यक्ष इत्यनुगमोऽपि। यद्वा प्रतियोगिसत्त्वविरोधीति यथाश्रुतमेव, तेनान्धकारस्थघटानुपलम्भेऽपि न तदभावग्रहस्तत्र घटसत्त्वस्यानुपलब्धिसहचरितत्वेनाविरोधात्। न च घटवति दोषाद्घटवत्ताज्ञानेऽपि घटाभावभ्रमो न स्यात् प्रतियोगिसत्त्वविरोध्यनुपलम्भासत्त्वादिति वाच्यम्। इन्द्रियसम्बद्धविशेषणतासहकारिण्या उक्तानुपलब्धेः प्रमाजनिकाया एव

---

(१) तदभावो गृह्यत इति ख०।

लब्धिसम्भवात्। महति वाय्वादौ उद्भूतरूपाद्यभावश्चक्षु-
रादिग्राह्य एव, तत्रोद्भूतरूपादिसत्त्वेऽनुपलब्ध्यनुपपत्तेः।
अत एव स्तम्भे पिशाचतादात्म्याभावः प्रत्यक्षः स्तम्भता-

निर्वचनादभावभ्रमस्य रजतभ्रमसामान्यसामग्र्यैवोपपत्तेः। नन्वेवं
विशिष्टज्ञानसामान्यसामग्र्यैवाभावज्ञानमस्तु किमनुपलम्भेन। न च
तापि विशेषणासंसर्गाग्रहगर्भेति तावताप्यनुपलम्भस्य हेतुतासिद्धि-
रिति वाच्यम्। एवम्भूतले घटाभाव इति बुद्धौ भूतलासंसर्गा-
ग्रहहेतुतालाभेऽपि घटानुपलम्भस्य हेतुतालाभात् वक्ष्यमाणक्रमेण
सामान्यसामग्र्यां घटाग्रहाप्रवेशाच्च। न चाभावेन्द्रियसम्बन्धादि-
सामान्यसामग्रीसत्त्वेऽपि घटोपलम्भे नाभावधीरित्यनुपलम्भो हेतुरिति
वाच्यम्। घटाभाववति घटोपलम्भस्य भ्रमतया तज्जनकदोषस्या-
भावप्रमाप्रतिबन्धकत्वात् तदभावे भ्रमस्यैवासम्भवात्। मैवम्।
अभावभ्रमस्थले प्रतियोग्युपलम्भे सति नाभावज्ञानमित्यनुपलम्भहेतुत्वे
कल्प्यमाने लाघवेनाभावज्ञानत्वावच्छिन्नं प्रति हेतुता कल्प्यते न
तु विशिष्य गौरवात्। न च तत्र प्रमासामग्र्येव प्रतिबन्धिका,
दोषाभावाद्वा नारोपोत्पत्तिरिति वाच्यम्। विवक्षितविवेकेनान्येषां
व्यभिचारेणोक्तानुपलम्भरूपाया एव प्रमासामग्र्या अभावस्यैव दोषत्व-
पर्यवसानात्। न च प्रतियोगिसत्त्वविरोधेनानुपलम्भस्तत्र हेतुत्वेन
कृप्तो येन प्रमायां तद्धेतुत्वं लभ्येतेति वाच्यम्। अत एव प्रतियोगि-
सत्त्वापादितप्रतियोगिकानुपलम्भहेतुत्वाभ्युपगमात् सामान्यतोऽनु-
पलम्भमात्रहेतुत्वकल्पनानन्तरं विशेषद्वये विशेषाभ्यामनुपलम्भसम्भ-

दात्वे च तस्य स्तम्भस्येवानुपलम्भासम्भवात्। एवं शब्दस्याप्यभावः प्रत्यक्षः तदा तत्र शब्दसत्त्वस्यानुपलब्धिविरोधित्वादिति तत्रेन्द्रियविशेषणतैव प्रत्यासत्तिः चक्षुषि जलत्वादिसत्त्वञ्च नानुपलब्धिविरोधीति चक्षुषा न

वात्। अत एव सामान्यसामग्र्यामप्यसंसर्गाग्रहप्रवेशो बोद्धव्य इति। यद्यपि य एव भ्रमस्थले प्रतियोग्युपलम्भप्रतिबन्धकः स एव हेतुः स चात्र नेति नातिप्रसङ्गः, तथापि तेषामननुगमादनुगतस्यैव हेतुत्वमिति तु तत्त्वं, चक्षुषि पृथिवीत्वाभावाप्रत्यक्षानुरोधेन चोक्तयोग्यानुपलम्भः सर्वथा हेतुरिति तत्त्वं। 'महतीति, न चैवमुद्भूतरूपे परमाणौ महत्त्वाभावप्रत्यक्षताप्रसङ्गः(१), दृष्टत्वात्। यत्रैवोपलम्भो यस्य प्रतियोगिसत्त्वेनापाद्यते तत्रैव तदभावप्रत्यक्षतास्वीकारात्। एवं मनस्त्वाभावोऽपि घटादौ, उद्भूतरूपवदन्योन्याभावोऽपि वाय्वादौ सुग्रहः। न च प्रतियोगियोग्यत्वं संसर्गाभावे, अधिकरणयोग्यत्वं अन्योन्याभावे योग्यतेति कथमेतदिति वाच्यम्। अनभ्युपगमात् उक्तानुपलम्भविषयत्वेनैवोभयत्र योग्यत्वादिति। अत एवाग्रे तादात्म्याभाव इत्युभयाभाववाचिना पदेन साधारणेन शिष्टनिर्देशः। 'स्तम्भेति, यद्ययं पिशाचतदात्मा पिशाचजातिमान्वा स्यात्तदा तत्प्रकारकोपलम्भविषयः स्यादित्यापादनसम्भवात्। न चैवं पिशाचे स्तम्भत्वसत्त्वेऽपि तदुपलम्भापादनं, अयोग्यवृत्तित्वेन पिशाचत्ववदनुपलम्भसम्भवादिति भावः। अत्रोपलम्भाभावः प्रत्यक्षाभावो वाच्यः। न

---

(१) महत्त्वाभावप्रत्यक्षत्वापत्तिरिति ख०।

तद्ग्रहः। नन्वभावे न विशेषणता प्रत्यासत्तिः, किन्तु समवाय एव समवायसाधकविशिष्टप्रतीतेरविशेषात्। न च समवेतत्वे तस्य भावत्वापत्तिः, भावस्य तत्त्वे अभावत्वापत्तिरिति वैपरीत्यसम्भवात्। रूपादौ प्रत्यासत्तित्वेन समवायकल्पनमभावेऽपि तुल्यं, विशेषणतापि तुल्या, प्रागभाव-प्रध्वंसौ प्रतियोग्याश्रये समवेतौ, प्रतियोग्याश्रयनाशजन्यध्वंसो देशे समये वा सम-

च पिशाचप्रत्यक्षाप्रसिद्धौ तदभावः सम्भवतीति नाशङ्कनीयम्, प्रत्यक्षेऽधिकरणे प्रतियोगिसंसर्गविषयत्वाभावस्य हेतुत्वात्। वस्तुतस्तु प्रतियोगिसत्त्वेनापादितप्रतियोगिकत्वेनानुगतेन यदि पिशाचत्वं सम्भवति स्यात्तदा सम्भवत्तित्वेनोपलभ्येतेत्यापादने सम्भवत्तित्वोपलम्भाभाव एव तथा, यदि वायौरूपं स्यात्तदा रूपवत्त्वेनोपलभ्येतेत्यत्र रूपवत्त्वोपलम्भाभावस्तथा इत्युभयत्र प्रतियोगिसत्त्वस्यापादकत्वादापादनमापाद्यप्रसिद्ध्यनुरोधेन द्विरूपमेवेत्युक्तप्रमेणैवानुगम इति सङ्क्षेपः। 'घटत्वाभावादेरिति, न चैवं द्रव्य-गुणान्यान्यत्वादीनां जातित्वं प्रसज्जितमनुभूतमेवेति वाच्यम्। उक्तरूपपरापरभावाभावेन जातिभेदे सिद्धेऽपि घटत्वाभावादौ नित्यानेकसमवेतत्वेन(१) तावन्मात्रस्य जातित्वे अप्रयोजकत्वमित्यन्यत्र ग्रन्थस्य तात्पर्यादिति। 'समवेतत्व इति, ननु समवायिकारणनाशस्य कारणतासमवायकल्पनोत्तरकल्प्या समवायकल्पनमेव प्राथमिकमुपजीव्यञ्च।

(१) नित्यानेकसमवेतत्वसत्त्वेनेति ख०।

वैति तत्रैव निरूपणात्। न च समवायिनाशे ध्वंस-नाशः, घटोन्मज्जनप्रसङ्गात् भावत्वस्योपाधित्वाच्च। अन्यथा तवापि तस्य जन्यत्वेन नाशापत्तिः। अथैव-मन्योन्याभावयोर्नित्यत्वेऽनेकसमवेतत्वे च जा-तित्वप्रसङ्गः। न च तत्र भावत्वं तन्त्रं, गौरवात्। न चाभावानां विशिष्टप्रतीतौ विशेषो येनाच समवाय-परित्यागः, इति चेत्। न। घटत्वाभावादेर्जातित्वे सत्त्व-द्रव्यत्व-पृथिवीत्वादिना परापरभावानुपपत्तेः। तेषां व्याप्यत्वे घटे तदभावप्रसङ्गः, व्यापकत्वे सामा-न्यादौ घटत्वाभावो न स्यादिति। उच्यते। समवेतत्वे ध्वंसस्य समवायिकारणनाशान्नाशः स्यात्। न च

गुणादिन्यायेनाभावमपि विषयीकृत्योत्पन्नत्वमुपजीव्यविरोधेन न तत्र समवायाभावकल्पनम् प्रत्युत तद्विरोधेन समवायिनाशेन समवेतनाशं प्रति भावत्वं तन्त्रमङ्गीक्रियतां गौरवस्य प्रामाणिकत्वादिति।

अत्राहुः। अभावे समवायकल्पनं नोक्तकारणतायामुपजीव्यं अभावमविषयीकृत्य गुणादिमात्रविषयीकरणे सिद्धेऽपि समवाये समवायिकारणनाशस्य हेतुतावच्छेदकत्वात्। दैवात्तु तदानीमभावे बाधकानवतारेण तस्य अभावविषयत्वात् तस्मात् प्रथमतो बाधका-नवतारेणाभावसाधारणसमवायानुमितावपि अनन्तरमुक्तबाधकाव-तारेऽस्य परित्यागः कार्य्यान्वितशक्तिवत्। वस्तुतस्तु समवायकल्प-नमन्तरेणापि घटादिनाशदर्शनेन ध्वंसाद्यनाशदर्शनेनापि चाभाव-

नाश्यत्वे भावत्वन्तन्त्रं, गौरवात् प्रागभावेऽभावाच्च। असमवेतत्वे तद्ध्वंसस्य जन्यत्वेऽपि न नाशः आश्रयनाशादेरभावात्। घटोन्मज्जनापत्तेः[१] न नश्यतीति चेत्। न। न हि प्रयोजनक्षतिभयेन सामग्री न कार्य्यमर्जयति, तस्मादुन्मज्जनाभावनिर्वाहकं ध्वंसस्यासमवेतत्वं कल्प्यतां। स्वसमवायिनाशात् ध्वंसपरम्पराकल्पने च घट-कपालादेरापरमाणुनाशे घटादि-तद्ध्वंसविरोधी चरमो ध्वंसः परमाणुवृत्तिः स्यात्। तथा च न प्रत्यक्षः।

सम्बन्धान्यसम्बन्धिकारणनाशत्वेन हेतुतायां क्लृप्तायामग्रे नोक्तानुमानेन तत्साधारणैकसम्बन्धसिद्धिर्विरोधात्, किन्त्वभावव्यावृत्तत्वेन ज्ञातः सम्बन्धः समवायसिद्ध्यनन्तरं तादूप्ये पर्य्यवस्यति, तस्मादुभयथापि नाभावसमवायः। न च भिन्नसम्बन्धसिद्धौ भाव एव विशेषणता, अभाव एव समवायः, स्वरूपसम्बन्धिनाश एव कार्य्यनाशहेतुः, समवायिकारणनाशो न समवेतनाशे हेतुरिति वैपरीत्यमेवास्तिति वाच्यम्। अभावस्वरूपाणामभावत्वेनानुगतानां स्वरूपसम्बन्धत्वकल्पनात् न त्वननुगतावयवि-गुण-कर्म्म-जात्यादीनामित्युक्तप्रायम्। अत एवाभावत्वेन तत्कल्पनात् अत्यन्तान्योन्याभावयोरपि स्वरूपसम्बन्धस्य क्लृप्तत्वेन लघुत्वात् स एव कल्प्यते न समवायः कल्पनीयत्वात्। ध्वंसे समवायबाधकाले कल्प्यमानः स्वरूपसम्बन्धो

---

(१) घटोन्मज्जनप्रसङ्गादिति ख०।

घटध्वंसस्य कपालसमवेतत्वे च न भूतले निरूपणं स्यात्। उभयवृत्तित्वे च व्यासज्यवृत्तित्वेन कपालं विना न निरूप्येत।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे समवायवादः।

ध्वंसत्वविशेषणनादायाभावत्वे सामान्ये पर्य्यवस्यति, अन्यथोक्तबाधकस्यात्यन्ताभावादावसत्त्वेन तत्र समवायकल्पनाया वज्रलेपतापातादिति दिक्।

इति श्रीजयदेवमिश्रविरचिते तत्त्वचिन्तामणालोके प्रत्यक्षखण्डालोके समवायवादालोकः।

अथानुपलब्ध्यप्रामाण्यवादः ।

नन्वभावग्रहो नेन्द्रियात्, किन्तु योग्यानुपलब्धेः तदुपलम्भे तदभावाग्रहात्[१] । नचैवं भावबुद्धिरप्यभावानुपलब्धेरेव नेन्द्रियादिति[२] वाच्यम् । भावग्रहे इन्द्रियानुविधानात् । अन्यथा निमीलिताक्षस्यापि घटाभावानुपलब्ध्या घटग्रहप्रसङ्गः । अत एव भावग्रहे अभावानुपलब्धिः पृष्ठलग्नापि न हेतुः इन्द्रियेणान्यथासिद्धत्वात् । न हीन्द्रियार्थसन्निकर्षे सति तां विना भावधीविलम्बः । अभावग्रहेऽपीन्द्रियं हेतुः तद-

---

अथानुपलब्ध्यप्रामाण्यवादालोकः ।

'किन्विति, तथाच न विशेषणता प्रत्यासत्तिरिति भावः । ननु ग्राहकत्वे तस्याः सिद्धे करणत्वं कल्प्यमतस्तदेव व्यतिरेकेण दर्शयति, 'तदिति । अनुविधानमेवाह, 'अन्यथेति । 'अत एवेति इन्द्रियानुविधानादित्यर्थः, 'पृष्ठेति भावग्रहे नियमतोऽन्वयाद्यनुविधानवतीत्यर्थः । ननु तथैवेन्द्रियमन्यथासिद्धमस्तु । न च निमीलिताक्षस्थले तस्यां सत्यामपि फलाभावादिन्द्रियहेतुत्वनिर्णयः, तर्हि तद्वदेवाभावज्ञानेऽपि इन्द्रियहेतुतासम्भवात् । न च तदानीमधिकरणग्रहाभावान्नाभावधीर्न

---

(१) तदनुपलम्भे तदभावग्रहादिति क० ।
(२) न त्विन्द्रियादिनेति ख० ।

नुविधानादिति चेत्। न। अभावेन चक्षुरादेः प्राप्य-भावेनाश्रयग्रहे तदुपक्षयात्। अथाधिकरणधीरिन्द्रियव्यापारः, न च तया तदन्यथा सिद्धं, अन्यथा सन्निकर्षोपक्षीणतया इन्द्रियं न हेतुः स्यादिति चेत्। न। हेतुत्वे सिद्धे तद्व्यापारत्वं, तदेव नास्ति प्राप्त्यभावात्। एतेनाधिकरणग्रहेन्द्रिययोः पृथगन्वय-व्यतिरेकग्रहात् दण्ड-चक्रयोरिव हेतुत्वं द्वयोरिति निरस्तं। प्राप्य-भावेनाभावाग्राहकत्वात्। न चेन्द्रियं प्राप्तविशेषण-

---

त्विन्द्रियसन्निकर्षाभावादिति वाच्यम्। अधिकरणज्ञानमात्रस्य तत्रापि सम्भवेन प्रतियोगिग्राहकेन्द्रियजन्याधिकरणज्ञानाभावो वाच्यः, तथाच तस्यापि कल्पनीयत्वादिन्द्रियसन्निकर्ष एव कल्प्यतां। किञ्च ग्राह्या-भावग्रहस्य सामान्यत एव प्रतिबन्धकतया अभावानुपलम्भस्याहेतु-त्वमसङ्गतम्[१]।

यत्तु परिशिष्टप्रकाशे महामहोपाध्यायचरणाः। अभावानुपल-म्भोऽभावोपलम्भप्रागभावो वाच्यः, तथाच भावोपलम्भे तत्प्रागभाव-हेतुतावश्यकतया गन्धादौ रूपादिप्रागभावादीनामिव भावानुपलम्भेन स्वप्रागभावेन सोऽप्यन्यथासिद्ध एवेति, तत्तु भावानुपलम्भापलाप-युक्तिकत्वात् न बुध्यामहे।

---

(१) अभावानुपलब्धिरहेतुरित्यसङ्गतमिति ख०। प्रतिबन्धकाभावस्य हेतुत्वात् अभावानुपलम्भस्य अभावोपलम्भरूपप्रतिबन्धकाभावतया हेतुत्वं सिद्धमेवेति भावः।

मप्राप्तमपि गृह्णाति, संयुक्तसमवायाद्युच्छेदप्रसङ्गात् प्राप्तपैगताप्राप्तदण्डस्यापि ग्रहप्रसङ्गात् इन्द्रियस्य प्राप्तग्राहकत्वाच्च। न च विशेषणता प्राप्तिः, अन्यत्र तदकल्पनात्। न च समवाये तत्कल्पनं, तस्यानभ्युपगमात् तत एवातीन्द्रियत्वाद्वा। अथाभावस्येन्द्रियग्राह्यत्वेन संयोगादिबाधे इहैव सा कल्प्यते रूपादौ तद्बाधे संयुक्तसमवायादिरिवेति चेत्, तथानुपक्षीणेन्द्रियानुविधानात्तथैव। इह त्वाश्रयग्रह एव तदुप-

---

किञ्चाधिकरणे प्रतियोगिसंसृष्टत्वोपलम्भविषयत्वाभावरूपानुपलब्धिर्वाच्या, सा च न प्रागभाव एव, स्वप्रागभावेन वा यद्यन्यथासिद्धा तदेन्द्रियेणेत्याद्यपि विरुद्धं। न चाभावानुपलब्धिरपि योग्यताविशेषिता वाच्या सा च यावदभावग्राहिकेत्यादिगर्भा प्रकृते वाच्या, तथाचाभावग्राहकप्रतियोग्यादिस्मरणादेर्भावाग्राहकत्वादभावानुपलब्धिर्न भावग्राहिकेति वाच्यं। एतावता व्यभिचारेणाहेतुत्वं प्राप्तं न त्वन्यथासिद्धेरिति प्रकृतग्रन्थविरोधात्। किञ्च प्रतियोगिस्मरणादि न योग्यताशरीरप्रविष्टं प्रतियोगि-तद्व्याप्येतरपदेन हि असाधारणतदुपलम्भकान्यङ्गीकार्यम्, यथाश्रुते घटोपलम्भप्रागभावस्य घटाभावाग्राहकत्वेनासम्भवात्। न हि स प्रतियोगी तद्व्याप्यो वा, तथा च प्रतियोगिस्मरणादयोऽभावासाधारणोपलम्भका इति तदन्ययावत्समवधानमस्त्येवेति नोक्तव्यभिचारोऽपीति। न चैवं संयोगिनाप्रजन्यसंयोगनाशस्थले

क्षीणं लाघवात्, न तु प्राप्त्यन्तरकल्पना, गौरवात्। अन्यथा त्वगनुविधानाद्रूपं विनापि वायुधीः प्रत्यक्षेति न सा स्पर्शलिङ्गग्रहे उपक्षीयेत। किञ्च विशेषणतायामिन्द्रियग्राह्यत्वं तेन रोत्यन्योन्याश्रयत्वं। अपि च विशेषणता ग्राह्यस्वरूपमेव। न च त्वगादौ स्वरूपसम्बन्धो हेतुः, किन्तु यथायथं संयोग-समवायौ। न च तयोरन्योन्यव्यभिचारादिन्द्रियं सम्बद्धं गृह्णातीत्येव व्याप्तिरिति वाच्यं। दृष्टान्ते हि सम्बन्धिगतः सम्बन्धो

एवं व्यभिचारोद्धारेण यावत्तदुपलम्भकेत्यादिगर्भैवानुपलब्धिर्हेतुः स्यादिति वाच्यम्। एककारणपरिशेषापातादिन्द्रियादेरप्यहेतुतापत्तेर्वक्ष्यमाणत्वात्। अत एव प्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकानुपलब्धिर्हेतुर्वाच्या तेन तादृशापादनस्थल एवाभावधीः, भावग्रहे च प्राथमिकेऽभावस्य तदानीमनुपस्थितत्वेन तथा प्रसञ्जनाभावान्नानुपलब्धिर्हेतुरित्यपास्तम्। एवमपि व्यभिचारप्रदर्शनादिन्द्रियेणान्यथासिद्ध्यप्रदर्शनात्। अथ ग्राह्याभावग्रहाभावो हेतुरित्यभावानुपलम्भोऽपि कारणमेव येन प्रकारेण भावानुपलम्भः कारणत्वेनाभावानुपलम्भोऽन्यथासिद्धः, तथाहि घटतादात्म्यग्रहे तदत्यन्ताभाव-तदाश्रयान्योन्याभावयोर्द्वयोरपि न ग्रह इति वस्तुगतिः, एवञ्च तदुभयग्रहे न घटतादात्म्यग्रह इत्यपि, तथाचाभावग्रहे ग्राह्याभावानुपलम्भो ग्राहको घटतादात्म्यस्य तदुभयस्वरूपग्राह्यविरहरूपत्वात् तद्वदेतेनैव रूपेण तदुभयाग्रहो

हेतुर्गृहीतः चक्षुष्यन्यत्रापि तथा, न तु ग्राह्यस्वरूपं, सम्बन्धस्य सम्बन्धिभिन्नत्वनियमात् । न हि स एव तद्वान्तेनैव भवति । स्वरूपसम्बन्धस्य हेतुत्वे च रूपादिग्रहेऽपि तत एवास्तु किं समवायादिना, अतः संयोगविशेषणत एव प्रत्यासत्ती इति षोढा कीर्त्तनमपि विफलं। एतेनालोकापेक्षणे चक्षुरपेक्षा तस्य तदेकसहकारित्वादिति निरस्तं । प्राप्तिं विना चक्षुषोऽहेतुत्वात् आलोकस्य च प्रतियोगिग्राहकत्वेन योग्यता-

---

घटतादात्म्यग्रहेऽपि कारणम् तदा घटान्योन्याभावग्रहे सत्यपि तत्तादात्म्यग्रहापत्तिः अन्योन्याभावस्य तदभावत्वाभावात् । न हि यथा तादात्म्यमन्योन्याभावाभावस्तथान्योन्याभावोऽपि तदभावरूपः, घटाप्रतियोगिकत्वापातात् संसर्गाभावत्वापाताच्च । यथाच नेयमिष्टापत्तिस्तथा व्यतिरेकिणि वक्ष्यामः । एवञ्च सानुपलब्धिर्भावग्रहे ग्राह्याभावानुपलम्भतया हेतुर्न त्वभाववद्ग्राह्याभावानुपलम्भत्वेन तादृश्येणान्यथासिद्धेरिति मैवम् । एवमपीन्द्रियेणेत्यादिविरोधात् तस्या एव मानत्वप्रसङ्गनवञ्चलेपत्वाच्च। उच्यते । भावानुपलम्भवदभावानुपलब्धिर्हेतुरविशेषात् ग्राह्यज्ञानविरोधिताया ग्राह्याभावज्ञानस्य सर्व्वसिद्धत्वात् । न च करणविरोधः, करणतायामन्यथासिद्ध्यभिधानात् प्रमाणत्वापेक्षितस्यैव समाधानस्यौचित्यात् । न च यादृश्यनुपलब्धिर्हेतुर्व्वाच्या तादृशी निमीलिताक्षस्य नास्ती-

घटवत्तया अभावग्राहकत्वात्। न चैवं प्रतियोग्युपलम्भकत्वेन चक्षुरपि हेतुः, एवं हि तत्तद्व्याप्येतरतदुपलम्भकसाकल्ये अनुपलब्धिर्ग्राहिका भवतीति वाच्यं। प्राप्तिं विना तस्याहेतुत्वेनाश्रयग्रहोपक्षयात्। नन्वेवमन्धस्य त्वगिन्द्रियोपनीते नीले स्मृतपीतस्यानुपलब्ध्या अभावग्रहप्रसङ्गः, प्रतियोगिग्राहकेन्द्रियग्राह्यत्वे त्वभावस्य नायन्दोषोऽन्धस्य चक्षुरभावादिति चेत्। न। अभावग्राहकत्वेनाभिमतमिन्द्रियमाश्रयग्रहोपक्षीणं,

---

त्यन्वयाद्यननुविधानात् इन्द्रियं हेतुरेव न कुतस्तेनान्यथासिद्धिरिति वाच्यम्। अभावानुपलम्भोऽपि न भावमात्रग्रहे कारणं व्यभिचारात् घटाभावग्रहेऽपि घटादिनिर्विकल्पकसम्भवात् समानप्रकारकत्वेन ज्ञानयोर्विरोधात्। किञ्च सविकल्पकमपि स्यादेव घटाभावस्य क्वचिदधिकरणे ग्रहेऽपि निरधिकरणस्य घटस्य प्रतीतेः, तथाच तदधिकरणनिष्ठभावग्रहे एव तन्निष्ठाभावानुपलम्भो हेतुर्वाच्यः, न तु सामान्यतः, तथाच सामान्यत इन्द्रियस्य प्रामाण्यकल्पनात् तद्धेतुरप्यनुपलब्धिर्न प्रमाणं अन्यथासिद्धत्वात् अभावधीस्तु निरधिकरणा नास्त्येव। नापि निर्विकल्पकेत्यभावप्रत्यक्षत्वावच्छिन्नं प्रत्येवानुपलब्धिः कारणं करणञ्च केनाप्यनन्यथासिद्धेरिति दिक्।

यत्तु अभावधीः सकरणिकेति कल्प्यमानं करणमिन्द्रियमेव[1]

---

(१) मानमिन्द्रियमेवेति ख०।

तथाच प्रतियोगिग्राहकेणेन्द्रियेण आश्रयग्रहे अनुपलब्ध्याऽभावग्रहात्। अन्यथा चक्षुःसंयुक्ते परमाणौ जलत्वाभावग्रहप्रसङ्गः । अथैवं वायौ रूपाभावो जले तिक्ताभावः[१] पाषाणे सौरभाभावश्च न गृह्येत वाय्वादीनां प्रतियोगिग्राहकैश्चक्षुरादिभिरग्रहात्[२]। न च तवापि ते अभावाः वायं प्रत्यक्षाः वाय्वादीनां तदिन्द्रियायोग्यत्वादिति वाच्यं। लिङ्गेन त्वगादिना वोपनीते

कल्प्यते कृप्तत्वात् नानुपलब्धिः, तथात्वेन क्वचिदप्यकल्पनात् । न च सन्निकर्षाभावान्न तथा अनुपलब्धावपि अन्वयव्यभिचारेणातथात्वात् । न च प्रतियोगिग्राहकेन्द्रियजन्याधिकरणज्ञानसहकारित्वकल्पनात्स नेति वाच्यम्। तस्य सहकारित्वमपि कल्प्यमिति सन्निकर्षकल्पनस्यैव तदपेक्षयोचितत्वात् इति तन्न। धर्मीतिन्यायात् कृप्ताधिकरणज्ञानस्य ज्ञानविशेषे उक्तरूपज्ञानत्वेन जनकतौचित्यात् न तु धर्म्यन्तरस्य सन्निकर्षस्येत्युक्तप्रायत्वादिति।

'तामिति, करणीभूतामिति शेषः । 'प्राप्तविशेषणं' प्राप्ताश्रयकमित्यर्थः । नन्वाश्रयप्राप्तेर्ग्राहकत्वमुक्तं अतोरूपत्वादिग्रहानुरोधेन रूपप्राप्त्यर्थं संयुक्तसमवायः स्यादित्येतावन्नाचाखरमादाह, 'प्राप्तेति। नन्वत्रापि धर्म्म-धर्मिभावग्रहः संयोगविषयक इति दण्डाज्ञानादेव न प्रसङ्गोऽन्यादृशप्रत्यक्षे नोक्तं नियामकमत एव च 'प्राप्तविशेषणेत्युक्तमतो

---

(१) गुड़े तिक्ताभाव इति ख० ।
(२) प्रतियोगिग्राहकैरिन्द्रियैश्चक्षुरादिभिरग्रहादिति ख० ।

वाय्वादौ योग्यरूपाद्यभावविशेष्यकं प्रत्यक्षं चक्षुरादि-
नैव न वाय्वादिविशेष्यकं प्रत्यक्षे योग्यविशेष्यस्य हेतु-
त्वादिति चेत्। न। वाय्वादौ रूपाद्यभावप्रतीतीना-
मनुपलब्धिलिङ्गकत्वात्। तव नीरूपो वायुरिति वायु-
विशेष्याभावप्रतीतिवत्। अथ भूतले अभावधीरिन्द्रि-
यजन्या साक्षात्कारित्वात्, तत एव विशेषणताकल्प-
नमपि। न च साक्षात्कारित्वमसिद्धं, परोक्षत्वे अज्ञा-

दोषान्तरमाह, 'इन्द्रियस्येति, अत्राप्ययोग्यतयैव न ग्रह इत्यरुचेराह, 'इन्द्रियेति, करणव्यापारविषयतयैव कर्मत्वादिति भावः। 'किञ्चेति, रूपादाविन्द्रियग्राह्यत्वस्य सर्वसिद्धत्वादिह त्वन्यतरासिद्धिरिति भावः। ननु 'दृष्टान्ते हीत्युत्कर्षसमा घटादौ शरीरिकर्तृकत्वदर्शनवत्' अतोऽत्र व्याप्तिमाह, 'सम्बन्धस्येति। 'न हीति, तदुक्तं "न हि सुशिक्षितोऽपि नटवटुः स्वं स्कन्धमारुह्य नृत्यति"। अत्र यद्यपीन्द्रियेण समं स्वरूपसम्बन्धो नोच्यत एव किन्त्विन्द्रियसम्बद्धेन स च तथापि वाच्योऽन्यथाधिकरणग्रहनियामकताभिधानमपि विरुध्येत तत्सम्बन्धं विना तदधिकरणत्वाभावात्, तथापि यद्विशेषणकमभावज्ञानं तज्ज्ञा-नसेवाधिकरणज्ञानं द्रष्टव्यम्। तद्विशेषणत्वञ्च सम्बन्धं विनैव क्वचित् तत्र रूपसमवायवदिति तदाशयः। 'उपमान इति, यद्यप्यभावपदस-ङ्केतग्राहकोपमानसत्त्वात् नैतत्, तथापि सिद्धसाधनभिया मानान्तरा-

---

(१) शरीरजन्यत्वदर्शनवदिति ख०।

तत्करणत्वानुपपत्तेः। तथाहि मन्दिरोदरे चैत्रो निपु-णमनुसृतोऽपि[1] न चोपलब्ध इत्याप्तवाक्यावगतानुप-लब्ध्या श्रोतानुमिनोति नासीत्तत्र चैत्र इति। एवम-भावधीः परोक्षा चेत्तदा नाज्ञातकरणिका परोक्षत्व-जातेर्ज्ञातकरणप्रयोज्यत्वात्। ज्ञातकरणत्वञ्च ज्ञान-करणत्वं लिङ्गादेरजनकत्वात्। तस्मात् साक्षात्कारि-त्वमज्ञातकरणत्वात्। न चेन्द्रियजन्यत्वमुपाधिः, तत-एव तत्साधनादिति चेत्। मैवं। परोक्षत्वं हि न जातिः अनुभवत्वेन सङ्करप्रसङ्गात्। किन्तु साक्षात्कारिभि-न्नज्ञानत्वं, एवञ्चाभावज्ञानं परोक्षमेव स्मृतिवत्। यथा च ज्ञातकरणत्वेऽपि शाब्दादिर्नानुमितिरेवम-ज्ञातकरणत्वेऽपि इन्द्रियजन्यं साक्षात्कार्य्यनुपलब्धिजन्यं तद्विजातीयमनुपलब्धं। यदि चाज्ञातकरणत्वेन साक्षा-

---

प्रवृत्तिपूर्व्वकं ग्रहणमत्र विवक्षितं इत्ययं व्यभिचारो द्रष्टव्यः। 'उप-मानत्वन्त्विति, तद्धि सादृश्यज्ञानवन्तत्त्व साक्षात्त्वादिना परापर-भावानुपपत्त्या न जातिरित्यपव्याख्यानम्, एवं प्रत्यक्षरूपसादृश्य-ज्ञानवृत्तौ साक्षात्त्वे व्यभिचारतादवस्थ्यात्। न हि सा जाति-र्ग्राहकतावच्छेदकत्वेन विशेषणीया येन साक्षात्त्वादिर्व्यावर्त्येत, तथा-

---

(१) निपुणतरतयानुसृतोऽपीति ख०।

त्कारित्वं तदा ज्ञातकरणत्वेन शब्दादेरनुमितित्वापत्तिः। ज्ञातकरणत्वेऽपि लिङ्गादिकरणभेदादनुमित्यादिफलभेद इति चेत्, अज्ञातानुपलब्धीन्द्रियकरणभेदात् फलभेद इहापि। एवञ्च साक्षात्कारित्वे इन्द्रियजन्यत्वं परोक्षत्वे च तदजन्यत्वं प्रयोजकं, न तु ज्ञाताज्ञातकरणजन्यत्वं गौरवात् स्मृतावभावाच्च। नन्वनुपलब्धिर्न मानं भावभूतमानसहकृतस्यैव मनसो बाह्यानुभवजनकत्वादिति चेत्। न। भावत्वस्य गुरुत्वेनाप्रयोजकत्वात्। अन्यथेन्द्रियसहकृतस्यैव मनसो बाह्यानुभवजनकत्वमित्यनुमानादि न मानं स्यात्। न चेदमभावज्ञानं भावमानसहकृतमनःसाध्यं बाह्याभावज्ञानत्वाल्लिङ्गादिजन्याभावज्ञानवदिति वाच्यं। अयमभावो नेन्द्रियग्राह्योऽभावत्वादयोग्याभाववत्।

सति शब्दत्वस्य साधनवैकल्यापातात्। न हि शब्दत्वं ग्राहकतावच्छेदकं, अपि तु तज्ज्ञानत्वं, तस्मात् ज्ञायमानकरणाभिप्रायेणेदमनुमानमुक्तं, तेन शब्दत्वं जातिरस्ति तथेति भवति दृष्टान्तः। न चोपमानत्वे व्यभिचारस्तस्य ज्ञायमानकरणतापक्षे सादृश्यत्वपर्य्यवसितस्य जातित्वाभावात् "सामान्यान्येव भूयांसि" इति मते सादृश्यस्य जातिरूपतया तद्वृत्तिधर्म्मे जातित्वाभावात् जातौ जातिमत्त्वाभावात्[१] इति फक्कि-

---

(१) जातौ जात्यन्तराभावादिति ख०।

इयमभावबुद्धिर्नेन्द्रियजन्या अभावबुद्धित्वाल्लिङ्गादि-
जन्याभावबुद्धिवदिति सत्प्रतिपक्षात्। अथ प्रतियोगि-
ग्राहकं मानं तदभावमपि गृह्णाति यथानुमानादि,
प्रतियोगिग्राहकश्चेन्द्रियमतोऽभावग्राहकमिति चेत्।
न। भावग्राहकयोरेव लिङ्ग-शब्दयोस्तदभावाग्राह-
कत्वात्। प्रतियोगिग्राहकजातीयं मानं तथेति चेत्।
न। उपमाने व्यभिचारात्। न च चक्षुष्ट्वादिकं अभा-
वग्राहकवृत्ति जातित्वात्, उपमानत्वञ्च न जाति-
रिति वाच्यं। प्राप्तिं विना चक्षुरादेरभावाग्राहकत्व-
साधनात्। अथ भावदृत्त्यभावभ्रमः स च करणदो-
षात्। न च प्रतियोगिसत्त्वाश्रयग्रहानुपलब्धयः स्वरू-
पतो दुष्टाः, किन्त्विन्द्रियं पित्तादिना दुष्टमिति, तदेव
च भ्रमहेतुरित्यभावप्रमायामपि तदेव मानमिति
चेत्। न। इन्द्रियस्यापि दुष्टत्वं दोषसाहित्यमात्रं न

कार्योद्रष्टव्य इति। 'अत, इति, अत्र दोषसहितभ्रमहेतुत्वादिति
विधिरेव हेतुः कर्त्तव्यो न तु भ्रमहेतुत्वमात्रं, दोष एव व्यभिचारा-
दित्यवधेयम्। ननु प्राप्तिरपेक्ष्यते व्यापारत्वेनान्यत्र, व्यापारश्चात्राधि-
करणज्ञानमेवेति कथमन्यथाऽप्राप्ते भ्रमोऽपीत्यत आह, 'किञ्चेति
कर्मप्राप्तिनियमात्करणस्य प्रमायामिन्द्रियेण प्राप्तिरपेक्ष्यते न तु
व्यापारतया, भ्रमे तु विषयः कर्मैव न प्रकारकत्वादतोऽप्राप्ते भ्रमो-

त्वन्यत्, तत्रानुपलब्धावपि तुल्यं। न च ज्ञातकारणा-
जन्यभ्रमत्वेनेन्द्रियजन्यत्वं। एवं ह्यभावप्रमाकारण-
त्वमपीन्द्रियस्य तत एवास्तु किमनया कुदृष्ट्या। एव-
मस्त्विति चेत्। न। प्राप्त्यभावेनोक्तोत्तरत्वात्। किञ्चा-
सन्निकृष्टेऽपि दोषादुपनीतेऽभावे भ्रम इन्द्रियेण सम्भ-
वति चक्षुषो पाषाणः सुरभिरिति भ्रमवत्। अभाव-
प्रमा न सम्भवति प्राप्त्यभावादित्युक्तं। नन्वधिकरणा-
भावार्थोर्विशिष्टबुद्धिरस्ति, सा नेन्द्रियजन्या अभा-
वबुद्धित्वात्, नानुपलब्धिजन्या भावबुद्धित्वात्, नोभ-
यजन्या जातिसङ्करप्रसङ्गात् अत उभयग्राहकमिन्द्रि-
यमभ्युपेयमिति चेत्, अभाववद्भूतलमित्यनुपलब्धु-
पनीताभावविशिष्टबुद्धिरिन्द्रियेणैव चक्षुषा चन्दनं
सुरभीतिवत्, भूतले घटो नास्तीति च चक्षुरुपनीत-
भूतलेऽभावबुद्धिरनुपलब्ध्यैव घ्राणेन चन्दने सौरभमि-
तिवत्।

जायते इत्यर्थः। 'अत इति, अनुपलब्धस्योभयग्राहकत्वासम्भवादिति
भावः। 'त्वन्मतेनेति, अस्माकन्तु तत्रानुमानस्वीकारेण कार्य्यवैजात्यात्
साजात्य एव व्यभिचारस्य कारणताविरोधित्वादिति भावः। व्यभि-
चारोदाहरणान्तरमाह, 'वाय्वादाविति। 'अपसिद्धान्तादिति। ननु

यत्तु व्यापाराभावान्नानुपलब्धिः प्रमाणं व्यापारवत-स्त्र करणत्वादिति। तन्न। क्रियया ह्ययोगव्यवच्छेदेन सम्बन्धि करणं, न तु व्यापारवदित्यपि विशेषणं गौरवादिति।

अत्रोच्यते। प्रतियोगिग्राहकेन्द्रियेणाश्रयग्रहो न हेतुः प्राङ्नास्तिताग्रहे त्वन्वयेन व्यभिचारात्। वाय्वादौ च रूपाद्यभावधीरिन्द्रियजन्यैव नानुपलब्धि-लिङ्गजन्या अनुपलब्धेरज्ञानात्। आप्तवाक्यस्यैव तज्-ज्ञापकस्याभावात्। अथाज्ञातैव रूपाद्युपलम्भस्यानुप-लब्धीरूपाद्यनुपलब्धिं गृह्णाति श्रुतेव घटाभावमिवेति चेत्, त्वन्मते उपलम्भस्यातीन्द्रियत्वेन योग्यानुपलब्ध्या उपलम्भाभावस्य ग्रहीतुमशक्यत्वात् अनुपलब्धिमात्र-

---

नायं वस्तुदोषः किन्तु पूर्वापराभ्युपगमविरोधेन[१] वादिदोषः तथाच योग्योपलम्भवादिनामनुपलम्भो मानान्तरं स्यादेव बाधकाभावात् अतो दोषान्तरमाह, 'योग्यत्वेऽपीति, 'मानान्तरेणेति, घटाभावादिग्राह-केणेति शेषः, अन्यथोपलम्भानुपलम्भस्यैवानुपलम्भत्वस्वीकारेण विरो-धापत्तेरिति। नन्वेतावतापि भवतु पटाद्यभावे ज्ञातानुपलब्धि-र्ग्राहिका, न चैवमनुपलब्धेर्मानान्तरस्य निरासः, उपलम्भानुपलब्धे-रभ्युपगमादित्यरुचेराह, 'अपिचेति। नन्विदमपि न सम्यक्, अन्यस्य

---

(१) पूर्व्वाभ्युपगमव्याघातेनेति ख०।

स्याभावाग्राहकत्वात्। अस्तु तर्हि ज्ञानं योग्यमिति चेत्। न। अपसिद्धान्तात्। योग्यत्वेऽपि भूतलीय-घटाभावेऽपि ज्ञानैव योग्यानुलब्धिर्लिङ्गमस्तु योग्य-घटोपलम्भस्यानुपलब्ध्या ग्रहसम्भवात् कृतमनुपलब्ध्या मानान्तरेण। घटाभावधीरज्ञातकरणिका लिङ्गाद्यनु-सन्धानं[१] विना जायमानत्वादिति चेत्। न। वाय्वादौ रूपाद्यभावप्रतीतिरपि तथा। अथ रूपादिमत्तया ज्ञातत्वाभावस्तदनुमितरूपवत्तानुपलब्धिर्वा लिङ्गमि-ति चेत्। न। वाय्वादौ ज्ञातत्वाभावस्यापि रूपा-द्यभावतुल्यतया ग्रहीतुमशक्यत्वात्। वाय्वादौ तस्य प्रत्यक्षत्वे रूपाद्यभावोऽपि तथास्तु। नापि काय-वाग्व्य-वहाराभावेनानुपलब्धिरनुमीयते उपेक्षाज्ञान-मूकत्व-

---

त्वगिन्द्रियोपनीतनीले पीताभावाग्रहादेव प्रतियोगिग्राहकेन्द्रिय-जाधिकरणग्रहणस्य कारणत्वात्। न च प्रतियोगिग्राहकेन्द्रिय-विलम्बादेव तत्र विलम्ब इति, इन्द्रियविलम्बो हि प्राप्तेन्द्रिय-विलम्बः। न च ततस्तत्र तदभावः, घटाभावस्थलेऽपि तादृश-तद्विलम्बादित्यस्वरसादाह[२] 'किञ्चेति। नन्विदमपि न युक्तम्, रूपाभावो वायुवृत्तिः योग्यप्रतियोगिकत्वे सति तद्वृत्तित्वेनानुपलभ्य-

---

(१) लिङ्गाद्यनुविधानमिति क०।
(२) तादृशविलम्बादित्यरुचेराहेति ख०।

प्रयोदर्शनेन व्यभिचारात्। न च व्यवहाराभावमात्रं लिङ्गं, कस्यचिद्व्यवहाराभावस्य व्यभिचारात् सर्व्वव्यवहाराभावस्य ग्रहीतुमशक्यत्वात्। किञ्च घटवत्तया ज्ञातत्वाभावेन तदनुमितानुपलब्ध्या वा लिङ्गेन भूतलादावभावानुमितिरस्तु किं मानान्तरेणानुपलब्ध्या। अपि च प्रतियोगिग्राहकेन्द्रियजन्यमधिकरणज्ञानमनुपलब्धिसहकारि तदा स्याद्यदि तेन विना सा नाभावं बोधयेत्। न चैतद्दृष्टं, वाय्वादौ रूपाद्यभावे तया दृष्टमिति चेत्। न। असिद्धेः। न च व्याप्तिबलात्तत्सहकारित्वं, एवं हि वाय्वादौ रूपाद्यभावप्रत्ययोऽनुपलब्धेर्भवंस्तादृशाश्रयमाक्षिपेत्। अनाक्षेपे वाऽनुपलब्धेर्न भवेत्। ततो न भवति किन्तु लिङ्गादिति चेत्, लिङ्गमपि सैव, तच्च दूषितमेव। किञ्च नानुपलब्धिर्लिङ्गं ततो हि नीरूपो वायुरित्यनुमितिः स्यात्, न तु वायौ रूपाभाव इति। अपि च घटवत्युपलम्भ-

---

मानयोग्यप्रतियोगिकत्वादित्यनुमानसम्भवात् इत्यरुचेराह, 'अपि चेति। नन्विदमप्यनुपपन्नं, यावत्तदुपलम्भकसाकल्ये सति अनुपलब्धिर्ग्राहिका उक्तस्थले यावत्तत्सत्त्वे उपलम्भप्रागभावात् अव्यवहितक्षणे घटोपलम्भस्यैव चोत्पत्त्या कथमभावधीरुत्पद्यतां। न चोभयसामग्रीसत्त्वे उभयोपल-

प्राक्कालेऽनुपलब्ध्या घटस्मृतिमतः कुतो नाभावधीः घटाभावादिति चेत्, तर्ह्यभावरूपार्थजन्याभावबुद्धिरर्थजन्यत्वेन साक्षात्कारिणी इन्द्रियजन्या च स्यात्। तदा घट एव प्रतिबन्धक इति चेत्, तथापि तदभावोऽभावबुद्धौ जनक एव स्यात्। स्यादेतत्। गृहमुपलभ्य निर्गतश्चैत्रो यत्र केनचित्पृष्टस्तत्र मैत्रश्चासीदिति, स च क्षणं ध्यात्वाऽनुपलब्ध्या तत्र मैत्राभावमवगम्याह नासीत्तत्र मैत्र इति, सेयं प्राङ्नास्तिताधीर्न स्मृतिः पुरा गेहेऽनुभूयमाने मैत्रासत्त्वेन तदभावाननुभवात्। एवञ्च तत्रैवेन्द्रियव्यापारं विनैवानुपलब्ध्या अभावानुभवादन्यत्रापि सैव हेतुः कल्प्यत्वात्। तदाहुः। "स्वरूपमात्रं दृष्टं हि वेश्माद्यर्थं स्मरन्नथ। तत्रान्येनास्तितां पृष्टस्तदैव प्रतिपद्यते" इति। मैवं। प्राङ्नास्तितायां

अयोरन्यतरोत्पत्तौ विनिगमकाभावः, प्रतिबन्धकाभावस्य कार्यसहभावेन जनकतया तत्रोत्तरकाले उपलब्ध्योत्पत्त्या तादृशानुपलब्ध्याभावाग्राहकत्वात्। किञ्च घटवति घटाभावधीर्भ्रम इति तत्र दोषाभावादेवाभावग्रहो न विषयाभावादिति। अत्र ब्रूमः। सत्यनुपलब्धिहेतुत्वे सर्वमिदमनुपपद्यते तदेव तु नास्ति इत्यत्र तात्पर्यं,

हि न तावद्ग्रातानुपलब्धिर्भूतले घटाभावस्यैवाऽभाव-ग्राहिका तदानीं[१] गेहस्य विप्रकृष्टत्वेन योग्यानुपलब्धेरभावात् । नापि ज्ञाता, अनवस्थाप्रसङ्गात् । अनुपलब्धेरप्यभावरूपतयाऽनुपलब्ध्यन्तरेण ग्राह्यत्वात् । उपलब्धास्यानुपलब्धिरज्ञातैव स्वरूपसतो मैचानुपलब्धिं गृह्णाति चेत्, त्वन्मते उपलब्धास्यातीन्द्रियत्वेन तदभावस्य योग्यानुपलब्ध्यग्राह्यत्वात् । अथ गेहस्य योग्यमैचवत्तया स्मरणार्हस्य स्मरणाभावस्तत्राज्ञातस्य गेहे मैचाभावग्राहक इति चेत् । न । स्वरूपसतः स्मरणाभावस्य ग्राहकत्वे तस्मिन् सत्यभावसंशय-विपर्ययाभावप्रसङ्गात् । भवति च कदाचित् तत्रासौदिति विपर्ययस्तत्रासौन्न वेति संशयश्च । अथ दोषात्संशय-

---

घटस्थलेऽभावानुपलम्भस्य विषयाभावेनैवोपपत्तेः । विषयकारणत्वस्य क्लृप्तत्वात् अनुपलम्भकारणस्य कल्पनौचित्यात् । न च घटाभावे सति घटोपलम्भवतो घटाभावानुपलम्भेन तद्धेतुत्वनिश्चयः, तत्र घटोपलम्भकदोषस्यैव प्रतिबन्धकत्वात् । तस्माद्विषयाभावेनैवान्यथासिद्धिसम्भवात् । अनुपलब्ध्यभावात् क्वचित् कार्याभावादर्शनेन न साभावधीहेतुः

---

(१) इदानीमिति ख० ।

विपर्य्ययौ। न चासाधारणं प्रमाकरणं दूषयन्त एव दोषाः संशयादिहेतवो भवन्ति। न चात्र स्वरसतिद्धस्य योग्यास्मरणस्य किञ्चिद्दूषितमिति वाच्यं। दोषसाहित्यमेव हि करणानां दुष्टता। न हि दूरत्वादिना चक्षुषः किञ्चिदपक्रियते, किन्तु मण्यादेर्दाह इव स्वरूपसतामेव प्रतिबन्धकत्वमिति चेत्। न। अज्ञाताद्योग्यास्मरणात् तदाभावधीरित्यसिद्धेः। किन्तु मनसा ज्ञाताद्योग्यास्मरणाल्लिङ्गात् प्रमाणेन कृतात्तदाभावप्रतीत्युपपत्तौ नानुपलब्धिः प्रमाणान्तरं वाच्यते। योग्यस्मरणाभावो न मनोग्राह्यः प्रत्यासत्त्यभावात् ज्ञानस्यायोग्यत्वाद्वेति[१] चेत्। न। वाय्वादौ रूपाद्यभावप्रतीतेरलैङ्गिकत्वेनेन्द्रियानुविधानेन तत्र-

---

कुतः करणमिति सर्व्वत्र तात्पर्य्यम्। न च ग्रन्थेऽन्वय-व्यभिचारदर्शनादिदमसङ्गतम्, तद्व्यतिरेकेण फलव्यतिरेकस्य बीजत्वादिति। 'वाय्वादाविति, घटाभावस्थले तेनानुपलब्धेर्ज्ञानान्तरत्वाभ्युपगमादुदाहृतं। 'इन्द्रियेति, इन्द्रियसम्बद्धविशेषणतात्रेन्द्रियसंयुक्तात्मसमवेतविशेषणविशेषणता द्रष्टव्या, गेहे मनःसंयुक्तात्मसमवेतज्ञानविषयीभूते मैत्रवत्त्वप्रकारकस्मरणविषयत्वाभावस्य विशेषणतासम्भवादिति। 'तत्तुल्य-

---

(२) ज्ञानस्यायोग्यत्वाच्चेति ख०।

त्वे सिद्धे इन्द्रियसम्बन्धविशेषणतायाः प्रत्यासत्तित्वकल्पनात्। तज्ज्ञानं प्रत्यक्षं जानामीत्यनुभवस्य लिङ्गाद्यजन्यत्वात्। न च ज्ञातता लिङ्गं, निराकृतत्वात्। तत्रापि कथमभावे संशय-विपर्य्ययाविति चेत्। न। लिङ्गसंशय-विपर्य्ययाभ्यां लैङ्गिकसंशय-विपर्य्ययदर्शनात्। यदा तु सुनिपुणेनैकज्ञानविषयतायोग्यस्य मैत्रस्यानुभवे सति स्मरणार्हस्यास्मरणमवधार्य्यते तदानुमितिः प्रमा। अत एवास्मरणमात्रस्य व्यभिचारमुपलभ्य तदुपेक्ष्य विशिष्टास्मरणं ज्ञातुकामस्य प्रणिधानमुपयुज्यते। अन्यथा ध्यानमनुपपन्नं स्वरूपसत एवास्मरणस्याभावग्राहकत्वात्। तत्राद्योऽस्मरणं लिङ्गत्वेनैवोपयुज्यते। प्रयोगस्तु तन्नेदं तदा मैत्राभाववत् तत्तुल्यपरि-

---

परिमाणेति, मया मैत्रवत्त्वेनास्मर्य्यमाणत्वादिति विशिष्यैव हेतुर्द्रष्टव्यः, तेन तत्तुल्यपरिमाणवत्तया अस्मर्य्यमाणे नायं हेतुरस्तीति तत्र हेत्वभावादस्मरणं न पृथक् प्रमाणं प्रसज्येत। मयेति च विशेषणाद्यस्य मैत्रे न तादृशप्रत्ययः तत्र संस्कारानुत्पाद-विलोपादिसम्भवादस्मरणस्य सम्भवेन व्यभिचारोऽपि न भवति, यस्य यत्रानुभवे सति स्मरणनियमस्तद्वत्तया अस्मर्य्यमाणत्वस्य अव्यभिचारात् स तु कोऽपि कस्यापि तादृशो भवतीति मयेत्युक्तं विशेषणमिति, तत्सूचनायैव 'तत्तुल्यपरिमाणेत्यादिविशेषणमिति।

मात्रादिवैगितया स्मरणेऽपि तद्वत्तया असम्यग्माण-त्वात् यदेवं तदेवं यथा घटाभाववद्भूतलमिति।

इतिश्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे अनुपलब्धिप्रामाण्यवादः।

इति श्रीजयदेवमिश्रविरचिते तत्त्वचिन्तामण्यालोके प्रत्यक्ष-खण्डालोके अनुपलब्धिप्रामाण्यवादालोकः।

अथाभाववादः ।

नन्वभावो भावात्मैव ततस्तत्र संयोगादिरेव ग्राहक-इति न तत्र विशेषणता प्रत्यासत्तिः । तत्र प्राञ्चः । अस्ति तावदिह भूतले घटो नास्तीत्यबाधिता बुद्धिः सा चेयं न भूतलालम्बना घटवत्यपि प्रसङ्गात् । नापि केवल-तदालम्बना अतिरिक्तकैवल्यानभ्युपगमात् । भूतलमेव-कैवल्यमिति चेत्, तर्हि पौनरुक्त्यमधिकं, अभेदे आधा-राधेयभावानुपपत्तिश्च । अथाधिकाभाववादिनापि अभावः साश्रयो वाच्यः देशादिनियमेन व्यवहारात् । तथाचास्ति भूतले विशेषो योऽभावाश्रयः स न भूतल-

---

अथाभाववादालोकः ।

'विशेषणतेति, समवायस्यातीन्द्रिय एवेति भावः । 'अधिक-मिति, अत्र घटवत्यप्यतिप्रसङ्गस्तदवस्थ एवेति भावः । नन्वग्नी-षोमावपि न प्रत्येकभिन्नौ मेलकस्यातिरिक्तस्यानभ्युपगमादित्य-न्यतरासम्बन्धितयैव तन्मात्रपदार्थनिर्वचनम् तथाचाभावाभ्युपगम इति दोषमग्रे वक्ष्यमाणत्वेनोपेक्ष्यान्यदाह, 'ततो भूतलेति । ननु प्रतियोग्यविषयाधिकरणबुद्धिरेव तन्मात्रबुद्धिः । न चाभावा-

माचं घटवत्यपि प्रसङ्गात्। नाभावयुक्तमन्योन्याश्रयात्। न च घटवत्, विरोधादिति चेत्। न। विशेषस्यैव[1] अभावाश्रयत्वात् स चाननुगत एव। एकाश्रयता त्वननुगतस्यापि घटाश्रयतेव भवति। किञ्च कुत्राभाव इति, यत्र प्रतीयेत इत्येवोत्तरं, क्व प्रतीयेत इत्यत्र यत्रास्तीत्येव। अन्यथा गोत्वादिकमपि न स्वीक्रियेत तदाश्रयविशेषादेव व्यवहारसत्त्वात्। तथापि कीदृशि भूतले अभाव इति चेत्, अभावपूर्व्वसमये कीदृशं भूतलमिति प्रश्ने घटवदित्युत्तरं, अभावसमयेऽभाववदिति, मध्यसमयस्तु नास्त्येव, इह भूतले घटोनास्तीत्याधाराधेयभावप्रतीतेश्च। अभावाधारत्वं भूतलस्य न प्रतीयते किन्तु तन्माचबुद्धिविषयत्वमिति चेत्, अहो व्याख्याकौशलमनुभवोऽपि व्याख्याय कथ्यते तन्माच-

---

भ्युपगमदोषः, तत्रापीत्यमेव तन्माचबुद्धिः रूपाभावस्वीकारात्, एवं तत्रापीति धारायामविश्रान्तिः प्रमाणिक्येवेत्यरुचेराह, 'किञ्चेति, 'व्यवहारस्येति। न चोत्कर्षरूपाया जातेः व्यक्तिवित्तिवेद्यायास्तारशब्दाभिलापात्मनि व्यवहारे व्यवहर्त्तव्याधिकस्यावधेर्ज्ञानं हेतुर्द्रष्टव्य इति वाच्यम्। तत्रापि सजातीयसाक्षात्कारप्रतिबन्धकप्रवृत्तित्वेनानुगतीकृततारत्वरूपप्रवृत्तिनिमित्तज्ञानस्य हेतुत्वात् तस्य चाव-

---

(१) भूतलविशेषस्यैवेति ख०।

पदार्थानिर्वचनञ्च । न हि भूतलबुद्धिस्तन्नाचबुद्धिः, घटवद्भूतलबुद्धेरपि भूतलबुद्धित्वात्। सा बुद्धिर्न भूतलस्य किन्तु घट-भूतलयोरग्नीषोमयोरिव देवतात्वमिति चेत्। न। ततो भूतलाव्यवहारप्रसङ्गात् भूतलस्याविषयत्वात् । आशुभाविभूतलविषयकज्ञानान्तरादिति चेत्, तर्हि सैव भूतलबुद्धिस्तन्नाचबुद्धिरिति तद्देशे घटाभावस्य व्यवहारप्रसङ्गः। एतेन भूतलेन्द्रियसन्निकर्षज-घटवद्भूतलेन्द्रियसन्निकर्षजज्ञानयोर्विशेषोऽङ्गीकरणीयः सामग्रीभेदस्य कार्यभेदनियतत्वात्। तथाच स एव तन्नाचपदार्थ इति निरस्तं। ततोऽपि भूतलव्यवहारात्। प्रतियोगि-तद्व्याप्येतरजनिता भूतलबुद्धिरभाव इति चेत्। न। घटवति तज्जनितायाश्चपीतरजनितत्वात्। तन्नाचजनिता सेति चेत्। न। माचार्थस्याभावत्वात् तस्य चापरिज्ञानात्। घटाविषया सती भूतलविषयेति चेत् । न । उक्तोत्तरत्वात्। किञ्च प्रतियोगिनिरूपणाधीननिरूपणोऽभावो बुद्धि-

---

धिगर्भतयाऽवधेरपि व्यवहर्त्तव्यत्वादिति शब्दानित्यतायां वाच्यत्वादिति भावः। 'तथाचेति, नन्वन्धकारे कण्टकाभावो मास्तु कण्टकाभावाभावोऽस्तीत्यपि न, तस्यापि बुद्धिरूपत्वात् भावे वा वेधः कुतस्तस्य कण्टकसाध्यत्वात् तस्य च कण्टकाभावाभावादन्यत्वात्, 'निर्ज्जन इत्या-

स्तु न तथा प्रतियोगिप्रकाशं विनापि बुद्धिनिरूपणात्। व्यवहारार्थं दृश्यप्रतियोगिज्ञानापेक्षा अभावो ज्ञात एवेति चेत्। न। व्यवहारस्य व्यवहर्त्तव्योपलम्भनिबन्धनत्वेन तथा अदृष्टचरत्वात्। यदि च प्रतियोगिस्मरणसापेक्षा तन्नाबधीरभावपदार्थः तदान्धकारादौ या तन्नाबधीः सा अभावो न स्यात्। तथा च तत्र विचरन् कण्टकैर्विध्येत कण्टकस्मरणं विना कण्टकाभावाभावात्। निर्जने बन्धविच्छेदेऽपि जलनिःसरणं न स्यात् तदानीं तन्नाबबुद्धेः सर्वथाऽभावात्। किञ्च तन्नाबधीनाशे घटोन्मज्जनप्रसङ्गः घटाभावाभावस्य घटत्वात्। यदि चाभावो नातिरिक्तस्तदा यत्र घटसंसृष्टत्वबुद्धिरासीत् भूतलत्व तन्नाबधीः मुद्गरपातजन्यातिरिक्तविषयानङ्गीकारात्। अतिरिक्ताभावे किं मानमिति चेत्, नास्तीति बुद्धिरेव। नन्वभावव्यवहारानुपपत्तिरन्योन्याश्रयादिति। अत्र प्राभाकराः। घटवद्भूतलबुद्धिभिन्ना भूतलबुद्धिरभावव्यव-

---

द्यपि सावद्यं, तथाहि प्रतिबन्धकाभावस्य हेतुभावोऽन्वय-व्यतिरेकगम्यः, स च प्रतिबन्धकाभावे कार्य्यम् तदभावे नेत्यात्मको न तु प्रतिबन्धके न कार्य्यमित्याद्यात्मकः, प्रतिबन्धकाभावाभावो न प्रतिबन्धकः किन्त्वन्य इति भ्राम्यतः पूर्व्वपक्षिणो मते तादृशव्यतिरेकपरस्य

धारकारणं। न च दोषात् घटवति घटवत्त्वाज्ञाने भूतलज्ञानमभावः स्यादिति वाच्यं। घटवतो भूतलस्य ज्ञानाद्भिन्नस्य भूतलज्ञानस्याभावत्वात् तद्भ्रमाद्या-भावभ्रमः। वस्तुतोऽत्यन्ताभावे प्रतियोगिमदधिकरण-ज्ञानस्याप्रसिद्धेः प्रतियोगिमज्ज्ञानभिन्नमधिकरण-ज्ञानं व्यधिकरणाभावव्यवहारे कारणं, समानाधि-करणनिषेधप्रतीतिश्च प्रतियोग्यधिकरणयोः स्वरूपभेद-

---

प्रतिबन्धकाभावहेतुत्वग्रहानुपयोगित्वात् तथाच बन्धाभावाभावे जल-निःसरणाभावोभवतीह तु तन्नाम्नबुद्धिरूपतया बन्धाभावाभावोना-स्तीति कथं जलनिःसरणाभावः। न चैवं बन्धाभावो बन्धाभावाभावो वा द्वयमपि नास्तीति विरुद्धं[१] बुद्ध्यात्मनोर्द्वयोरपि अभावे तदभावा-दित्यपरितुष्यन्नाह, 'किञ्चेति। 'नास्तीति, तत्र विषयान्तरासम्भवा-दिति भावः। 'न चेति, इदं तु स्वम्प्रति द्रष्टव्यम्, स्वस्मिन्नेवाभा-वज्ञाने तद्व्यवहारस्यादनुपपत्त्या तद्धीरित्यात्माश्रयात्[२] परम्प्रति तु सा प्रमाणमेवेति भावः। ननु तद्व्यवहारादित्याद्यसङ्गतम्, प्रतियोगि-ज्ञानादेरभावव्यवहारार्थमेवापेक्षणादिति सिद्धान्तात्, आकाशादेरव-धेरभावस्य केवलान्वयिनः स्वीकारपक्षे प्रतियोगिमदधिकरणस्या-

---

(१) विप्रतिषिद्धमिति ख०।

(२) तत्रैवाभावज्ञाने तद्व्यवहारः तदनुपपत्त्या तद्धीरित्यन्योन्याश्रयसम्भ-वादिति ख०।

मालम्बते। तेन घटवत्त्वेन ज्ञायमानेऽपि भूतले भूतलं घटो नेति प्रतीतिः। तथाच यस्याभावज्ञानकारणत्वं परेषान्तदेवाभावव्यवहृतिकारणमस्तु। न ह्यधिकरणबुद्धिं विना तद्बुद्धिः। न च भूतलबुद्धिस्तथा, घटवत्यपि प्रसङ्गात्। न चाभावाधिकरणभूतलविषयत्वाद्बुद्धेर्विशेषः, प्रतियोगिसत्त्वेऽपि प्राङ्नासीदिदमचेति प्रतीतेः। किञ्च ज्ञानविषयभूतलस्याभावो यदि विशेषणं तदा अभावज्ञानमेव तज्ज्ञानकारणं, उपलक्षणं चेत्, न कश्चिद्विशेषः। प्रतियोगिसत्तयानुपलब्धिरपि कारणमिति चेत्। न। प्रतियोगिसत्तयोपलब्धेऽपि प्राङ्नासीदिदमचेति प्रतीतेः, बुद्धयोश्च विशेषः[१] स्वरूपविशे-

---

प्रसिद्धिरित्यस्वरसादाह, 'वस्तुत इति, 'अत्यन्ताभावे' आकाशादिप्रतियोगिके, 'प्रतियोगिसदिति। न च घटवति घटाज्ञानदशायामभावापत्तिरभावो नाम ह्यन्यो नास्त्येवेति, अभावव्यवहारापादनमनानिष्टम् प्रतियोगिस्मृतौ यावत्तदुपलम्भकत्वेऽधिकरणज्ञाने चाभावव्यवहारात्। न चोत्तरकाले बाधावतारेऽपि तदापत्तिः, प्रतियोगिसत्त्वज्ञानस्य बाधकत्वेनाभावव्यवहारस्य तदानीमभावात्। न च बाधानवतारकालीनाभावव्यवहारस्यापि संवादापत्तिः, बाधितत्वेनासंवादादिति भावः। 'समानेति प्रतियोगिसमनाधिकरणेत्यर्थः। न

---

(१) भेद इति क०।

धावेव नान्योन्याभावोऽनवस्थाना दात्माश्रयाद्वा। भूत-
लज्ञानापेक्षया घटवद्भूतलज्ञानत्वमेव वा वैधर्म्यभेदः।
न चातिरिक्ताभावपक्षेऽप्यन्योन्याभावेऽत्यन्ताभावे च
नित्ये मानमस्ति, प्रतियोगिनि बुद्धिस्थेऽधिकरण-
स्वरूपस्यैवानतिप्रसञ्जकत्वात्। न हि तत्राधिकरणस्य
प्रतियोगितादात्म्यं प्रतियोगिमत्त्वं वा सम्भवति। अत-
एवाभावे अभावान्तरं त्वया न स्वीक्रियते[१] अधिकर-
णस्य तद्वैरूप्याभावात्। नन्वर्थेनैव विशेषो बुद्धेः, न चा-

चैवमनुगम इत्याह, तथाचेति। ननु यत्कालीनोऽभावोबुद्ध्यते तदा-
तनाभावाधिकरणत्वं बुद्धेर्विशेष उच्यत इत्यरुचेराह, 'किञ्चेति।
नत्वभावोऽधिकरणे विशेषणमेव तद्बुद्धौ तूपलक्षणम्, प्रतियोगि-
मत्तानुपलम्भोऽपि ग्राह्याभावकालीनप्रतियोगिमत्तानुपलम्भ इत्येत-
न्नियामकमभावपक्षे घटते केवलाधिकरणाभावपक्षेऽधिकरणस्यैक-
रूपत्वात्कथं तत्रैव कदाचिद्घटवदिति कदाचिद्घटाभाववदिति व्यव-
हारवैचित्र्यमित्यत आह, 'न चेति एवमधिकरणद्वैरूप्यात्प्रागभाव-
ध्वंसातिरेकेऽपि अन्योन्याभावादेरतिरिक्तत्वे मानं नास्तीत्यर्थः। एवं
तदुभयोराधारात्मकत्वे[२] प्रागभावादेरपि तथात्वमनुमेयमिति भावः।
'अतएव' अनतिप्रसङ्गादेव, 'धारेति, एतच्च प्रतियोगिमद्भिन्नत्वानव-

---

(१) अभावे नाभावान्तरं स्वीकुरुते इति ख०।

(२) तदुभयोरनतिरिक्तत्वे इति ख०।

पार्थभेदोऽस्ति। मैवं। न हि तावदर्थो ज्ञानकारणमपश्यं, किन्तु सामग्रीविशेषादुद्धिविशेषो जायते धारावाहिकबुद्धिवत्। यद्वा घटवद्भूतलभिन्नं भूतलमभावः यच्च परेषामभावः भेदश्च स्वरूपमेव। तादात्म्येनाप्रतीतौ प्रतीतिरिति तवापि स्वरूपभेदलक्षणं इदानीमिदं भूतलं घटवद्भूतलं न भवतीति प्रतीतेः। एतावांस्तु विशेषो यत् तव समानाधिकरणनिषेधप्रतीतिरियमन्योन्याभावभेदमवगाहते, मम तु स्वरूपं[१]। ननु यदेव भूतलं घटवद्भूतलाभिन्नमासीत्तदेव कथमद-

---

गाहित्वे बुद्धेर्द्रष्टव्यम्, तद्भिन्नत्वप्रकारकबुद्ध्यभ्युपगमे चार्थभेद एवेत्यनुपदमेव स्फुटमिति। ननु प्रतियोगिमदधिकरणबुद्धिभिन्नमित्यत्र प्रतियोगिमत्त्वं यद्यधिकरणविशेषणं न किन्तु धीविशेषणं[२] तदा घटवत्यपि घटाभावापत्तिः, अथाधिकरणविशेषणम् तर्हि तावदेवास्तु घटं बुद्ध्यन्तर्भावेण। न चाधाराधेयभावानुपपत्तिः, घटाभावे घटात्यन्ताभाववदुपपत्तेरिति पूर्वाखरसादाशङ्किते सम्प्रतिपत्तिमाह, 'यद्वेति। न चाकाशाभावादौ प्रतियोगिमदधिकरणप्रसिद्धिः, तदभ्युपगमात्, अभ्युपगमे वा प्रतियोगिप्रतियोगिकभिन्नोऽधिकरणनिष्ठसम्बन्ध उक्तस्यार्थो द्रष्टव्यः। अस्ति चाकाशादिप्रतियोगिकभिन्नः

---

(१) स्वरूपभेदमिति ख०।

(२) यद्यधिकरणबुद्धिविशेषणमिति ख०।

भिन्नमिति चेत्। न। तथाप्यबाधितसमानाधिकरण-निषेधप्रतीतिबलेनान्योन्याभावसिद्धौ तथात्वस्य दुर्वारत्वात्। समयभेदेनैव भेदाभेदौ न विरुध्येते इति तु युक्तं। यदि च घटवद्भूतलाभिन्नं तदिदानीं स्यात् तदा घटवद्भूतलव्यवहारस्तत्र स्यात् घट-तदभावावच्छेदभेदेनान्योन्याभाव-तदभावौ भूतले वर्त्तेते इति चेत्, मयापि भूतलबुद्धिर्घटवद्भूतलबुद्ध्यवच्छेदेन स्वरूपभेद-तदभावौ[1] वर्त्तेते इति गृहाण। ननु भूतले घटोऽस्ति न वेति संशयो घटो नास्तीति विपर्य्ययो वा कथं स्यात् प्रतियोगिनि बुद्धिस्थेऽधिकरणस्य तज्ज्ञानस्य चाभावस्योपलम्भादिति चेत्। न। भूतले तज्ज्ञाने वा घटवद्भिन्नत्वस्य घटवद्भूतलज्ञानभिन्नत्वस्य

सर्व्वनिष्ठः सम्बन्धः, न तु घटप्रतियोगिकभिन्नो घटवति सम्बन्धः, तस्य घटप्रतियोगिकत्वात् आधाराधेयत्वप्रतितीरप्यत एवोत्पद्यते, तादृशसम्बन्धस्य भूतलादिवृत्तित्वादिति भावः। 'भेदश्चेति कश्चित्स्वरूपभेदः कुतोऽपि भेद इत्यर्थः। स्वरूपस्यैव भेदत्वे संवादमाह, 'तादात्म्येनेति तदात्मत्वेनाप्रतीयमानत्वे सति प्रतीयमानत्वस्यैव तद्भेदरूपत्वादित्यर्थः। 'तथापीत्युक्त्या स्वमतेऽप्रतीयमानत्वेन प्रतीयमानत्वाभावेन भेदलक्षणं भेदेन वा प्रतीयमानत्वनिर्व्वचनम्। भिन्नाधिकरणस्यैव तन्मतेऽभावत्वेने-

---

(१) स्वरूप एव भेदाभेदौ इति ख०।

च दोषवशेनानिश्चयात्। भूतल-तज्ज्ञानस्वरूपाणामननुगमात् कथमनुगतव्यवहार इति चेत्। न। अभावेऽपि तुल्यत्वात्। न ह्यभावत्वं सामान्यं, अभावत्वगतान्योन्याभावाव्यापकत्वात्। न च भावविरोधित्वं, विरोधस्याभावनिरूप्यत्वात् भावाभावयोः सहावस्थानाभावस्य स्वरूपाननिरेकाच्च। नापि भावप्रतियोगित्वं प्रतियोगित्वस्याभावविरहरूपत्वात् अभावाभावस्य भावाप्रतियोगिकत्वाच्च[१]। नापि सप्रतियोगिकत्वं, समवाय-सादृश्यादीनामपि तथात्वात्। नापि परकीयस्वभावत्वं, ज्ञानादिगतत्वात् स्वभावशब्दस्य

त्यन्योन्याश्रयान्नेदं लक्षणमिति सूचितम्। तन्मतेऽभावस्यातिरिक्तत्वेन न तस्य भेदलक्षणत्वविरोध इति भावः। तादात्म्येनाप्रतीयमानत्वं रजतत्वभ्रमविषयशुक्तावपीति तस्यामपि शुक्तिभेदापत्त्या भगवज्ज्ञानमादाय तादात्म्येनाप्रतीयमानत्वस्यासिद्धिर्वाच्या। न च तन्मते भगवान्नास्तीति, तवापीत्युक्तं इत्यन्ये।

ऋजवस्तु न ममैवेदं लक्षणं किन्तु तवापीति यथाश्रुतमेवार्थमाहुः। 'भूतलबुद्धीत्युपलक्षणं समयभेदोऽपि द्रष्टव्यः। 'भूतल इति, ननु वस्तुतो घटवतो भूतलाद्भिन्नस्याधिकरणस्याभावतया तन्मात्रगोचरैव धीरभावधीः, घटादिप्रतियोगिनापेक्षा चाभावशब्दाभिलापादौ

---

(१) अभावप्रतियोगिकत्वाच्चेति ख०।

स्वरूपार्थेऽननुगमाच्च । नापि सत्ताशून्यत्वं, सत्तायामेव गतत्वात् शून्यत्वस्याभावरूपत्वाच्च । सत्तात्यन्ताभाववत्त्वमभावत्वं अत्यन्ताभावश्चाभावत्वानवगतावप्यवगत-इति चेत् । न । अभावे अभावानभ्युपगमात् तथात्वेऽपि तत्रैव तदभ्युपगमात् । सत्ताबोधविधुरत्वमभावत्वं, सामान्यादौ सत्तावगतेऽपि बाधात् सा त्यज्यते अभावस्य तद्विरुद्धतयैव प्रतीतेरिति चेत् । न । विरोधिनस्य स्वरूपानतिरेकात् । सहानवस्थाननियमो विरोध इति चेत् । न । अनवस्थानस्यावस्थानाभावत्वेनाताश्रयात् । भावभिन्नत्वमिति चेत् । न । भेदस्य

व्यवहारे इति यदि पक्षस्तदा कथं उक्तक्रमेण संशयसमर्थनमिति । नैवम् । तदाप्यभावसंशयस्योक्तरीत्यैव निर्वाहात् घटवत्त्वकोटेस्तद्भिन्नत्वकोटिविरोधित्वेनाधिकरणरूपघटाभावनिश्चयस्य घटवत्त्वनिश्चयतत्संशयादावकिञ्चित्करत्वात् इति । इयांस्तु विशेषो यदेकत्र प्रतियोगिसद्भिन्नत्वमभावत्वं तत्कोटिकः संशयोऽपरत्राधिकरणत्वमभावत्वं तत्र संशय एव न किन्तूक्तसंशयोऽभावसंशयत्वेनाभिलप्यते इति संशयस्योक्तविषयत्वमुभयकक्ष्येऽपीति । 'अभावेऽपीति अतिरिक्ताभावेऽप्यनुगमाभावस्य तुल्यत्वात् इत्यर्थः । तथाच व्यवहारोऽप्यननुगत-एव व्यवहर्त्तव्यानुगमेनैव व्यवहारानुगमात्, तथाचाननुगते किमनुगतेन निमित्तेनेति भावः । 'तुल्यत्वादित्यस्य तवाप्यननुगतेनैवानु-

स्वरूपान्योन्याभावरूपत्वे उक्तदोषात् वैधर्म्यस्य चिन्त्यमानत्वात् प्रागभावत्वादेरभावनिरूप्यत्वात्। एवञ्चेदभावेऽपि नानुगमस्तदा किमधिकेन। स्वरूपविशेषादेव घटव्यवहारोऽप्यस्त्विति चेत्। न। भूतलविलक्षणघटानुभवात्। एक एवाभावोऽनुगत इति चेत्। न। तस्य नित्यत्वेन प्रतियोगिकालेऽप्यभावव्यवहारप्रसङ्गात् प्रागभावादिव्युत्पादनविरोधाच्च। यद्वा अभावपादिनाप्यभावज्ञानकारणमनुगतो भूत-

---

गतव्यवहार इत्यपव्याख्यानम् असम्भवादपसिद्धान्ताच्चेति। न ह्यभावत्वंसामान्यमिति, सामान्योक्त्यानुगतं पदार्थान्तरमभावत्वमित्यपि च प्रत्युक्तं वेदितव्यम्। 'अभावाभावेति, न च तत्साधारणाभावत्वानिर्वचनम्। तथासति तत्राभावव्यवहारस्यान्यनिबन्धनत्वेनाननुगतादेव व्यवहार इत्यागतमिति भावः। सप्रतियोगिकत्वं तन्निरूपणाधीननिरूपणत्वं, परकीयत्वं परवित्तिवेद्यत्वमिति भेदः। आशङ्कितस्यैव सत्ताशून्यत्वस्यार्थं विविच्य परीहारमुद्धरति, 'सत्तेति, 'अभाव इति, द्रव्यत्वाज्ञाने घटव्यक्तिवदभावत्वेनानवगततया सत्तात्यन्ताभावव्यक्त्यनुगमस्तदा स्याद्यद्यभावेषु सैका व्यक्तिर्भवेत्, न त्वेवम्। अभावेऽभावाभावात् किन्तु तत्तद्व्यक्तिस्वरूपं, तत्र चानुगतधर्मान्तराभावेऽननुगमः। अभावत्वेन चानुगमे आत्माश्रय एवेति भावः। 'तथावेऽपि' अभावेऽप्यत्यन्ताभावाभ्युपगमेऽपि(१)। 'तत्रैवेति, आत्माश्रयादिति

---

(१) अभावसत्त्वभावान्तराभ्युपगमेऽपीति ख०।

बुद्धिविशेषः स्वीकार्य्यः तद्वरं स एवास्तु प्रमेयं प्रमाणञ्च स्वप्रकाशत्वाद्बुद्धीनां। ननु तन्नाचबुद्धेरभावत्वे तस्याः स्वप्रकाशत्वेन प्रतियोगिज्ञानापेक्षा न स्यादिति चेत्। न। न ग्रहणाय तदपेक्षा किन्तु व्यवहाराय। ज्ञानस्य सत्यामिच्छायां व्यवहारार्थमधिकापेक्षेति चेत्। न। दृष्टा हि व्यवहारार्थमधिकापेक्षा यथा परिमाणस्य दीर्घत्वव्यवहारे। तथाह्यधिकलम्बावच्छिन्नह्रस्वितस्याद्यवच्छेदः परिमाणस्य दीर्घत्वं, तद्विपरीतन्तु ह्रस्वत्वं तादृशपरिमाणञ्चावयवि-

---

भावः। इदञ्चापाततः, परमार्थतस्तु तस्यानुगतस्य ज्ञातस्यानुगमकत्वं वाच्यं तज्ज्ञानं न प्रतियोगिज्ञाननिरपेक्षं, न वा निर्विकल्पकरूपमिति तदभावत्वेन ज्ञातमनुगमयेत् तथाचात्माश्रयः। किञ्च सत्तापदं सत्तादिवारणाय द्रव्यत्वादिषट्कपरं भावत्वपरं वोभयथापि सामान्यत्वादेर्भावत्वस्य च ज्ञानेऽभावत्वस्य ज्ञानादात्माश्रय इति द्रष्टव्यम्। ननु सत्ताबोधविरहः कदाचित्सत्तावत्यपीति तद्विरोधितावच्छेदकत्वमर्थः। तदुक्तमभावस्येत्यादि तथासत्याह, 'विरोधित्वस्येति। ननु अनुगतघटाभावव्यवहारोऽनुगतेन घटात्यन्ताभावेनेति कथमननुगतसाम्यमुभयोरित्यस्वरसादाह, 'यद्वेति अतिरिक्ताभाववादिनापि तत्तदभावज्ञाने स्वाधिकरणज्ञानत्वेनानुगतो बुद्धिविशेषोऽङ्गीकर्त्तव्यः, तद्वरं तत्तदधिकरणज्ञानत्वेन तत्तदभावव्यवहारजनकत्वमस्तु इत्यर्थः।

ग्रहसमकालमेवानुभूतं दीर्घत्वव्यपदेशस्त्वल्पसङ्ख्याव-च्छिन्नहस्ताद्यवच्छेद्यपरिमाणज्ञानमपेक्षते, तन्नाच-बुद्धेरभावत्वे दृश्यप्रतियोगिज्ञानापेक्षतया दृश्यतास-म्पत्त्यर्थं केश-कीटादिस्वरूपजिज्ञासाप्यर्थवती। न च तन्नाचबुद्धेरभावत्वे तद्विनाशे अभावाभावे भावोत्प-त्तिप्रसङ्ग इति वाच्यं। यथा घटाभावो बुद्धिस्तथा बुद्ध्यभावस्यापि बुद्ध्यन्तरत्वात्। निर्जने बन्धविच्छेदे च जलनिःसरणं नानुपपन्नं मनुष्याभावेऽपि पक्षि-कीटा-दिबुद्धिविशेषसम्भवात्। मोक्षे पुरुषान्तरस्य नियमे प्रमाणं नास्तीति चेत्। न। कार्य्यात् कारणकल्पनात्।

'न ग्रहणायेति, एतच्च स्वरूपज्ञातबुद्धिविशेषस्यैवाभावव्यवहारकत्व-मिति मते, यदा तु प्रतियोगिमदधिकरणज्ञानभिन्नत्वेन ज्ञातं ज्ञानं व्यवहारकं तदा ग्रहणायैव प्रतियोगिज्ञानापेक्षेति द्रष्टव्यम्। 'हस्त-वितस्त्याद्यवच्छेद इति, यद्यप्येतत्परिमाणस्य दीर्घत्वं धर्मस्तथाप्य तद्ग्रहे एवावधिज्ञानापेक्षा न तु दीर्घत्वव्यवहारमात्रे, तथापि तद-वच्छेदोऽपि परिमाणस्वरूपमात्रमिति दीर्घत्वव्यवहार एवावधि-ज्ञानापेक्षा परिमाणस्वरूपस्य ज्ञातत्वादिति भावः[१]। ननु तन्नाच-बुद्धेरभावत्वे तण्डुलादौ केशादिजिज्ञासाऽनुपपन्ना तण्डुलरूपाधि-करणबुद्धिरूपस्य केशाद्यभावस्य निश्चयादित्यत आह, 'तन्नाचेति,

---

(१) ज्ञातत्वादित्याशय इति ख०।

न चैवं बुद्धिनाशे पुनः संस्मरिता, बुद्धिधारासत्त्वात्। न च सर्वयुक्तिः, प्रमाणाभावात्। प्रतियोगिमदधिकरणभिन्नाधिकरणस्वरूपस्याभावत्वे सर्वं समञ्जसमेवेति पूर्वपक्षः।

सिद्धान्तस्तु सप्रतियोगिकोऽभावोऽनुभूयते घटो न पटोनेत्यनुभवात्, न तु तन्नाचं। अतोऽभावविक्ति-

---

'दृश्यता' प्रतियोगिग्राहकयावत्सम्पत्तिः, तथाच केशादेः सूक्ष्मस्य प्रतियोगिनो जिज्ञासापि ग्राहिकेति दृश्यतासम्पत्तये जिज्ञासापेक्ष्यते तेन जिज्ञासायां सत्यान्तन्नाचधीरेव व्यवहारं करोतीत्यर्थः। 'कार्य्यादिति, तद्धेतोरितिन्यायेनाधिकरणज्ञानस्यैवाभावव्यवहारजनकत्वप्रतीतेरिति भावः। ननु बुद्धिधारा परात्मीया, न च परात्मा प्रत्यक्षः, इत्यनुमित्यादिरूपा बुद्धिधारा वाच्या, न चानुमित्यादयो धारावाहिन्यः, स्मृतेरपि संस्कारोद्बोधकज्ञानसान्तरत्वेन सान्तरत्वादिति तदा तदन्यपुरुषीया तया धीर्वाच्या, तस्यापि तथा बुद्धिविच्छेदे तदन्यपुरुषीया तथा धीर्वाच्या, एवञ्चात्मकोटीनामाकल्पतैव परापरतादृशबुद्धिकल्पनमप्रामाणिकं गुरु चेत्यरुचेराह, 'प्रतियोगिमदिति।

'प्रतियोगीति, यद्यपेतन्नानुभवसाक्षिकं, तथाप्यनुभवसाक्षिके तद्वित्तिवेद्यत्वे पूर्व्वाप्रतीतस्य विशेषणतया विशेषणत्वानुभवेनैव तदाक्षिप्तमिति परम्परया तत्राप्यनुभवः साक्षीत्येतदुपात्तं। 'न च

वेद्यत्वं प्रतियोगिनः, प्रतियोगिज्ञानाधीनज्ञानत्वाभावस्यानुभवसाक्षिकं गोसादृश्यवत्। न च केवलमधिकरणं तज्ज्ञानं वा अभावः, प्रतियोगिज्ञानं विनापि तद्वित्तेः तद्वित्तौ प्रतियोगिनोऽविषयत्वाच्च। सप्रतियोगिकत्वाभावे च कस्य प्रतियोगी घटः। अथ केवलमधिकरणं तज्ज्ञानं वा अभावः स चाप्रतियोगिक एव, अभावव्यवहारस्तु प्रतियोगिज्ञानमपेक्षते इति तस्य प्रतियोगी घटः घट-तदभावव्यवहारयोर्विरोधादिति चेत्। न। इह घटो नेति नञर्थस्य प्रतियोगी घटोऽनुभूयते न त्वभावज्ञानानन्तरभाविनोऽभाव्य-

---

केवलमिति। न च त्वन्मतेऽप्यभावो न सप्रतियोगिकः इदन्त्वेन तदनुभवस्य प्रतियोगिनिरपेक्षत्वात् किन्तु अभावत्वं, तच्च ममापि तथैव घटवद्भिन्नत्वरूपस्य तस्य घटधीसापेक्षत्वादिति वाच्यम्। तद्भिन्नत्वस्यापि तस्य स्वरूपातिरिक्तत्वाभावेन सप्रतियोगिकत्वानुपपत्तेः अभावज्ञानं विना प्रतियोगिमद्भिन्नत्वानवगमाच्च। प्रतियोग्यवृत्त्यनुयोगिवृत्तिधर्मज्ञानाधीनत्वाद्भेदग्रहस्य। न चेदमसिद्धं प्रतियोग्यवृत्तित्वेन धर्मग्रहस्य भेदग्राहकत्वे सति प्रतियोगिवृत्तित्वं धर्मस्य घटत्वादेर्घटत्वाद्युपस्थितिसाध्यम्, तच्चेह घटेतरत्वगर्भतया भेदधीसापेक्षमित्यन्योन्याश्रयादिति वाच्यम्। वस्तुतः प्रतियोग्यवृत्तिना स्वरूपतो ज्ञातेन धर्मेण भेदग्रहात्। न च भेदभ्रमासम्भवः, प्रमाया-

वहारस्य, तत्राभावानुभवसमयेऽप्रतीतेः। व्यवह्रियते-ऽसौ न त्वनुभूयते इति चेत्। न। तादृशानुभवं विना तथा व्यवहाराभावात्। व्यवहारे प्रतियोगिज्ञाना-पेक्षेत्यपि न युक्तं व्यवहर्त्तव्यज्ञानस्य सत्यामिच्छायां व्यवहारेऽधिकापेक्षाया अदृष्टचरत्वात्। लघवादिह तथा कल्प्यते न त्वभाव इति चेत्। न। व्यवहार-भावे तथा कारणत्वानवधारणात् व्यवहारविशेष-स्याननुगतत्वात्। ह्रस्वत्व-दीर्घत्वे च परिमाणान्तरे एव। तवाप्यल्पाधिकसङ्ख्यावच्छिन्नहस्ताद्यवच्छेद्यत्वं परिमाणस्य ह्रस्वत्वं दीर्घत्वञ्चाल्पाधिकावधिज्ञाना-धीनज्ञानं अतो द्रव्यसमकालं परिमाणानुभवेऽपि नानुभूतमिति न तदा तद्व्यवहारः। गोसादृश्यं यद्यपि

मभावग्राहकसामग्रीगवेषणात्। भ्रमस्य तु भावभ्रमवदारोप्यस्मृति-विशेषादर्शनदोषादिघटितया सामान्यसामग्र्यैव निर्व्वाहात्। प्रतियोगि-वृत्तित्वेनाज्ञातधर्म्मग्रहो वा हेतुर्व्वाच्य इत्यन्यत्र विस्तरः। 'तवाप्यल्पेति तन्मते गुणगतजात्यभावादवच्छेद्यत्वं स्वरूपं, मम त्ववच्छेद्यतावच्छेदक-जातिमत्त्वं तत्, तथाच परिमाणग्रहेऽपि व्यञ्जकाभावात्तन्न गृहीतं स्वरूपत्वेऽपि तस्य तेन रूपेण ज्ञानं तथा व्यवहारे निदानमिति तत्प्रकारकज्ञानार्थमेवावध्यपेक्षेत्यर्थः।

गवयगतानि सामान्यानि तज्ज्ञानसमकालमेवानुभूतानि, तथापि गोवृत्तित्वे सति गवयवृत्तित्वं गोसादृश्यत्वं गोज्ञानाधीनज्ञातमिति न तदा सादृश्यव्यवहारः। स्यादेतत् अस्ति तावत्कस्यचिज्ज्ञानात् क्वचिदभावपदप्रयोगः सर्वसिद्धः, तत्र प्रयोगालम्बनं भूतलाद्येव घटवदतिरिक्ताप्रकाशात्, ततश्च यदपेक्षं यस्याभावपदप्रयोगविषयत्वं तत्तस्याभाव इत्युपेयते, तद्बुद्धिजनिताभावपदप्रयोगविषयत्वमेव घट-भूतलयोः प्रतियोग्यनुयोगिरूपः सम्बन्धः। अत एव भूतलस्य सप्रतियोगिकत्वं तद्बुद्धिजनिताभावपदप्रयोगविषयत्वेन तद्बुद्धिं विना अभावपदप्रयोगाविषयत्वात्। अनेनैवो-

---

केचित्तु तादृशपरिमाणग्रह एवावधिसापेक्ष इति द्रव्यग्रहसमकालं महत्त्वरूपपरिमाणग्रहेऽपि व्यङ्ग्यावधिज्ञानाभावान्न दीर्घत्वादिपरिमाणग्रह इति व्याचक्षत इति। तन्न। परिमाणस्य सावधित्वे मानाभावात्। किन्तूक्तप्रकारेणैतद्वृत्तिधर्मविशेषस्यैव तथात्वात्[१]। न चैवं धर्मस्यापि जातिरूपस्य सावधित्वे मानाभावः, स्वरूपेणेष्टापत्तेः। उक्तधर्मावच्छेदेन गृहीतायाः जातेः प्रवृत्तिनिमित्तत्वात् तारत्वादिवत् तस्याश्च तद्वदेव सावधित्वादिति दिक्। अत्र यद्यपि यावदुक्तं

---

(१) तथा भावादिति ख०।

पाधिना घटाभावादिपदव्युत्पत्तिग्रह इति चेत् । न । अभावप्रयोगालम्बनं[१] न भूतलं न हि भूतलं घटाभाव इति प्रतीति-प्रयोगौ, अपि तु भूतले घटाभाव इति भूतले घट इति वत् । भूतले घटो नास्तीति भूतलाधिकरणातिरिक्तनञर्थप्रकाशात् । अपि च घटबुद्धिजनिताभावपदप्रयोगविषयत्वं भूतलस्य घटाभावत्वं तथाच घटाभावत्वे तस्यावगते घटाभावपदप्रयोगविषयत्वं, घटाभावपदप्रयोगविषयत्वे च ज्ञाते तस्य घटाभावत्वमित्यन्योन्याश्रयः पदप्रवृत्तिनिमित्तेऽवगते पदप्रयोगनियमात् । घटाभावत्वञ्च घटाभावपदे प्रवृत्तिनिमित्तं । यदि च भूतलं सप्रतियोगिकं तदा प्रतियोगिनं विना केवलं न भासेत सादृश्यादिवत् । घटाभावपदप्रयोगदशायां तत् सप्रतियोगिकं नाव्यदेति चेत्, तर्हि घटप्रतियोगिकत्वे

घटाभावो न पटाभाव इत्यादि प्रतीत्या घटाभावे पटस्याभाव इत्यादि प्रतीत्या च तस्यापि सप्रतियोगिकत्वानुभवादप्रतियोगिकाधिकरणरूपत्वाभ्युपगमाच्च प्रतिबन्धिकवलितं, तथाप्यभावसिद्धिदशायामेतादृशप्रतिबन्ध्यनवतारेणाप्रतिबन्धिनोक्तयुक्तिदार्ढ्येनाभाव-

---

(१) अभावपदप्रयोगालम्बनमिति ख० ।

तस्य घटबुद्धिजनिताभावपदप्रयोगविषयत्वं, सति च तस्मिन् घटप्रतियोगिकत्वमित्यन्योन्याश्रयः केवलस्याप्रतियोगिकत्वात्। एवञ्च गोबुद्धिजनितसदृशपदप्रयोगविषयत्वं गवयस्य गोसादृश्यमस्तु ज्ञातमतिरिक्तसादृश्येनेति सप्रतियोगिकपदार्थापलापः। अपि च न केवलं भूतलमभावः भूतलाभावयोराधाराधेयभावानुभवात्, अभेदे तदनुपपत्तेः। दुःखवदात्मभिन्नस्य च आत्मनो दुःखाभावत्वे मोक्षस्यापुरुषार्थत्वप्रसङ्गः आत्मनोऽसाध्यत्वात्। अथ घटवद्भूतलज्ञानभिन्नं भूतलज्ञानमभावः तस्य च भूतलाधारता स्वरूपसम्बन्धेनानुभूयत इति चेत्। न। तस्य निष्प्रतियोगिकत्वेनाभावत्वानुपपत्तेः[१] इत्युक्तत्वात्। अपि च तज्ज्ञानं किं स्वरूपसद्देवाभावव्यवहारकारणं, भूत-

---

सिद्धौ तदुत्तरकालेऽनवस्थाभयादिना अभावाधाराभावप्रतियोगिकाभावान्तराप्रसिद्धौ तयोर्भावैकपर्य्यवसानेऽप्यवतीर्णा सा प्रतिबन्धिनाभावग्राहकं प्रमाणं बाधते उपजीव्यत्वात् फलमुखगौरवादित्याखण्डलकस्यैव मूलावष्टम्भयुक्तिर्धारणीयेति सर्व्वतात्पर्य्यसंक्षेपः। 'यथेति येन प्रकारेण यथा युक्त्येति यावत्, सा च प्रतीतिः प्रयो-

---

(१) ज्ञानस्याप्रतियोगिकत्वेनाभावत्वानुपपत्तेरिति ख०।

लाधिकरणकनिषेधरूपतयानुभूयमानं वा, नाद्यः स्वरूपसतो भूतलाधेयतया प्रतीत्यनुपपत्तेः। न द्वितीयः घटवद्भूतलज्ञानस्य तदानीमनुपस्थितेः तद्भिन्नज्ञानस्य प्रत्येतुमशक्यत्वात्। किञ्च यदि घटवद्भूतलज्ञानाद्भिन्नभूतलज्ञानमभावः तदा घटवति दोषात् घटवत्ताज्ञाने भूतलज्ञानमभावो भवेत्, तथाच तदेव तदैव घटवत् घटाभाववच्च स्यात्, न स्याताञ्च घटाभावज्ञान-तद्व्यवहारौ विसंवादिनौ विषयाबाधात्[१]। अथ वस्तुतोघटवतो भूतलस्य ज्ञानाद्भिन्नं भूतलज्ञानमभावः। न च घटवति भूतलज्ञानं तथा व्यवहारस्तु विसंवादी, तथाविधभ्रमादर्शनादिति चेत्, तर्हि घटवतो भूतलस्य ज्ञानाद्भिन्नत्वेन ज्ञानं

मानुगम एवेत्यर्थः। यद्वा येन धर्मेणैकपदार्थत्वमिति स्फुट एवार्थो ग्राह्यः। न चाग्रे तदप्रदर्शनाद्विरोधः, समवविशेषस्य निष्प्रतियोगिकत्वेनेति ब्रुवता अर्थात्सप्रतियोगिकत्वमभावत्वमित्युक्तत्वात्। न च समवायाव्याप्तिः, सप्रतियोगिकत्वेन प्रतियोग्यविशेषणकप्रत्ययाविषयत्वस्योक्तत्वात्। समवाय-संयोगयोस्तादृशप्रतीतिविषयत्वात् गौरोघट इति प्रत्ययात् संयोगे निर्विकल्पकसम्भवाच्च। न च

---

(१) विषयबाधाभावादिति ख०।

भूतलज्ञानं अभावव्यवहारप्रतिहेतुः। न च तत्तत्प्रभवति, स्वप्रकाशेनानुव्यवसायेन वाधिकरणज्ञाने तदप्रकाशात् तेदप्रतियोगिनोऽनुपस्थितेः। न च ज्ञानान्तरेण तथानुभवः, योग्यानुपलब्ध्या तत्र घटाभावनिश्चयं विना तथा निश्चेतुमशक्यत्वात्। अपिचाधिकरणतज्ज्ञानानामननुगतत्वेनानुगताभावव्यवहारानुपपत्तिः। न चातिरिक्ताभावपक्षेऽपि तथा अभावत्वस्यानुगतस्याभावादिति वाच्यं। अनुगताभावत्वं विनापि घटादिर्न पट इति समानाधिकरणनिषेधादनुगतव्यवहारः पटान्योन्याभावेनैकेन, एवं घटादौ न गोत्वमित्यनुगतव्यवहार एकेनात्यन्ताभावेन, कपालेषु भूतलेषु इदानीं घटो विनष्ट इत्यनुगतव्यवहारो ध्वंसेनैकेन, घटानुत्पाददशायामेतेषु घटोनास्तीत्यनुगतव्यवहार एकेन प्रागभावेन, एवं चत्वारोऽनुग-

---

ज्ञानादावतिप्रसङ्गः, विषयातिरिक्तप्रतियोगिज्ञानजन्यज्ञानविषयत्वस्यापि विशेषणत्वात्। एतच्चाभावविभाजकोपाधिरूपं द्रष्टव्यम्, प्रतीतिविषयस्वभावत्वमभावस्वरूपमेवेत्युक्तं प्रामाण्ये। 'सम्बन्धान्तरमिति विशिष्टप्रत्ययजननयोग्यताविशिष्टस्वरूपस्य सम्बन्धत्वादित्यर्थः। यथाश्रुते योग्यत्वस्यैव सम्बन्धत्वप्राप्तेः। न च तथैव किं न स्यादिति वाच्यम्। विशिष्टधीविषयस्य सम्बन्धत्वात्। विशिष्टबुद्धेश्च विशिष्ट-

तनिषेधव्यवहाराश्चतस्रभिरेव व्यक्तिभिः क्रियन्ते। तव त्वभावचतुष्टयं तत्तदधिकरण-तत्तद्घटानामननुगतत्वान्न सम्भवति अनुगताभावचतुष्टयव्यवहारस्य प्रत्येकाभावेनोपपादयितुमशक्यत्वादित्यतिरिक्ताभावव्यक्तिचतुष्टयसिद्धिः। तस्य च यथा अभावत्वेनैकेनैकपदार्थत्वं तथानुपदमेव वक्ष्यामः। स्यादेतत् यस्मिन् समयविशेषे यत्र भूतले अभावः परैः स्वीक्रियते तत्समयविशेषयोग एव भूतलस्य घटाभावः, एवञ्चेह भूतले घटोनास्तीत्याधाराधेयभावप्रतीतिरप्युपपद्यते, समयविशेषयोगस्य भूतलवृत्तित्वात्। न च समयविशेषयोगस्याभावत्वे अननुगमो दोषः, अतिरिक्ताभावपक्षेऽपि तुल्यत्वात् अभावत्वस्य जातेरुपाधेर्वा असत्त्वात्। यदि चाभावप्रतीतिप्रयोगानुगमार्थं तत्र धर्मा-

---

बुद्धिविषयत्वात्। अतएव सम्बन्धस्य सम्बन्धिभिन्नत्वनियमेन स्वरूपसम्बन्धं परे दूषयन्तीति भावः। अत्र वदन्ति। एवं सति घटाभावभ्रमानुपपत्तिस्तद्योग्यतायाः फलदर्शनगम्यतया तत्र विशिष्टघटानोत्पत्त्या योग्यतावश्यकत्वात्। न च प्रमायोग्यता सम्बन्धः, सम्बन्धसत्त्वेन तस्यापि प्रमात्वात्। अन्यथा तस्याप्रमात्वे तत्र सम्बन्धाभावः, तस्मिंश्च तस्याप्रमात्वमित्यन्योन्याश्रयः। किञ्च यो-

न्तरं स्वीक्रियते तदा समयविशेषयोगस्यैव तदस्तु लाघवादिति। तन्न। समयविशेषयोगस्य निष्प्रतियोगिकत्वेनाभावव्यवहारासामर्थ्यात्। किञ्च भूतलवत् समयविशेषोऽपि अभावाधारतयानुभूयते इदानीं भूतले घटोनास्तीति प्रतीतेः। न च तत्समयविशेषे तत्समयविशेषयोगः, अभेदे सम्बन्धानुपपत्तौ आधाराधेयभावाभावात्। अपिच समये किमभावाश्रयतैव विशेषः, तत्तत्समयस्वरूपं वा, आद्ये अभावस्वीकारः, द्वितीये अननुगमः। मम त्वेकाभावव्यक्तेरेव तथा नानासमयवृत्तित्वात्। किञ्च समयविशेषयोगादिदानीं भूतलमिति प्रतीति-प्रयोगौ स्यातां विशेषणस्य स्वप्रकारकविशिष्टप्रत्ययजनकत्वात्, न तु भूतले घटाभाव इति। यदि च तत्तत्समयविशेषयोगाद्भूतले

ग्यतायाः प्रत्ययाविषयत्वे धर्मिद्वयसामानविषयतायां कथं काचिन्मा काचिन्नेति प्रतीतिविभागः विशिष्टधीयोग्यतासत्त्वासत्त्वस्य प्रत्ययाविषयत्वेनानियामकत्वात्। किञ्चातीन्द्रियाभावस्वरूपसम्बन्धाव्यापकमिदं तच्च स्वरूपद्वयस्य विशिष्टज्ञानाजनकत्वादिति। मैवम्। एतेन विशिष्टधीजननयोग्यतावच्छेदकावच्छिन्नस्वरूपद्वयस्य सम्बन्धत्वाभिमानात् तदभावे किञ्चिद्योग्यं किञ्चिन्नेति विभागासम्भवात्।

घटाभावव्यवहारस्तदा यादृशसंस्थानविशेषविशिष्टे कपाले घटो वर्त्तते तादृशकपालादिकमेव तत्तत्समयविशेषयोगाद्घटादिव्यवहारजनकमस्तु किं घटादिना प्रतीतिश्च तुल्या। एतेन "दृष्टस्तावदयं घटोऽत्र च पतन् दृष्टस्तथा मुद्गरः दृष्टा खर्परसंहतिः परमितोऽभावो न दृष्टोऽपरः। तेनाभाव इति श्रुतिः क्व निहिता किञ्चाच तत्कारणं स्वाधीना कलशस्य केवलमियं दृष्टा कपालावली" इति निरस्तं। मुद्गरपातादिनष्टो घट इति प्रतीत्यातिरिक्तविनाशानुभवात्। न च केवलभूतलं तद्बुद्धिर्वा तज्जन्या, तेन विनापि तयोः सत्त्वात्। त्वन्मते च तयोरभावमात्रत्वेन विनाशत्वायोगात्। योगे वा अभावमात्रस्य विनाशित्वापत्तिः। अथ त्वन्मते यद्विनाशकं तदेव तत्सहितं भूतलं ज्ञानं वा विनाश इति चेत्। न। मुद्गरपातजन्यो हि विनाशो-

---

योग्यतावच्छेदकं क्वचित् प्रतियोगिदेशान्यदेशत्वं, क्वचित् प्रतियोगिदेशत्वे सति प्रतियोगिकालान्यकालत्वं, क्वचित् प्रतियोगितावच्छेदकाभाववद्वृत्तित्वं। न च भेदवत्त्वादावपि(१) मतुवर्थः सम्बन्धानुयोगः, तत्रापि तत्प्रतियोगि-तदवच्छेदैकदेशान्यदेशभेदेन भेद-तदत्यन्ताभाव-

---

(१) भेदवत्त्वाभाववत्त्वादावपीति ख०।

ऽनुभूयते। न च तस्यैव तज्जनकत्वं, सप्रतियोगिकस्य विनाशोऽनुभूयते, न च मुद्गरपातस्तथा। नन्वभावेन समं भूतलस्य सम्बन्धाभावात् कथं भूतले घटाभावप्रत्ययः। स्वरूपसम्बन्धादिति चेत्, तर्हि घटवद्भूतलस्यापि चत्वरीयाभावेन स्वरूपसम्बन्धोऽस्ति भूतलमभावश्चेत्यतोऽधिकस्य स्वरूपसम्बन्धस्याभावात्। प्रतियोग्यारोप एव स्वरूपसम्बन्धः,[१] अत एवारोप्य निषिध्यत इत्युच्यत इति चेत्। न। तत्राभावसम्बन्धे सत्यारोपः स एव चाभावसम्बन्ध इत्यन्योन्याश्रय इति चेत्। न। सम्बन्धान्तरमन्तरेण विशिष्टप्रत्ययजननयोग्यत्वस्य स्वरूपसम्बन्धत्वात्। न च घटवद्भूतल-चत्वरीयाभावयोः परस्परं विशिष्टप्रत्ययः। ज्ञान-विषययोः समवाय-समवायिनोरिव सम्बन्धान्तराभ्युपगमे चान-

---

सम्भवात्। न चानवस्था, वस्तुनस्तथात्वात्। प्रत्ययानवस्था तु नास्त्येव उक्तावच्छेदकत्वस्य स्वरूपपरिचायकत्वात्[२] अत एवातीन्द्रियाव्याप्तिरप्यपास्ता। एवञ्च तादृशस्वरूपाभावे यत्राभावधीस्तत्रैव भ्रम इति किमनुपपन्नम्। न च विषये विशेषाभावात् कथं भ्रमत्वं, एकघट-

---

(१) स्वभावसम्बन्ध इति क०।
(२) स्वरूपविशेषणत्वादिति ख०।

वच्छाभिया तत्सम्बन्ध-सम्बन्धिनोरपि तादृशसम्बन्ध-स्वीकारादिति सिद्धोऽतिरिक्तोऽभाव इति[१] तद्ग्राहिका विशेषणतेति सिद्धमेतत् ।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे अभाववादः ।

वच्छाभावस्य प्रकारत्वात् । अन्यत्र तद्देशान्यदेश इति विशेषस्य स्फुटत्वात् प्रकारत्वस्य च स्वरूपसम्बन्धविशेषत्वात्तद्विशेषस्यावश्यं वाच्यत्वात् । अन्यथा अन्यत्रापि प्रत्ययवैचित्र्यानुपपत्तेरिति दिक् ।

इति श्रीजयदेवमिश्रविरचिते तत्त्वचिन्तामण्यालोके प्रत्यक्षखण्डा-लोके अभाववादालोकः ।

---

(१) सिद्धोऽधिकोऽभाव इतीति ख० ।

अथ प्रत्यक्षकारणवादः।

षोढा सन्निकर्षः प्रत्यक्षविशेषे कारणं, विषयेणालोकसंयोगविशेषश्च तत्र कारणं, न तु चक्षुषा, प्रकाशस्थेन चक्षुषान्धकारस्थस्याग्रहणात् वैपरीत्ये च ग्रहणात्। नन्वेवं परभागावच्छेदेनालोकसंयुक्तोऽपि घटो गृह्येत। न चावयविग्रहणसामग्र्याः स्वावयवग्रहणसामग्रीनियमात् परभागावच्छिन्नो न गृह्यत इति वाच्यं। त्र्यणुके व्यभिचारात् प्रत्यक्षावयवे च सामग्रीभेदकल्पने मानाभावात्। अथाभिमुखावयवावच्छेदेन घटालोकसंयोगः कारणं, तर्ह्यभिमुखावयवावच्छेदेन चक्षुरालोकसंयोगोऽपि हेतुरस्तु। यदि चालोकसंयोगावच्छिन्ने चक्षुःसंयोगस्तथा समानदेशताविरोधश्च नि-

---

अथ प्रत्यक्षकारणवादालोकः।

'अन्वय-व्यतिरेकाभ्यामिति अन्वय-व्यतिरेकसहकारिप्रत्यक्षगम्यतया प्रयत्नोपस्थितविषयालोकसंयोगेनातीन्द्रियतया अनुमानगम्यहेतुताकचक्षुरालोकसंयोगोऽन्यथासिद्ध इत्यर्थः। अतएव कल्पान्तरेऽपि अक्षरशोऽनुवादः। 'अन्ये त्विति, 'उद्भूतरूपेति। न चैवं दण्डदृढत्वमपि घटहेतुः स्यादिति वाच्यम्। तत्र चक्राभ्रमिव्यापार-

विषयोरेव, अन्यथा घट-महारजतयोः पटोदक-योश्चाग्रहप्रसङ्गः, तर्हि घटसंयोगावच्छिन्ने चक्षुरा-लोकसंयोगः कारणमस्तु। अथ चालनीन्यायेन चक्षोलोकसंयोगसन्निहिते चक्षुर्घटसंयोगः कारणं, तदा घटचक्षुःसंयोगसन्निहिते चक्षुरालोकसंयोगो हेतुरस्त्विति चेत्। नैवं। अन्वय-व्यतिरेकाभ्यां विषया-लोकसंयोगस्य कारणत्वे निश्चिते तेनैवोपपत्तौ न चक्षुरालोकसंयोगः कारणं कल्प्यते।

अन्ये तु द्वयोरप्यालोकसंयोगयोः कारणत्वे विष-यालोकसंयोगः कारणमेवेति। नन्वभिमुखावयवाव-च्छेदेन विषयालोकसंयोगयोः कारणत्वे विषयालोक-संयोगः कारणमेवेति।

कतया दण्डहेतुत्वकल्पने दृढ़त्वस्यान्यथासिद्धेः। न च तत्रापि दृढ़त्वं हेतुरिति वाच्यम्। तत्र चक्राभ्रमिजनकत्वे चक्राभ्रमिजनक-त्वाभावात् दार्ढ्यस्य तत्रैव विश्रामात् भ्रमिं प्रति दण्डसंयोगहे-तुताग्राहके सति विशेषणीभूतदण्डस्यापि कारणताग्रहाच्चेति वैषम्यात्। वस्तुतस्तद्भूतरूपोत्कर्षेण प्रत्यक्षोत्कर्षात् तस्य हेतुता न हि दृढ़त्वे-ऽप्येवमिति भावः। अथ सगुणानामिन्द्रियभाव इति सिद्धान्तं साधयति, 'चक्षुरिति, 'रूपस्येति रूपत्वपक्षधर्मावच्छिन्नसाध्य-व्यापकमुद्भूतरूपत्वं तेजोरूपत्वपक्षधर्मावच्छिन्नसाध्यव्यापकं तेजो-

नन्वभिमुखावयवावच्छेदेन विषयालोकसंयोगस्य कारणत्वे आवश्यकत्वादवयवालोकसंयोग एव हेतुरस्त्विति[१] चेत्। न। अवयवसंयोगमात्रस्यातिप्रसक्तेः स्वावयवसंयोगो वक्तव्यः तथा च स्वसंयोग एव लाघवात्। अवयवसंयोगेन चान्यथासिद्धौ कारणतैव न स्यात् संयोगस्येत्युक्तं[२]। आलोकस्योद्भूतरूपमपि व्यञ्जकं अन्वय-व्यतिरेकित्वात्। ननु तेजःकारणतावच्छेदकं तत् उष्णादीनां चाक्षुषत्वाभावात्। न च स्वातन्त्र्येणान्वय-व्यतिरेकित्वात् द्वयोरपि हेतुत्वं अन्यथा दण्डादेरपि चक्रावच्छेदकत्वं स्यादिति[३] वाच्यं। उद्भूतरूप-तेजोमात्रयोः समवधाने कार्योदयादिति

गतोद्भूतरूपत्वं वा नोपाधिरित्यर्थः। उद्भूतत्वमात्रे वक्तव्ये रूपवग्रहणमुद्भूतत्वस्य तत्तद्व्याप्यस्य नानात्वेन रूपत्वव्याप्योद्भूतत्वविशेषलाभायेति द्रष्टव्यम्। उपाधेः साध्यव्यापकतायाएकाभावमाह, 'व्यभिचारेणेति, उक्तोपाधेः साध्यव्यापकता तदा स्याद्यद्युपाधितावच्छेदकोद्भूतरूपत्वेन व्यञ्जकतेजोगतोद्भूतरूपत्वेन वा व्यञ्जकत्वव्याप्यत्वमवच्छिद्येत, समव्याप्तोपाधिपक्षे साध्यव्याप्यतावच्छेदकरूपेणैव साध-

---

(१) कारणमस्त्वितीति ख०।
(२) संयोगस्य कारणतैव न स्यादित्युक्तमिति ख०।
(३) सहकार्युच्छेदादितीति ख०।

हेत्। नैवं। उद्भूतरूपतेजस्त्वं तेजसश्च उद्भूतरूपत्वं वावच्छेदकमिति विनिगमकाभावादुभयोरपि हेतुत्वात् दण्ड-चक्रयोरिवैकैकं विहायापरस्यान्वय-व्यतिरेकाभावात्। एवं चक्षुषो रूपमपि व्यञ्जकं व्यञ्जकतेजोरूपत्वात् आलोकरूपवत्। रूपस्य व्यञ्जकत्वे उद्भूतरूपत्वन्तेजोगतोद्भूतरूपत्वं वा नोपाधिः व्यभिचारेण गौरवेण चाप्रयोजकत्वात्। किन्तु व्यञ्जकरूपत्वमेव तथा लाघवात्। विषयस्थमपि रूपमुद्भूतं सहकारि तदुद्भवे च मानं। इन्द्रियालोकादिप्रत्यासत्तं महदवयविवायूपनीतसुरभिशीतोष्णचक्षुरादिकं साक्षात्कारकारणकिञ्चित्तमवधानशून्यं अप्रत्यक्षत्वादन्धकारस्थघटवदिति। तच्च कारणं लाघवादनुगतं

व्यापकतावच्छेदात्। न चेद् ताभ्यां व्यञ्जकत्वव्याप्यवच्छेदः, प्रथमे व्यभिचारात् अन्वयव्यभिचारात् विषयाद्युद्भूतरूपे सत्यपि नभसि तदग्रहात्, द्वितीये गौरवं उद्भूतत्वस्य व्यर्थत्वात्, तथाच न तदुभयं साध्यव्यापकमिति भावः। अत एवोक्तं 'किन्त्वित्यादि, न हि व्यञ्जकतेजोरूपत्वं हेतुतावच्छेदकं, अपि तु व्यापकतावच्छेदकमेव। न च तत्कारणतावच्छेदकमेव कुतो न स्यात् लाघवादिति वाच्यम्। एवं सति व्यञ्जकगुणत्वे लाघवाद्गुणमात्रस्यैव हेतुतापत्तेः। तस्माद्यदभावात् कार्य्याभावस्तस्यैव कारणत्वं। तथाच यथा आलोकोद्भूतरू-

सामान्यं रूपादिवृत्ति न द्रव्यगतं उष्णादौ स्पर्शग्रहे रूपस्य, प्रभादौ रूपग्रहे स्पर्शस्य ग्रहप्रसङ्गात् उद्भवत्वैकार्थसमवायाविशेषात्। अन्यथा स्पर्श-रूपयोरग्रहप्रसङ्गात्। नाप्युभयवृत्ति, रूपादिवृत्तित्वेनैवोपपत्तेः रूप-स्पर्शयोस्तु तन्नाना एकग्रहेऽप्यपरस्याग्रहात्। न च रूपत्वादिना परापरभावानुपपत्तिः, तारत्वादिवन्नानात्वात्। रूपादिप्रत्यक्षे एकैकोद्भवस्यैव प्रयोजकत्वात्। ननु महत्त्वे एवोद्भवत्वमस्तु तदेव प्रत्यक्षत्वे तन्नं लाघवात्। न च रूपेऽपि, गौरवादिति चेत्। न। आश्रयमहत्त्वोद्भवाभावेऽपि गन्ध-स्पर्शयोः प्रत्यक्षत्वेनोद्भवत्वमिति प्रत्यक्षमूर्त्तविशेषगुणत्वेन रूपेऽप्युद्भवत्वात् न महत्त्वे सामान्यगुणत्वात्। अथानुद्भवत्व-

---

पाभावे कार्य्याभाव इति तस्य हेतुत्वं तथा ग्राह्यजातीयगुणवदिन्द्रियव्यतिरेकेण रूपादिबाह्यविषयाग्रहात् तत्र ग्राह्यजातीयगुणस्यापि हेतुत्वं। न चैवं हेतुतावच्छेदकं तन्न हेतुरिति वाच्यम्। ग्राह्यजातीयगुणवदिन्द्रियत्वं वा इन्द्रियनिष्ठग्राह्यजातीयगुणत्वं वा अवच्छेदकं न अन्यविनिगमकं[१] इत्युभयोरपि हेतुत्वादिति, तच्च तेजोगतोद्भूतरूपेत्यादिनोक्तप्रायमिति नाचरेणोक्तं। तथाच तयोर्व्यञ्जक-

---

(१) अवच्छेदकमित्यत्र किं विनिगमकमिति ख०।

मेव जातिः अप्रत्यक्षत्वप्रयोजकत्वेन साक्षादेव तत्कल्पनात् तदभावात् प्रत्यक्षत्वमिति चेत्। न। अप्रत्यक्षतायाः प्रत्यक्षकारणविरहप्रयोज्यत्वेन प्रत्यक्षकारणस्य लाघवेन जातेः कल्पनात्। न तु प्रतिबन्धकत्वेनानुद्भवत्वं कल्पयित्वा तदभावः कारणं गौरवादिति संप्रदायविदः।

वयन्तु ब्रूमः। शुक्लत्वादिना कारणरूपाभिसंयोगप्रयोज्याभ्यां जातिभ्यां परापरभावानुपपत्त्या रूपवत्युद्भवत्वमनेकं वाच्यं, तथाचोद्भूतत्वेन कारणत्वे अननुगमः। तस्मादनुद्भवत्वं शुक्लत्वादिव्याप्यं नानाजातितदभावकूटस्तु प्रत्यक्षत्वे प्रयोजकः। अन्यथानुगतप्रत्यक्षानुपपत्तेः। एवं स्पर्शादावपि। अथ वोद्भूतत्वमनुद्भूतत्वं वा न जातिः किन्तु रूपत्वव्याप्यजाति-

---

तेजोरूपयोर्ग्राहकत्वे(१) व्यञ्जकतेजोरूपत्वमेव व्यञ्जकत्वव्याप्यतावच्छेदकं लाघवादिति तद्व्याप्यत्वे उपाध्योः साध्याव्यापकत्वमर्थसिद्धमिति सर्वनिगर्भः। साक्षात्कारणसमवधानशून्यत्वं साक्षात्कारप्रयोजकसमवधानशून्यत्वमिति कारण-तदवच्छेकसाधारणेनानुमानमन्यथा द्रव्यवृत्त्येव तदास्तामिति शङ्कानुत्थानात् 'न त्वित्यादिग्रन्थविरोधः। तद्वृत्तित्वेन तदाश्रयद्रव्यस्य हेतुत्वे तस्या जातेरवच्छेदकत्वपर्यवसा-

---

(१) ग्रहहेतुत्वे इति ख०।

मत्त्वमेवोद्भूतत्वं तदभावोऽनुद्भवत्वं प्रत्यक्षे रूपे शुक्ल-तर-तमत्वादिजातिमत्त्वात्, उष्म-चक्षुरादिरूपे तु शुक्लत्वमात्रमेव तद्व्याप्यजातौ मानाभावादुत्कर्षाभावात्। न च रूपत्वमेव मानं, लाघवेन तस्य प्रयोजकत्वे प्रत्यक्षत्वप्रसङ्गात्। एवं स्पर्शादावपीति। इतोऽपि महत्त्वेनोद्भवत्वं प्रयोजकं वाय्वादौ महत्त्वोत्कर्षेऽप्यप्रत्यक्षत्वात्। ननु भर्जनकपालगतो वह्निर्वारिस्थघटव्यञ्जकाहरतेजश्च गृह्येत वारि-कपालयोः प्रत्यक्षत्वेनोद्भूतरूपवत्त्वात्। तयोः संयोगविशेष एव प्रतिबन्धक इति चेत्। न। जल-कपालादीनामालोकव्यञ्जकतया तद्ग्रहे प्रतिबन्धकत्वाभावात्[१]। प्रतिबन्धकत्वे वा भर्जनकपाल-वारिसंयोगिवह्नि-सौरालोकयोरग्रहप्रसङ्गः संयोगे च न विशेषो जातिद्वयतः अन्यतरकमजत्वादिना

नादिति। 'एकग्रह इत्युपलक्षणं रूपत्वादिना परापरभावानुपपत्तेरिति द्रष्टव्यम्। 'रूपत्वादिनेत्यतद्गुणसंविज्ञानबहुव्रीहिणा नीलत्वादीति द्रष्टव्यम्। रूपादिवृत्तितज्ज्ञानात्मत्वानुपदमेवोक्तत्वेन तादृशग्रहाभावतारादिति द्रष्टव्यम्। 'प्रत्यक्षेति, न च विशेषपदवैयर्थ्यमिति वाच्यम्। महत्त्वस्यैवोद्भूतत्वं महत्त्वस्यापीति वा आद्ये तदेकार्थसमवा-

---

(१) प्रतिबन्धाभावादिति ख०।

सङ्करप्रसङ्गात्। तारत्वकल्पनात्वे गौरवात्। नापि तत्संयोगभेदः, अनदुगमादिति। मैवं। जलस्थन्तु तेजो गृह्यत एव। उभयोः स्वच्छतया विविच्य ग्रहो न भवति। भर्जनकपाले चाभूतरूपमुद्भूतस्पर्शमन्यदेव तेजः तादृशैरवयवैर्वह्निसहचरितैरारभ्यते, प्रतिप्रतैलादौ कदाचिदुद्भूतरूपावयवप्रवेशाद्व्यञ्जकोऽपि। न चैवं दुग्धसहचरितदधिपरमाणुभिरेव दध्यारम्भः, दुग्धध्वंसजन्यद्रव्यत्वेन खण्डदुग्धवद्दध्नो-दुग्धोपादानोपादेयत्वात्[१]। नन्वेवमुद्भूतरूपवह्न्यादावुद्भूतस्पर्शो नास्ति तत्सहचरिततेजोऽन्तरनियमेन तथोष्णत्वबुद्धेरुपपत्तेः[२] उद्भूतरूपोद्भूतस्पर्शसामग्रीरूपणि प्रभादौ विरोधावधारणादिति चेत्। न। यं

यस्य प्रत्यक्षत्वप्रयोजकत्वे रूप-स्पर्शयोरन्यतरप्रत्यक्षतापातात्, द्वितीये रूपसाचवृत्तित्वेनोपपत्तौ महत्त्वे तद्वृत्तौ मानाभावादिति विशेषान्तर्भावेणैव व्याप्तेरिति। 'अप्रत्यक्षत्वेति अप्रत्यक्षताप्रयोजकवदित्येवानुमानादित्यर्थः। 'अप्रत्यक्षताया इति, भवद्वक्तक्रमेणानुमानं, तथापि कार्यं प्रत्यभावकारणत्वकल्पनापेक्षया

(१) यत् द्रव्यं यद्द्रव्यध्वंसजन्यं तत् तदुपादानोपादेयमिति नियमादिति भावः।

(२) तत्सहचरिततेजोऽन्तरसम्बन्धनियमेन तथोष्णत्वबुद्धेरुपपत्तेरिति ख०।

वह्निमद्राक्षं तं स्पृशामीत्यबाधितप्रत्यभिज्ञानवशात् दर्शन-स्पर्शनाभ्यां वह्नौ रूप-स्पर्शयोरुपलम्भात्। न च तेजस्त्वस्याबाधकं, उद्भवानुद्भवयोर्निमित्तभेदसंसर्गप्रयोज्यत्वात् तेजस्त्वस्य रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वेनोद्भूतरूप-स्पर्शवद्वृत्तित्वात्। न चोद्भूतरूपस्पर्शयोर्विरोधः, जल-पृथिव्योरुभयसत्त्वात्। तेजसि विरोधस्य निमित्तभेदोपाधिकत्वादिति उद्भूतरूपसहचरितयोर्महत्त्वानेकद्रव्यवत्त्वयोर्युगपद्वाहितया अन्वय-व्यतिरेकतुल्यत्वेऽपि द्रव्यचाक्षुषत्वे नानेकद्रव्यवत्त्वमुभयं वा तन्त्रं किन्तु महत्त्वमेव लाघवात् अनेकद्रव्योत्कर्षं विनापि तूलकादौ प्रचयजन्योत्कृष्टपरिमाणात् प्रत्यक्षोत्कर्षदर्शनाच्च। दूरस्थकेशराशौ द्रव्यानुत्पादेन महत्त्वाभावेऽप्येककेशस्य सजातीयसंयोगेना-

---

भावकारणत्वे लाघवात् अप्रत्यक्षत्वप्रयोजकोऽप्युद्भूतत्वजात्यभाव एव सिद्ध्यति न तु अनुद्भूतत्वं। अनुद्भूतत्वाभावहेतुत्वापेक्षया उद्भूतत्वजातिहेतुत्वे लाघवादिति भावः। ननु लाघवाद्भावहेतुत्वमनुमन्यते, तदेवाननुगमेन तत्तत्कार्य्यं प्रति तत्तत्कारणत्वेन विपरीतमतोनोद्भूतत्वं प्रत्यक्षत्वप्रयोजकं, न तद्भवत्वं जातिरेव नास्तीति, एकत्र कोटावनुद्भूतत्वे तद्विरहिणि तद्विरुद्धजातिनियमादिति स्वसिद्धान्तमाह, 'वयन्त्विति, 'न जातिः' नातिरिक्तजातिः, 'किन्त्विति।

नेकद्रव्यवत्त्वात् द्रव्यप्रत्यक्षतेत्यनेकद्रव्यवत्त्वं तच्च तन्त्र-मिति चेत्। न। अनेकद्रव्यसम्बन्धित्वस्य समवा-येन प्रयोजकत्वात्। न तु संयोगेन, अतिप्रसङ्गात्। तथाच दूरग्रहणे सजातीयसंयोगस्य अनेकद्रव्यवत्त्वे सहकारिता वाच्या, सा महत्त्व एवास्तु। ननु यद्युद्भूत-रूपवत्त्वं महत्त्वञ्च द्रव्यप्रत्यक्षतायां स्वरूपयोग्यता तदा दण्डत्ववत्तयोः कारणता न स्यादिति चेत्। न। तदु-त्कर्षात् प्रत्यक्षोत्कर्षेण तयोः कारणत्वात्। न ह्यकार-णोत्कर्षमकार्य्यमनुविधत्ते। दण्डत्वादौ नैवं, प्रकार-

---

ननु चक्षुषोऽपि रूपे रूपत्वव्याप्यशुक्लत्वव्याप्यं भास्वरत्वं जातिरस्तीति(१) तस्यापि प्रत्यक्षतापत्तिः। किञ्च प्रत्यक्षरूपे उत्कर्षरूपजातिमत्त्वे अप्रत्यक्षे तत्राप्यनुत्कर्षरूपा रूपत्वव्याप्यव्याप्या जातिरस्तीति तस्यापि तदापत्तिः। न चोत्कर्षरूपा जातिस्तथेति वाच्यम्। उत्कर्षाणामन-नुगमेनोक्तक्रमेणैवानुगमादिति। मैवम्। व्याप्यजातेरुत्कर्षरूपाया विवक्षितत्वेन रूपत्वव्याप्योत्कर्षवत्त्वस्य प्रत्यक्षताप्रयोजकत्वात् उत्क-र्षाणाञ्चोत्कृष्टपदप्रवृत्तिनिमित्तत्वेनानुगमात्। यद्वा नानाजातिव्या-पकत्वेन सा जातिर्विशेष्या अतो नोक्तदोषः। 'लाघवादिति, इदञ्चोपलक्षणं आत्मनि कृप्तत्वादित्यपि द्रष्टव्यम्। 'अनेकेति, इदञ्च

---

(१) रूपत्वव्याप्यव्याप्यजातिरस्तीतीति ख०।

भेदेनोभयरूपत्वाच्च चाक्षुषद्रव्यग्राने विषयत्वेन तयोः कारणत्वं, द्रव्ये अनुगतत्वेन कारणतावच्छेदकत्वमिति।

ननु नोद्भूतरूपवत्त्वं तच्च तन्न वायोः प्रत्यक्षत्वात्। तथाहि वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् महत्त्वे सत्युद्भूतस्पर्शवत्त्वाद्वा घटवत्। उष्मादौ प्रत्यक्षत्वान्न व्यभिचारः। न चाप्रयोजकं, स्पार्शनप्रत्यक्षत्वे महत्त्वे सत्युद्भूतस्पर्शवत्त्वं प्रयोजकं, नोद्भूतरूपवत्त्वमपि गौरवात्। न च पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकश्चोद्भूतरूपवत्त्वमुपाधिः, स्पार्शनप्रत्यक्षत्वे तस्याप्रयोजकत्वात् त्वगिन्द्रियव्यापारानन्तरं वायुर्वातीति प्रतीतेश्च। न च स्पर्शलिङ्गग्रहे तदुपक्षयः, घटेऽपि तथात्वापत्तेः। लैङ्गिकत्वे च स्पर्शो वायुवृत्तिरिति धीः स्यात्, न त्वनुष्णाशीतस्पर्शो वायुरिति, स्पर्शग्रहेऽपि शीतो वायुरिति प्रतीतेश्च।

यद्युत्कर्षरूपा जातिस्तदा द्रष्टव्यं। वस्तुतस्तु उत्कृष्टपरिमाणविषयत्वमेव तत्र प्रत्यक्षस्योत्कर्ष इति पूर्वोक्तैव मूलयुक्तिरनुसन्धेयेति, अत एवाग्रेऽपि तदुत्कर्षेणेत्यादिहेतुमुक्त्वा तत्साक्षरसेन हेत्वन्तरं वक्ष्यति, 'प्रकारेति'।

'वायुरिति प्रत्यक्षस्पर्शाश्रयो वायुरित्यर्थः। यथाश्रुते भाग-

न च शीतद्रव्योपनायकत्वेनानुमिते वायौ तथा धीः, बाधकाभावात् विशेषदर्शने सत्यारोपाभावाच्च। अथा-चाक्षुषत्वं स्पार्शनत्वे बाधकं चक्षुषानुपलभ्यमानस्य त्वचानुपलम्भादिति चेत्, तर्हि चक्षुरेव द्रव्यग्राह-कत्वेन स्पर्शमात्रं प्रतीयेत वायाविव प्रत्यभिज्ञापि तद्वदेव। अथानुभवस्य दुरपह्नवत्वात् त्वचाश्रय-सहित एव स्पर्श उपलभ्यते, तदा वायावपि तुल्यं। अथ दोषाभावे सति द्रव्यग्रहे तन्नतसङ्ख्यादिग्रहनि-यमात् वायौ सर्वथा तदग्रहान्न स प्रत्यक्ष इति चेत्। न। न च तावदयं व्यक्तौ नियमः, पृष्ठलग्नवस्त्रादेः सङ्ख्या-परिमाणाग्रहे त्वचा ग्रहणात्। तज्जातीये तु फूत्कारादौ सङ्ख्या-परिमाणादीनां वाय्वभिघातस्य च शरीरे प्रत्यक्षत्वात्। स्यादेतत् बहिरिन्द्रियजद्रव्य-साक्षात्कारे महत्त्वे सत्युद्भूतरूपवत्त्वं प्रयोजकं सति

बाधासिद्धेः प्रसङ्गात्। न च पक्षतावच्छेदकभेद एव ते समान-प्रकारकविरोधिज्ञानस्यैव प्रतिबन्धकतया वायुपरमाणुत्वाद्यवच्छे-देन तदुभयाभावनिश्चयेऽपि वायुत्वाद्यवच्छेदेनोभयज्ञानादिति वाच्यम्। एवमपि तत्र तज्ज्ञानस्य भ्रमत्वेन तत्त्वनिर्णयाभावेन वादकथायान्तत्त्वनिर्णयाय तद्वारकविशेषणोपादानस्य सर्वसिद्ध-

सम्भवे त्यागायोगात्। न तु जन्येन्द्रियग्राह्यविशेषगुणवत्त्वं कार्यमहत्त्वसमानाधिकरणविशेषगुणवत्त्वं वा, रसनगतपित्तद्रव्यस्योद्भूततिक्तरसस्य वायूपनीतसुरभिद्रव्यस्य च प्रत्यक्षतापत्तेः। मैवं। नोद्भूतरूपवत्त्वं तथा नयनगतपित्तद्रव्यस्य च प्रत्यक्षतापत्तेः। अस्तु वोद्भूतस्पर्शवत्त्वं तच्च तन्त्वं। न चैवं प्रभायामप्रत्यक्षत्वं, प्रभा हि तेजसो रूपं न द्रव्यं तदाश्रयतेजःप्रतीतिः प्रत्यक्षरूपलिङ्गाधीनैव यथा तवोष्णादिप्रतीतिः। तत्र संयोग-कर्मादि कथं प्रत्यक्षमिति चेत्, चान्द्र-सौर-दीपप्रभादौ तु न कथञ्चित्। इन्द्रनीलादिप्रभाया रूपस्य पूर्वदेशानुपलम्भेन उत्तरदेशोपलम्भेन लिङ्गेन तदाश्रयतेजःसंयोग-विभागाद्यनुमानमिति। त्वन्मते यथा त्वचा स्पर्शमात्रग्रहानन्तरं फूत्कारे संयोगा-

---

त्वादिति भावः। 'प्रत्यक्ष इति स्वविशेष्यकप्रत्यक्षजनक इत्यर्थः, न तु विषयतया प्रत्यक्षजनक इत्यर्थः, विषयत्वस्य ज्ञानसमानकालीनत्वेन तज्जनकतानवच्छेदकतया तादृशसाध्यस्याप्रसिद्धेः। न च तवापि विशेष्यत्वपर्य्यन्तमधिकं, वायौ स्पर्श इत्यादिप्रतीतीनामपि सन्निकर्षप्रविष्टत्वेन वायुजन्यत्वात्। एवं विवक्षिते सामान्यलक्षणादिजन्यप्रत्यक्षविषयतया सिद्धसाधनं लौकिकत्वविशेषणे च तस्यानागत-

दीनां। एतेन धूम-वास्ययोरस्पार्शनत्वेनोद्भूतस्पर्शा-भाव्येऽपि[1] चाक्षुषत्वं अन्यथा तद्गतसंयोग-विभाग-कर्मणां प्रत्यक्षता न स्यात् लिङ्गाभावादिति निरस्तं। न च बहिरिन्द्रियग्राह्यानेकविशेषगुणवत्त्वं तन्त्रं, तव वसरेणु-प्रभयोरप्रत्यक्षतापत्तेः गौरवाच्च। नन्वेवं विनि-गमकाभावादुभयोरपि तथात्वमस्तु तथापि वायुर-प्रत्यक्ष इति चेत्, एवं बहिरिन्द्रियजद्रव्यसाक्षात्कारे चाक्षुषत्वे स्पार्शनप्रत्यक्षत्वे च प्रत्येकमुद्भूतरूपवत्त्वे सत्युद्भूतस्पर्शवत्त्वं प्रयोजकं पर्य्यवस्यतीति गौरवं। मम तु चाक्षुषत्वे उद्भूतरूपवत्त्वं स्पर्शनत्वे उद्भूत-स्पर्शवत्त्वं, यस्य विशेषे प्रयोजकत्वं तस्यानुगतेन रूपेण

गोचरसाक्षात्कारहेतुसन्निकर्षाजन्यत्वपरत्वेऽप्रसिद्धिः। षोढासन्नि-कर्षजन्यत्वपरत्वे च विशेषणव्यावृत्त्या प्रसिद्धिरित्यादिदोषानवकाश इति भावः। 'प्रत्यक्षेति, प्रत्यक्षस्वरूपयोग्यस्पर्शाश्रयत्वादिति भावः। फलोपधानपरे प्रत्यक्षपदे अप्रयोजकता तस्य प्रत्यक्षजनकतानव-च्छेदकत्वात् समानकालीनस्यातथात्वात्। तद्योग्यता तु महत्त्व-समानाधिकरणोद्भूतस्पर्शाश्रयत्वेनेत्यतोऽग्रे तमेव हेतुमाह, 'महत्त्व-इति। न चैवमुभयोरेकार्थत्वेन पौनरुक्त्यम्, उपाधिभेदेन भेदात्।

---

(१) अनुद्भूतस्पर्शवत्त्वेऽपीति ख०।

सामान्यप्रयोजकत्वमिति द्रव्यग्राहकबहिरिन्द्रियव्यवस्थापकोद्भूतविशेषगुणवत्त्वं सामान्यप्रयोजकमिति लाघवं। विशेषस्य सामान्यस्य च भिन्नप्रयोज्यत्वनियमात् नैकं प्रयोजकं। अथ वायुर्यदि बहिरिन्द्रियजन्यसाक्षात्कारविषयद्रव्यं स्यार्शनसाक्षात्कारविषयद्रव्यं वा स्यात् उद्भूतरूपः स्यात्। न चैवं तस्मात् तथा, तादृशसाक्षात्कारविषयद्रव्यस्य रूपजनकत्वनियमादिति चेत्। न। रूपवत्समवेतत्वेन हि द्रव्यस्य रूपजनकत्वं न तु तादृशसाक्षात्कारविषयद्रव्यत्वेन तस्य रूप-

---

न च वायुत्र्यणुके व्यभिचारः, उद्भूतत्वस्य फलबलकल्प्यत्वेन निमित्तभेदनिबन्धनत्वेन च तत्रोद्भूतस्पर्शाभावात्। न चाश्रयत्वप्रवेशनवैयर्थ्यं, एकाधिकरणकावच्छेदकद्वयसत्त्व एव तदवतारात्। अतएव यन्निष्ठेत्यादि सार्थकतावीजं वक्ष्यति। न चैवं धूमवत्त्वादित्यपि कथायां प्रजुज्येत, धूमवत्त्वहेतुत्वे तस्येष्टत्वात् इति वक्ष्यते इति भावः। 'साधनेति साधनैकदेशेत्यर्थः, स्पर्शवत्त्वमात्रेणैव व्यभिचारवारणे शेषवैयर्थ्यादिति[२]। अत्र यद्यपि रूपवत्त्वमेवोपाधिरुद्भूतत्ववैयर्थ्यात्[३]। तथापि तस्याप्रयोजकताचाक्षुषतरूपत्वावच्छेदेन जन-

---

(१) यन्निष्ठेत्यादि सार्थकतानियामकमिति ख०।
(२) स्पर्शवत्त्वमात्रेणैव व्यभिचारवारणादिति क०।
(३) उद्भूतत्वे वैयर्थ्यापातादिति ख०।

जननोत्तरकालीनत्वात् । घटो यदि चक्षुरितरेन्द्रिय-
ग्राह्यद्रव्यं स्यात् अरूपमस्पर्शमचाक्षुषादि स्यात्, त्वगि-
न्द्रियं यदि द्रव्यग्राहकबहिरिन्द्रियं स्यात् रूपवत् स्यात्
स्पर्शग्राहकं वा न स्यात् रूपग्राहि वा स्यात् चक्षुर्वत् ।
न चैवं तस्मान्न तथेति, घटोपि न त्वगिन्द्रियग्राह्यः
स्यात् तन्नतसङ्घादिज्ञानं फूत्कारादाविवेति स्यात्
स्पृशामीत्यनुव्यवसायश्च घटवद्वायावपि । अथ स्पार्श-
नत्वे उद्भूतस्पर्शवदुद्भूतं रूपमपि तन्त्वं उद्भूत-
रूपवत्त्वे चाक्षुषत्ववत् स्पार्शनत्वदर्शनादिति चेत् ।
न । उद्भूतरूपवत्त्वे सत्यपि प्रभायां न स्पार्शनत्व-
मिति उद्भूतस्पर्शस्यावश्यकत्वेनोद्भूतरूपस्यान्यथा-

कत्वात् । कार्य्य-कारणभाव एव तर्कः प्रतीकार इत्युपजीव्यत्वात्
प्रयमोपस्थितत्वाच्च स एवोपाधिरुपन्यस्तः । अत एव व्यर्थविशेषण-
तापि नेति भावः ।

उद्भूतपदं प्रत्यक्षपरं तथाच समव्याप्तोपाध्यभिप्रायेणेदमित्यन्ये ।

'स्पार्शनेति, स्वव्यवस्थापकगुणपुरस्कारेणैव द्रव्ये चक्षुरादीनां प्रवृ-
त्तिरिति स्वव्यवस्थापकगुणयोग्यतायास्तन्त्वमिति चाक्षुषत्वे रूपमस्तु
तन्त्वं स्पर्शनत्वेऽपीति भावः । ननु स्वव्यवस्थापकगुणमादायैव
प्रवर्त्तेतां, न चैतावता अयोग्ये स्वव्यवस्थापकविशेषगुणयोग्यता
तत्प्रवृत्तिहेतुः, इत्यतः अन्वय-व्यतिरेकमेव मानमाह, 'त्वगिति ।

सिद्धत्वात्। न ह्युद्भूतस्पर्शे सत्युद्भूतरूपाभावात् स्पार्शनत्वाभावः। नन्वेवं स्पर्शगत उद्भवः कारणमस्तु न तु रूपमकारणमिति चेत्, तथापि स्पर्शस्तदुद्भवश्च कारणं न तु रूपमपि तस्मिन् द्वये सति तदभावेन तदभावादर्शनात्। वस्तुतो रूप-स्पर्शगते उद्भवत्वजाती कारणतावच्छेदिके न तु कारणे इति। उच्यते। द्रव्यस्य स्पार्शनत्वे उद्भूतस्पर्शमात्रं न तन्त्रं निदाघोष्णि वायू-

---

नन्विन्द्रियजद्रव्यसाक्षात्कार इव बहिरिन्द्रियजद्रव्यसाक्षात्कारेऽपि नैकं किञ्चिदनुगतं कारणं भवेत् अतआह, 'सतीति, तत्रासम्भवात्तदभाव इह तु सम्भवतोऽपि त्यागो नोचित इति भावः। ननु सम्भवमात्रेणैवात्यागे जन्येन्द्रियेत्यादिद्वयमप्यस्तु नियामकमत आह, 'न त्विति, तथा च तयोरसम्भव एवेति भावः। इह प्रथमे विशेषपदोपादानञ्चरमे समानाधिकरणेत्यादिपदोपादानञ्च प्रयोजकत्वलाभाय। न हि स्वव्यवस्थापकगुणयोगित्वं तादृशगुणवत्त्वं वा तत्तदिन्द्रियप्रवृत्तौ तन्त्रं, अतो जन्येन्द्रिय ग्राह्यस्वव्यवस्थापकगुणवत्त्वं कार्यमहत्त्वसमानाधिकरणतादृशगुणवत्त्वञ्चोपात्तं, विशेषगुणपदञ्च जन्येन्द्रियव्यवस्थापकगुणपरमिति[१]बोद्धव्यम्। 'प्रत्यक्षतापत्तेरिति, न चेष्टापत्तिः, तद्गतसङ्ख्यादेः प्रत्यक्षत्वापातात्[२]। 'अस्तु वेति वस्तुतोबहिरिन्द्रियज-

---

(१) स्वव्यवस्थापकगुणपरमितीति ख०।

(२) तद्गतसङ्ख्यादिप्रत्यक्षतापत्तेरित्यर्थ इति ख०।

एनीतशीतोष्णद्रव्ये च प्रत्यक्षत्वेन तद्गतसङ्ख्या-परिमाण-संयोग-विभाग-कर्मणां प्रत्यक्षत्वप्रसङ्गात्। योग्यवृत्तित्वेन तेषां योग्यतया द्रव्यग्राहकसामग्रीग्राह्यत्वावधारणात्। न चोष्णादिजातीये दोषाभावेऽपि घटादाविव कारणरामर्शे कदाचित् केनापि सङ्ख्या गृह्यते, तथोद्भूतरूपवत्त्वमात्रस्य तथात्वे

द्रव्यप्रत्यक्षेऽनुगतं रूपं नास्त्येव यदि च सति सम्भव इत्यादिन्यायात् स्वीक्रियेत तदोद्भूतस्पर्शवत्त्वमेवास्त्वित्यर्थः। 'यथेति, त्वन्मत इति शेषः। 'एतेन' प्रभाप्रत्यक्षत्वेनेत्यर्थः, 'पर्य्यवस्यतीति विशेषौ प्रति रूप-स्पर्शयोः सामान्यसामग्र्यपेक्षणात् त्रिष्वप्युभयोर्ग्रहस्य प्रयोजकत्वं पर्य्यवसितं न तूभयत्वेन विशेषयोरपि प्रयोजकत्वमित्यर्थः। ननु मनैकमेव त्रिषु प्रयोजकत्वमिति लाघवं तव तु त्रिषु त्रीणि प्रयोजकानीति गौरवमत आह, 'विशेषस्येति तथाच तल्लाघवं विरोधाद्धेयमित्यर्थः।

'स्पार्शनत्व इति, यद्यपि बहिरिन्द्रियजन्यद्रव्यसाक्षात्कारविषयत्वे तत्त्वं स्पार्शनत्वे तूद्भूतस्पर्शवत्त्वमेव, तथापि सामान्यसामग्रीसापेक्षा विशेषसामग्रीति स्पार्शनत्वेऽपि तत्प्रयोजकत्वमुक्तं। वस्तुतस्तु स्पार्शनपदं बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षपरमेव(१) मन्तव्यम्। 'दोषाभाव इति, पृष्ठसंयुक्तत्वादौ(२) दोष एव प्रतिबन्धकोऽत एवाभिमुख्ये पुनस्तत्रैव

---

(१) स्पार्शनत्वपदं बहिरिन्द्रियजन्यप्रत्यक्षविषयत्वपरमेवेति ख०।

(२) पृष्ठनिष्ठत्वस्यादाविति ख०।

चान्द्राद्युद्योतस्य नयनगतपित्तद्रव्यस्य च प्रत्यक्षत्वे तद्गतसङ्ख्याग्रहोऽपि स्यात्। न च घटादाविव निपुणं निभालयन्तोऽपि तद्गतसङ्ख्याद्वित्वादि हस्तवितस्त्यादि-परिमाणं कर्म वा वीक्षामहे, इत्येकैकव्यभिचारा-द्विनिगमकाभावादुभयमपि बहिरिन्द्रियद्रव्यप्रत्यक्षत्वे प्रयोजकमिति वायुरप्रत्यक्षः। न चैवमपसिद्धान्तः, पीतः शङ्ख इत्यादौ नयनपित्तपीतिमैव गृह्यते न तु पित्तद्रव्यं विभक्तावयवत्वात् प्रभायामिव तेजस इति टीकाकृतामभिधानादिति नवीनाः।

सङ्ख्यादिग्रहात् दोषः प्रतिबन्धकोऽपि कल्पनीय इति भावः। 'नवीना इत्यखरसोद्भावनन्तद्बीजन्तूभयप्रयोजकतायां गौरवमेव द्रष्टव्यम्। 'तस्मादिति, नन्वेवं चन्द्र-तारादौ[१] सङ्ख्योपलक्षापत्तिः, किञ्च रूपवत्त्वस्य बहिरिन्द्रियद्रव्यप्रत्यक्षप्रयोजकत्वे तस्यैव तच्चाक्षुषत्वप्रयोजकत्वे सामान्य-विशेषयोर्भिन्नप्रयोजकतानियमो भज्येतेति। नैवं पक्षिकाण्डादिगतिप्रत्यक्षान्यथानुपपत्त्योक्तस्य[२] प्रत्यक्षताप्रयोजकत्वे सङ्ख्याद्यग्रहस्य दोषनिबन्धनत्वस्थितौ विष्वग्विसारिजातीयसमुदायादेरेव[३] दोषत्वव्यवस्थितेः सामान्य-विशेषयोः प्रयोजकभेद एव

---

(१) चन्द्रप्रभादाविति ख०।
(२) उद्भूतरूपस्येति ख०।
(३) विष्वग्विसारिस्वरूपजातीयसम्वलनादेरेवेति ख०।

सम्प्रदायविदस्तु चलति पक्षिकाण्डादौ पूर्वदेश-विभागोत्तरदेशसंयोगयोः प्रत्यक्षता न स्यात् पूर्वोत्तर-देशस्य प्रभामण्डलस्यानुद्भूतस्पर्शत्वेनाप्रत्यक्षत्वात्। तथाच परेषां चलतीतिप्रतीतिरपि तल्लिङ्गिका न स्यात्। अलाकमपि चन्द्र-तारादौ संयोग-विभाग-लिङ्गकगत्यनुमानं न स्यात्। न च पूर्वोत्तरदेशे उप-लम्भानुपलम्भाभ्यां संयोग-विभागावनुमाय ताभ्यामेव गत्यनुमानं, पूर्वोत्तरदेशयोरप्रत्यक्षत्वेन लिङ्गासिद्धेः। तस्मादुद्भूतरूपवत्त्वं तच प्रयोजकमिति वायुर-प्रत्यक्षः। ननु शीतो वायुरित्यारोपो न स्यार्शनः विशेष्यस्यायोग्यत्वात्। न च प्रमाणान्तया, सामान्ये बाधकाभावात्। नाप्यनुमानोपनीते वायौ त्वगिन्द्रि-योपनीतः शीतारोपः शीतद्रव्याभेदारोपो वा, मनसा

सामान्ये उद्भूतरूपवत्त्वस्य चाक्षुषत्वे रूपग्राहकसामग्रीसमावेशस्य प्रयोजकत्वात्। अत एव न तमसि सुवर्णं प्रत्यक्षं।

द्रव्यत्वेनैव गुणं प्रति, संयोगादिकञ्च विशेषं प्रति प्रयोजकत्वदर्श-नात् भिन्नप्रयोजकतानियम एव[१] नास्तीत्यन्ये।

---

(१) गुणत्वसामान्यधर्मावच्छिन्नं प्रति द्रव्यत्वेन प्रयोजकत्वमिव संयोग-त्वादिविशेषधर्मावच्छिन्नं प्रत्यपि तेनैव रूपेण प्रयोजकत्वात् सामान्य-विशेषधर्मावच्छिन्नं प्रति विभिन्नधर्मावच्छिन्नप्रयोजकतानियमो न प्रामा-णिक इति भावः॥

तल्लिङ्गस्पर्शादिचतुष्कस्याग्रहणात् शीतस्पर्शस्यातल्लिङ्गत्वात्। न च शीतद्रव्योपनायकत्वेनानुमिते वायौ मनसा शीतारोपः, शीतानाश्रयत्वेनानुमिते वायौ तदनारोपात्। नापि पीतः शङ्ख इति वद्बहिरिन्द्रियजन्योऽयं भ्रमः, येनानुमानिकविशेषग्रहेऽपि[1] दोषमाहात्म्याद्भवेत् शीतद्रव्योपनयनजनकप्रणालीमविदुषोऽपि शीतो वायुरिति प्रत्ययाच्च। नापि लिङ्गाभासजन्यानुमितिरूपोभ्रमः, तद्प्रतीतेः शीतस्पर्शस्य वायुलिङ्गत्वेन भ्रमाविषयत्वात्। न च शीतस्पर्शानुमिते द्रव्ये स्पृतवाय्वभेदारोपः, वायुविशेष्यकशीतप्रत्ययात्। अत एव शीतस्पर्शोऽयं वायोरिति भ्रमशरीर-

---

यत्तु स्वव्यवस्थापकयोग्यगुणवत्त्वं प्रयोजकमित्युक्तं, तद्गौरवादेव न सम्भवतीत्युद्भूतरूपस्य लाघवाभिधानादेवार्थतः प्रत्युक्तम्।

'वायुलिङ्गत्वेति, एतच्च प्रकारान्तरानवतारेण प्राथमिकप्रत्ययमभिप्रेत्य, तदानीं वायोरनुपस्थित्या वायवीयत्वारोपस्यान्यथा असम्भवात्। यदा तु कुतश्चिल्लिङ्गात्कदाचिद्वायूपस्थितौ शीतो वायुरिति धीस्तदा तल्लिङ्गत्वारोपं विनैव शीतस्पर्शे वायवीयत्वमारोप्यते। न च वायोरन्यतोऽनुपस्थितिदशायां शीतस्पर्शस्य जन्यवृत्तितया गृहीतस्य व्यभिचारे स्फुरति कथं वायुलिङ्गत्वारोपोऽपीति वाच्यम्।

---

(१) आनुमानिकविशेषदर्शनेऽपीति ख०।

मपास्तं। न च स्वप्नविभ्रमवत् स्वोत्प्रेक्षितपदार्थ-संसर्गारोपवच्च मानसोऽयं, त्वगिन्द्रियव्यापारानुविधानादिति। उच्यते। यथा वायुवैधर्म्येण जलवृत्ति-तया गृहीतस्य शीतस्पर्शस्य वायावारोपो दिङ्मोह-वद्दोषमाहात्म्यात् तथा शीतस्पर्शे वायुलिङ्गत्वारो-पाद्वायवीयत्वानुमानं। न चैवं शीतो वायुरिति प्रतीतिः(१) न स्यादिति वाच्यं। शीतोऽयं वायवीय-इति ज्ञानानन्तरं शीतोऽयं वायुरिति च मनसारोपात् अनुष्णो वायुरिति वत्। अथत्वग्व्यापारानन्तरं कथं वायुर्वातीति प्रतीतिः तल्लिङ्गसंयोग-विभागयोरप्र-त्यक्षत्वात्। न च शरीरे वाय्वभिघात एव तल्लिङ्गं, अभिघातस्य संयोगत्वेनाप्रत्यक्षत्वादिति चेत्। न।

तदानीं जलस्यानुपस्थितत्वेन(२) शीतोऽयं पृथिव्यादिचयान्यवृत्ति तदवृत्तित्वे सति वृत्तिमत्त्वात् इत्यनुमानाभासस्यैव तल्लिङ्गत्वारोप-पदेन विवक्षितत्वादिति दिक्। 'ज्ञानेनेति ज्ञानं पृथिव्याद्यष्टद्रव्या-न्यद्रव्यवृत्तीत्येवं प्रकारेणेत्यर्थः। ज्ञाने आत्मीयत्वं स्वात्मीयत्वं एतच्छरीरावच्छिन्नात्मवृत्तित्वमिति यावत्। 'एवमिति, न चानुभ-वकलहः, स्वशरीरावच्छिन्नात्मवृत्तितानुमानं हि शरीरान्तरावच्छेदे-

---

(१) इति धीरिति ख०।
(२) अनुपलम्भबाधेनेति ख०।

अभिघातजन्यसुख-दुःखविशेषेणाभिघातमुन्नीय तस्य स्पर्शवद्वेगवज्जन्यत्वमनुमाय वेगेन कर्मानुमानात्। एवं प्रणालीमविदुषस्तत्प्रत्ययासिद्धेः। अथ वायुः शीतो वातीति कथं विशिष्टवैशिष्ट्यप्रतीतिरेका शीतविशिष्ट-प्रतीतेर्मानसत्वेन कर्मप्रतीतेः[१] आनुमानिकत्वेन जातिसङ्करप्रसङ्गादिति चेत्। न। शीतविशिष्टत्वेन स्पृते वायौ कर्मानुमानाद्विशिष्टवैशिष्ट्यं न तूभयं विशेषणमेकदा भासते। न चैवं कल्पनागौरवं दोषाय, प्रत्यक्षत्वे बलवद्बाधकाभावात्[२]। एवं बहिरिन्द्रिय-जद्रव्यप्रत्यक्षत्वे उद्भूतरूपवत्त्वस्य प्रयोजकत्वे व्यव-

---

नानुपलभ्यमानतया ग्राह्यम्। न च योऽहं सोऽहमिति प्रत्यभिज्ञान-काले शरीरान्तरोपस्थितिनियमः, येन लिङ्गज्ञानादीदृशप्रणालीनि-यमः स्यादिति न किञ्चिदेतत्। 'न च साधनेति, असन्मते उष्णि शुद्धसाध्यव्यभिचारादिदमुदाहृतम्, न तु पार्थिवादिपरमाणुषु व्यभिचारवारणाय, उद्भूतपदेन प्रत्यक्षयोग्यत्वेन परमाणुषु तत्त्वात् अन्यथा साधनावच्छिन्नत्वेऽपि वायुपरमाणौ व्यभिचारतादव-स्थ्यात् इति दिक्। 'किञ्चेति, यद्यप्युद्भूतस्पर्शवत्त्वेः स्पार्शनत्वे तन्त्रमुच्यते न बाह्येन्द्रियग्राह्यत्वे[३] इत्यनुक्तोपालम्भः, तथापि रूप-

---

(१) कर्मविशेषप्रतीतेरिति ख०।
(२) बलवद्विरोधादिति ख०।
(३) बाह्यप्रत्यक्षत्व इति ख०।

स्थिते प्रत्यक्षत्वसाध्यकानुमाने पक्षधर्मावच्छिन्नस्य साध्यस्य साधनावच्छिन्नस्य वा व्यापकमुद्भूतरूपवत्त्वमुपाधिः। न च विशिष्टस्य व्यभिचार-व्यतिरेकयोः साधनेऽर्थान्तरं, विशेष्यव्यभिचार-व्यतिरेकसिद्धिपर्य्यवसानादित्युपाधौ वक्ष्यामः। अथ वायुवदात्मापि न प्रत्यक्षः द्रव्यप्रत्यक्षत्वे उद्भूतरूपवत्त्वस्य तन्त्रत्वात्[1]। न च लिङ्गज्ञानं विनैवाहं जानामीति प्रत्ययात् न लैङ्गिकत्वं, ज्ञानमविदुषो जानामीति विशिष्टप्रत्ययाभावेन ज्ञानस्य लिङ्गत्वात्। न च घटमहं जानामीति वर्त्तमानप्रत्ययो न स्यात् घटज्ञानस्यानुमितिपूर्वतृतीयक्षणे विनाशादिति वाच्यं। स्थूलसमयो-

---

वत्त्वस्य तन्त्रतायां सत्यव इत्येव न्यायः स च स्पर्शसाधारण इति नियामकत्वकल्पनायां विनिगमकाभावोऽनियामके स्पर्शवत्त्वे गमनाद्व्यभिचारी वा न्यायः स्यादिति तस्यागमनव्युत्पादनमिदं न तु तदुक्तपरिहार इति भावः। 'प्रभावत्' मण्यादिप्रभावत। ननु बलवत्सजातीयग्रहणजातसंग्रहणं खल्वभिभव इत्यन्धकारे सजातीयग्रहणदशायान्तदुपलभ्येतेत्यत आह, 'अभिभवश्चेति, लाघवादिति भावः। ननु प्रभारूपतेजोऽन्तरकल्पने गौरवं तदीयशौक्ल्यभानापत्तेश्चेत्यस्वरसादाह, 'यद्वेति, यद्यपि भास्वरत्वेऽनभिभवाभिधानमप्रसक्तप्रति-

---

(१) प्रयोजकत्वादिति ख०।

पाधिमादाय वर्तमानप्रत्ययात्, यथा दुःखाद्वेषो-दर्शनेन करोतीत्यनुमितिरिति उच्यते। योऽहं घट-मद्राक्षं सोऽहं घटं स्पृशामीत्यभेदप्रत्यभिज्ञानादात्मा प्रत्यक्षः। न चैतत्स्पर्शनेन्द्रियजन्यज्ञानाश्रयोऽहं तद्-र्शनज्ञानाश्रयाभिन्नः मदीयाहंप्रत्ययविषयत्वात् तद्-र्शनज्ञानाश्रयवदित्यात्माभेदप्रत्यय इति वाच्यं। मदं-शस्याप्रत्यक्षत्वेनानुमानसिद्धेः। न च ज्ञानेना-त्मानुमानं ततस्तप ज्ञाने ज्ञातीयत्वानुमानं ततो-मदीयाहंप्रत्ययविषयत्वज्ञानमात्मनीति वाच्यं। एवं प्रणालीमविदुषोऽपि योऽहं सोऽहमिति प्रत्ययात्। न च वायौ प्रत्यभिज्ञानमस्ति, सदागतिमत्त्वेन गतस्य पुनरज्ञानात्। स एव पुनः पुरोवात इति प्रतीतेः तज्जातीयानुमितिरूपत्वात्। तस्माद्वायुर्बहिरिन्द्रिया-प्रत्यक्षः नीरूपद्रव्यत्वात् आकाशवत्। न च साधनाव-

---

षेधः परप्रकाशकत्वव्यञ्जकस्य तस्य तदन्वय-परव्यतिरेकानुविधायिप-ह्यादस्यादृशाभिभवाकल्पनात् कारणाभावेन कार्याभावे प्रतिबन्ध-काकल्पनादिति तथापि शुद्धत्वपरिहारितामात्रेण प्रसज्यप्रतिषेधो-द्रष्टव्यः। व्यञ्जयदादिदमुपलक्षणं परप्रकाशकत्वव्यञ्जकादृशादित्यपि द्रष्ट-व्यं। एतत्सर्वमग्रेणपर्यन्तमभिभवपदार्थमुपेत्य समाहितम्। वस्तु-तस्तु बलवत्सजातीयसम्बन्ध एवाभिभव इति तदसम्बन्ध एवान-

चिन्नसाध्यव्यापकसुद्भूतस्पर्शानाश्रयत्वमुपाधिः, उद्भूतस्पर्शस्य तथाहेतुत्वेनोपाधेः साध्याव्यापकत्वात्। किञ्चोद्भूतस्पर्शवत्त्वस्य वह्निरिन्द्रियजन्यद्रव्यसाक्षात्कारप्रयोजकत्वे सुवर्णरूपन्तेजोद्रव्यं प्रत्यक्षं न स्यात् प्रभावत् तस्यानुद्भूतस्पर्शवत्त्वात् रूपन्तु तस्योद्भूतमेव। किन्तु उपरागकपीतरूपाभिभूतं। अभिभवश्च बलवत्सजातीयसम्बन्धः। एवमन्धकारे पीताग्रहणेऽप्यभिभवः। न चैवमन्धकारे सुवर्णोपलब्धापत्तिरभिभूतस्यापि तेजसो ग्रहात्, न च तेजसि तेजोऽन्तरं व्यञ्जकं, इति वाच्यं। रूपे गृह्यमाण एव चक्षुषा द्रव्यग्रहात्, सुवर्णरूपमभिभवादेव नोपलभ्यते, उपरागकरूपस्यालोकाभावात्। अथ यथा अरुण-कपिलादिरूपाभिभूतमपि वह्निरूपं परं आत्मानञ्च प्रका-

---

भिभवः, अतस्तादृशस्यैव व्यञ्जकत्वम्, तथाच तत्सम्बन्धः प्रतिबन्धकस्तदभावः कारणमिति पर्य्यवसितोऽर्थः। तथाचारुण-कपिलाद्यभिभूतस्य वह्निरूपस्य ग्राहकत्वेन सुवर्णरूपस्याग्राहकत्वेन च किञ्चित्सजातीयसम्बन्धः प्रतिबन्धकः किञ्चित्सम्बन्धोनेति कल्प्यते(१)। अग्रहणगर्भे त्वभिभवे न अभिभवो ग्रहणं वाच्यम्। तथाचानभिभू-

---

(१) किञ्चित्सम्बन्धो न तथेत्येव फलबलात् कल्प्यत इति ख०।

भवति तया घनतमपि प्रकाशेत प्रकाशयेदेति चेत्। न। तत्र प्रभिभूतरूपवह्निसम्बन्धाभिभूतरूपा वह्निमध्यादिव्यापिनी[१] प्रभैव व्यञ्जिका। यद्वा वह्नौ रूपभास्वरत्वे नाभिभूते किन्तु मुद्गत्वमात्रं, सुवर्णे तु रूपमभिभूतत्वेन तद्गतमुद्गत्व-भास्वरत्वे अनभिभूते अपि व्यक्त्यग्रहाच्च गृह्येते इति फलबलात्कल्प्यते। न च पीतिमगुरुत्वाश्रयातिरिक्तं तदसिद्धं, अस्ति हि सुपर्णस्यात्यन्ताग्निसंयोगेऽपि पीतं रूपं न तद्विजातीयं, तदुपपन्नमसति द्रवद्रव्यसम्बन्धे, पार्थिवेऽत्यन्ताग्निसंयोगस्य पूर्वरूपविजातीयरूपजनकत्वनियमात्। जलसम्बन्धे तदपगमे च पटादौ दाहादाहदर्शनात्।

तद्रूपं तेजोग्राहकं गृह्यमाणरूपस्तेजोग्राहकमिति पर्य्यवस्येत्। न चैतत् सम्भवति, तेजोरूपस्य रूपाग्राहकत्वात् गौरवाद्विषय-तेजसोर्युगपदेव रूपग्रहाच्च। किन्तु योग्यमस्तीति गृह्यते न तु ग्रहणस्यापि विषयग्रहणे विनियोगः। किञ्चैवं उद्भूतरूपमप्यधिकं स्यात् अनुद्भूतस्य ग्रहासम्भवादिति वयम्। ननु यत्रात्यन्ताग्निसंयोगेन समानजातीयमेव रूपमारभ्यते भस्मादौ तत्र व्यभिचारः स्यादिति पीतरूपान्तर्भावेण विग्रिष्यैव हेत्वन्तरमाह, 'यद्वेति, पीते ह्यग्निसंयो-

---

(१) वह्न्यादिमध्यपातिनीति ख०।

तद्दिं भायमानं कनकं यत्यन्ताग्निसंयोगि-पार्थिवत्वे सति विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तं न स्यात् पूर्वरूपविजातीयरूपवत्त्वात् वह्निसम्बद्धघटवत्। अन्यथा पार्थिवं न स्यात् जलं वा स्यात् अग्निसंयोगि वा न स्यात्। तदयं प्रयोगः। अत्यन्ताग्निसंयोगि पीतं विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तं अत्यन्ताग्निसंयोगित्वे सति पूर्वरूपविजातीयरूपानधिकरणपार्थिवत्वात् जलमध्यस्थिताग्निसंयुक्तपीतपटवत्। यद्वा पीतं सुवर्णं पीतरूपातिरिक्तरूपोत्पत्तिप्रतिबन्धकद्रवद्रव्यसंयुक्तं नक्तन्दिवमग्निसंयोगेऽपि पीतरूपातिरिक्तरूपानाश्रय-

---

गात् विजातीयमेव रूपमुत्पद्यत इति नियमादेवमुक्तं, आत्यन्तिकत्वं सावधितया अननुगतमतस्तदनुगमार्थं नक्तन्दिवेत्युक्तं। पार्थिवत्वञ्चात्र हेतावनुषञ्जनीयम्[१]। ननु करकावत्सहजमेव द्रवत्वं[२] स्यादतआह, 'नैमित्तिकेति, तथाच तत्त्वग्निसंयोगान्वय-व्यतिरेकानुविधानानुपपत्तिरिति भावः। 'तत्रापि' उपष्टम्भकरूपप्रतिबन्धकेऽपीत्यर्थः। एतत्तानुद्भूतगुणस्य पाके सत्युद्भूतगुणत्वनियमात् व्यञ्जनादौ पाक-

---

(१) एतेन 'पीतरूपातिरिक्तरूपानाश्रयपार्थिवत्वात्' इत्ययं खचिह्नितमूलपुस्तकपाठो न समीचीनः।

(२) करकावत् प्रतिबद्धसहजद्रवत्वमिति ख०।

त्वात् तावत्पर्यन्तमग्निसंयुक्तजलमध्यस्थपीतपटवत्। न चाप्रयोजकत्वं, विरोधिद्रवद्रव्यसम्बन्धं विना पार्थिवेऽत्यन्ताग्निसंयोगस्य विजातीयरूपजनकत्वात्। तद्द्रवद्रव्यं न जलं स्वाभाविकद्रवत्वानाश्रयत्वात्। न चानुद्भूतं तत्, शीतलशिलातले अग्निसंयोगाद्दाहदर्शनेनानुद्भूतद्रवत्वस्य दाहाविरोधित्वात् नैमित्तिकद्रवत्वाच्च। नापि तत एव पार्थिवत्वं, द्रुतपार्थिवस्य विजातीयरूपप्रतिबन्धकत्वे घृतादावपि तथात्वापत्तेः तत्रापि रूपपरावृत्तिप्रसङ्गाच्च। उपष्टम्भकस्यापि पार्थिवत्वेन विजातीयरूपाप्रतिबन्धकत्वात्। यद्यपि तेजोऽन्तरं न नैमित्तिकद्रवत्वाधिकरणं, नापि विजातीयरूपप्रतिबन्धकं, किन्तु तज्जनकं, तथापि प्रत्यक्षद्रव्यत्वेन तस्य रूपवत्त्वे पृथिवी-जलान्यत्वेन तेजस्त्वात् धर्मिग्राहकमानसिद्धं तथात्वं, पीतभागद्रवत्वमप्यग्निसंयोगे न नश्यति द्रुततेजःप्रतिबन्धादेव जलमध्यस्थाग्निसंयुक्तघृतवदिति। अथ यदि द्रुततेजसो विजा-

---

जोद्भूतरसवति पाषाणादिभस्मनि पाकजगन्धस्य दर्शनेन निश्चितादध्यवसेयं। अन्यथा तस्यानुद्भूतरूपस्य अनुद्भूतरूपपरावृत्तौ इष्टापादानस्यापि सम्भवादित्यवधेयं। ननूपष्टम्भकेनैव तद्विजातीयं

तीयरूपप्रतिबन्धकत्वं तदा जलस्थपटवत् द्रुतसुवर्ण-मध्यस्थितपटादेरपि रूपपरावृत्तिर्न स्यादिति चेत्। न। तोके सुवर्णत्वेनानुभूयमाने पीतद्रव्ये अविनि-र्भागवर्त्तिन्युपष्टम्भके द्रुतन्तेजो विजातीयं रूपं प्रति-बध्नाति नान्यच तथैवान्वय-व्यतिरेकात्। तर्ह्युपष्टम्भक-त्वमनुभवसिद्धं सुवर्णस्येत्यावश्यकत्वात्। तस्यैव स्वरूप-परावृत्तौ प्रतिबन्धकत्वमस्तु कृतन्दृष्टविजातीयतेजः-कल्पनयेति चेत्। न। उपष्टम्भकमात्रे हि विजातीय-रूपप्रतिबन्धकस्वभावत्वं द्रुततेजसोधर्म्मिग्राहकमान-सिद्धत्वात् तस्य तेनैव रूपेण सिद्धेः। यदि द्रुतन्तेजो रूपपरावृत्तिप्रतिबन्धकं स्यात् पटादिरूपपरावृत्तिमपि प्रतिबध्नीयादिति तर्कस्य तद्विपर्य्ययस्य च सिद्धसिद्धि-व्याहतत्वात्[१]। अनुभूयमानसुवर्णस्य च उपष्टम्भक-रूपपरावृत्तिप्रतिबन्धकस्वभावत्वं[२] न धर्म्मिग्राहक-मानादन्यतो वा सिद्धं येन पार्थिवे असति विरोधिद्र-

---

रूपं प्रतिबध्यतामत आह, 'उपष्टम्भकस्येति, 'तथापीति। ननु पृथि-व्यन्यत्ववत् तेजोऽन्यत्वस्यापि सम्भवः। न च पार्थिवरूपप्रतिबन्धकत्व-

---

(१) सिद्धसिद्धिपराहतत्वादिति ख०।
(२) स्वरूपपरावृत्तिप्रतिबन्धकस्वभावत्वमिति ख०।

वद्द्रव्यसम्बन्धे अग्निसंयोगस्य रूपपरावर्त्तकत्वमन्वय-व्यतिरेकसिद्धं परिभूयेतेत्याचार्य्याः।

नवीनास्तु अत्यन्ताग्निसंयोगेनानुच्छिद्यमानप्रत्यक्ष-द्रवत्वाधिकरणं तैजसं जल-पृथिवीभ्यामन्यत्वे सति रूपवत्त्वात् वह्निवत्। न चासिद्धिः, प्रत्यक्षद्रव्यत्वाधि-करणत्वेन[१] तस्य रूपित्वात्[२]। न च तज्जलं, सांसिद्धिक-द्रवत्वानाश्रयत्वात्[३] नैमित्तिकद्रवत्वाधारत्वात् स्नेह-शून्यत्वाद्वा लाक्षावत्। स्नेहे सति स्नेह-द्रवत्वाधीनसंग्र-हप्रसङ्गात्। न च[४] पार्थिवं, अत्यन्ताग्निसंयोगेऽप्यनुच्छि-द्यमानं यद्द्रवत्वं तदधिकरणत्वात् जलपरमाणुवत्। अस-ति विरोधिद्रवद्रव्यसम्बन्धे इति विशेषणान्तेन ग्राह्यमान-

---

रूपस्येवापार्थिवत्वे मानं, तेजोऽन्यत्वेऽपि तत्सत्त्वात्। पृथिव्यन्तरे प्रतिबन्धकत्वादर्शनवत् तद्दर्शनस्यासत्त्वात्। अत्रैव तथात्वकल्पनं विशेषे यदि तदा पार्थिवविशेषतयैव तत् कल्प्यतामिति। मैवम्। उपष्टम्भ-कसुवर्णादिरूपं प्रति तेजोद्रवत्वेन प्रतिबन्धकत्वस्य लघुत्वात् तत्पा-र्थिवद्रवत्वेनोपष्टम्भकद्रवत्वेन च तत्तद्रूपं प्रति प्रतिबन्धकत्वे गौरवात्

---

(१) प्रत्यक्षद्रव्यत्वाधारत्वेनेति ख०।
(२) रूपवत्त्वादिति ख०।
(३) सांसिद्धिकद्रवत्वानाधारत्वादिति ख०।
(४) नापीति ख०।

जलद्रवृतेन न व्यभिचारः। न चाप्रयोजकत्वं, अत्यन्तानलसंयोगेन लाक्षादि-घृतादि-पृथिवीद्रवत्वोच्छेदे पृथिवीद्रवत्वत्वमेव प्रयोजकं असति बाधके अनुगतस्य प्रयोजकत्वे सम्भवति त्यागायोगात्। न च घृतद्रवत्वत्वादिकं, अननुगमात्। नापि नैमित्तिकद्रवत्वत्वं, द्रवत्वमेववा, सुवर्णे द्रवत्वोच्छेदप्रसङ्गात्। अथापार्थिवमपि सांसिद्धिकद्रवत्वं तैले जन्यजलान्तरे चात्यन्ताग्निसंयोगादुच्छिद्यते अतोऽनुगतमेव तृणारणि-मणिन्यायेन द्रवत्वोच्छेदप्रयोजकमिति चेत्। न। पृथिवीद्रवत्वोच्छेदे पृथिवीद्रवत्वत्वं, जलद्रवत्वोच्छेदे जन्यजलद्रवत्वत्वं, द्रवत्वमात्रोच्छेदे च जन्यरसवद्द्रवत्वत्वं प्रयोजकं लाघवात्। एतेन विवादविषयः पृथिवी

प्रघनस्य प्रमाणसिद्धत्वादित्युक्तप्रायत्वात् इति भावः। 'द्रुततेजस इति, द्रवद्रव्यसम्बन्धत्वेन रूपपरावृत्तिप्रतिबन्धकत्वकल्पनात्, न तु स्वगुणप्रतिबन्धकत्वं गुणिनोविरोधादिति भावः। 'प्रत्यक्षद्रव्यत्वेति, न च प्रत्यक्षपदोपादानमधिकं, जलपरमाणौ भाग-बाधवारणात्[१] इति भावः। असतीत्यादिविशेषणमप्यत्र प्रयोज्यन्तेन

---

(१) भाग-बाधवायकत्वादिति ख०।

नैमित्तिकद्रवत्वाश्रयत्वात् घृतवदिति सत्प्रतिपक्षत्वमपास्तं। अनुकूलतर्काभावेन अग्निसंयोगाद्द्रवत्वोच्छेदप्रसङ्गलक्षणप्रतिकूलतर्केण च हीनबलत्वात्। अथ नैमित्तिकद्रवत्वे पृथिवीत्वं समवायिकारणतावच्छेदकं असति बाधके त्यागायोगादिति चेत्। न। घटादावपि नैमित्तिकद्रवत्वप्रसङ्गात्[१]। न च घृतलाक्षादिषु पृथिवीत्वावान्तरं किञ्चिदेकमनुगतं नैमित्तिकद्रवत्वसमवायिकारणतावच्छेदकमस्ति। पृथिवीनियतनैमित्तिकद्रवत्वं कथमपृथिव्यामिति चेत्। न। तावत्तिर्य्यग्गमनोर्द्ध्वज्वलनवत्तज्जातिनियतं[२] घटादावभावात्। नापि पृथिवीत्वावान्तरजातिविशेषनियतं, घृतं विहाय लाक्षादिष्वपि भावात्। अथोपष्टम्भके पीतिमगुरुत्वाश्रये पार्थिवेऽत्यन्ताग्निसंयोगेनानुच्छि-

---

जलस्यक्ष्यमानघृते न बाध इत्यवधेयं। 'नवीनास्त्विति, अत्र नवीनत्वोपान्यासेऽखरसबीजं पीतिमगुरुत्वाश्रयस्य प्रत्यक्षसिद्धद्रवत्वापह्नव एव द्रष्टव्यमित्येकं, अपरञ्चाग्निसंयोगस्य नैमित्तोकद्रवत्वावच्छेदेनैव नाशकत्वं लाघवात् न तु पार्थिवद्रवत्वेनैव गौरवात् सुवर्णादावतिप्रसङ्गस्यासतीत्यादिविशेषणेन स्वयमेव निरासादिति।

---

(१) तत्प्रसङ्गादिति ख०।

(२) तिर्य्यग्गमनोर्द्ध्वज्वलनवज्जातिनियतं तदिति ख०।

द्यमानद्रवत्वाधारत्वमनैकान्तिकं, न हि तेजोद्रवत्व-दशायामद्रवमेवास्ते, पीतं द्रुतमिति प्रतीतेरिति चेत्। न। तत्र द्रवत्वाभावात्। पार्थिवद्रवत्वस्यात्यन्ताग्निसंयोगेनोच्छित्त्यापत्त्या बाधकेन द्रुतप्रतीतेर्भ्रमत्वात्। तर्हि तदा पीतं काठिन्यमेवोपलभ्येतेति चेत्। न। जलमध्यस्थितमसीघोदादेरिव तदवयवानां द्रव-द्रव्यसम्बन्धेन प्रश्लिष्टसंयोगाश्रयत्वात्। न तु तेषां द्रवत्वं। न चैवं घृतादावपि तथा, द्रवत्वे तत्र बाधकाभावात्।

अन्ये तु उपहतमते द्रवत्वमप्युत्पद्यत एव अनुभ-

घत एवाचार्य्यमतेन न पौनरुक्त्यं। 'अन्ये त्वित्यादेरपि न पौनरुक्त्यमेनापि पार्थिवद्रवत्वावच्छेदेनोच्छेदाभ्युपगमात्। आचार्य्याणान्तु नैमित्तिकद्रवत्वावच्छेदेनैव तथाभ्युपगमः। नन्वाचार्य्यमतेऽप्येतस्य ग्रन्थे उपसंहारात् कथं ततोऽस्य भेदः, कथं वा अस्वरसः 'नवीना इति[१]। मैवम्। आचार्य्या हि नोपहतकद्रवत्वोच्छेदप्रतिबन्धकतयैव तेजोरूपं सुवर्णे साधयन्ति, किन्तु रूपादिप्रतिबन्धकत्वेन सिद्धे द्रुते तेजसि तस्यैव द्रवत्वोच्छेदप्रतिबन्धकत्वमपि कल्पयन्ति लाघवात्।

अन्ये तु[२] द्रवत्वोच्छेदप्रतिबन्धकतयैव द्रवद्रव्यं साधयन्तीति

---

(१) नव्यास्त्विति ख०।
(२) अपरे इति क०।

वस्य दुरपह्नवत्वात्। अत्यन्ताग्निसंयोगेन तदुच्छेदस्तु न भवति द्रवद्रव्यस्य तेजसः प्रतिबन्धकत्वात्। न चैवं द्रुततेजसि मानाभावः। तथाहि पीतद्रवत्वाधिकरणं द्रवत्वोच्छेदप्रतिबन्ध्यद्रवद्रव्यसंयुक्तं अत्यन्ताग्निसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधारपार्थिवत्वात् दह्यमानजलमध्यस्थितघृतवत्। न चाप्रयोजकत्वं, अत्यन्ताग्निसंयोगेन विरोधिद्रवद्रव्यसम्बन्धासम्बन्धे पार्थिवद्रवत्वोच्छेदानुच्छेददर्शनात्। अथवा रूपवत्त्वे जलान्यत्वे च सति तैजसत्व-पार्थिवत्वसन्देहे विवादाध्यासितं द्रवत्वाधिकरणं तैजसं अस्ति द्रवद्रव्यसंयोगे[1] अत्यन्ताग्निसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधारत्वात्[2] यन्नैवं तन्नैवं यथा जलं घृतं वेति व्यतिरेकी। न चासा-

---

भेदः, इदमेवास्यरसबीजम्। न हि पार्थिवरूपवत्त्वेनाग्निसंयोगनाश्यतावत् पार्थिवद्रवत्वेनापि तथा नाश्यत्वं प्रत्यक्षकल्पनं, येनाप्रयोजकता न स्यादपार्थिवरूपवदपार्थिवद्रवत्वस्य तदानीमनुपस्थित्या पार्थिवत्वविशेषणायोगात्। न च जले द्रवत्वदर्शनाद्विशेषणोपादानं, तावता तस्याप्यग्निसंयोगनाश्यत्वदर्शनात्तत्साधारणजन्यद्रवत्वेनैवावच्छेदेन तथा

---

(१) द्रवद्रव्यसम्बन्धे इति ख०।

(२) अनुच्छिद्यमानानित्यद्रवत्वाधिकरणत्वादिति ख०।

धारण्यं, अगृह्यमाणविशेषदशायां तस्य दोषत्वात्। तथाहि यथा साध्याभावव्यावृत्तत्वेन पक्षे तस्य साध्यसाधकत्वं, तथा साध्यव्यावृत्तत्वेन साध्याभावसाधकतापि स्यादिति तत्प्रतिपक्षोत्थापकतया तस्य दोषत्वं। न च साध्याभावसाधकस्य पृथिवीत्वसिद्धिपर्यवसायिनस्तुल्यबलत्वं, अनुकूलतर्काभावेन हीनबलत्वात्। यदीदं पार्थिवं स्यादसति विरोधिद्रवद्रव्यसम्बन्धे अत्यन्ताग्निसंयोगेनोच्छिद्यमानद्रवत्वाधिकरणं स्यात् तैजसमिति प्रतिकूलतर्केण हीनबलत्वात्। यदीदं जलान्यरूपवत्त्वे सति तैजसं न स्यात् पार्थिवं स्यात् यदि च पार्थिवं स्यादत्यन्ताग्निसंयोगेनोच्छिद्य-

---

कल्पनौचित्यात्, न तु तत्रापि रसवत्त्वविशेषणप्रवेशः(१)। तथाच सिद्धे द्रुततेजसि तादृशविशेषणान्तर्भावः, तदन्तर्भावेण गृहीते च कारणत्वे अप्रयोजकतापरीहार इत्यन्योन्याश्रयः। आचार्यमते तु मानान्तरसिद्धे द्रुततेजसि तद्वारकविशेषणान्तर्भावेण कारणताग्रहादुपष्टम्भकद्रवत्वोच्छेदापत्त्या तत्प्रतिबन्धकं तदेव कल्प्यत इति, इदमेव च 'नवीना इत्यत्रास्तरसबीजम्। अत्राप्युपष्टम्भके द्रवत्वाभ्युपगममात्रमतो भेद इति तत्त्वम्।

---

(१) रसवत्त्वविशेषणप्रक्षेप इति ख०।

मानद्रव्यत्वाधिकरणं स्यादित्यनुकूलतर्कसद्भावेन प्रतिकूलतर्काभावेन च नैयत्यसाधकस्याधिकबलत्वात्। यदि चासाधारणस्य साध्य-तदभावव्याप्तत्वेन तदुभयसंशयजनकतया दोषत्वं तथापि विशेषादर्शनसहितस्य संशयकत्वं, प्रकृते चानुकूलतर्क-विशेषदर्शनसहकृतस्य व्यतिरेकिभावेन साधकत्वं[१]। तस्मात् यदा साध्य-तदभावकोटौ न विशेषदर्शनं तदा असाधारणस्य दोषत्वं। न चैवं शब्दोऽनित्यः शब्दत्वादित्यादिकमपि[२] हेतुः स्यात्, विशेषदर्शनदशायामिष्टत्वात्।

'पार्थिवद्रवत्वस्येति, न च विरोधिद्रवद्रव्यसम्बन्धादेवानुच्छेदइति वाच्यम्। जलद्रवत्वस्यैव विरोधित्वेन तदभावे सत्येवोच्छेदापत्तेरिति भावः। 'द्रवद्रव्यस्येति, अपार्थिवद्रवत्वस्यैव विरोधितावच्छेदकं लाघवात् न तु तद्विशेषजलद्रवत्वमिति भावः। 'प्रतिकूलतर्केणेति, इदमुपलक्षणं, व्यर्थविशेषणत्वेनेत्यपि द्रष्टव्यम्, अतैयत्याभावेन यमद्रवत्वाभावस्यैव व्याप्तेः। न च विशिष्टाभावतया प्रतीकारः, विशिष्टस्यातैयत्याप्रयोजकत्वे तदभावस्य तदभावेऽप्रयोजकत्वादिति भावः।

---

(१) साध्यसाधकत्वमिति क०।
(२) जलकत्वादित्यादिकमपीति क०।

अन्ये तु तेजस्त्वं नाद्रवरूपवन्नापवृत्ति रूपवद्वृत्ति-द्रव्यत्वसाक्षाद्व्याप्यजातित्वात् पृथिवीत्ववत्। यद्वा तेजस्त्वं द्रुतवृत्ति रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजाति-त्वात् जलत्ववत्। न च रसवद्वृत्तित्वमुपाधिः, रस-वत्त्वं द्रवत्वसमानाधिकरणात्यन्ताभावप्रतियोगि अद्रु-तवृत्तिद्रव्यत्वव्याप्यधर्मत्वात् पटत्ववदिति[1] द्रुततेजः-सिद्धौ साध्याव्यापकत्वादिति सामान्यतोदृष्टेन तेजसि द्रवत्वं प्रसाध्य पिण्डाध्यासितं द्रुतं तैजसं अत्यन्ताग्नि-संयोगेनानुच्छिद्यमानानित्यद्रवत्वाधिकरणत्वात् न य-देवं न तदेवं यथा जलमिति वदन्ति।

'अन्ये त्विति, विपक्षबाधकेन बलवत्त्वे तैजसत्वमेव साध्यमास्तां किमसाधारण्यपरीहारार्थकेनाचारेण, तदनपेक्षायां तेजोमात्रावृत्ति-त्वोपाधिविरहेणैव सत्प्रतिपक्षत्वमस्तु, असाधारणरूपः सत्प्रतिपक्षो-ऽन्यथा वेत्यत्राविशेषादित्यत्रास्तरबीजम्। 'नाद्रवेति, नाद्रवमात्र-वृत्तीत्येव साध्यं, रूपवत्पदञ्च स्वरूपोत्कीर्त्तनं न तु साध्यप्रविष्टम्। अन्यथा मनस्त्वादावपि साध्यत्वेन तत्र व्यभिचारवारणाय रूपवद्वृत्ति-पदानुपादानापत्तेरिति भावः। 'अद्रुतवृत्तीति, ननु यद्यपि द्रुतत्वे अद्रुतवृत्तित्वेन, रूपित्वे रूपित्वव्याप्यत्वेन, द्रुतघटान्यान्यत्वे भावत्वपरेण धर्मपदेन व्यभिचारो वार्य्यतान्द्रुत-घटाविति समूहालम्बनविशेष्यत्वे कथं

---

(१) घटत्ववदितीति ख०।

अथ प्रथमानुमाने तेजोमात्रावृत्तित्वमुपाधिः। न च पक्षेतरत्वं, प्रदीपत्वादेरपि व्यावर्त्यत्वादिति चेत्। न। बलवद्विपक्षबाधकेन विवादविषये द्रुततैजसत्वसिद्धावुपाधेः साध्याव्यापकत्वात्। एवञ्च विवादाध्यासिते पार्थिवत्व-तैजसत्वसाधकानि यद्यपि बहून्यनुमानानि सन्ति तथापि विपक्षबाधकतर्कात् तैजसत्वसाधकस्य बलवत्त्वमिति ध्येयम्।

अथ द्रुत-द्रुततरादेः क्रमशः प्रतीतेः प्रबलानल-संयोगेन सुवर्णनाशात्तद्द्रवत्वं नश्यतीति असिद्धो हेतुः। न च द्रवत्वप्रागभावासमानाधिकरणद्रवत्व-

---

व्यभिचारवारणम्। नैवम्। धर्मपदेन समवेतत्वस्याभिधानात्। न चासिद्धिः, रसवत्त्वपदेनापि रसवत्त्वावच्छिन्नस्यैवोक्तत्वात्। 'द्रुततेज-इत्यत्र तेजःपदं वास्तवाभिप्रायेण प्रयुक्ते द्रुतनीरसमेवेत्यर्थः।

'प्रथमेति(१) व्येतिरेक्यपेक्षया प्रथमे द्रुतत्वसाधकानुमानद्वय-इत्यर्थः। 'अग्निसंयोग इति, आश्रयनाशाद्यत्र घृते द्रवत्वनाशस्तत्र व्यभिचारवारणाय सत्यन्तं, तेन सत्यग्निसंयोगे तद्धेतुकनाशा-प्रतियोगिद्रवत्वसमवायि द्वयोरवधृतसामर्थ्यादित्यर्थः। ननु घटिद्र-वत्वान्तरोत्पत्तिर्द्रवत्वनाशानन्तरं घटिनेति आश्रयवैजात्यकृतमेव वैलक्षण्यमुचितं न तच्छेदकृतं अतः खण्डपाशिद्धोऽयं हेतुरित्यत आह, 'अथवेति, 'द्रवत्वोच्छेदसमये' अग्निसंयोगजद्रवत्वोच्छेदसमये इत्यर्थः,

---

(१) 'आद्येतीति क०।

ध्वंसस्वरूप उच्छेदो न सुवर्णे द्रवत्वनाशेऽप्यग्निमद्रवत्वे-
नोत्पादात् घृते च तथेति वाच्यम् । सुवर्णे द्रवत्वनाशे
सति विनष्टाश्रये द्रवत्वान्तरस्यानुत्पादेन द्रवत्वप्राग-
भावासमानाधिकरणद्रवत्वध्वंसस्य सत्त्वादिति चेत् ।
न। सुवर्णद्रवत्वं चाश्रयनाशादिनश्यति न त्वग्निसंयो-
गात्। यदि चाग्निसंयोगादिनश्येत् तदा घृतवन्न द्रव-
त्वान्तरमुत्पद्येत द्रवत्वोच्छेदकाग्निसंयोगस्य द्रवत्वान्तर-
प्रतिबन्धकत्वात् । तथा चाग्निसंयोगित्वे सति तद्धेतु-
कनाशप्रतियोगिकद्रवत्वाधिकरणत्वादिति हेत्वर्थः ।
अथवा घृते द्रवत्वोच्छेदसमये समानाधिकरणद्रवत्व-
सामग्रीसमवधानं नास्ति सुवर्णे त्वस्ति । एवञ्च समा-
नाधिकरणद्रवत्वसामग्रीसमवहिताग्निसंयोगजन्यध्वंस-
प्रतियोग्यवृत्तिद्रवत्वावान्तरसामान्यवद्द्रवत्वं हेत्वर्थः ।

अन्यथा सुवर्णे जलसंयोगादिना तदुच्छेदेन तादृशसामग्र्यसमवधानात् तदपेक्षयेदं घृतस्य वैलक्षण्यं न स्यादिति भावः । 'समवधानेति समव-धाननियम इत्यर्थः, अन्यथा घृते द्रुततरत्वादिप्रतीतेर्द्रवत्वान्तरोत्पत्ति-सिद्धौ बाधापत्तेः । नियमस्तु नास्ति भस्मप्राक्कालोच्छेदसमय एव व्यभिचारादिति भावः । 'सुवर्णे त्विति अग्निसंयोगाद्द्रवत्वनाशे तादृश-सामग्रीसमवधाननियम इत्यर्थः । 'एवञ्चेति, न च नञ्द्वयगर्भत्वं द्रवत्वावान्तरेत्यादिगर्भत्वञ्च व्यर्थं द्रवत्वोच्छेदसमानाधिकरणद्रवत्व-

यद्वा घृतपरमाणावग्निसंयोगदशायां द्रवत्वनाशे सति[१] द्रवत्वान्तरं नोत्पद्यते तदारब्धभस्मनि द्रवत्वाभावात्। एवं सुवर्णपरमाणुद्रवत्वम् अग्निसंयोगाच्च यदि विनश्येत् तदा तदारब्धसुवर्णमद्रवं स्यात्। तथा सुवर्णारम्भकाः परमाणवो न पार्थिवाः अत्यन्ताग्निसंयोगेनानुच्छिद्यमानद्रवत्वाधिकरणत्वात् जलपरमाणुवत्। तैजसा वा तत एव यन्नैवं[२] तन्नैवं यथा घृतपरमाणुरिति व्यतिरेकी। एवमपार्थिवारब्धं तैजसारब्धं वा सुवर्णमपार्थिवं तैजसं वा अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणपरमाणारब्धत्वादित्यन्वयिव्यतिरेकी चेति।

सामग्रीसमवहिताग्निसंयोगजन्यध्वंसप्रतियोगिद्रवत्ववत्त्वादित्यस्यैव सम्यक्त्वादिति वाच्यम्। द्रुततरत्वादिप्रतीत्या घृतेऽपि तादृशद्रवत्वसत्त्वेन व्यभिचारात् घृतद्रवत्ववृत्तिजातेः भस्मप्राक्कालिकोच्छिन्नद्रवत्वेऽपि सत्त्वादुक्तहेतुस्तत्र नास्तीति तत्राव्यभिचारात्[३]। न चैवं सुवर्णे द्रवत्वोत्पत्त्यनन्तरं तदुच्छेदो न स्यात्, अग्निसंयोगादन्येन जलसम्पर्कादिनैव द्रवत्वनाशे तदुच्छेदात्। न च द्रवत्वावान्तरपदं व्यर्थं तादृशध्वंसप्रतियोग्यवृत्तिसामान्यवद्द्रवत्वस्यैव हेतुत्वादिति वाच्यम्।

---

(१) द्रवत्वनाशादिति ख०।
(२) न यदेवं न तदेवमिति ख०।
(३) नास्तीति व्यभिचाराभावादिति ख०।

स्वदेशी तु द्रवत्वाधिकरणं न तेजः पीतत्वात्। न चाप्तिधिः, पीतं द्रुतमिति प्रतीतेः[१]। पीतत्वे पार्थिवत्वापत्त्या बाधकेन पीतप्रतीतिर्भ्रम इति चेत्। न। शुक्लत्वेऽप्यपार्थिवत्ववत् पीतत्वेऽप्यपार्थिवत्वे बाधकाभावात्। यथा नैमित्तिकद्रवत्वे पृथिवीत्वं न तन्त्रमतिप्रसङ्गात् तथा पीतत्वेऽपि गन्धनियतत्वमपि नैमित्तिकद्रवत्ववदेव। पृथिवी-जलान्यत्वे सति रूपित्वेन तेज इति चेत्। न। अग्नेयोजकत्वात्। अन्यथा जलतेजोऽन्यत्वे सति स्पर्शवत्त्वेन वायोरपि पृथिवीत्वापत्तेः। अथ रूप-रस-गन्धानामभावान्न तथात्वं तेषामनुद्भवे च

विवक्षाभेदेन हेतुत्वात् तादृशध्वंसप्रतियोग्यवृत्तिद्रवत्वावान्तरसामान्यवत्त्वस्य तादृशध्वंसप्रतियोग्यवृत्तिसामान्यवद्द्रवत्वस्य च समर्थत्वात्। नन्वेवं विवक्षितहेतोर्जलमध्यस्थघृतादावभावेनासतीत्यादिविशेषणप्रवेशो नित्यपदप्रक्षेपश्च प्राप्तो विरुद्ध्येतेति चेत्। न। अग्निसंयोगित्वे सति द्रव्यादिविवक्षायां तद्विशेषणोपादानात् उपष्टम्भके द्रवत्वोत्पत्तिपक्षे तत्र व्यभिचारवारणायाश्चैव तदुपादानाद्वा। अतएव तत्र द्रवत्वानुत्पत्तिपक्षे अस्यां विवक्षायाञ्च विशेषणवैयर्थ्यं मत्वा द्वितीयतैजसत्वव्यतिरेकिणि तदुभयविशेषणमनुपादायैव हेतुनिर्देशः कृत इति दिक्।

---

(१) प्रत्ययादिति ख०।

पृथिवी उद्भूतरूप-रस-गन्धाद्यन्यतमवतीत्यादिबहुविध-व्याप्तिविरोध इति चेत् । न । तेजोऽद्रवमेव प्रत्यक्षं तेजः प्रत्यक्षरूप-स्पर्शाद्यन्यतरवदेव स्व-परप्रकाशकमेवेत्यादिव्याप्तिविरोधस्य तेजस्यपि सत्त्वात् । द्रवत्वाधिकरणञ्च न पृथिवीति त्वयैव साधितं यतो नैमित्तिकद्रवत्वाधिकरणं पीतं सुवर्णं द्रव्यान्तरमेवेत्याह ।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे प्रत्यक्षकारणवादः ।

यदा तु न पिठरेषु पाकाद्द्रवत्वनाशः किन्त्वाश्रयनाशादेव तदा परमाणुपक्वकानुमानमाह, 'यद्वेति । 'एकदेशीत्यखरसाविष्कारः । तद्बीजन्तु धर्म्मिकल्पनात इत्यादिकमेव । तेनातिरेक्यबाधे धर्म्मकल्पना-प्रसक्तौ पृथिवी-तेजोधर्म्मकल्पने च कथितमेव विपक्षबाधकं विनिगमकमिति ।

इति श्रीजयदेवमिश्रविरचिते तत्त्वचिन्तामण्यालोके प्रत्यक्षखण्डालोके प्रत्यक्षकारणवादालोकः ।

अथ मनोऽणुत्ववादः ।

नन्विन्द्रियजन्यत्वं सुखादिप्रत्यक्षाव्यापकं प्रत्यक्षलक्षणमिति चेत् । न । ज्ञातकरणाजन्यः सुखाद्यनुभवः इन्द्रियजन्यः जन्यप्रत्यक्षत्वात् रूपप्रत्यक्षवत्, जन्यसाक्षात्कारस्येन्द्रियजन्यत्वादिति तथापि तल्लक्षणसत्त्वात् । स्पर्शाद्यविषयत्वेन त्वगादिना नार्थान्तरं, गन्ध-रस-रूप-स्पर्शैक्यैकमानसाक्षात्काराजनकत्वेन पृथिव्यादिभेदसिद्धौ निःस्पर्शं लाघवान्निरवयवञ्च मनः । तच्च विभु ज्ञानासमवायिकारणसंयोगाधारत्वात् नित्येन्द्रियत्वात् नित्यत्वे सति द्रव्यानारम्भकद्रव्यत्वात् आत्मादिवत्, न च महत्त्वमुपाधिः, साधनव्यापकत्वादिति ।

अथ मनोऽणुत्ववादालोकः ।

उपोद्घातसङ्गतिमाह, 'नन्विति, 'प्रत्यक्षलक्षणं' इन्द्रियजन्यत्वरूपप्रत्यक्षलक्षणमित्यर्थः । 'ज्ञातेति नञ्व्यत्यासेनाज्ञातकरणजन्य इत्यर्थः, तेन भगवत्प्रत्यक्षे नांशतो बाधः । 'इन्द्रियजन्यः' विषयप्रत्यासन्नसंयोगिकरणजन्यः । अन्यथेन्द्रियत्वस्य मनोगर्भतया मनोऽसिद्धिदशायां साध्याप्रसिद्ध्यापत्तेरित्यर्थः । अत एव स्मृतावंशतो बाधवारणायानुभवेति

ननु सुखादिकं मूर्त्तसंयोगासमवायिकारणकगुण-वृत्तिगुणत्वावान्तरजातियोगि नित्यवृत्त्यनित्यविशेष-गुणत्वात् शब्दवत् पाकजरूपवच्चेति चेत्। न। अनात्म-वृत्तित्वस्य शब्दभिन्नविशेषगुणग्राह्येन्द्रियाजन्यत्वस्य शब्दस्य द्रव्यत्वेन मूर्त्तवृत्तिगुणत्वस्य चोपाधित्वात् अप्र-योजकत्वाच्च। कारणे मूर्त्तत्वस्य गुणत्वात्। अस्तु वा शरी-रात्मसंयोगजन्यत्वेनार्थान्तरं। यथासमवाय्यधीनो वि-शुकार्य्याणां प्रादेशिकत्वनियम इति विभु-मनोयोगा-दात्ममात्रे सुखादेरुत्पत्तौ नियतदेशता न स्यात् अतोऽणु मन इति। मैवम्। निजसमवायिकारणं स्वावच्छिन्ने विशुकार्य्यं जनयतीति नियमः। स्वावच्छिन्ने जनयत्येवेति वा। स्वावच्छिन्ने एव जनयतीति वा। आद्ये सुखादेरधिकदेशत्वे चापादकाभावः। द्वितीये

पक्षविशेषणम्। अन्यथा स्पृतेरपि इन्द्रियजन्यतया तत्र बाधाभावात्। न चेन्द्रियत्वेन तज्जन्यत्वं विवक्षित्वा तत्र बाधाद्यासञ्जनम्, तत्र हि जनकतावच्छेदकमिन्द्रियत्वमपि यथा विवक्षितमेवेत्युक्तम् प्रत्यक्षलक्षणे। 'स्पर्शादीति, त्वगादीनां स्वव्यवस्थापकगुणपुरस्कारेण प्रवृत्तिनियमादिति भावः। ननु त्वगन्यद्वायवीयं, चक्षुरन्यत्तैजस-मपीन्द्रियं स्यादित्यत आह, 'रूपेति। 'निस्पर्शमित्यनन्तरमत इति पूरणीयन्तेन निस्पर्शत्वालाघवाच्चेत्यर्थः। 'नित्यत्वे इति। अनारम्भक-

अणुमनःसंयोगेऽपि स्वावच्छिन्ने अधिकदेशे च जनये-
न्नियामकाभावात्। अन्त्ये तवापि सुखादेरणुमात्रदेश-
तापत्तिः। मनोवैभवेऽप्यविरोधश्च। अथ निमित्त-
चन्दनाद्यनुरोधेन सुखादौ न्यूनाधिकदेशता निमित्त-
वायुसंयोगादिव शब्दे न त्वसमवाय्यनुरोधात्। तथाच
सुखादिकं तदवच्छिन्न एवोत्पद्यत इति चेत्। हन्त
तर्हि वैभवेऽपि तथास्तु। न च विभुकार्य्यासमवायी
स्वावच्छिन्ने कार्य्यं जनयत्येव मेर्य्याकाशसंयोग इव
शब्दमिति चन्दनाद्यनवच्छिन्नेऽपि सुखादिकमुत्पद्येतेति
वाच्यम्। तद्देशीयचन्दनसुखे हि तद्देशीयचन्दनसम्बन्ध-

द्रव्यत्वसप्रसिद्धमतः 'द्रव्यानारम्भकेति, द्रव्यपदञ्चाचेतनन्नित्यगुणे, सत्यन्तं चान्त्यावयविनि व्यभिचारवारणाय। 'विशेषेति खसमानाधि-करणद्रव्यत्वसाक्षाद्व्याप्यजात्यवच्छिन्नव्यावृत्त्यौपयिकावान्तरसामान्यवद्-गुणशून्यद्रव्यत्वादित्यर्थः। 'आत्मादीति, आदिपदादाकाश-दिशोः परिग्रहः। 'महत्त्वमिति महत्त्वं परिमाणभेदः। 'वैभवञ्च सकलमूर्त्त-संयोगित्वमिति उपाधौ साध्यभेदो द्रष्टव्यः। 'नन्विति, न च गुण-वृत्तीत्यादि व्यर्थम्[१], शब्दजशब्दे व्यभिचारवारणार्थत्वात्। 'नित्येति, जतावयवि-तत्परमाणुत्वेहयोर्व्यभिचारवारणाय प्रथमविशेषणद्वयम्। विशेषगुणपदन्नित्यवृत्तिद्वित्वे व्यभिचारवारणाय। 'पाकजत्वदिति

---

(१) गुणवृत्तीत्याद्यधिकमिति ख०।

सापेक्षोऽसमवायी हेतुरिति कथं तन्निरपेक्षस्तत्कुर्यात्। चन्दनस्य स्वावच्छिन्ने सुखजनकं कथं स्वानवच्छिन्नेऽपि तदुत्पादयेत् कथं वा तद्देशीयचन्दनसुखं तद्देशचन्दनसम्बन्धजन्यं तेन विनैवोत्पद्येत। अथ मनोवैभवे सुखाद्युत्पत्तौ नियत उपाधिर्वाच्यः तेन नानानिमित्तसमवधानेऽपि तदवच्छेदेनैकदा सुख-दुःखादिष्वेकमेवोत्पद्यते, न नाना। एकावच्छेदेनैकदा एक एव विभुविशेषगुण उत्पद्यत इति नियमात्। निमित्तस्य त्ववच्छेदकत्वे नानासुखादिकमुत्पद्येत शब्दवदिति चेत्। न। श्रोत्रे कर्णशष्कुल्यवच्छेदेन नानानिमित्तादनेक-

---

परमाणुवृत्तिरूपवदित्यर्थः, अन्यथा घटाद्यवयवरूपे साधनवैकल्यम्। 'अनात्मेति, साधनावच्छिन्नसाध्यव्यापकावेतावुपाधी। शुद्धसाध्यव्यापकत्वे च प्रथमस्य प्रचयजन्यपरिमाणवृत्तिजातियोगिन्यात्मपरिमाणे, द्वितीयस्य चक्षुरादिसंयोगे व्यभिचारादिति। 'गुरुत्वादिति, तथाच व्यर्थविशेषणत्वमपीति भावः। अत्यन्तायोगव्यवच्छेदादिभेदेन नियमं विकल्पयति, 'किमिति। 'अन्यत्रेति, तथाचैकावच्छेदेनेत्यादिनियमे एकनिमित्तमात्रसमावेश उपाधिरिति बोध्यम्। 'युगपदुत्पन्नेति युगपद्विद्यमानेत्यर्थः। 'अबाधितेति, तथाचेदमयपरं वैभवे मानमिति भावः। 'शरीरावच्छिन्नेति। ननु विशेषव्याप्तावप्रसिद्धिः शरीरावच्छिन्नासमवायिकारणत्वाप्रसिद्धेः। न

शब्दोत्पादात्। अन्यथा कोलाहलग्रहो न स्यात्। नानावच्छेदेनैकदा चन्दन-दहनादिसम्बन्धे सुख-दुःख-योरेकदा अनुभवसिद्धत्वेनेष्टापादनात्। न च तद्यौग-पद्यप्रत्ययो भ्रमः, बाधकाभावात्। न चान्यत्र क्रमा-दपि क्रमानुमानं, अन्यत्र क्रमस्य निमित्तक्रमा-धीनत्वात्। एवञ्च विवादविषयसुख-दुःखानि[१] युग-पदुत्पन्नासमवायिकारणकानि युगपदुत्पद्यमानत्वात् युगपदुत्पन्नघटादिवत्। अबाधितानुभवाच्च नासिद्धिः। एतेन चरणदुःखं यदि शरीरावच्छिन्नासमवायिहेतुकं स्यात् शरीरव्यापकं स्यादिति निरस्तं। निमित्त-

---

यद्यदवच्छिन्नासमवायिकारणकं तत्तदवच्छिन्नमिति सामान्यव्याप्ते-रेवोक्ततर्कप्रवृत्तिः, अङ्गुल्यवच्छिन्नकरतलसंयोगासमवायिकारणकस्य[२] भुज-वृक्षसंयोगस्याङ्गुल्यव्यापकत्वेन व्यभिचारादिति। मैवम्। विभुवि-शेषगुणत्वावच्छेदेन सामान्यतो व्याप्तेः, एवं विपर्य्ययोऽपि, सुखं न शरीरावच्छिन्नासमवायिकारणकविभुविशेषगुणः शरीराव्यापकत्वादिति प्रयोज्यम्। अन्यथा सामान्यव्याप्तावुक्तविशेषणादाने व्यभिचारादिति ध्येयम्। न चैवमणुमनःपक्षेऽपि बाधः, अतिप्रसक्तस्यानवच्छेदक-त्वात्। न च वैभवेऽपि साध्यमस्ति चरणावच्छिन्नसुखं प्रति मनो-

---

(१) विवादाध्यासितानि सुख-दुःखानीति ख०।
(२) अङ्गुल्यवच्छिन्नकर-वृक्षसंयोगासमवायिकारणकस्येति ख०।

समवधानस्य तन्मत्वे अस्याप्रयोजकत्वात्। अन्यथा-णुत्वपक्षे शरीरव्यापकं सुखादि न स्यात्। आभिमानिकाभ्यासिक-मानोरथिकसुखेषु ज्ञानेच्छा-प्रयत्न-द्वेषेषु च देशनियमः। शरीरावयवेषु यत्क्रियायामिच्छा तदवच्छेदेन प्रयत्न इति तत्रैव चेष्टा आवश्यकत्वात् अनियतदेशज्ञानेच्छादौ लघुत्वाच्च। अन्यथाणुत्वपक्षे प्रयत्नस्याणुदेशत्वं शरीरमात्रदेशत्वं वा स्यात्।

अन्ये तु सुखादौ तन्निमित्तावच्छेदेनात्म-मनःसंयोगोऽसमवायी तन्मात्रसुखाद्युपलम्भात्। न त्वात्म-मनःसंयोगमात्रमतिप्रसङ्गादित्याहुः।

योगस्य शरीरावच्छिन्नमनोयोगत्वेनाजनकत्वादिति वाच्यम्। तत्तदवच्छिन्नमनोयोगत्वेन तत्सुखं प्रति अजनकत्वात् किन्तु चेष्टाश्रयावच्छिन्नमनोयोगत्वेन जन्यात्मविशेषगुणत्वावच्छिन्नं प्रतीति वस्तुगतेरिति भावः। 'अन्यथेति यदि यदवच्छिन्नासमवायिकारणकमिति व्याप्तिरित्यर्थः। ननु यत्समवायिकतो न प्रादेशिकतानियमस्तदा वैषयिकसुखादौ निमित्तवदन्यत्र नियामकाभावात् प्रादेशिकता कथं स्यादत आह, 'मानोरथिकेति, तत्र न शरीरैकदेशतानियमः सुखादिवदिति फलबलाच्छरीरमेव नियामकं कल्प्यत इति भावः। एवमन्यत्रापि नियामकान्तरमाह, 'शरीरेति, 'अनियतदेशज्ञानेच्छादौ' शरीरव्यापकज्ञानोत्पत्तौ। 'न त्वात्म-मनःसंयोगमात्र'

यावति यत्सुखादिप्रागभावः तावत्येव तत्सुखादिक्षणमुत्पद्यत इत्यपरे।

यत्तु तदितरहेतुसाकल्ये तद्व्यापकत्वेन प्रागभावस्यावश्यकत्वमिति। तन्न। प्रागभावस्याहेतुत्वापत्तेः। तदितरहेतुसाकल्ये तदभावेन कार्य्याभावाभावात्। एतेन व्यापकमनवच्छिन्नं नेन्द्रियगतिप्रसङ्गादित्याकाशे कर्णशष्कुलीवन्नियत उपाधिर्वाच्यः, स च न शरीरं, तदवयवमात्रं वा, नियतस्तदवयवी वा, चेष्टाश्रयमात्रं वा, नानावयवावच्छेदेनाव्याप्यवृत्तिसुखाद्युपलब्धेः, एवञ्च सूक्ष्ममिन्द्रियमुपाधित्वेन कल्पनीयं, तथाच

न शरीरावच्छिन्नात्म-मनःसंयोगमात्रं, क्वचित्तु 'आवश्यकत्वादित्यनन्तरं 'अन्ययाणुत्वपक्षे प्रयत्नस्याणुदेशत्वं शरीरमात्रदेशत्वं वा स्यात् अन्ये तु तन्निमित्तावच्छेदेनात्म-मनःसंयोगोऽसमवायी तत्मात्रसुखाद्युपलक्षात् न तु' इतिपर्य्यन्तं ग्रन्थलिखनं, अग्रे 'लघुत्वाच्चेत्यनन्तरं नञ्शब्दलोपश्च दृश्यते तत्तु कल्पितमसाम्प्रदायिकमित्युपेक्षितं। 'चाक्षुषेति चाक्षुषद्रव्यज्ञानवत इत्यर्थः। तेन हेतौ 'तदानीमित्यनेन तस्यैव परामर्शात् अन्धकारस्य काले स्वविषयसाक्षात्काराजनके सुवर्णे(१) न व्यभिचारः। न हि तत्रापि तेजःसंयोगाभावादग्रहो येन तेजःसंयोगः स्वविषयसाक्षात्कारे हेतुः स्यात्तेजसि तेजोऽन्तरस्याग्राहक-

---

(१) सुवर्णरूपतेजसीति ख०।

तदेव मनः किमुपधेयेन विभुना, तच्च च सर्व एव हेतवो धर्मिग्राहकमानबाधिता इति निरस्तं। इन्द्रियत्वेन तस्य शरीरमात्रस्योपाधित्वेऽपि निमित्तवशात् सुखादेर्नियतदेशतोपपत्तेः। न चैकदानेकविषयेन्द्रियसम्बन्धे युगपज्ज्ञानानुत्पत्त्या इन्द्रियसहकारितयानुमितं मनोऽणु तदेव सुखग्राहकमिन्द्रियं लाघवादिति तद्वैभवहेतवो बाधिता इति वाच्यं। बुभुत्सावशात् कारणधर्मत्वाद्वा अणुत्वपक्षे श्रोत्रे अनेकशब्दसमवायेऽपि बुभुत्सितमात्रशब्दग्रहवत् व्यासङ्गदशायां युगपज्ज्ञानानुत्पत्तेरुपपत्तेः अन्यच दीर्घशष्कुलीभक्षणादौ

लाद्रूपाग्रहेण तत्र सुवर्णाग्रहादिति भावः। विषयेन्द्रियसंयोगशून्यत्वेनार्थान्तरवारणाय 'स्वविषयसम्बद्धानीति पक्षविशेषणं, साक्षात्कारहेतुसंयोगशून्यत्वं तदसमवहितत्वं तत्समवधानस्य कार्यप्रयोजकत्वेन तदसमवधानस्य प्रत्यक्षाप्रयोजकत्वेन साधनौचित्यात्। तथाच चाक्षुषसाक्षात्कारहेतुसंयोगसमवधानत्वेन बाधो माभूदतः 'स्वविषयेति साक्षात्कारविशेषणं। 'तदानीमिति चाक्षुषद्रव्यज्ञानकालीनस्य-स्वविषयसाक्षात्काराहेतुत्वादित्यर्थः। अत्र स्वविषयत्वं स्वजन्यसाक्षात्कारविषयत्वं इन्द्रियस्य व्यापारानुबन्धेनैव सविषयत्वात् तथाच दृष्टान्ते घटेऽपि स्वविषयत्वं स्वस्मिन्नस्तीति घटे न दृष्टान्तासिद्धिः न वा परमाण्वादावयोग्ये व्यभिचारः। तत्र स्वविषया-

युगपज्ज्ञानोत्पत्तेरिष्टत्वादिति। अत्रोच्यते। व्यासङ्ग-दशायामिन्द्रियाणां स्व-स्वविषयसम्बन्धेऽप्येकस्मात् ज्ञानं नान्यस्मादित्यनुभवसिद्धमतो यस्यासम्बन्धान्न युगपज्ज्ञानानि तदिन्द्रियसहकारिभूतेन तदधिष्ठायकं मनस्तदेव सुखादिग्राहकमिति तस्य धर्मिग्राहकमानबाधितं विभुत्वं। तथाहि चाक्षुषज्ञानवतो मैत्रस्य स्व-स्वविषयसम्बद्धानि घ्राण-रसन-त्वक्श्रोत्राणि स्व-स्वविषयसाक्षात्कारहेतुसंयोगशून्यानि तदानीं स्वविषयसाक्षात्काराजनकत्वात् इन्द्रियासम्बद्धघटवत्[१]। एकैकं वा पक्षः अन्यथा हेतुसाकल्ये युगपज्ज्ञानोत्पत्तिप्रसङ्गः। न च वैभवेऽप्यदृष्टविलम्बादिलम्बः, तदितर-

---

प्रसिद्धा हेत्वभावात् द्रव्यपदमधिकं हेतौ प्रवेश्यं, अन्यथा योग्यानुपलब्धाभावादभावे स्वविषयसाक्षात्काराजनके व्यभिचारः। न च स्वविषयाभावादनुत्पन्नशब्दादिसाक्षात्काराजनके श्रोत्रादौ व्यभिचारः, विद्यमानत्वेनापि स्वविषयविशेषणादिति भावः। अत्र प्रयोजकत्वमात्रञ्च निषेधति, 'न वेति, एवमपेऽपि। ननु घटबुभुत्सायामपि पटज्ञानोदयवत्पृथ्यदर्शनवतः इच्छाद्यन्वयानुविधानमस्ति तथाचोभयोरन्यतरस्याप्यबाधे[२] विषयभेदो गतिरिति च चात्र स्फुट एव

---

(१) घटवदिति ख०।
(२) उभयोरप्यबाधे इति ख०।

हेतुसाफल्ये तस्यापि सत्त्वात् इन्द्रियान्तरविरोधप्रसङ्गाच्च। न च बुभुत्सावशात् ज्ञानो दृश्यते हि नृत्यदर्शनवतो बुभुत्सानोऽभिमतविषयान्तरज्ञानमिति वाच्यं। सा हि न स्वविषयज्ञाने हेतुः अबुभुत्सितेऽपि[1] ज्ञानोदयात्। नाप्यन्यज्ञानप्रतिबन्धिका, घटबुभुत्सायामपि पटज्ञानोदयात्। बुभुत्सा च क्रियाहेतुमनोगोचरप्रयत्नद्वारेन्द्रियान्तरादाकृष्य अभिमतार्थग्राहिणीन्द्रियान्तरे मनो निवेशयन्ती बुभुत्सितग्रहे हेतुरन्यग्रहे प्रतिबन्धिका च न तु साक्षात्। अत एव बुभुत्सासत्त्वेऽपि मनोगोचरप्रणिधानाभावे[2] सा न क्रियोत्पादिका। नन्विन्द्रिय-मनःसंयोगविशेष एव विषयविशेषग्रहे हेतुः कल्प्यताम्। न चैवं सिद्धकारणभावस्य विशेषकल्पने हेत्व-

स्वविरोधिसामग्र्याः प्रतिबन्धकत्वदर्शनेन स्वविरोधिज्ञानेच्छा प्रतिबन्धिका। न च घटज्ञानस्य पटज्ञानं विरोधि, उभयगोचरसमूहालम्बनसम्भवात्। किन्तु चाक्षुषज्ञानस्य रासनादिज्ञानं तथा। तथाच तदिच्छैव प्रतिबन्धिका तदनुविधानमेव नृत्यदर्शनवत इत्यादिनोक्तं, अतस्तदनुविधानमप्युपाधिना अन्यथासिद्ध्यति, 'बुभुत्सा चेति, 'तस्यापीति हेत्वन्तरस्यापीत्यर्थः। तथाच यत्रैव हेत्वन्तरमन्वय-व्यतिरेकि

(१) अबुभुत्सतेऽपीति ख०।
(२) मनोगोचरप्रयत्नाभावे इति ख०।

तरोच्छेदः, तस्याप्यन्वय-व्यतिरेकित्वादिति चेत्। न। इन्द्रिय-मनःसंयोगे हि विशेषो न जातिरूपोऽनुगत-हेत्वभावात् जातिसङ्करप्रसङ्गाच्च। नापि सहकारि-रूपः, तस्यैव हेतुतापत्तेः। अथास्तु करणधर्मत्वेन क्रियाक्रमः, एककरणमेकत्रैकदैकावच्छेदेन तुल्यदेशे वा एकजातीयामनेकां क्रियां न करोति, किन्त्वेका-मेव। एकत्रेत्यादिविशेषणात्कुठाराग्निसंयोग-शब्देषु न व्यभिचार इति चेत्, तर्हि चक्षुराद्यवच्छेदेन भिन्न-देशीयशब्दवत् परमाणाविव विजातीयामग्निसंयोगव-दनेकां क्रियां कुर्य्यादेव। अथ ज्ञानकरणमेकत्रात्मन्येक-दैकमेव ज्ञानं करोति समूहालम्बनकरणवत्, कथम-न्यथा नानासामग्रीसत्त्वे[1] समूहालम्बनमेकम्। यत्त्व-परज्ञानसामग्री यदि तदा कार्य्यावश्यम्भावः[2] तदसत्त्वे

तत्रैव सिद्धकारणभावस्य विशेषाकल्पनं, यत्र तु न तथा तत्र धर्म्मी-तिन्यायात्सिद्धकारणभाव एव विशेषकल्पनमिति भावः। 'जाति-सङ्करेति। अन्यतरकर्म्मजत्वादिनेत्यर्थः[3]। 'तस्यैवेति तथाच किमनेन

---

(२) नानासामग्रीत इति ख०।
(३) अपरज्ञानसामग्रीसत्त्वे ज्ञानावश्यम्भाव इति ख०।
(३) अन्यतरकर्म्मजत्वादिनेति शेषः इति ख०।

किं करणधर्म्मत्वेन तस्य सहकार्य्यन्तरपर्य्यवसायित्वादिति। तन्न। समूहालम्बनसाम्यात्। करणस्यैकदैकमात्रजनकत्वेनापराजनकतया तत्र कारणाभावेनैव सामग्रसत्त्वादिति चेत्, तर्हि पञ्चसु यदेकं जनयति नापराणि तत्र नियामकमास्थेयम्। अन्यथा ज्ञानजनने तेषां कलहः समादध्यात्। किञ्चैवं युगपज्ज्ञानानि माभूवन् युगपज्ज्ञानन्तु केन वार्य्यते एकजन्यसमूहालम्बनवत्। न च चाक्षुषत्वादिजातिसङ्करापत्तेर्नैकज्ञानमिति वाच्यम्। एवं हि फलविरोधेनैकमपि ज्ञानं न जनयेद्विशेषात्। उत्पद्यतां वा चाक्षुषादिविजातीयं ज्ञानं सामग्रीसत्त्वात् चित्ररूपवत्। फलबलात्तत्र तथेति चेत्, तर्ह्यत्र फलाभावे हेतुः कल्प्यतां अन्योन्यप्रतिबन्धकत्वे तत्रैव ज्ञानमेव

विधुना मनसेत्यर्थः। 'एकङ्करणमिति, न चैकावच्छेदेनेति विशेषणे दत्ते एकत्वेत्यधिकं, एकस्य श्येनकर्णस्वरणावच्छेदेन युगपच्छाखा-वृक्षसंयोगद्वयस्यैव जनकत्वेन व्यभिचारात्। अत एवोभयं सकलमप्याह,'तुल्यदेशे वेति। 'अथ ज्ञानकरणमिति, न चैकत्वात्मनीत्यधिकं, ज्ञायमानकरणपक्षे लिङ्गशब्दादौ[१] तदनभ्युपगमेऽपि आलोकादौ व्यभिचारवार-

---

(१) शब्दलिङ्गादाविति क०।

न स्यात् न त्वेकज्ञानमित्युक्तम्। ननु चक्षुरादि न सम्भूय जनकं अन्यविषयेऽन्यस्यासामर्थ्यात् शीतं सुरभि शुभ्रं चन्दनमित्यत्रैव कारणान्तरानुपनयाच्च। न च स्व-स्वविषयज्ञानायोद्यतमिन्द्रियं कारणान्तरसहकारात् तत्तद्विषयमादायैव स्व-स्वविषयं ज्ञापयेदिति वाच्यं। भिन्नविषयप्रमाणानां सम्भूयाजनकत्वनियमात्। तत्त-दिन्द्रियन्तत्तज्ज्ञानांशे जनकमित्यपि न विषयस्यां-शत्वादिति चेत्। मैवं। न हीन्द्रियाणां सम्भूय कारित्वं, किन्त्वार्थः समाजः, प्रत्येकज्ञानसामग्रीसत्त्वादेकदा ना-नाज्ञानप्रसक्तौ करणधर्मत्वेन मनस्तावद्गोचरामेका-मेव ज्ञानक्रियामुत्पादयेत् समूहालम्बनवत्। न चैक-क्रियाजननदशायामपरविषयक्रियायां मनो न समर्थ-मिति कथं तां जनयेदिति वाच्यम्। भिन्नक्रि-यायामसामर्थ्येऽप्येकक्रियायां सामर्थ्यात्।

कत्वादिति भावः। ननु गो-गोत्वयोरालोचनानन्तरं[१] अन्यतरविषय-कज्ञानोत्पत्तिवददृष्टमेव नियामकं स्यादित्यरुचेराह, 'किञ्चेति, करणधर्मत्वादेकोत्पत्तिमात्रं सिद्ध्यति सा च सर्वगोचरैकज्ञानेऽपि सम्भवतीति भावः।

---

(१) गो-गोत्वयोर्निर्विकल्पकज्ञानानन्तरमित्यर्थः।

वस्तुतस्तु विशेषाभावादेकामिवापरामपि बुद्धिज्ञानयेदविशेषात्। न चैकामपीत्यनेकज्ञानोत्पत्तिर्ज्ञानानुत्पत्तिर्वा न त्वेकविषयज्ञानोत्पत्तिरिति नियामकमास्थेयं। समूहालम्बने फलबलेन परस्परापेक्षितत्वेनैकैव सामग्री। ननु मनोऽणुत्वे कथं सन्दोऽपि बुभूत्सितः शब्दो गृह्यते नान्यः। अथ शब्दे बुभुत्सैवेतरग्रहप्रतिबन्धिका अग्रहस्य तदनुविधानात् अनन्यगतिककार्यदर्शनात् बुभुत्सितशब्दग्रहसामग्रीव वा बलवतीति यदि मन्यसे, तदा वैभवेऽपि तत एव युगपज्ज्ञानानुत्पत्तिरिति चेत्। मैवम्। बुभुत्सा न रूपादिग्रहे हेतुर्न वेतरग्रहे प्रतिबन्धिकेत्युक्तत्वात्। किञ्च रूपादिसकलबुभुत्सायां परस्परप्रतिबन्धादज्ञानबुभुत्साधीनसामग्रीबलवत्त्वाद्वा सर्वेषां ज्ञानं स्यात् न त्वेकस्य पञ्चावधानस्य सर्वेषां ज्ञानं भवत्येवेति चेत्। न। तत्रापि क्रमानुमानात्।

ननु चित्रज्ञानसम्भवि रूपादिषु मध्ये रूपादिमात्रग्रह एव चक्षुरादिसामर्थ्येन स्व-स्वाविषयगुणादिग्रहे तदसामर्थ्यादित्यखरसादाह, 'वस्तुतस्त्विति, न चादृष्टमेव नियामकमित्युक्तमेवेति वाच्यम्। अणुना मनसा दृष्टेनैवोपपत्तौ अदृष्टकल्पनानवकाशात्। अन्यथा मन एव कुतो न कल्प्येत, कुतो वैभवावैभवचिन्ता, उदाहृते तु गत्यन्तराभावादिति भावः। 'बुभुत्सितेति, बुभुत्सितशब्दग्रहसामग्र्याः प्रतिबन्ध-

अन्यथा सर्व्वबुभुत्साधीनप्रणिधानेऽप्यन्येषां कथं न स्यात्[१]। नन्वणुत्वेऽपि दशभिः पद्यमानासु गाथासु तावन्नोचरबुभुत्सायां प्रणिधाने चोक्तरीत्या सर्व्वेषां ज्ञानसङ्घानं वा न त्वेकज्ञानमिति चेत्। अत्र कश्चित्। श्रोत्र-मनःसंयोगे आत्म-मनःसंयोगे वा कश्चिद्विशेषः कार्य्योन्नेयः किञ्चिच्छब्दग्रहे हेतुः, तदन्यग्रहे प्रतिबन्धक इति। तन्न। वैभवेऽपीन्द्रिय-मनःसंयोगविशेषस्य तथात्वे व्यासज्योपपत्तेः। अनुगतरूपाभावेन प्रतिव्यक्ति प्रतिबन्धकत्वे हेतुत्वे च व्यभिचारात्। संयोगे च विशेषस्य जातित्वे जातिसङ्करः। उपाधित्वे स एव हेतुर्न मनः।

अपरे तु प्रत्यक्षानुकूलेन्द्रिय-मनःसंयोगद्वारा बुभुत्सा प्रणिधानञ्च प्रत्यक्षहेतुरिति[२] चाक्षुषादिबुभुत्सितग्रहे कृतत्वात् ताभ्यां श्रोत्रे बुभुत्सितशब्दावच्छे-

---

कत्वे बुभुत्सावच्छेदिकेति भेदः[३] इति भावः। 'जातिसङ्कर इति कग्रहजनिका गग्रहप्रतिबन्धिका जातिरेका अपरा चाविपरीता तयोरुभयगोचरसमूहालम्बनदर्शनेन तज्जनकमनोयोगे सत्त्वेन सङ्कर-

---

(१) कुतो न स्यादिति ख०।
(२) बुभुत्सा-प्रणिधानयोः प्रत्यक्षहेतुत्वमितीति ख०।
(३) विशेष इति ख०।

देन मनः संयुज्यत इति स गृह्यते नान्यः, क्वचित्प्रणिधानं विनैव तथा। अन्यच्च प्रणिधानाधीनक्रियया अश्रूयमाणशब्दावच्छिन्नात्मनो विभज्य बुभुत्सितशब्दावच्छेदेन मनः संयुज्यते इति तद्ग्रहो न सर्व्वस्येति। तत्तुच्छम्। युगपत्क्रियमाणासु विंशतौ गाथासु तावन्नोचरबुभुत्सायां प्रणिधाने च तावन्नाद्यावच्छेदेन मनःसंयोगाद्युगपत्तासामुपलम्भप्रसङ्गात् प्रत्येकसामग्रीसत्त्वात् निकटाऽन्यमानठक्कादिशब्दानां श्रोत्रव्यापकत्वनियमाच्च।

अथ यच्च कोलाहले श्रूयमाणस्य बुभुत्सितशब्दग्रहः तत्रोभयशब्दावच्छेदेन मनःसंयोगादुभयग्रहः कोलाहले तूपेक्षाज्ञानमेवेति तथापीति चेत्, तर्हि हतमनया दुरुक्त्या। अबुभुत्सिते उपेक्षाज्ञानमेवास्तु, न च तदपि, इतो न शब्दान्तरमश्रौषमित्यनुभवात्। अन्यथा वैभवेऽपि व्यासङ्गदशायामितरेषामुपेक्षाज्ञानमेवेति। अत्रोच्यते। यद्यपि बुभुत्सा-प्रणिधाने न शब्दग्रहमात्रे सहकारिणी न वेतरग्रहप्रतिबन्धके, तथापि नानाशब्दसमवायदशायां

इत्यर्थः। 'हेतुरित्यनन्तरं अस्तिति, 'न मन इत्यनन्तरञ्च कल्प्यमिति शेषः।

यः शब्दग्रहः तत्र तयोस्तथाभावः तथैवत योरन्वय-व्यतिरेकानियमात्।

यद्वा कोलाहले श्रूयमाण एव बुभुत्सितग्रह इत्यत्रेऽपि कोलाहलत्वेन तद्विषया एव बहूनाञ्चैकदा समवाये युगपत्सन्निधाने वा व्यक्तिग्रहे तद्गतगत्वत्वादिग्रहो न भवति। अगृहीतकत्वादिनानाशब्दस्य कोलाहलबुद्धिविषयत्वात्। तस्यां दशायाम्बुभुत्सित-शब्दत्वादिजातिग्रहे बुभुत्सैव शरणं एककालीन-बहुशब्दबुभुत्सा च न हेतुः व्यभिचारात्।

यत्तु कोलाहलादन्यत्रैकदा नानाशब्दग्रहे श्रोत्रन्न समर्थं किन्त्वेकशब्दग्रहे विनिगमिका बुभुत्सैवेति। तन्न। एकगीयमानापेक्षयैकदा नानागीयमानस-जातीयगीतादिषु सुखादिवैलक्षण्यानुभवात्।

अथ दीर्घशष्कुलीभक्षणे कथं पञ्च घ्राणानि। क्रमस्तत्रेति चेत्। न। घ्राणानां यौगपद्यप्रत्ययस्य बाधकं विना प्रमात्वात्। व्यासङ्गोबाधक इति चेत्, तर्हि मनोऽवयव्यस्तु तेन सङ्कोच-विकाशाभ्यामुभयमुप-

---

नानाशब्दसमवायकालीनैकतरबुभुत्सा यद्यपरग्रहप्रतिबन्धिका तदैकबुभुत्सायाङ्कोलाहलधीर्न स्यादित्यखरसाद्बुभुत्सायाः शब्दग्रहे न हेतुत्वं अन्यग्रहे वा न प्रतिबन्धकत्वमपि तु तज्जातिग्रहे हेतुत्वं

पद्यते इति केचित्। तन्न। यदि हि सङ्कोच-विकाश-हेतुरदृष्टन्तर्हि तत एव तदुभयमस्तु कृतं मनसा। नाप्येक-पञ्चबुभुत्सया तौ भवतः तस्या अहेतुत्वात्। हेतुत्वे वा अस्तु विभु मनः अवयविनो लघुत्वात्।

अथ यथा क्वचित् बुभुत्सया क्वचित्तीव्रविषयेन्द्रिय-सन्निकर्षादिन्द्रिय-मनःसंयोगः, एवं मनःसङ्कोच-विकाशयोर्बुभुत्सादिकं हेतुरिति चेत्, तर्हि पञ्चबुभुत्सायां प्रणिधाने च सर्व्वदा सर्व्वेषां पञ्च ज्ञानानि जायेरन् पञ्चावधानज्ञाने क्रम एव। एतेनाणुमनःपञ्चतयमस्तु अवयविनो लघुत्वात् बुभुत्सादिवशात्तेषामेक-पञ्चेन्द्रियसम्बन्धादुभयमुपपद्यत इति निरस्तम्। पञ्चबुभुत्सायां सर्व्वेषां पञ्चेन्द्रियसम्बन्धे व्यासङ्गानुपपत्तेः। कथं तर्हि दीर्घशष्कुलीभक्षणे गन्ध-रस-रूप-स्पर्श-शब्दान् प्रत्येमीत्यनुव्यवसायः क्रमिक-ज्ञानपञ्चतयेन युगपन्मनःसन्निकर्षाभावादिति चेत्।

तादृश्येव प्रतिबन्धकत्वञ्चेत्याह, 'यद्वेति, न चैवमेकदा स्वस्वविषय-सम्बद्धेन्द्रियदशायां रूपाद्यन्यतरबुभुत्सा तद्ग्राहिका अन्यग्रहप्रतिबन्धिका चास्तिनि समः समाधिरिति(१) वाच्यम्। तादृशबुभुत्सायामपि

---

(१) परीहार इतीति ख०।

न। अनुव्यवसायस्यैकत्वासिद्धेः, अनुव्यवसायाः पञ्चैव समयसौक्ष्म्यात्तेषां क्रमो न गृह्यते[१]।

अथवा क्रमिकानुव्यवसायाहितसंस्कारात् पञ्चज्ञानविषयस्मृतावनुभवत्वारोपात् युगपत्प्रत्येमीत्यनुव्यवसायः। विभुत्वे हेत्वभावादात्म-मनःसंयोगाभावान्नात्मसुखाद्युपलब्धिः स्यात्। द्रव्यत्वेनात्मसंयोगित्वसाधने त्वङ्संयोगसिद्धौ तत एव तद्विभागित्वेऽपि सर्वदा तयोः परस्परविरुद्धसंयोग-विभागप्रसङ्गः। ननु अणुत्वे असमवाय्यनुरोधात् चेष्टाहेतुप्रयत्नस्यानुदेशत्वं शरीरदेशमात्रत्वं वा[२] स्यात्। न तु शरीर-तदवयवदेशत्वं, येन क्रियानियमोभवेत् नियमकाभावात्। न च नोदनाभिघातादिवाव्यापिनोऽपि प्रयत्नात् शरीरादिक्रिया, अतिप्रसङ्गात्। एवमेकदा विंशतिप्रयत्नाभावात् क्रमयमङ्गुलीषु विंशतिः क्रियाः। न च यौगपद्यभ्रमः, बाधकाभावात्। युगपत्सन्निकर्षाभावेनाङ्गुल्यश्चलन्तीति

सूची-सर्पादिवेधानुभवेन तादृश्या अपि व्यभिचारादिति भावः।

विभुत्वे बाधकान्तरमाह, 'विभुत्व इति, 'विभागप्रसङ्ग इत्यापाततः, परमार्थतस्त्वप्रयोजकमात्मसंयोगित्वे द्रव्यत्वं,मूर्त्तत्वे च सामग्र्येव

---

(१) न लक्ष्यते इति ख०।
(२) शरीरमात्रदेशत्वं वेति ख०।

समूहालम्बनानुपपत्तेः विंशतिज्ञानानामेकदानुव्यवसायासम्भवात् अग्र-पश्चाद्भावे विनिगमकाभावाच्च। क्रमोत्पादे च भ्रू-नयन-कर-चरणादिसकलशरीरावयवानां युगपद्विचित्रनानाकर्मसमूहरूपं नृत्यं न प्रत्यक्षं स्यात्। तथाच प्रत्येककर्मजन्यसुखादिलक्षणसुखविशेषो नानुभूयेतेति। अत्र ब्रूमः। सुखे चन्दनादिवत् चिकीर्षैव नियामिका यत्क्रियायां चिकीर्षा सा क्रिया तच्चिकीर्षाजन्यात् प्रयत्नाद्भवति। तत्र शरीरक्रियापि तच्चिकीर्षाजन्यादणुमात्रदेशादपि प्रयत्नाद्भवति। अथवा यस्य क्रियायां चिकीर्षा तदवच्छेदेन प्रयत्न उत्पद्यते तेन शरीरावच्छेदेनोत्पन्नप्रयत्नादेव शरीरक्रिया। एवं विंशतिक्रिया चिकीर्षाजन्यादणुमात्रदेशादपि प्रयत्नाद्विंशतिक्रिया युगपदुत्पद्यन्ते। अथवा अङ्गुलीविंशतिक्रियायां चिकीर्षेति

विपक्षबाधिका, आत्मविभागित्वे तु मूर्त्तत्वमेव न कुतो द्रव्यत्वं, कपालद्वयसंयोगेन घटोत्पत्तिकाले आत्मविभागस्यानाग्नित्वेनाग्निसमये संयोगादिवद्विभागोत्पत्तिसामग्र्यभावेनात्मविभागानुत्पत्तौ व्यभिचारात्। न चाग्निकाले तदुत्पादः, तदुत्तरकाले घटनाशस्यापि सम्भवात्। ननु सुखे चन्दनादिवच्चिकीर्षा प्रयत्नोत्पत्तौ नियामिका न तु चेष्टो-

विंशत्यवच्छेदेन विंशतिप्रयत्नाद्विंशतिक्रियाहेतव उत्पद्यन्ते, एवं नृत्यादावपि। एतच्चिकीर्षानुविधानात् क्रिया-प्रयत्नयोरध्यवसेयं। तदेवमणुमनःसिद्धौ तद्ग्राह्या आत्मविशेषगुणाः बुद्धि-सुख-दुःखादय इति नाव्यापकं प्रत्यक्षलक्षणं।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे मनोऽणुत्ववादः।

त्पत्तौ तत्र चिकीर्षाया अनिमित्तत्वात् विभुकार्य्याणामेव निमित्तानुरोधाच्चेत्यतस्तथैव सिद्धान्तयति[१] 'अथवेति।

इति श्रीजयदेवमिश्रविरचिते तत्त्वचिन्तामणालोके प्रत्यक्षखण्डालोके मनोऽणुत्ववादालोकः।

---

(१) सिद्धान्तमाहेति ख०।

अथानुव्यवसायवादः ।

ननु वर्त्तमानं ज्ञानं न मानसं किन्तु स्वयमेव स्वव्यवहारहेतुः, स्वस्मिन् सत्येव स्वव्यवहारात्, न तु ज्ञानान्तरमपेक्षते तदन्वय-व्यतिरेकाननुविधानात् ज्ञानान्तरविरहदशायां स्वविरहादेव स्वव्यवहारविरहात् स्वत एव स्वव्यवहारोपपत्तौ ज्ञानान्तरकल्पने गौरवाच्च । घटादिव्यवहारे ज्ञानान्वय-व्यतिरेकादस्तु तदपेक्षा । स्वीयमतीतमनागतं परकीयञ्च ज्ञानं स्वव्यवहारे ज्ञानान्तरमपेक्षत एव व्यवहारकाले तदभावात्

अथानुव्यवसायवादालोकः ।

'नन्विति, तथाच ज्ञानगोचरप्रत्यक्ष एवाव्याप्तम् प्रत्यक्षलक्षणमिति पूर्वाक्षेपस्तदवस्थ एवेति भावः । नन्वेवं परकीयज्ञानादौ न व्यवहारकालासत्त्वं अतो हेत्वन्तरमाह, 'ज्ञानेति। 'व्यवहारस्येति, इदञ्च समाधिसौकार्य्यादुक्तं यतो व्यवहारानुरोधं विनापीच्छामीति इच्छाविषयकानुभवादेवेच्छाविषयकं ज्ञानं सिध्यति । न चैवं ज्ञाने, तत्र जानामीत्यनुभवस्य स्वप्रकाशतया अन्यथासिद्धौ व्यवहारबलादेव ज्ञानानुव्यवसायस्य वाच्यत्वात्। न चैवं व्यवहारानुरोधं विनापि योग्यत्वादेव ज्ञानानुव्यवसायोऽस्तु लाघवादनुगमाच्च क्षणिकात्मविशेषगुण-

ज्ञानान्तरान्वय-व्यतिरेकानुविधानाच्च। नन्वेवमिच्छा-दिकमपि स्वव्यवहारज्ञानं नापेक्षेत ज्ञानतुल्यतया स्वयमेव स्वव्यवहारशक्तत्वादिति चेत्। न। व्यवहा-रस्य ज्ञानजन्यत्वनियमेनेच्छादिव्यवहारे ज्ञानापेक्ष-णात्। अथ ज्ञानमात्रं न व्यवहारहेतुरतिप्रसङ्गात् किन्तु व्यवहर्त्तव्यविषयमिति ज्ञानव्यवहारोऽपि तद्वि-षयज्ञानान्तराद्भवेदिति चेत्। सत्यं। स्वस्यैव स्वविष-यकत्वात्। यद्व्यवहारानुकूलशक्तियोगि यज्ज्ञानं तस्यैव तद्विषयकत्वात्। शक्तिश्च पदार्थान्तरं न कार-णमेति नान्योन्याश्रयः। स्वव्यवहारे ज्ञानं शक्तमिति स्वविषयकं। व्यवहारशक्ति-समवायादयश्च स्वभावत-एव तदीयाः सम्बन्धान्तरेऽप्यनवस्थानात् स्वभाव एव शरणं। एतेन भेदनियतो विषय-विषयिभावः कथ-

---

लेनैव योग्यत्वात् न तु तेन तेनेच्छात्वादिनेति वाच्यम्। निर्वि-कल्पकजीवनयोनियत्नसाधारणेनाननुगतस्यैव योग्यतावच्छेदकत्वात्, तथाच फलबलाद्योग्यतावच्छेदककल्पना ज्ञाने तु फलं न निश्चितं येन ज्ञानविशेषत्वं तथा कल्प्येत तन्निश्चायकयोर्व्यवहारानुभव-योरन्यथासिद्धत्वादित्यवधेयम्। 'व्यवहारानुकूलेति, न च ज्ञाने-त्यधिकं, ज्ञानं विना तदनुकूलशक्तिमता केवलमात्मना व्यवहा-राजननादिति भावः। 'नान्योन्येति, यद्यपि व्यवहारानुकूलका-

मभेद इति निरस्तं। स्वव्यवहारशक्तत्वस्य स्वविषयत्व-स्याभेदेऽपि[१] सम्भवात्। अस्तु वा ज्ञानस्य स्वभाव-विशेष एव स्वविषयत्वं सम्बन्धं विनैव स्वभावविशेषा-द्यथा ज्ञानं घटीयं घटव्यवहारजननयोग्यं स्वीयमपि तथा[२]। कोऽसौ स्वभावविशेष इति चेत्। न। आख्यातुमशक्यत्वेऽप्यनुभवसिद्धस्य स्वभावविशेषस्य माधुर्य्यादिविशेषवत् प्रत्याख्यातुमशक्यत्वात्। यद्यपि स्वभावविशेष इति वाक्येनाख्यायत एव, तथापि पदेनाख्यातुमशक्यत्वात्। अथ व्यवहारो व्यवहर्त्तव्य-भिन्नज्ञानसाध्यः क्रियत्वेन विना स्यादिति चेत्। न। व्यवहारं प्रति व्यवहर्त्तव्यज्ञानत्वेन हेतुत्वात्, न तु व्यवहर्त्तव्यभिन्नज्ञानत्वेन गौरवात्। समूहालम्बनञ्चै-

रणता व्यवहारकारणतावच्छेदिकेत्यात्माश्रयः, तथापि व्यवहारका-रणतावच्छेकावच्छिन्नत्वज्ञाने सति व्यवहारकारणताज्ञानमवच्छेदका-वच्छिन्नत्वज्ञाने सत्येवावच्छेद्यग्रहात् तज्ज्ञाने सति तदवच्छिन्नत्वज्ञानं विशेषणज्ञानसाध्यत्वात् विशिष्टज्ञानस्येत्यन्योन्याश्रयो द्रष्टव्यः। ननु 'स्वव्यवहारः' स्वविषयकव्यवहारः, शक्तेरपि तदीयायास्तत्र समवायः,

(२) स्वविषयत्वस्याभिन्नत्वेऽपीति ख०।
(३) तथा स्वीयमपीति ख०।

तैकव्यवहारजनकत्वादेकैकविषयकमपि न तु समूह-विषयकमेव अतिरिक्तस्य तस्यासत्त्वेन सन्निकर्षाभावात्। भ्रमस्थले रजतव्यवहारानुकूलशक्तिरस्त्येव रजतज्ञाने, किन्तु दोषादभिभूतैव सा जायत इति न तया रजते व्यवहारः, रजतज्ञानं न शुक्तौ प्रवर्त्तकं किन्त्विन्द्रियजन्यमिदं ज्ञानमेव, रजतार्थिप्रवृत्त्यर्थन्तूपस्थितरजतभेदाग्रहमपेक्षत इति रजतज्ञानं कारणतावच्छेदकम्। एवञ्च स्वविषयत्वं स्वप्रकाशत्वं न तु स्वव्यवहारे ज्ञानान्तरानपेक्षत्वं गौरवात्। अन्यथा ज्ञानस्य स्वाविषयत्वेन संस्काराभावात् स्मरणं न स्यात्।

समवायित्वञ्च समवायसम्बन्धः, तान्येतानि सम्बन्धं विना न सम्भवन्ति, स्वरूपसम्बन्धो नेष्यत एवान्यथा ज्ञानविषयत्वेऽपि तथात्वापत्तेः, तथाच सम्बन्धान्तरमभ्युपेयतामित्यत आह, 'व्यवहारेति, सर्वत्र स्वरूपसम्बन्धं नापजानीमः किन्तु ज्ञानविषयत्व एवेतिभावः। ननु कारणतायां गृहीतायां शक्तिकल्पनं तस्मिंश्च तदवच्छेदेन हेतुताधीरित्यन्योन्याश्रयः, किञ्च ज्ञानस्यापि स्वरूपव्यवहारतया तेन सह स्वरूपसम्बन्धाभ्युपगमे ज्ञानेनापि तथाभ्युपगम इत्यरुचेः स्वभावमेव विषयतामाह, 'अस्तु वेति। ननु समूहालम्बनं प्रत्येकविषयं न स्यात् समूहेन्द्रियसन्निकर्षजत्वेन प्रत्येकविषयकव्यवहाराजननादि-

यत्तु स्वव्यवहारे ज्ञानान्तरानपेक्षत्वमुक्तं तत् स्वप्रकाशत्वनिर्व्वाहकतया, प्रमाणञ्च स्वप्रकाशे प्रत्यक्षमेव, सर्वाः प्रतीतय इदमहं जानामीत्येवमाकाराज्ञातारं ज्ञानं ज्ञेयञ्चोल्लिखन्त्यो जायन्ते, तत्रात्मा[1] कर्तृत्वेन, ज्ञेयं कर्मतया, ज्ञानं क्रियात्वेन भासते अतो ज्ञातृ-ज्ञेय-स्वविषयं ज्ञानमनुभूयत इति चिपुटीप्रत्यक्षवादिनः।

त्यतआह, 'समूहेति, तत्खातिरिक्तत्वाभावेन तावदात्मकस्य समूहस्य यः सन्निधिः स प्रत्येकस्यापीति उक्तदोषाभावादिति भावः। ननु व्यवहारजनकत्वं[2] यदि तद्विषयकत्वं तदा रजतज्ञानमपि शुक्तिगोचरमित्यन्यथाख्यातिरतआह[3], 'रजतज्ञानमिति। स्वैकदेशिमतं निरस्यति 'न त्विति।

स्वमते स्वोपजीव्यमविरोधयितुमाह, 'यत्त्विति, 'प्रत्यक्षमेवेति। यद्यपि ज्ञानगोचरतायां प्रत्यक्षं प्रमाणं सम्भवति न तु स्वविषयतायां व्यवसायोत्तरत्वेऽपि तथैवानुव्यवसायाकारात्[4], तथापि ज्ञानान्तरकल्पने गौरवासाघवसहकृतमिदमेव प्रत्यक्षं ज्ञानगोचरत्वेनानुभूयमानं स्वविषयत्वे पर्य्यवस्यतीति हृदयम्। 'कर्तृत्वेन' आश्रयत्वेन,

---

(१) तत्र ज्ञातेति ख०।
(२) तद्व्यवहारशक्तत्वमिति ख०।
(३) अन्यथाख्यात्यापत्तिरित्यत आहेति ख०।
(४) अनुव्यवसायस्य तथैवाकारादिति ख०।

नन्विदमिति व्यवसायः तदुत्तरमिदमहं जाना-मीत्यनुव्यवसायो मानस इति चेत्। न। स्वप्रकाशत्वे-नोपपत्तौ ज्ञानान्तरकल्पने गौरवात्[१] परिशेषाच्च स्वप्रकाशत्वं परप्रकाशकत्वे हि न ज्ञानमेव सिद्ध्येत् मानाभावात्। न हि तच्च ज्ञातता लिङ्गं, अतीतानागतयोस्तदभावात्। नापि मानसं प्रत्यक्षं, अजिज्ञासि-

---

'कर्मतया' विषयतया, 'क्रियात्वेन' विशेषणतया, 'अनुभूयत इति ज्ञेय-ज्ञातृ-स्वविषयकत्वानुभवस्वरूपमुत्पद्यत इत्यर्थः। यद्वा ज्ञातृ-ज्ञेय-स्वविषयकानुभवोऽपि स एवानुभव इति तत्सिद्धान्तोऽन्यथा ज्ञानान्तरेण तद्ग्रहाभ्युपगमे तज्ज्ञानगोचरज्ञानान्तराभ्युपगमापत्ता-वनुव्यवसायस्वीकारापत्तिरिति भावः।

पूर्वोक्तप्रमाणे तर्कापेक्षागौरवान्मानान्तरमाह, 'परिशेषादिति। 'अनवस्थानादिति तथाचैतद्भ्रमेनायोग्यमेव ज्ञानमभ्युपगन्तुमर्हं तथाच क्व मानसप्रत्यक्षमित्यर्थः। न च विषयान्तरसञ्चारः प्रतिबन्धकः, वैपरी-त्येन तस्यैवानुत्पत्त्यापत्तेरित्याह, 'विषयान्तरेति। 'जिज्ञासेति अजि-ज्ञासाग्राह्यभिन्नात्मधर्मत्वादित्यर्थः, अजिज्ञासाग्राह्यत्वञ्च जिज्ञासान-पेक्षप्रत्यक्षविषयत्वम्, यथाश्रुते ग्रहपदस्य प्रत्यक्षपरत्वे दृष्टान्तासिद्धिः। पटताकाङ्गनाघटकजिज्ञासाजन्यं ज्ञानमनुमितिः शाब्दञ्च, तद्विषयता

---

(१) ज्ञानान्तरे कल्पनागौरवादिति क०।

तस्य मानसत्वे ज्ञानाविरामादनवस्थानात् विषयान्तरासञ्चाराच्च। जिज्ञासितस्य ग्राह्यत्वे ज्ञानं न मानसं जिज्ञासाग्राह्यात्मधर्मत्वात् संस्कारवदित्यनुमानप्रतिरोधः। अतएव जिज्ञासां विनैव सुखादीनां मानसत्वं, जिज्ञासापि ज्ञानसाध्येत्यनवस्था, धर्मिज्ञानेच्छादिभिर्ज्ञानस्य नाशाच्च न प्रत्यक्षत्वम्। अथ ज्ञानं मानस-

---

संस्कारेऽस्त्येव ग्रहपदस्य ज्ञानमात्रपरत्वादिति यदि तदा सुखादावेव व्यभिचारः। न च सावधारणतया जिज्ञासाजन्यग्रहमात्रगोचरत्वं, तथाच सति मात्रपदार्थप्रविष्टस्य विवक्षितैकदेशस्य समर्थत्वेन हेतुत्वौचित्यात्। न चात्मेत्यधिकं, आत्मन्येव व्यभिचारवारकत्वात्। न चातीन्द्रियत्वमुपाधिः,विपक्षबाधकाभावेन तुल्यबलतया तस्यापि प्रतिरोधपर्य्यवसायित्वादिति भावः। 'अत इति यतोऽजिज्ञासाग्राह्यात्मधर्मत्वं मानसत्वे तन्त्रं अतएव सुखादीनां जिज्ञासां विना मानसत्वमित्यर्थः,तथाच मानसत्वव्यापकजिज्ञासाविरहस्याभावाद्व्याप्यस्य मानसत्वस्याभावः साध्यत इति भावः। अतोऽपि विवक्षितोहेतुरुचित इत्यवधेयम्। ननु चाक्षुषत्वाविशेषेऽपि केशादौ जिज्ञासापेक्षा न दृक्षादाविति वदिहापि क्वचिदेव जिज्ञासा क्वचिन्नेति स्यादित्यप्रयोजकत्वं मत्वा दोषान्तरमाह, 'जिज्ञासापीति जिज्ञासा धर्मिज्ञानसापेक्षा तच्च जिज्ञासापेक्षमित्यनवस्थानादित्यर्थः। ननु सामान्यतो धर्मिज्ञानं जिज्ञासानपेक्षं हेतुः सा च विशेषतो ज्ञानग्रहे कारणमतोऽनवस्था न सम्भवतीति दोषान्तरमाह,

प्रत्यक्षं प्रत्यक्षात्मगुणत्वात्, आत्मविशेषगुणत्वे सति क्षणमात्रस्थायित्वात् सुखवत्, ज्ञानं प्रत्यक्षजनकेन्द्रियसन्निकर्षाश्रयः प्रत्यक्षत्वात् सुखवदिति चेत् । न । मानसत्वेऽनवस्थानात् । अतएव चक्षुर्जन्यं ज्ञानं न चक्षुर्जन्यज्ञानविषयः प्रत्यक्षत्वात् रासनवत्, नैतज्ज्ञानविषयो वा एतज्जनकेन्द्रियसन्निकर्षानाश्रयत्वात् गगनवत्, चक्षुर्न चाक्षुषज्ञानग्राहकं बहिरिन्द्रियत्वात् रसनवदिति प्रतिपक्षानुमानमपास्तं । परप्रकाश्यत्वे अनवस्थया ज्ञानासिद्धावाश्रयासिद्धेः । स्वप्रकाश्यत्वेन तत्सिद्धौ

'धर्मीति, 'प्रत्यक्षेति, मनोयोग्यतावच्छेदकं लाघवात्प्रत्यक्षगोचरात्मगुणत्वमेव न त्विच्छात्वादि गौरवादिति ज्ञानस्य मनोयोग्यत्वस्थितौ योग्यसन्निधेः प्रत्यक्षजनकत्वनियमात् जानामीत्येतदधिकज्ञानान्तरानुभवेन तदेव ज्ञानं मानसं कल्प्यतेऽतस्तदनुरोधादेवानुव्यवसायोऽधिकोऽस्तीति निर्गलितार्थः । अन्यथा तद्गोचरमानसज्ञानान्तरोत्पत्त्यापि साध्यपर्य्यवसानेनास्मादनुमानात्स्वप्रकाशताबाधः स्यादित्यवधेयम् । तथाचान्यज्ञानासम्भवरूपतर्कमहकारादिदमनुमानं सम्यगिति । मानसप्रत्यक्षत्वम् मानसप्रत्यक्षविषयगुणत्वव्याप्यजातिमत्त्वम् तेनाग्निमद्धेतावालोचन-जीवनयोनियत्नयोर्न व्यभिचारः । जातिप्रत्यक्षता व्यक्तिप्रत्यक्षतां विना नेति तावद्दूरमनुमानान्निर्वहतीति ध्येयम् । 'क्षणेति चतुर्थक्षणवृत्तिध्वंसप्रतियोगित्वादित्यर्थः, आत्मविशेष-

धर्मिग्राहकमानबाधात् । किञ्च स्वव्यवहारशक्तत्वं स्वविषयत्वं, तच्च स्वसन्निकर्षाजन्यत्वे स्वाजन्यत्वे च न विरुद्धम् । न च स्वव्यवहारे शक्तत्वस्याभाव एव साध्यः, अप्रयोजकत्वात् स्वसन्निकर्षाजन्ये स्वाजन्ये व्यवहारशक्ते घटादौ व्यभिचाराच्च । अतएव स्वप्रकाशत्वेन पूर्वानुभवविषयता तत्तानुभूतमात्रविषये स्मरणे उत्सर्गतो भासते ज्ञानान्तरस्यानावश्यकत्वात् । स्वस्य स्वाजन्यत्वे कथं स्वकर्मतेति चेत् । न । अतीतानागतयोरिव स्वविषयत्वं न तु कर्मत्वं, विषयत्वञ्चाभेदेऽपि स्वव्यवहारशक्तत्वस्य ज्ञानस्वभावविशेषस्य वा विषयत्वात् ।

गुणत्वम् अत्राप्यनुषञ्जनीयम्, अन्यथा शब्दादौ व्यभिचारप्रसङ्गादिति। 'प्रत्यक्षजनकेति स्वप्रत्यक्षजनकेत्यर्थः, तेन यत्र यत्प्रत्यक्षविषयता तत्र तज्जनकेन्द्रियसन्निकर्षाश्रयत्वमितिव्याप्तिपर्यवसाने यथाश्रुतसाध्यमादाय न सिद्धसाधनावकाशः सुखप्रत्यक्षजनकसंयुक्तसमवायस्य ज्ञानेऽपि सत्त्वादिति[१], 'प्रत्यक्षत्वात्' जन्यप्रत्यक्षविषयत्वात् । 'चक्षुरिति न स्वसमानाधिकरण-समानकालीनचाक्षुषधीविषय इत्यर्थः, तेन यथाश्रुते न चाक्षुषोऽयमित्युपनीतधीदर्शनात्स्वमते बाधः न चाक्षुषधीर्विशेष्य इतिसाध्ये परमते सिद्धसाधनं जानामीति ज्ञाने ज्ञानस्य विशेषणत्वात् इति दूषणं न लगति । 'प्रत्यक्षत्वात्'

---

(१) सिद्धत्वादितीति ख० ।

न चाधीकर्मतया घटस्पृक्वद्सत्त्वं, तस्य कदाप्यप्रकाशात्, धीजन्यव्यवहारभागित्वं कर्मत्वं स्वप्रकाशेऽपि तदन्यफलभागित्वञ्च घटेऽप्यसिद्धं ज्ञातताविषेधात्। ज्ञानानपेक्षेन्द्रियसन्निकर्षजं ज्ञानं प्रत्यक्षमतः सर्व्वं ज्ञानं ज्ञानानपेक्षात्म-मनःसन्निकर्षजन्यत्वेन स्वात्मनि प्रत्यक्षं, विशिष्टप्रत्यक्षञ्च न विशेषणज्ञानजन्यं निर्व्विकल्पकनिषेधात्। सविकल्पकत्वेन ज्ञानाजन्यज्ञानं वा प्रत्यक्षं तेन निर्व्विकल्पकजन्यं जातिविशिष्टज्ञानं प्रत्यक्षं, न त्वसाधारणेन्द्रियादिकारणकं तेन विनाप्यनुमित्यादौ स्वात्मप्रकाशात्। इन्द्रियादिकन्त्वर्थप्रकाशस्य हेतुः तस्यैव तत्प्रतिबन्धहेतुजन्यत्वादिति।

अत्रोच्यते। प्रत्यक्षं न स्वप्रकाशे प्रमाणं व्यवसाया-

साक्षात्वात्, यद्यपि ज्ञानत्वादित्येवोचितं तथापि व्यर्थविशेषणत्वाभावेन हेत्वन्तरस्यापि सम्यक्त्वात् इदमुक्तं। 'गगनवदिति, सन्निहितमिन्द्रियमपहाय दृष्टान्तान्तरमुपाददता एतदजनकत्वादिति हेत्वन्तरं सूचितं, तत्र हेताविन्द्रियस्य साधनविकलत्वात् गगनस्य शब्दादन्यत्र ज्ञानादावव्यभिचारेणोदाहृतत्वात् अतो न 'स्वसन्निकर्षाजन्यत्वे स्वाजन्यत्वे च' इत्यनेन स्वजन्यत्वहेतोः(१) अप्रयोजकत्वाभिधानमसङ्गप्रतिषेधो भवतीति ध्येयम्।

---

(१) वाद्यनुक्तहेतोरिति क०।

नामिदमहं जानामीत्याकारासिद्धेः। न चैवमनुभव-विरोधः, अर्थनिश्चयेन प्रवृत्त्यादिदर्शनात्। व्यवसायस्य अर्थविषयत्वमात्रमनुद्रूयते न तु स्वविषयत्वमपि गौरवेण तस्य स्वविषयभानतया प्रवृत्त्यहेतुत्वात्[१]। अनुभवोऽपीदं रजतमित्याद्येव। न चैवमिदमहं जानामीत्यनुभवापलापे उपेक्षणीयता, व्यवसायोत्तरकालं तदुपगमात् इदं रजतमित्यादिलौकिकानुभवात् व्यवसायस्य तदाकारतां निषेधामो न त्वनुव्यवसायस्य। ननु भिन्नानुव्यवसाये अनवस्थानात् व्यवसाय एवानुव्यवसाय इति चेत्, तर्हि परप्रकाशे बाधकात् स्वप्रकाशत्वसिद्धौ सर्वप्रतीतीनामिदमहं जानामीत्या-

---

ननु स्वप्रकाशत्व-परप्रकाशत्वसन्देहेऽपि ज्ञानगोचरज्ञानसत्त्वादाश्रयासिद्धिर्न भवतीत्यत्रचेराह, 'किञ्चेति, घटादावित्यतद्गुणसंविज्ञानवद्बहुव्रीहिणात्मादेरभिधानं घटस्य व्यवहारप्रकत्वाभावादित्यवधेयम्। 'तस्येति शशशृङ्गस्यासत्त्वे अधीकर्मत्वमप्रयोजकं किन्तु प्रकाशाविषयत्वं अतः प्रकाशविषयतासत्त्वादधीकर्मत्वेऽपि नासत्त्वमित्यर्थः। अधीकर्मत्वन्तु न ज्ञानासत्त्वसाधकं अतीन्द्रिये व्यभिचारादिति वस्तुस्थितिः। यदि वा ततोऽसत्त्वसाधनं तदा स्वरूपासिद्धिरित्याह, 'धीजन्येति, परसमवेतक्रियाफलशालित्वस्य कर्मतात्वादित्यभिप्रेत्य

---

(१) प्रवृत्त्याद्यहेतुत्वादिति ख०।

कारतासिद्धिः, तथाच स्वप्रकाशत्वासिद्धौ सर्व्वप्रतीतीनामिदमहं जानामीत्याकारत्वमसिद्धमिति न सा प्रतीतिः स्वप्रकाशत्वे प्रमाणं।

अपिच क्रियायाः द्वतेर्वा समवायित्वं कर्त्तृत्वं, परसमवेतक्रियाफलशालित्वं करणव्यापारविषयत्वं वा कर्म्मत्वं, धात्वर्थत्वमन्यद्वा क्रियात्वम् इदमहं जानामीति व्यवसाये न भासते तद्बोधकेन्द्रियसन्निकर्षाभावात् किन्त्विदंविषयकज्ञानत्वविशिष्टस्य ज्ञानस्य वैशिष्ट्यमात्मनि भासते। न च स्वप्रकाशे व्यवसाये तादृशं स्वस्य वैशिष्ट्यं भासितुमर्हति, पूर्व्वं विशेषणस्य तस्याज्ञानात्। तस्मा-

---

तथानुमानप्रयोगादिति भावः। ननु भवतु स्वप्रकाशपक्षस्यापि तदंशे प्रत्यक्षं भवितुमर्हति तत्सन्निकर्षजन्यत्वादित्याह, 'ज्ञानेति। ननु यदीन्द्रियनिबन्धनं न प्रत्यक्षत्वं तदीन्द्रियानुविधानानुपपत्तिरित्याह, 'इन्द्रियादिकमिति, तस्य ज्ञानोत्पत्तावेव सामर्थ्यात् प्रत्यक्षत्वे तु तस्यातन्त्रत्वादिति भावः[१]। 'तस्यैवेति अर्थप्रकाशमात्रस्यैवेन्द्रियादिसहकृतकारणजन्यत्वादित्यर्थः।

'व्यवसायानामिति, व्यवसायस्य नायमाकारः, किन्तु अनुव्यवसायस्य, तथाच तदाकारकस्य तस्य वस्तुतो ज्ञानविषयस्यार्थगोचरत्वं ज्ञानीयं विषयो न तु स्वस्य ज्ञानव्यवसायीयं विषयत्वमपि

---

(१) तस्यातन्त्रत्वादित्यर्थ इति ख०।

दिदमहं जानामीति न व्यवसायः किन्त्वनुव्यवसायः। स्यादेतत्। कर्तृत्वादिज्ञानवैशिष्ट्यमात्मनि मा ज्ञायि व्यवहारस्य स्वविषयकज्ञानसाध्यत्वसिद्धौ तदेव ज्ञानं स्वविषयकं कल्प्यते लाघवात्। ज्ञानवित्तिवेद्य आत्मापि तद्विषय इत्यात्मविषयत्वं सर्व्ववित्तीनामिति चेत्। न। स्वप्नकेन्द्रियसन्निकर्षानाश्रयत्वेन स्वस्य स्वाविषयत्वात्। विषयत्वनियामकेन्द्रियसन्निकर्षादेरभावे स्वविषयत्वानुपपत्तेः, कारणं विना कार्य्यानुत्पादनात् प्रत्यक्षाजनकस्य प्रत्यक्षविषयत्वानुपपत्तेश्च। आत्मधर्म्मप्रत्यासत्त्यनाश्रये प्रत्यक्षविषताया जनकत्व-

---

येन ज्ञानान्तरकल्पनागौरवग्रहकृतं सत्प्रतिपक्षम् प्रमाणं स्वप्रकाशं निर्व्वहेत् स्वस्य स्वाविषयत्वेन स्वविषयाविषयत्वात्, न च स्वमपि स्वगोचरः, तथासत्यन्योन्याश्रयः, स्वविषयत्वे सिद्धे गौरवग्रहकृतं ज्ञानगोचरतायाहकं स्वप्रकाशतायां प्रत्यक्षं प्रमाणीभवेत् तेन च मानेन स्वविषयतासिद्धिरित्यर्थः। तदिदमाह, व्यवसायस्यार्थविषयत्वं अनुभूयते अनुव्यवसायेन न तु स्वविषयत्वमपि उक्तदोषात् न वयमुक्तक्रमेण स्वविषयतां ब्रूमो येन परस्पराश्रयः, किन्तु व्यवहारानुरोधेनैव स्वविषयतेत्यत आह, 'गौरवेणेति। नन्वर्थमात्रगोचरानुभवाभावादस्वनुभवविरोध इत्यत आह, 'अनुभवोऽपीति तथैव तस्यानुव्यवसायेनानुभवादित्यर्थः। 'तदुपगमादिति, व्यवसायविषयत्वेनैव तस्य ज्ञानान्तरेण ग्रहणादिति भावः।

घातत्वात्। ज्ञानस्य प्रत्यक्षत्वेनेन्द्रियसन्निकर्षाश्रयत्वात् मनःसन्निकर्षजन्यत्वेन मानसत्वं। तदयं प्रयोगः। विवादाध्यासितं[1] इन्द्रियजन्यं ज्ञानं नैतज्ज्ञानविषयाश्रयः[2] एतज्जनकेन्द्रियसन्निकर्षानाश्रयत्वात् एतद्जनकत्वाद्वा घसन्निकर्षवत्। नैतज्ज्ञानविषयकं वा घातधर्मप्रत्यासत्त्यनाश्रयत्वे सति एतदजन्यत्वे च सति साक्षात्कारित्वात्। प्रत्यक्षविषयोज्ञानं स्वप्रत्यक्षजनकेन्द्रियसन्निकर्षाश्रयः प्रत्यक्षविषयत्वादिति मनः-

---

ननु जानामीति ज्ञानं सार्व्वलौकिकं तदेव पूर्व्वापरज्ञानकल्पनागौरवग्रहकारेण स्वविषयं पर्य्यवस्यतीति सिद्धं प्रत्यक्षप्रमाणात् स्वप्रकाशत्वमित्यत्रचेराह, 'अपिचेति, 'क्रियायाः' धात्वर्थस्येत्यर्थः। एतच्च घटोभवतीत्यादिप्रयोगादचेतनस्यापि कर्त्तृत्वमिति वैयाकरणमते[3]। 'परेति धात्वर्थानधिकरणत्वे सति धात्वर्थतावच्छेदकफलशालित्वमित्यर्थः। आत्मानं जानामीत्यात्मनि अकर्म्मत्वं मा प्रसाङ्क्षीदिति सत्त्वान्तरमाह, 'करणेति। 'अन्यद्वेति कृतित्वं वेत्यर्थः। सर्व्वत्र धात्वर्थे कृतिप्रवेशादिति भावः। ननु विषयत्वं घटादेराश्रयत्वमात्मनोविशेषणत्वं ज्ञानस्येत्येव कर्म्मत्व-कर्त्तृत्व-क्रियात्वादिभानमित्युक्तोपालम्भतया अपरितुष्यन्नाह, 'न चेति, विशेषणत्वमपि तादृशस्य

---

(१) विवादपदमिति ख०।
(२) नैतज्ज्ञानविषयमिति ख०।
(३) वैयाकरणादिमते इति ख०।

सन्निकर्षग्राह्यं । चाक्षुषज्ञानं न चक्षुर्जन्यज्ञानविषयः चक्षुरसन्निकृष्टत्वात् घटवत् । ज्ञानं प्रमेयमेवेतिव्याप्तिज्ञानं ज्ञानत्वप्रत्यासत्त्या स्वविषयं, ईश्वरज्ञानमहेतुकत्वेन सर्व्वविषयत्वात् स्वप्रकाशं। ननु परप्रकाशकत्वे ज्ञानमेव न सिध्येदनवस्थानादिति धर्मिग्राहकमानात् स्वप्रकाशत्वसिद्धावनन्यगतिकतया स्वस्यासन्निकृष्टस्यापि प्रत्यक्षविषयत्वमतो धर्मिग्राहकमानबाधितास्त्वदीयहेतव इति चेत्। न। वित्तेरवश्यवेद्यत्वाभावेनानवस्थाविगमात् । संयुक्तसमवायेन मनोवेद्यत्वादपेक्षणीयान्तराभावाद्योत्पन्नैव कुतो नावश्य-

---

व्यवसायस्य तदा यदि तत्पूर्व्वभानं, न च स्वप्रकाशे तथा सम्भवति, इति भावः[१]। यद्यप्यभावत्वविशिष्टबोधस्तद्धियं विनापीति व्यभिचारस्तथापि यथैनं विना न भासते तद्धीहेतुरेव तद्धीहेतुरिति तज्ज्ञानं विनापि तद्विशिष्टबोधः, अतथाभूते तु तद्विशिष्टबुद्धिस्तद्बुद्धिसाध्येति नियम एव । न चात्मात्माभाने अभावाभानवत् ज्ञानाभाने आत्माभानमस्ति येनेहापि तद्बोधकमेव तद्बोधकमस्तीति विशेषणज्ञानानपेक्षा विशिष्टबुद्धिरभ्युपगम्येत, तथासति ज्ञानाभाने सुखादिविशिष्टोऽप्यात्मा न भासते इति यत्किञ्चिदेतत्। ननु विशिष्टबुद्धौ विशेषणज्ञानापेक्षेति तव सिद्धान्तो

---

(१) इत्यर्थं इति ख० ।

वेदेति चेत्। न। सुखादि-तद्बुद्ध्यादिसामग्र्या प्रतिबन्धात् विषयान्तरसंचारदर्शनेन तस्या बलवत्त्वात् अनुद्भवादिति केचित्।

योग्यात्मविशेषगुणत्वात् ज्ञानत्वात् ज्ञानं प्रत्यक्षतेवेति व्याप्तेर्व्वित्तेरवश्यवेद्यत्वेन स्वप्रकाशत्वमिति चेत्। न। व्याप्तेरसिद्धेः परप्रकाशकत्वेऽनवस्थानात्। स्वप्रकाशे कारणानुपपत्तेः सन्निहितमेव प्रत्यक्षं तद्विषयजन्यमेव प्रत्यक्षमिति व्याप्तेश्च। अन्यथा कारणं विना कार्य्यानुत्पत्ति-व्याप्तेर्विनिगमकं कारणसत्त्वेपि प्रतिबन्धात् कार्य्यानुत्पादे कारणत्वमग्रत्यूहम् कृतकारणं विना कार्य्योत्पादे कारणताभङ्गः कार्य्यानुत्पादश्च। अपिच परप्रकाशे अनवस्थानात् परिशेषानुमानेन ज्ञानस्य स्वप्रकाशत्वं, तथाच स्वप्रकाशत्वानुमितेरपि

मम तु साकाङ्क्षविशेष्य-विशेषणोभयविषयकं विशेषणबुद्ध्यनपेक्षमेव विशिष्टज्ञानमित्यभिप्रेत्य शङ्कते, 'स्यादेतदिति। 'स्वजनकसन्निकर्षानाश्रयत्वेन' स्वजनकसन्निकर्षाद्यनाश्रयत्वेनेत्यर्थः। ननु सन्निकर्षादिवत्तदभेदोऽपि विषयतानियामकोऽस्तु अनुगमाभावस्य तुल्यत्वादित्यतआह, 'प्रत्यक्षेति, सत्यपि विशेषेऽनुगतस्यैव सम्भवेनाऽनुगताभ्युपगमानुपपत्तेः, अभेदस्य विषयतानियतत्वे नियामकस्य हेतोरवश्यानुसन्धानादभेदस्य च हेतुत्वादिति भावः। ननु प्रत्यक्षविषयता न

स्वप्रकाशत्वमनुमित्यन्तरगम्यमेवं तस्यापीत्यनवस्था स्वप्रकाशत्वानुमितिपरम्पराद्वारा तवापि स्यात् विषयान्तरसञ्चारस्य प्रतिबन्धकत्वं, यावज्जिज्ञासं वा स्वप्रकाशत्वानुमितिरिति यदि तुल्यं परप्रकाशत्वेऽपि। न च ज्ञानं स्वप्रकाशमित्यनुमित्या स्वप्राशत्वमपि सामान्यप्रत्यासत्त्या विषयीकृतमिति वाच्यम्। परतः पक्षेऽपि तुल्यत्वात् त्वया तदनभ्युपगमाच्च। किञ्चानुमित्यादौ जातिसत्त्वान्न प्रत्यक्षत्वम्। न च ज्ञानसापेक्षं मनोजनकमित्यनुमितिविषयवदात्मनि न तत्प्रत्यक्षम्। तस्य स्वविषयत्वे ज्ञानानपेक्षेति चेत्। न। ज्ञानं ज्ञानजन्यं तच्च स्वविषये स्वातन्त्र्येणैवेति कथं तदपेक्षं तदनपेक्षञ्च विरुद्धत्वात्। न च ज्ञानभिन्नविषयत्वं सापेक्षं, तथात्वे परिर्ज्ञानं प्रत्यक्षं न

जनकत्वव्याप्ता संस्कार-स्मृत्युपनीततत्तादौ व्यभिचारादतो व्याप्तिशरीरमाह, 'आत्मेति। नन्विदमप्यसत् यथाश्रुते सामान्यलक्षणप्रत्यासत्तिजन्यप्रत्यक्षविषये व्यभिचारेणानागतविषयसाक्षात्कारहेतुप्रत्यासत्त्यनाश्रयत्वं तदर्थोवाच्यः सोऽपि विद्यमानत्वसामान्यजन्यप्रत्यक्षविषये व्यभिचारावारकतया अजनकविषयसाक्षात्कारेत्यादिना विशेषणीयः[१] तथाच व्यर्थतया प्रत्यासत्तिभागमपहायाजनकविषय-

---

(१) विवक्षणीय इति ख०।

स्यात्[१] । अथान्यस्यान्यविषयत्वे सन्निकर्षादिर्नियामकः स्वविषयत्वे किन्तेन अनतिप्रसङ्गात् सन्निकर्षस्यानुगमाच्च व्यवहारे शक्तत्वं विषयत्वमभेदे सन्निकर्षं विनापीति चेत्। न। अन्यत्र प्रत्यक्षमात्रे[२] सन्निकर्षस्य हेतुत्वात् अन्यथानुगमापत्तिः। अथ या वित्तिर्न वेद्या[३] सा प्रमाणाभावादसतीति तदधीनसत्त्वस्य विषयपर्य्यन्तस्यासत्त्वं स्यादिति चेत्। न। अविरलसमतद्वित्तिवित्तिधारा[४] नाभ्युपेयते किन्तु काम कोनचित्तादाचित्ताचिद्वित्तिर्व्यवहारलक्षणलिङ्गादिना प्रतीयत इति सर्व्वा प्रमाणसिद्धैवेत्यभ्युपगमात्। अथ स्यादेवं यदि घटोऽयं घटमहं जानामीत्यतोऽधिका

साक्षात्कारान्यप्रत्यक्षविषयताया जनकत्वव्याप्तत्वं वाच्यम्, एवञ्च स्वाजनकत्वेन स्वविषयतायां जनकत्वस्यानियामकत्वे स्वविषयता न बाधितेत्यस्यैर्मूलयुक्तिमाह, 'ज्ञानस्येति, द्रव्यत्व-रूपत्वादीनां[५] अननुगमेन प्रत्यक्षत्वमेवेन्द्रिययोग्यतावच्छेदकं लाघवात् अनुगमाच्चेति सामान्यतः सिद्धे परिशेषात्मनःसंयोगजन्यत्वान्मानसत्वमिति न प्रागा-

(१) तथात्वेऽपि ज्ञानं प्रत्यक्षं न स्यादिति ख०।
(२) प्रत्यक्षविषयमात्र इति ख०।
(३) वेद्या न भवतीति ख०।
(४) अविरलवित्ति-तद्वित्तिधारेति ख०।
(५) द्रव्यत्व-रूपत्वादीनामिति ख०।

घट-तद्धिप्तिधारापाहिविषयग्रतभारसम्परा काचिद्धि-त्तिरस्मदादेरुत्पद्यमानानुभूयेत, नचैवमिति चेत्। न। अनुव्यवसायो विषयमात्रनिरूप्यो न तु तद्विषयपर-म्परानिरूप्यो गौरवात्। तथाच ज्ञानज्ञानत्वेन सर्व्वा वित्तिरस्मदादेरुत्पद्यमानानुभूयत एव। न चैवमनि-र्मोक्षः, योगजधर्म्मप्रत्यासत्त्या सामान्यलक्षणया वा व्याप्तिज्ञानरूपस्यानुव्यवसायस्यापि स्वविषयत्वाभ्युप-गमात्। न च तद्व्यवहारशक्तत्वं तद्विषयत्वं, तद्विषयत्वेन तद्व्यवहारकारणत्वग्रहे सति तच्छक्तत्वज्ञानं तच्छक्तत्वञ्च तद्विषयत्वमित्यन्योन्याश्रयात् कारणत्वग्रहं विना शक्ते-रग्रहात् त्वन्मतेऽपि रजतज्ञानस्य शुक्तिविषयत्वापत्तेश्च।

शङ्किताव्याप्तिलेशोऽपीति भावः। 'आत्मेति एतद्विषयकालौकिक-प्रत्यासत्त्यजन्यत्व इत्यर्थः। अतएव ज्ञानमित्यत्र हेत्वभावान्न व्यभिचार-इति वक्ष्यति, 'साक्षात्कारित्वादिति इन्द्रियजन्यत्वादित्यर्थः। अतएवे-श्वरज्ञाने व्यभिचारवारणाय अहेतुकत्वेन हेत्वभावं वक्ष्यति। 'ज्ञान-मिति अत्रालौकिकप्रत्यासत्तेः सामान्यस्यैव सत्त्वेन हेत्वभावादेव न व्यभिचार इत्यर्थः। कृप्तहेत्वभावेन फलाभावे सत्ययोग्यतया तदभा-वकल्पनमप्रामाणिकमित्यस्वरसात् केचिदित्युक्तं।

ननु कारणताभङ्गः(१) इष्टापत्तिः स्वप्रकाशवादिना प्रत्यक्षविषय-

---

(१) कारणतानभ्युपगमश्चेतीति ख०।

रजतार्थिप्रवृत्तौ रजतज्ञानं हेतुः न तु तदवच्छेदक-मित्युक्तत्वात्। लाघवेन स्वविषये ज्ञानस्य प्रवर्त्तकत्वं सर्वैरेवाद्यप्रवृत्तौ तथावगमादिति चेत्, हन्तैवमन्यथा-ख्यातिरस्तु न त्वन्यथासिद्धरजतज्ञानस्याप्रवर्त्तकत्व-मिति। एतेन यथा तद्गुणसंविज्ञानबहुव्रीहिसिद्धं कुटा-दिपदमशक्यमपि कुटं गुणमादायैव प्रधानमन्यपदार्थं बोधयति तथा ज्ञानमविषयमप्यात्मानमादायैव स्ववि-षये व्यवहारं करोति संस्कारञ्च। स्वजन्यव्यवहार-विषये ज्ञानस्य संस्कारजनकत्वात्। स्वजन्यव्यवहार-विषयः स्वात्मा विषयश्चेति प्राचीनं गुरुमतमपास्तम्। अन्यच्च लाघवेन ज्ञानस्य स्वविषये व्यवहार-संस्कार-

---

तामात्रेण तत्कारणतानभ्युपगमादित्यत उक्तं 'कार्य्यानुत्पादश्चेति, कारणान्तरस्याभावादिति भावः। ननु स्वविषयत्वे ज्ञानसामान्य-सामग्रीमात्रं तन्त्रम्, घटादिविषयत्वे क्वचिदिन्द्रियसन्निकर्षः, क्वचि-ल्लिङ्गादिः, परप्रकाशेऽनवस्थानात् स्वप्रकाशतानिर्व्याहककल्पनायां गौरवस्य प्रामाणिकत्वादित्यखरसादाह, 'अपिचेति अनवस्थैव नास्त्यवश्यवेद्यत्वाभावादनावश्यकत्वेऽप्यनवस्थायान्तवापि साम्यादित्यर्थः। नन्वस्मन्मते नानवस्था स्वप्रकाशत्वानुमितेः स्वप्रकाशत्वानुमितावपि क्षतेरभावात् वस्तुतस्तु स्वप्रकाशत्वपक्षे सानुमितिरिति स्वमिव स्वविषयत्वमपि विषयीकरोत्येवेति तस्य स्वप्रकाशत्वं तद्गोचर एवेति

जनकत्वकल्पनात्। स्वविषये स्वात्मनि व्यवहार-संस्कारजनकत्वात्। व्यवहार-संस्कारयोः स्वविषयज्ञानसाध्यत्वेन स्वाविषयकज्ञानासाध्यत्वात्। ननु ज्ञानस्य मानसत्वे कथं जानामीति विशिष्टबुद्धिः ज्ञानत्वनिर्विकल्पकजन्यज्ञानक्षणे विशेष्याभावेन प्रत्यक्षानुत्पत्तेरिति[१] चेत्। न। ज्ञाननाशक्षण एव ज्ञाने ज्ञानत्वविशिष्टबुद्धिः विशेष्यस्य पूर्व्वक्षणसत्त्वात्। प्रत्यक्षे स्वसम-

---

कथं तदर्थं ज्ञानान्तरापेक्षेत्यखरसादाह, 'किञ्चेति, नन्वसन्मते साक्षात्त्वं न जातिरपि तु ज्ञानानपेक्षेन्द्रियजन्यत्वमुपाधिरिति क्व सङ्करइत्यत आह, 'तवेति। 'विरुद्धत्वादिति, यद्यपि यद्विषयत्वावच्छेदेन ज्ञानाजन्यत्वमित्युक्तौ न कश्चिद्दोषप्रसङ्गः, तथापि स्वविषयत्वेन न प्रत्यक्षत्वं तस्य सकलसाधारण्येनाव्यावर्त्तकतया क्वचिदपि जन्यतानवच्छेदकत्वात् सामान्यसामग्र्यां ज्ञानत्वस्यैवावच्छेदकत्वात् विशेषसामग्र्यां स्वविषयत्वस्य सर्व्वज्ञानसाधारण्येनातिप्रसक्ततयैवानवच्छेदकत्वादिति भावः। 'प्रत्यक्षं न स्यादिति विषयत्वे ज्ञानभिन्ने परज्ञानानपेक्षत्वं ज्ञाने धर्म्मिणि तदपेक्षत्वमिति प्रत्यक्षत्वं न स्यात् इत्यर्थः। नन्वव-श्यवेद्यत्वाभावेनानवस्थोद्धृता तदेव तु दुर्लभमित्याह, 'अथेति। 'तथाच ज्ञानज्ञानत्वेनेति, न च घटत्वेन जानामीत्यनुव्यवसायो घटत्वप्रकारकत्वं व्यवसायस्य यथा गृह्णाति न तथा तदीयघटत्व-

---

(१) विशेष्यस्याभावेन प्रत्यक्षानुपपत्तेरितीति ख०।

यवर्त्तितया गौरवेण विशेष्यस्याहेतुत्वात्। जानामीति वर्त्तमानत्वेन स्थूल उपाधिर्भासते, न तु क्षणः, तस्यातीन्द्रियत्वात्। ततो ज्ञानविशिष्टबुद्धिरात्मनि विशेषणज्ञानस्य पूर्व्वसत्त्वात्। विशेषणञ्च न विशिष्टप्रत्ययहेतुर्गौरवात्। किन्तु तज्ज्ञानमावश्यकत्वात्। अतएव तत्तां विनापि तद्बुद्धेः प्रत्यभिज्ञा।

यत्तु व्यवसायनाशक्षणोत्पन्नव्यवसायान्तरे ज्ञानत्व-

प्रकारकत्वं तदनुव्यवसाय इति कथं सर्व्वास्तुल्याकारा इति वाच्यम्। घटत्वप्रकारकमाद्यं ज्ञानं तदनुव्यवसायस्तु घटत्वप्रकारकज्ञानज्ञानं यथा तथा तदनुव्यवसायादेरपि[१] घटत्वप्रकारकज्ञानज्ञानज्ञानतया शेषपर्य्यन्तमेवानुव्यवसायसम्भवात् इति भावः। इदञ्चाभ्युपेत्य, वस्तुतो घटत्वप्रकारकत्वप्रकारकत्वप्रकारकमपि ज्ञानमुत्पद्यत एव नियमस्तु नास्त्येव तथेति द्रष्टव्यम्। ननु ज्ञानसिद्ध्यर्थं ज्ञानान्तरानुसरणे नाशेषविशेषगुणोच्छित्तिलक्षणमोक्ष इत्यत आह, 'न चेति।

'व्यवसायनाशेति, अत्र व्यवसायनाशक्षणोत्पन्नव्यवसायान्तरे ज्ञानत्वविशिष्टधीस्तदुत्पत्त्यग्रिमक्षणे तदा तस्य सत्त्वे विशेष्यवर्त्तमानातः प्रत्ययोभवतीत्यभिसन्धिः। 'तद्धेतोरिति, घटत्वादिज्ञानघटादीन्द्रि-

---

(१) तृतीयादेरपीति ख०।

विशिष्टबुद्धिरिति। तन्न। तद्धेतोरभावात् अनुमिनोमीत्यादौ अनुव्यवसाये अनुमितित्वाभावाच्च।

यद्वा ज्ञानं ज्ञानत्वञ्च निर्विकल्पके भासते, ततो ज्ञानत्ववैशिष्ट्यं ज्ञाने ज्ञानवैशिष्ट्यञ्चात्मनि भासते। विशेष्ये विशेषणं विशेषणे विशेषणान्तरञ्च भासत इत्येव हि विशिष्टवैशिष्ट्यार्थः।

वस्तुतस्तु ज्ञानमभावइव विशिष्टज्ञानविषय एवानु-

यसन्निकर्षादेरित्यर्थः। 'अनुव्यवसाये' अनुव्यवसायस्थले, यद्वा 'अनुव्यवसाये' व्यवसायपाश्चात्ये, तन्नाशक्षणोत्पन्नव्यवसायान्तर इत्यर्थः। एतच्च दोषद्वयं नियमपक्षे अनियमपक्षे(१) त्वयमपि कल्पः सम्यक्। व्यवसायानन्तरं ज्ञानत्वनिर्विकल्पकेन तन्नाशे तत्क्षणे व्यवसायान्तरोत्पत्तौ बाधकाभावादित्यवधेयम्।

'यद्वेति, न विशिष्टवैशिष्ट्यभाने विशिष्टबुद्ध्यपेक्षानियम इत्युभयथापि विशिष्टवैशिष्ट्यधीरिति तत्सामग्रीद्वैविध्यात् क्वचित्तया क्वचिदेतया च सामग्र्या विशिष्टवैशिष्ट्यधीरिति व्यवस्थितो विकल्पो ग्राह्यः।

'वस्तुतस्त्विति, ज्ञानांशे निर्विकल्पकं न सम्भवति विशिष्टज्ञानसामग्रीसत्त्वादिति पूर्वाखरसः। ज्ञानत्वविशिष्टबुद्धौ प्राचीनप्रका-

---

(१) सम्भवपक्षे इति ख०।

व्यवसायस्य विषयरूपविशेषणविषयकव्यवसायसाध्यत्वेन विशिष्टज्ञानसामग्रीसत्त्वात् । ज्ञानत्वमपि तच्च भासते तज्ज्ञानसामग्रीसत्त्वात् । अंशे तत्प्रकारकं निष्प्रकारकञ्चेति नरसिंहाकारं तत्रैव विशिष्टज्ञाने

रेणास्वरसोऽग्रेऽनुमिनोमीत्यभिधाने तत्प्रकारानुसरणस्थैर्य्यात् जानामीत्यत्र कदाचिदन्योऽपि प्रकारः सम्भवतीत्याह, 'तत्रैवेति, न च निर्विकल्पकतया तदयोग्यमतः कथमेतत्, अंशे तदस्तीत्यंशमात्रं योग्यमिति तु मन्दमेव एकस्य योग्यायोग्योभयरूपतापत्तेरिति वाच्यम् । ज्ञानमात्रस्यैव योग्यत्वात् सम्बन्धितावच्छेदकरूपेण सम्बन्धिनिरूपणं विना न सप्रतियोगिकनिरूपणमिति तद्विरहादेव योग्यस्यापि तद्विषयत्वेनाज्ञानात् । न च नरसिंहाकारज्ञाने घटत्वप्रकारकत्वाभावात्तत्र ज्ञानत्ववैशिष्ट्यबोधेऽपि घटत्वेन जानामीति ज्ञानत्वविशिष्टघटत्वप्रकारकज्ञानवानहमिति धीर्न स्यादिति[१] वाच्यम् । विषयनिरूप्यं हि ज्ञानं न तु यावद्विषयनिरूप्यं[२] गौरवादित्युक्तं । तथाच नरसिंहाकारस्य सत्यपि घटत्वप्रकारकत्ववैशिष्ट्यविषयत्वे घटत्ववैशिष्ट्यविषयत्वमस्त्येवेति तदुत्पत्त्यग्रिमक्षणे तत्र ज्ञानत्वविशिष्टबुद्धौ तदग्रिमक्षणे घटत्ववैशिष्ट्यावगाहिज्ञानवानहमित्येवं रूपो जानामी-

---

(१) प्रतीतिर्न स्यादितीति ख० ।
(२) विषयपरम्परानिरूप्यमिति ख० ।

ज्ञानत्वपैशिष्ट्यं भासते, अनुमीनोमीत्यादौ तु न तथा अनुव्यवसाये अनुमितित्वाभावादिति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे अनुव्यवसायवादः।

त्यनुव्यवसायः सम्भवत्येवेति कदाचिदप्येवमप्यनुव्यवसायः सम्भवतीति न काप्यनुपपत्तिरिति भावः।

इति श्रीजयदेवमिश्रविरचिते तत्त्वचिन्तामण्यालोके प्रत्यक्षखण्डालोके अनुव्यवसायवादालोकः।

अथ निर्विकल्पकवादः ।

तत्र प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकञ्चेति। तत्र नाम जात्यादियोजनारहितं वैशिष्ट्यानवगाहि निष्प्रकारकं निर्विकल्पकं। ननु ज्ञानत्वं सविकल्पकभिन्नवृत्ति इत्यत्र किं मानं न प्रत्यक्षमसिद्धेः अतीन्द्रियत्वाभ्युपगमाच्च। न च व्यवहारः, तस्य सविकल्पकसाध्यत्वात्। नापीदं न विवेचितं पूर्वमधुना विवेचयामोत्यनुभवप्रमाणकावालोचन-विकल्पौ, बहुविशेषणज्ञानाज्ञानाभ्यां तदुपपत्तेः। ननु गौरितिप्रत्यक्षं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वादनुमितिवदिति। अथ

अथ निर्विकल्पकवादालोकः ।

ननु नरसिंहाकारं ज्ञानमित्यसिद्धं[१] सविकल्पकस्य प्रत्यक्षधीजन्यत्वादिलक्षणविषयस्य निर्विकल्पकस्यैव प्रत्यक्षत्वादित्यत आह, 'तत्रेति, जात्यादेरपि तात्त्विकतया पारमार्थिकविषययोरुभयोरपि प्रत्यक्षत्वादिति भावः[२]। ननु तथापि तथाविधज्ञानानुपपत्तिः

---

(१) ज्ञानमित्यसङ्गतमिति ख० ।
(२) प्रत्यक्षत्वादित्यर्थ इति ख० ।

विशेषण-विशेष्यज्ञानसामग्रीतः साकाङ्क्षोभयविषयमेकं विशिष्टज्ञानं तत्र प्रत्यक्षे योग्येन्द्रियसन्निकर्षादनुमितौ पक्षधर्मतावलात् व्यापकत्वावच्छेदकप्रकारेण शाब्दे योग्यतादिवशात्पदार्थतावच्छेदकरूपेणापूर्वमेव विशेषणं भासते, उपमितावप्येवमेवेति न क्वापि विशेषणज्ञानं जनकं[१]। न च प्रत्यभिज्ञायान्तत्तानुभवस्तथा, तत्तानुभवेऽपि संस्कारस्यानुद्बोधात्, विलोपाद्वा प्रत्यभिज्ञानानुत्पादेनोद्बुद्धः संस्कार एव प्रत्यासत्तितया विशेषणज्ञानार्थमिन्द्रियसहकारी, सुरभिचन्दनमित्यादावपि विशेषणज्ञानार्थं तज्ज्ञानं प्रत्यासत्तिस्थानीय-

---

निर्विकल्पकत्व-सविकल्पकत्वयोर्विरुद्धजात्योरेकत्रासमवायादत आह, 'तत्रेति विषयगर्भावुभावुपाधी निर्विकल्पकत्व-सविकल्पकत्वे न तु जाती इत्यर्थः, 'अविद्धेः' निर्विकल्पकविषयप्रत्यक्षासिद्धेः। न च प्रतीतिकलह इत्याह, 'अतीन्द्रियेति। 'साकाङ्क्षेति, यदि वैशिष्ट्यगोचरं विशिष्टज्ञानं भवेत् तदा वैशिष्ट्यज्ञानीयसम्बन्धिनो विशेषणस्य पूर्वं ज्ञानमङ्गीक्रियेतेति भावः। 'संस्कार इत्युपलक्षणम्, स्मृतिरपि यदि हेतुः सापि प्रत्यासत्तितयैव सुरभीत्यादिवत् इति ध्येयम्। 'भ्रम इत्यपि स्वमते वस्तुगतिमनुरुध्योक्तं यतो विशि-

---

(१) हेतुरिति ख०।

निन्द्रियसहकारि, भ्रमो विशिष्टज्ञानमेव नास्तीति चेत्। उच्यते। साध्यप्रसिद्धिपदार्थोपस्थिति-वाच्यत्वज्ञान-तत्तानुभवानामनुमित्यादिहेतुत्वम्। साध्यप्रसिद्ध्या-दिकं विनानुमित्यादेरसम्भवात्[१]। साध्यादिकञ्च विशेषणमिति तज्ज्ञानमनुमित्यादिहेतुः। यद्यप्यनुमि-त्यादिप्रत्येकं प्रति साध्यादिविशेषणज्ञानत्वेन न कार-णता। तथापि विशिष्टज्ञानमात्रं प्रति विशेषणज्ञानत्वेन कारणता बाधकाभावात्। स्याद्येतद्वह्निमानित्यादिज्ञानं प्रति वह्निज्ञानस्य न विशेषणज्ञानत्वेन कारणता द्रव्य-त्वेन वह्निज्ञानेऽपि वह्निमानितिज्ञानाभावात्। किन्तु विशेषणतावच्छेदकप्रकारकज्ञानत्वेनातो न विशिष्टज्ञाने विशेषणज्ञानं हेतुः। विशेषणज्ञानत्वमपि तथास्तीति चेत्। न। तस्यातिप्रसक्तत्वात् अन्यथासिद्धेश्च। न

ष्टज्ञानत्वपक्षेऽपि तत्रापि ज्ञानस्य प्रत्यासत्तित्वमिति सुवचं। 'साध्यप्रसिद्धीति, ननु साध्यप्रसिद्ध्यादिर्न हेतुरावश्यकव्याप्तिज्ञानसत्त्वे तद्विलम्बेन विलम्बाभावात् व्याप्तिधीरेव न तां विनेत्यतो हेतु-हेतुत्वमायाति न तु हेतुत्वमिति चेत्। मैवं। व्याप्तिज्ञानादीनामेव साध्यप्रसिद्ध्यादित्वात् न तु तदन्या साध्यादिप्रसिद्धिर्हेतुः येनान्यथा-

---

(१) तदभावात् इति ख०।

च तादृशविशेषणज्ञानजन्यत्वं साध्यं, बाधादिति। तन्न। विशिष्टवैशिष्ट्यज्ञानं प्रति हि विशेषणतावच्छेदकप्रकारकं ज्ञानं कारणमुभयसिद्धमतो विशिष्टज्ञानमात्रं प्रति विशेषणज्ञानं हेतुः यद्विशेषयोः कार्य्यकारणभावस्तत्सामान्ययोरपि बाधकं विना कार्य्यकारणभावनियमात्[१] अन्यथा सामान्यकार्य्योच्छेदः। न चातिप्रसङ्गः, विशेषसामग्रीविरहेण तत्तत्कार्य्यविशेषानुदयात्। न च परोक्षत्वमुपाधिः, प्रत्यभिज्ञायां साध्याव्यापकत्वात्। नापि विशिष्टविशेषणकत्वं, पक्षेतरत्वादिति। मैवं। तथापि स्मृतिवत्पूर्वानुभवस्य संस्कारद्वारा जनकत्वात् सिद्धसाधनात्। न चाव्यवहितविशेषणज्ञानजन्यत्वं साध्यं, अप्रयोजकत्वात् प्रत्यभिज्ञावत्

सिद्धिर्भवेत्। ननु तथापि क्लृप्तव्याप्तिज्ञानत्वमेव तद्धेतुतावच्छेदकं न तु विशेषणज्ञानत्वं साध्यप्रसिद्धिस्तच्चेति चेत्। न। द्वितीये इष्टापत्तेः, प्रथमे विशिष्टज्ञानलक्षणकार्य्यस्याकस्मिकतापत्त्या अनुगतहेतुगवेषणायामुक्त एव पर्य्यवसानात्। किञ्च विशिष्टज्ञानं वैशिष्ट्यगोचरज्ञानं तथाच वैशिष्ट्यस्य सम्बन्धरूपतया अवश्यं सम्बन्धीभूतविशेषणधीर्जनिका वाच्या। न हि तन्मते द्वयोरप्याकमपि धर्म्म-धर्म्मिगोचरमेव

---

(१) तथात्वनियमादिति ख०।

स्मृत्यैवोपपत्तेर्वा। नापि तत एवाव्यवहितविशेषणानुभवजन्यत्वं साध्यं, अप्रसिद्धेः प्रत्यभिज्ञानादौ व्यभिचाराच्च। अथ तत्कालोत्पन्नरूपादिविशिष्टप्रत्यक्षे संस्काराभावेन स्मरणाभावात् पक्षधर्मतावलेन निर्विकल्पकसिद्धावन्यत्रापि सामग्रीतौल्यात्तत्सिद्धिरिति चेत्। न। प्रत्युत्पन्नविशेषणस्थले हि शुक्लत्वादिविशिष्टशुक्लवैशिष्ट्यबोधो वा अविशिष्टतद्विशिष्टबोधो वा, आद्ये शुक्लत्वादिजातिस्मरणं प्रथमं, ततः प्रत्यक्षेण तद्विशिष्टशुक्लबोधः, ततः शुक्लत्वादिविशिष्टशुक्लादिवैशिष्ट्यबोधः[1] द्रव्य इति किमनुपपन्नं, शुक्लत्वादिजातिस्मरणमेव वा सामान्यलक्षणया सकलरूपादिविषयमस्तु। द्वितीये अननुभवः, न हि शुक्लत्वादिप्रत्ययविलक्षणं[2] शुक्लरूपादिविशिष्टबोधं कश्चिदनुभवति।

ज्ञानं विशिष्टज्ञानं येन समूहालम्बनवदुभयग्राहकसामग्रीमात्रादुपपद्येत, न तु विशेषणधियः पूर्वसत्त्वमनुमन्येत। ननु सम्बन्धस्योभयसम्बन्धिनिरूप्यत्वाद्विशेष्यधीरपि विशिष्टधीकारणं भवेदिति चेत्। न। सम्बन्धो हि प्रतियोगिनिरूप्यो न त्वनुयोगिनिरूप्योऽपि तथैवान्वयाद्यनुविधानात्, रूपवानित्यत्र रूपप्रतियोगिकः समवायो भासते

---

(१) शुक्लत्वादिविशिष्टशुक्लवैशिष्ट्यप्रत्यय इति ख०।

(२) शुक्लत्वादिप्रत्यक्षविलक्षणमिति ख०।

अथ जागराद्यविशिष्टानुभवो विशेषणज्ञानजन्यो विशिष्टज्ञानत्वात्। न च तत्र संस्कारद्वारा पूर्वविशेषणानुभवः तज्जन्यविशेषणस्मरणं वा तत्र सम्भवति, उद्बोधकं विना संस्कारस्य स्मरणे विशिष्टबोधे वा सामर्थ्याभावादित्युद्बोधकं वक्तव्यं, उद्बोधकश्चान्यत्र ज्ञानं दृष्टमिति तदेव वाच्यं। न च तद्विशिष्टज्ञानमेव, तथापि विशेषणज्ञानापेक्षायामनवस्थापत्तेरित्यालोचनसिद्धिरिति। तन्न। सत्यपि ज्ञाने संस्कारानुद्बोधात्। यस्मात् फलं भवति स ज्ञानविशेषस्तथेति चेत्। न। अननुगतत्वात्। यदनन्तरं फलं दृश्यते तदेवाननुगतमप्युद्बोधकं कल्प्यते फलबलादिति चेत्, तर्हि जागरकारणानन्तरं संस्कारोद्बोधोऽस्तीति तदेव कारणमस्तु लृप्तत्वात्। अत एव संस्कारोद्बोधे न नियतो

न द्रव्यप्रतियोगिकः तथा सति कदाचिद्द्रव्यवद्रूपमित्यपि प्रतीतिः स्यात्[१]। न चैवं संयोगोऽप्यन्यतरसंयोगिमात्रनिरूप्यः स्यादिति वाच्यम्। परोक्षे ज्ञाने पक्षज्ञानादिसापेक्षतयैवापरसंयोगिज्ञाननियमात्[२], प्रत्यक्षे स्वाश्रयघटितसन्निकर्षापेक्षणात् उभयसंयोगिग्रहा-

---

(१) धीः स्यादिति ख०।

(२) अपरसंयोगिभाननियमादिति ख०।

हेतुरिति, "तद्दृष्टाद्दृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः" इत्याहुः। एतच्च[1] प्रणिधानादिसूचनमपि सङ्गच्छते। अपिच विशिष्टज्ञानत्वादित्यत्र व्यवच्छेद्यमविशिष्टज्ञानं तत्राप्रसिद्धं सिद्धौ वा व्यर्थमनुमानं। ज्ञानत्वञ्च स्वतोऽसिद्धव्याप्तिकं निर्विकल्पके व्यभिचारात् अनवस्थापाताच्च। किञ्च विशिष्टज्ञानत्वं न तावद्वस्तुगत्या विशेषण-विशेष्यविषयकज्ञानत्वं आलोचनेन व्यभिचारात्। नापि विशेषणत्वविषयकत्वं, अतद्व्यावृत्तिबोधजनकज्ञानविषयत्वस्य विशेषणत्वस्य तत्राप्रकाशात्। नापि वैशिष्ट्यविषयकज्ञानत्वं, तथा सति गौरितिविकल्पे वैशिष्ट्यं विशेषणमित्यालोचनस्यापि तद्विषयत्वेन विशिष्टज्ञानत्वे अनवस्थापातादिति। नापि सप्रकारकज्ञानत्वं प्रकारश्च विषयताविशेष इति

पेक्षा, व्यासज्यवृत्तित्वेन प्रत्येकपरिसमाप्ताश्रयत्वाभावेन मिलित-एवाश्रयत्वपर्य्याप्तेः व्यासज्यवृत्तौ विशेषे उभयाश्रयज्ञानानुविधानाच्च। न हि द्वित्वेऽप्युभयाश्रयप्रत्ययापेक्षा, सम्बन्धस्य सम्बन्ध्यपेक्षेत्यवश्यत्वेन द्वित्वस्य संयोगसमवायवदसम्बन्धरूपत्वादिति दिक्। 'यद्विशेषयोरिति, इदमपि समाधिसौकर्य्यादुक्तं, वस्तुतो वैशिष्ट्यस्य

---

(१) अत एवेति ख०।

वाच्यं। ज्ञानविषयस्वरूपातिरिक्ताया विषयताया अभावात्। न च विशेषणज्ञानजन्यत्वं सप्रकारत्वं, यद्विशेषणज्ञानजन्यं यत् स एव तत्र प्रकार इति गौरितिविकल्पे तस्यैव साध्यत्वात् ईश्वरज्ञानस्य निष्प्रकारकत्वापाताच्च। नाप्यतद्व्यावृत्तिविषयत्वं विशिष्टज्ञानत्वं, अपोहवादनिरासेन गौरितिविकल्पे तथात्वासिद्धेः। नाप्यतद्व्यावृत्तिबोधजनकत्वं तत्, आलोचनव्यावृत्तानुगतरूपमन्तरेण अतद्व्यावृत्तबोधजनकत्वस्य ग्रहीतुमशक्यत्वात्। न च गौरितिज्ञानमेतदन्यसविकल्पकान्यज्ञानभिन्नं प्रमेयत्वात्, यद्वा चक्षुः चाक्षुषसविकल्पकज्ञानातिरिक्तज्ञानजनकं[१] इन्द्रियत्वादिति

प्रतियोगिनिरूप्यत्वादेव विशिष्टबुद्धौ विशेषणधीः कारणमित्युक्तं। अन्यथा विशिष्टज्ञानत्वादित्यप्रयोजकमेव स्यात्, प्रत्युत विशिष्टवैशिष्ट्यावगाहिज्ञाने विशेषणतावच्छेदकप्रकारकधीर्हेतुरित्येव न विशिष्टज्ञाने विशेषणज्ञानं कारणमिति सामान्यसामग्र्येव निर्वाहे विशेषसामग्र्यकल्पनात्। न च द्रव्यत्वेन वह्निज्ञाने वह्निमानिति धीः स्यादित्यतिप्रसङ्गः, वह्निमानिति वह्नित्वविशिष्टज्ञानं वह्नौ, वह्निविशिष्टधीः पर्वते, तथाच यथा वह्निज्ञानात्तद्विशिष्टज्ञानं, तथा

---

(१) चाक्षुषविशिष्टज्ञानातिरिक्तज्ञानजनकमिति ख०।

तत्सिद्धिः, अप्रयोजकत्वात् उभयत्र सविकल्पकपदानन्तरं निर्विकल्पकादिपदप्रक्षेपेण तृतीयादिज्ञानसिद्धिप्रसङ्गाच्चेति[१]।

अत्रोच्यते। प्राथमिकं गौरिति प्रत्यक्षं ज्ञानं जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वात् अनुमितिवत्। न च स्मरणं तत्र सम्भवति, तज्जननि तेन गोत्वस्याननुभवात्। अथ यथा बालस्याद्यप्रवृत्तिबलात्

वह्निलज्ञानात्तद्विशिष्टज्ञानं भवेत्। न च द्रव्यत्वेन ज्ञाने तदस्ति, तस्माद्यद्यद्विशिष्टज्ञानं तत्तद्विशेषणज्ञानजन्यमिति सामान्यसामग्रीतएव तत्तद्विशिष्टज्ञानं, न तु विशिष्टवैशिष्ट्यज्ञानत्वावच्छेदेन कार्य्यत्वं विशेषणतावच्छेदकप्रकारकज्ञानत्वेन हेतुत्वं नीलघटवदर्थसमाजलभ्यत्वादित्युक्तं। सम्बन्धिताच्छेदकप्रकारकत्वेव सम्बन्धिज्ञानमपरसम्बन्धिस्मारकं अन्यथातिप्रसङ्गादिति दोषं स्फुटत्वादुपेक्ष्य दोषान्तरमाह, 'सत्यपीति। ननु यदि जागराद्यज्ञाने संस्कारोपनीतं गोत्वादि विषयत्वदा प्रत्यभिज्ञानवत्तत्तोल्लेखापत्तिः तत्तोल्लेखे संस्कारजन्यत्वस्य नियामकत्वकल्पनादित्यत्रचेराह, 'अपिचेति, खत इत्यनन्तरमपीति शेषः। 'अनवस्थानादिति। न च कार्य्यं कारणजन्यमितिवदनवस्था प्रामाणिकीति वाच्यम्। तत्र हि कार्य्यकादाचित्कत्वं कारणकादा-

---

(१) तृतीयादिज्ञानप्रसङ्गाच्चेतीति ख०।

प्राग्भवीयसंस्काराद्व्याप्तिस्मरणं तथेहापि जन्मान्तरीयसंस्काराद्गोत्वस्मरणमस्तु प्राथमिकविशिष्टज्ञानवत्वादिति चेत्। न। जीवनादृष्टेन तत्र संस्कारोद्बोधात्तथास्तु, इह तु न विलक्षणतद्बोधकमस्ति अतो गोत्वासन्निकर्षेऽपि-गोत्वस्मरणप्रसङ्गः[१]। य एव गोत्वेन्द्रियसन्निकर्षस्तव निर्विकल्पके हेतुः स एव संस्कारोद्बोधक इति चेत्, तर्ह्यत्र कृतकारणभावाद्गोत्वेन्द्रियसन्निकर्षाद्गोत्वानुभव एव स्यात् स्मरणसामग्रीतोऽनुभवसामग्री बलवत्त्वात्। न च तत् विशिष्टज्ञानं,

---

चित्कत्वं विना नेति कादाचित्कत्वेन हेतुत्वं सिद्ध्यत् कादाचित्कपरम्पराया एव सहेतुकत्वं विषयीकरोतीति युगपत्कारणपरम्पराभिद्धेः प्रामाणिकता, इह तु ज्ञानजन्यज्ञानमिति सर्वज्ञानानां ज्ञानजन्यत्वे ज्ञानाविरामे प्रापणाद्यनुपपत्तेनानवस्था प्रामाणिकीति सा प्रतिकूलतर्करूपतया व्याप्तिधीविरोधिन्येव। अत एव केवलज्ञानत्वे प्रतिकूलतर्केण न व्याप्तिग्रह इति व्याप्तिग्रहोपयिकेत्वेन विशिष्टपदं सार्थकमेवेति मत्वा अत्र दूषणे अपरितुष्यन् दोषान्तरमाह, 'किञ्चेति, 'तथासतीति, विशेषणं विशेष्यञ्च विशिष्टधीविषयो नान्यदित्यभिमानादिदमुक्तम्। 'प्रकार इत्यन्तं 'न चेति सम्बध्यते, तत्र हेतुर्गौ-

---

(१) गोत्वासन्निकर्षेऽपि प्रथमं गोत्वस्मरणप्रसङ्ग इति ख०।

पूर्वं विशेषणज्ञानाभावादित्यर्थान्निर्विकल्पकं। अतएव न तत्र ज्ञानत्वेन विशिष्टज्ञानत्वानुमानं कारणबाधेन बाधात्। यदि चानुभवसामग्रीतः स्मरणं तदा नित्यानां वैदिकार्थानाञ्च स्मरणं स्यान्न त्वनुभवः। न च गोत्वज्ञानं गोत्वज्ञानजन्यं जन्यज्ञानजन्यं जन्यविशेषणज्ञानजन्यञ्चेत्यन्यत्र दर्शनात् प्रथमं न गोत्वानुभव इति वाच्यं। एकस्यैव जन्य-जनकत्वानवच्छेदकत्वात् अनवस्थापाताच्च। ननु गौरित्यत्र गोत्ववैशिष्ट्यङ्गवि भासते तथाच तद्विषयकं ज्ञानं स्यात्, तत्र निर्विकल्पकमिति चेत्। न। गोत्वं हि तत्र विशेषणं, न तु तद्वैशिष्ट्यं। ननु तथाभूतविशेषणधीजन्यविशिष्टज्ञाने विशेषणं स्वधर्मविशिष्टं कथं भासेत पूर्वं तस्यानवगमात्, अव-

---

रित्यादि, 'अपोहेति, यद्यप्यगोव्यावृत्तिर्गोत्वमिति निराखेऽपि गोत्वं विशेषणं गौर्विशेष्यः, 'अतद्व्यावृत्तिर्वैशिष्ट्यमिति न निराकृतं तदभिप्रायेणेदं निरुक्तं। न चाभावस्य प्रतियोग्यनुयोगिधीग्राह्यत्वेन कथमत्रोक्तिसम्भवोऽपीति वाच्यम्। स्वरूपेण समवायो वैशिष्ट्यमितिवदतद्व्यावृत्तिर्वैशिष्ट्यमिति सम्भवात् समवायवत्तत्तज्ज्ञानविशेषेऽभावे(१) प्रतियोगिज्ञानाद्यपेक्षणात्। तथापि प्रमेयत्वविशिष्टबोधे

---

(१) समवायवत् ज्ञानविशेष एवाभावे इति।

गमे वा तस्यापि विशेषणान्तरवतो विशेषणमित्यनवस्थेति चेत्। न। गौरिति विशिष्टज्ञाने विशिष्टस्य गोत्वस्याभानात्[१]। अथ सर्वं विशेषणं विशेषणवदेव गोत्वादावपि व्यक्त्यादेर्विशेषणत्वादिति चेत्, अस्तु तथा किन्तु विशेषणं विशेषणवदेव भासेत इति न नियमः। अन्यथा गौरिति ज्ञाने विशेषण-तद्विशेषणानन्तपरम्पराविषयत्वे विषयापर्य्यवसानप्रसङ्गः। अग्निर्विशेषणस्यापि भाने प्रथमतोऽपि तथा स्याद्विशेषात्। न च विशिष्टज्ञानत्वादित्यत्र हेतोर्व्यर्थविशेषणत्वं येन विशेषणेन विना व्याप्तिर्ग्रहीतुं न शक्यते तस्यैव सार्थकत्वात् व्यभिचारवारकस्यापि सार्थकत्वे एतदेव मूलं, इहापि ज्ञानत्व-विशेषणज्ञानजन्यत्वयो-

---

तत्र वैशिष्ट्यं सत्तावतीति वैशिष्ट्यविधया अतद्व्यावृत्तिवैशिष्ट्यविषयत्वसमर्थितं अतोविशेषणत्वेनैव तज्ज्ञानं वाच्यमिति पराभिसन्धानदार्ढ्येन तदेव दूषितमिति बोध्यम्। 'स्मरणेति, यत्रैवोभयसामग्री एका तत्र तस्यानुभवजनकत्वमेव न स्मरणजनकत्वं, तथाच सामग्रीत्वे बलाधिक्यपर्य्यवसानम् न तु सामग्र्यामभेदेन न्यूनाधिकब-

---

(१) अविशिष्टस्य गोत्वस्य भानादिति ख०।

विशेषणं विना व्याप्तिर्ग्रहीतुं न शक्यते अनवस्थानात् सामान्यतोव्यभिचारावगमात्[१]। अतएव चक्षुस्तैजसत्वादिसाधने रूपादिषु मध्ये रूपस्यैव व्यञ्जकत्वादित्यादावसिद्धिवारकमपि विशेषणं सार्थकं तेन विना रूपस्यैव व्यञ्जकत्वादित्यस्याप्रसिद्धेर्व्याप्त्यग्रहात्। विशेषणं विनापि यत्र व्याप्तिग्रहस्तत्र व्यर्थविषशेषणत्वं यथा नीलधूमत्वशरीराजन्यत्वादौ। यस्य यत्र यः सम्बन्धः स एव तत्र तस्य वैशिष्ट्यन्तेन हि स्वासम्बन्धेभ्यो व्यावृत्तो बोध्यते। यथा दण्डी पुरुष इति ज्ञाने दण्डसम्बन्धः पुरुषेऽवगत इति तेनायमदण्डव्यावृत्तो बोध्यते तथा गौरिति विकल्पेऽपि, तथाच विशेषणवद्विशेष्यज्ञानत्वं विशिष्टज्ञानत्वं एतद्वैयात्यावृत्तबोधजनकतावच्छेदकं। ननु दण्ड-पुरुष-सम्बन्धा इत्यत्रापि दण्डसम्बन्धः पुरु-

---

त्वत्वानुपपत्तेरिति। 'अनवस्थानादिति, अत्र प्रामाणिकतया प्रतिकूलतर्कविधया व्याप्तिधीविरोधित्वं अनवस्थायाः। यदि च तद्भिया क्वचिदपि विश्रान्तिर्वक्तव्या[१] तदाह, 'सामान्यत इति, व्यभिचारावारकमपि विशेषणं सार्थकमित्यत्रोपष्टम्भकमाह, 'अतएवेति,

---

(१) व्यभिचारादिति ख०।
(२) मन्तव्येति ख०।

षेऽवगत इति ततोऽप्यदण्डव्यावृत्तपुरुषबोधः स्यादिति चेत्, भवत्येव दण्डसम्बन्ध एव पुरुषे दण्डज्ञानं विना न ज्ञायते इति ब्रूमः। यत्र विशिष्टज्ञानसामग्री नास्ति तत्र निर्विकल्पकं, ज्ञानकरणजन्ये सर्वत्र विशेषणज्ञान-जन्यत्वान्न तदिति प्रत्यक्षमेवैतदिति। अतएवाभावे न निर्विकल्पकं तद्बुद्धौ प्रतियोग्यधिकरणज्ञानयोः कार-णत्वेन तदुभयविशिष्टज्ञानसामग्रीनियमात्। यद्यभावे न निर्विकल्पकं तदा घटाभाववद्भूतलमिति ज्ञानन्न स्यात् विशेषणज्ञानं विना तदभावात्। भावे वा न निर्विकल्पकसिद्धिः विशिष्टज्ञानत्वस्य तत्रैव व्यभिचा-रादिति चेत्। न। प्रथमभूतले घटोनास्तीति बुद्धिः तत्र भूतलं विशेषणं अभावोविशेष्यः विशेष्यज्ञानञ्च न कारणं, पश्चाद्भूतलविशेष्यकं घटाभाववदिति ज्ञानं। नन्विन्द्रियसम्बद्धविशेषणतया अभावो गृह्यत इत्युक्तं

यद्यपि रूपस्यैव व्यञ्जकत्वादित्यत्र व्यञ्जकद्रव्यत्वं हेतुः पर्य्यवसितः, अन्यथा सन्निकर्षे व्यभिचारात्, तथाच रूपादिषु मध्ये इत्यदत्ते अप्रसिद्धतया व्यभिचार एव नास्ति कस्य वारणं द्रव्येत्वेन विशेष-णेनेति, प्रसिद्धिद्वारा व्यभिचारधियमुत्पाद्य द्रव्यत्वविशेषणेन स वार्य्यते रूपादिषु मध्य इत्यनेन परम्परया व्यभिचारवारकत्वम-

अतः कथं स विशेष्य इति चेत्, भूतलविशेषणतया स्वभावप्रत्यासत्त्या गृह्यत इति तदर्थः, न त्वभावस्य विशेषणतया भानमिति। अतएव वायौ रूपाभाव इति प्रतीतेश्चाक्षुषत्वमुक्तमाचार्य्यैः। अयोग्यविशेष्ये इन्द्रियस्यासामर्थ्यात्। ज्ञानत्वे च निर्विकल्पकं विषयविशिष्टत्वांशे सविकल्पकमपि, अनुव्यवसायस्य व्यवसायजन्यत्वेन नियमतः पूर्वं विषयरूपविशेषणभानात् तत्रैव ज्ञाने तदेव ज्ञानं निष्प्रकारकं सप्रकारकञ्चेति न विरुद्धं धर्मभेदमादायाविरोधात्। अतएव निर्विकल्पकत्वसविकल्पकत्वे न घातो चाक्षुषत्वादिना सङ्करापत्तेः। गौरिति सविकल्पकमपि गोत्वांशे निर्विकल्पकमेव तत्र प्रकाराभानात् भाने वानवस्था निर्विकल्पका-

---

स्यापि, तथापि तद्वारकस्य सार्थकतया व्याप्तिग्रहौपयिकत्वं तन्त्रमिति कृतमनया कुहृष्या। न हि व्यभिचारवारकस्यापूर्वोऽस्ति शक्तिविशेषो यदित्यमपि तद्वारकं व्यवस्थाप्येत। अत एवास्य हेतोः रसाव्यञ्जकत्वे सति रूपव्यञ्जकत्वमर्थ एवेति कल्पनमपास्तम्। तस्य हेत्वन्तरत्वेऽपि प्रकृतहेत्वर्थत्वे मानाभावात् अस्यैव समर्थत्वादिति। ननु विशिष्टज्ञानत्वादित्यत्र विशिष्टज्ञानत्वं वैशिष्ट्यगोचरज्ञानत्वं तथाचाप्रसिद्धो हेतुः वैशिष्ट्यस्य पदार्थान्तरस्यास्माभिरनभ्युपगमादित्यतआह, 'यः सम्बन्ध इति, तदेव कथमतआह, 'तेन

सिद्धिश्च। प्रकारश्च द्विविधः विशेषणोपलक्षणभेदात्। ननु व्यावर्त्तकत्वाविशेषे कथन्तयोर्भेदः व्यावर्त्तकत्वे सति सद्विशेषणमसदुपलक्षणं यथा दण्डी पुरुषः कुरुणा क्षेत्रमिति चेत्। न। काकवद्देवदत्तगृहं जटाभिस्तापस इत्यादावुपरिभ्राम्यतः काकस्य जटादेरसत्त्वेऽप्यविशेषणत्वादुपलक्षणत्वाच्च। एतेन व्यावृत्तिबोधकाले व्यावर्त्तकं सद्विशेषणमसदुपलक्षणं, तेन काकादीनां व्यावृत्तिबोधसमये सतां विशेषणत्वमेव व्यावृत्तिबोधसमये असतामुपलक्षणत्वं। अतएव काकैर्जटाभिः कुरुणेत्यादावित्यभूतलक्षणे तृतीयेतिनिरस्तं। व्यावृत्तिबोधसमये सतोऽप्युपरिभ्रमतः काकादेरविशेषणत्वात् उपलक्षणत्वाच्च। नापि विशेष्यवृत्तित्वे सति प्रत्याय्यव्यावृत्तिसमानाधिकरणत्वे सति व्यावर्त्तकं विशेषणं, यद्वा

धीति(१) खानाश्रयव्यावृत्तबुद्धिजनकत्वस्यैव वैशिष्ट्यत्वादित्यर्थः। 'भवत्येवेति, एतच्च यदि दण्डप्रतियोगित्वं पुरुषनिष्ठत्वञ्च सम्बन्धस्य तद्धीविषयत्वदा। वस्तुतस्तादृशसमूहालम्बने तथात्वानियमः, 'दण्डेति, अयमपि न नियमः, शब्देन सम्बन्धोपस्थापनेऽन्यथापि तथा समूहालम्बनसम्भवादिति प्रतियोग्यधिकरणज्ञानयोरित्युपलक्षणं। अभाव-

---

(१) येन धीतीति क०।

यत्र विशेष्यतावच्छेदेन व्यावृत्त्या वा यत्समानाधिकरणत्वेन प्रतीयते तत्र तद्विशेषणं विशेष्यत्वञ्च प्रत्याय्यव्यावृत्त्यधिकरणत्वमिति जटाभिस्तापस इत्यादौ जटादावतिप्रसङ्गात्। न हि तापसे न जटा वर्त्तते। नापि विशेष्यसमानविभक्तिकत्वं विशेषणत्वं, काकवद्देवदत्तगृहमित्यादावुपलक्षणेऽपि गतत्वात् अनभिधानदशायामविशेषणत्वापाताच्च। अथ व्यावर्त्तकत्वे सति विशिष्टधीविषयत्वं विशेषणत्वं, विशिष्टबुद्धिश्च न विशेषणत्वगोचरा गौरवात्, किन्तु विशेषणविषया विशेषणोपलक्षणसन्देहानुपपत्तेः। अत एव पाचकत्वादिविरोधः,

---

तस्याभाववुद्धिवेद्यतया[१] अभावत्वविशिष्टज्ञानसामग्र्याः सत्त्वादपि नाभावे निर्विकल्पकमिति स्मर्त्तव्यम्, 'प्रकारः' व्यावर्त्तकप्रकारः, 'अत एवेति 'इत्यस्तूतदत्यनेनातीतार्थकतप्रत्ययेनाशक्त्य बोधनादित्यर्थः। ननु विशेषणवत्त्वात्मकस्यैव विशेष्यत्वमित्यात्माश्रयशङ्कायां तस्यैवार्थमन्येन लक्षणेनाह, 'प्रत्याय्येति। नन्विदमपि लोहितः स्फटिक इत्यत्र लौहित्ये विशेषणे अव्याप्तमित्यतश्चेः प्रतीतिगर्भं लक्षणमाह,[२] 'यद्देति, 'यदिति[३], व्यावर्त्तकमिति शेषः। उक्तात्माश्रयभयादिशेष्यत्वं निर्वक्ति,

---

(१) अभावत्वस्याभाववित्तिवेद्यतयेति ख०।
(२) प्रतीतिगर्भं लक्षणद्वयमाहेति ख०।
(३) तदितीति ख०।

उपलक्षणत्वे तूपलक्षितं संस्थानादि विशिष्टधीविषयो न काकवत्त्वं तदभावेऽपि तद्गृहप्रतीतेस्ताद्रूप्यात्। अन्यथा भ्रमत्वापत्तेः। न च शब्दोपस्थापितस्य कथं शाब्दज्ञानबहिर्भाव इति वाच्यं। तथैव व्युत्पत्तेः। न हि गङ्गायां घोषइत्यत्र प्रवाहोऽपि तीरावच्छेदकतया भासते, किन्तु तीरत्वेन तीरविशेष एव अन्यथा अगङ्गत्वार्थासाम्यात्। न चैवमुपलक्षणपदस्य लाक्षणिकत्वं अशक्यस्य संस्थानादेरुपस्थापनादिति[१] वाच्यं। उपलक्षणबुद्ध्युपस्थापितकारणान्तरजन्यसंस्थानोपस्थित्या तदन्वये तात्पर्य्यादिति। मैवं। तथा व्युत्पत्तेरसिद्धेः। न ह्युपलक्षणपदातिरिक्तमुपलक्ष्योपस्थापकमस्तीत्युपलक्षणपदं स्वार्थमुप-

---

विशेष्यलक्षेति। 'नापीति, पूर्वस्मिन् सति इदं लक्षणं द्रष्टव्यम्। अन्यथा घटः पट इत्यादौ उदासीनद्वयेऽप्यन्योन्यविशेषणतापातादिति भावः। 'व्यावर्त्तकत्व इति व्यावृत्तिबोधजनकज्ञानप्रकारकत्व इत्यर्थः, अतो न वैशिष्टविषयतामात्रमादायातिव्याप्तिरित्यर्थः। नन्विदं यदि विशेषणत्वं तदा बुद्धिविषयो न स्यात् बुद्धेर्वस्तुविषयतानियमादत आह, 'विशिष्टेति, 'ताद्रूप्यात्' काकवत्त्वाद्याकारत्वात्, 'लक्षणेति, तत्रापि गङ्गापदमोपस्थापकं किन्तु तत्तद्बुद्ध्युपस्थापितमन्यदेव तथा स्यादि-

---

(१) अशक्यसंस्थानादेरुपसंस्थानादितीति ख०।

साप्योपलक्ष्यतुपलापयतीति लक्षणैव स्यात्। अन्यथा लक्षणोच्छेदः घटो नास्तीत्यत्रोपलक्षणस्य प्रतियोगिनोऽभावधीविषयत्वात् नियतोपलक्ष्याभावाच्च। नापि व्यावर्त्तकत्वे सति क्रियान्वयि विशेषणमन्यदुपलक्षणं। क्रियाहीने सुभगोऽयं दण्डी महाबाहुरित्यादौ[1] दण्डादेरविशेषणत्वापातात् परम्परयोपलक्षणेऽपि क्रियान्वयित्वाच्च।

त्यस्य सुवचत्वादिति भावः। ननूपलक्षणे भवतु लक्षणैव कोदोषइत्यत्रत्वादाह[2], 'घट इति, केवलविशेष्यादगाहिविशिष्टज्ञानासम्भवादिति भावः। ननु तत्रापि तदुपलक्षितविषयत्वमेवास्त्वित्यतआह, 'नियतेति, वस्तुतो लक्षणापत्तिरेव दोषः। न चेष्टापत्तिः, शाब्दबोधमेवमिष्टापादनेऽपि प्रत्यक्षादौ तदतिरिक्तविषयत्वस्यानुक्तिसम्भवादिति। 'क्रियेति विशेष्यान्वयिक्रियेत्यर्थः। अत एव विशेष्येऽतिव्याप्तिवारणाय व्यावर्त्तकत्वे सतीति विशेषणमिति। ननु सुभगोऽयमित्यादावप्यस्ति क्रियान्वयित्वं यत्रान्य[illegible]पदं नास्ति तत्रास्तिभवतिपदं प्रयोज्यमिति[3] वैयाकरणसिद्धान्तादित्यरुचेराह, 'परम्परयेति अवच्छेदकतयेत्यर्थः।

---

(१) सुभगो हि महाबाहुर्दण्डीत्यादातिति ख०।
(२) इत्यरुचेराहेति ख०।
(३) अस्ति-भवतिपदप्रयोग इतीति ख०।

अपातत्वाद्वृत्तिवैशिष्ट्यं तथाच विशिष्टज्ञाने अतद्व्यावृत्तिर्विषयो न विशेषणमुपलक्षणं वा तथाच विशिष्टधीकारणज्ञानविषयत्वे सति प्रत्याय्यव्यावृत्तिसमानाधिकरणं विशेषणमिति। तन्न। नीलमुत्पलमित्यादावनीलानुल्लेखे अतद्व्यावृत्त्यनुल्लेखात् नीलज्ञानमीत्यनुव्यवसायविरोधात् अपोहापाताच्च।

'प्रत्याय्येति विशिष्टज्ञानविशेषणीभूतेत्यर्थः। अत एवातद्व्यावृत्तिवैशिष्ट्यमित्यादिग्रन्थसंवतार्थ्येव लक्षणं निरुक्तं। न च विशिष्टज्ञानकारणेत्यादिविशेषणं व्यर्थम्, गौरित्यादौ सास्नादेर्विशेषणत्ववारणार्थत्वात्। प्रकारस्य द्वेधेत्युपक्रमेणैव तत्तत्प्रतीतिविशेषणत्वैव लक्ष्यत्वात्। न च काकादेरपि प्रत्याय्यव्यावृत्तिसमानाधिकरणत्वादतिव्याप्तिः, समानाधिकरणत्वेन सामानाधिकरण्यनियमस्य विवक्षणात्। न च प्रतीयमाना देवदत्तगृहव्यावृत्तिसामानाधिकरण्यनियताः काकादयः, अकाकेऽपि गृहे तद्व्यावृत्तिसत्त्वादिति। असत्त्वेन दूषयति, 'नीलमिति, प्रतियोग्यप्रतीत्या व्यावृत्तेर्विशिष्टज्ञानागोचरत्वादिति भावः। ननु व्यावृत्तित्वेन तत्तज्ज्ञाने प्रतियोगिज्ञानापेक्षा अन्यथा समवायस्यापि प्रतियोगिज्ञानापेक्षित्वेन समवायात्मनोऽपि वैशिष्ट्यस्य प्रमेयत्वेनापि अभानप्रसङ्गादित्यखरसादाह, 'नीलमिति। नन्वनुव्यवसायोऽप्यनीलव्यावृत्तं जानामीत्येवमाकार इत्यखरसादाह, 'अपोहेति, तथाच नीलप्रतीत्यभावे अनीलव्यावृत्तेरेव नीलत्वापत्तेरिति भावः।

अथ व्यावर्त्तकं साक्षात्सम्बद्धं नीलादि[1], परम्परासम्बद्धं गृहोपरि भ्रमत्काकादि, तच्च व्यावर्त्तनीयमधितिष्ठति, यद्वि साक्षादेव तद्विशेषणमतो विपरीतमन्यत्। दण्डी पुमानिति विशेषणमेव दण्डः पुंसो न जातिरनुदण्ड-मसौ च तस्येति सम्बन्धिव्यतिरिक्तसम्बन्धघटकाभावे सति सम्बन्ध एव साक्षात्सम्बन्धः। स च संयोग-समवाय-स्वरूपसम्बन्धसाधारणो ज्ञाने विषयस्याधिकरणे ज्ञाना-दन्यत्र सम्बन्धिनि समवायस्यालीति तेषामपि विशेषण-

---

'नीलादि' नीलमसीत्यादौ। नन्वेवं साक्षात्सम्बद्धं विशेषण-मित्युपलक्षणे प्रतियोगिनि गतमतोनिर्गलितमाह[2], 'तच्चेति, 'साक्षात्' सम्बन्धिमध्ये यत्साक्षात्सम्बन्धेनाधेयं, 'तद्विशेषणं' इति, नातिव्याप्ति-रिति भावः[3]। 'पुंस इति पुंसोविशेषणं दण्डः न तु दण्डत्व-जातिरित्यर्थः, 'असौ अनुदण्डं' दण्डे वर्त्तमाना जातिर्दण्डत्वमिति यावत्। 'तस्य' दण्डस्य, अपत्साक्षात्सम्बन्धस्यापि यतः कालादि-रुपलक्षणमेव न यदि ब्रूते तदाव्याप्त्यतिव्याप्ती लक्षणयोर्न वक्तुं शक्येते इति निःसन्दिग्धे ते दर्शयति, 'गौरिति, गौरनित्यो गौः रूपवानित्युदाहरणद्वयं द्रष्टव्यं। एकोदाहरणत्वे अन्यतरानुपादानापत्ते-रिति वर्त्तव्यं। 'लोहित इति, परम्परासम्बन्धेन लौहित्यादिप्रकारिका

---

(१) दण्डादीति क०।
(२) लक्षणार्थं निर्गलितार्थमाहेति ख०।
(३) नातिव्याप्तिरित्यर्थ इति ख०।

त्वमिति शिवादित्यमिश्राः। तन्न। गौरनित्योरूपवांश्च-लति रूपवति रस इत्यादौ जाते रूपस्य च साक्षात्सम्बन्धेऽप्युपलक्षणत्वात्। रोहितः स्फटिक इत्यादौ परम्परासम्बन्धेऽपि रोहितत्वस्य विशेषणत्वात्। अथान्वय-प्रतियोग्युपस्थापकतया अन्वितमुपलक्षणं, साक्षादन्वितं विशेषणं, काकादेः संख्यानाद्युपस्थापकतयोपयोगात् अतथात्वे दण्डादिपदविशेषणत्वमेवेति चेत्। न। उप-लक्षणपदस्य लाक्षणिकत्वापत्तेः, प्रतियोगिनोऽभावे धर्मान्तरानुपनयाच्च।

धीर्यथा प्रमा तथोक्तं। अन्यथा शुक्ति-रजतवदसङ्ग्राह्यतायामव्याप्त्युप-दर्शनविरोधात्। 'प्रतियोग्युपस्थापकतया' तदुपस्थापकज्ञानविषयतया, अर्थस्य शुद्धस्वातथात्वात्। ननु काकपदं संख्यानोपस्थापकं न ब्रूमः अपि तु काकपदोपस्थाप्यः काक एव, तत्सम्बन्धस्तु मतुपा बोधितः काकसंख्यितश्च संख्यानविशेष इति तत्सिद्धान्ते नेदं दूषणं घटते इति दूषणान्तरमाह[१], 'प्रतियोगीति। यद्यपि प्रतियोगिनोऽभाव-याथार्थतया अभावस्य चान्यप्रतियोगितात् अन्यप्रतियोग्युपस्था-पकतया अन्वितत्वेन नोपलक्षणत्वं[२] दण्डाव्यापकं, न वा साक्षादन्वितत्वं

---

(१) इत्यस्यरसाद्दोषान्तरमाहेति ख०।
(२) नोपलक्षणलक्षणमिति ख०।

अथ व्यावृत्तिपुरितसमये विशेष्यसम्बद्धं व्यावर्त्तकं विशेषणं, तदानीं विशेष्यासम्बद्धं व्यावर्त्तकमुपलक्षणं। न च घटो यदा यत्रास्ति तदा तत्र उपलक्षणं अत एव तत्रैव तदेव सम्बन्धसमये विशेषणमसम्बन्धसमये उप-

---

विशेषणत्वं[१] अतिव्यापकं, तथापि विशेष्यसाम्बन्धप्रतियोगिन उपस्थापकत्वं वाच्यम् इन्द्रियसंयोगादौ इन्द्रियस्य संयोगग्राहकत्वाप्यनुपलक्षणत्वात् इत्यभिप्रायेणेयं अव्याप्तिर्बाध्या ।

'दण्ड्यासीदिति, स दण्डीत्यतीतदण्डस्मरणस्यैवोदाहरणीयम्, उदाहृते तु दण्डध्वंसवानयमित्यर्थपर्य्यवसानाद्दण्डस्याभावं प्रति उपलक्षणत्वमेव पुरुषं प्रति तु दण्डसम्बन्धो न भासते किन्तु तद्ध्वंसस्य हि सम्बन्धो भासते स च विशेषणमेवेति परेणाभिहिते दोषाभावकतापातादिति। 'समानाधिकरणत्वेनेति साक्षात्सम्बन्धेन समानाधिकरणत्वमत्र लक्षणार्थः[२], तेन न पूर्व्वेण पौनरुक्त्यमिति।

'दण्डी पुरुष इति, अत्र[३] यद्यपि व्यावृत्तिः क्वचिदस्ति क्वचिन्नेति स्वरूपविशेष एव प्रयोजकः, स्वरूपस्यचाचस्य स्वरूपसम्बन्धत्वेऽतिप्रसङ्गात् स्वरूपविशेषस्य विशिष्टबुद्धिजनकत्वस्यानुगतेन रूपेणेति अत्यन्ताभावे[४] प्रतियोगिदेशान्यदेशत्ववदत्रापि

---

(१) विशेषणलक्षणमिति ख० ।
(२) लक्षणार्थो द्रष्टव्य इति ख० ।
(३) अत इति ख० ।
(४) संसर्गाभाव इति ख० ।

सम्बन्धमिति । तन्न । रूपवति घटे रस इत्यादौ रूपस्य विशेषणत्वप्रसङ्गात् । दण्डवासीदित्यादावतीते दण्डस्याविशेषणत्वापाताच्च[१] । एतेन यत्र यद्विशेष्यावच्छेदकधर्मेण व्यावृत्त्या वा समानाधिकरणत्वेन प्रतीयते तत्र तद्विशेषणमित्यपि प्रत्युक्तं ।

प्रतियोगितावच्छेकाभाववत्त्वमेव व्यावृत्त्यधिकरणतावच्छेदकं इत्यभ्युपगमः अनभ्युपगमे अन्यथाभ्युपगमे वा कथितदोषात् तथाच दण्डवत्यदण्डव्यावृत्तिरस्ति इत्येव वक्तुमुचिता तस्या एव चावच्छेदककल्पनार्हत्वात् । तथापि तत्त्वत्त्व एव किं प्रमाणं येन तदनुरोधादवच्छेदकत्वं दण्डादेः कल्पनीयमिति तत्स्थापनाय तथा प्रतीतिरुपन्यस्तेति न कश्चिद्दोषः[२] एवमग्रेऽपि । यद्यपि तदभाववत्यपि तत्त्वत्त्वात् इत्येव वक्तुमुचितं, तथापि तत्त्वत्त्वार्थमेव तत्प्रतीतिरिति वक्ष्यते । 'प्रत्याय्येति, तद्व्यावृत्त्यधिकरणत्वलाभाय, तेन यद्व्यावृत्त्यधिकरणतावच्छेदकं तदेव तत्र विशेषणमित्यर्थो लभ्यते । अन्यथा क्वचिद्विशेषणस्य यत्किञ्चिद्व्यावृत्त्यधिकरणतावच्छेदकत्वेऽपि यत्र यद्व्यावृत्त्यधिकरणतानवच्छेदकं तत्रापि तद्विशेषणतापत्तेः । न ह्युपलक्षणं व्यावृत्त्यधिकरणतावच्छेदकमेव न भवति, काकादेरपि अकाकवद्व्यावृत्त्यधिकरणतावच्छेदकत्वायत्काकवानित्यादौ विशेषणत्वादित्यर्थः ।

---

(१) दण्डविशिष्टव्यवहाराभावप्रसङ्गाच्चेति ख० ।
(२) कश्चिद्विरोध इति ख० ।

अपोच्यते। दण्डी पुरुष इतिज्ञानानन्तरं दण्डवत्य-दण्डव्यावृत्तिरवगम्यत इति प्रत्याय्यव्यावृत्त्यधिकरणता पुरुषस्य दण्डेनावच्छिद्यते न पुरुषत्वेनातिव्याप्तेः। उपलक्षणे तु गृह-तापसादिनिष्ठप्रत्याय्यव्यावृत्त्यधिकर-णता न काक-जटादिभिरवच्छिद्यते तदभाववत्यपि व्यावृत्तिप्रतीतेः, किन्तु संस्थानविशेषवत्त्वादिना।

'एवञ्चेति, न च प्रमेयत्वादेः पूर्व्वप्रतीकेन वारणाद्व्यावर्त्तकपदव्यर्थता, अर्थगर्भस्य पूर्व्वप्रतीकस्य तदधिकरणमात्रवृत्तीदन्त्वादौ गतत्वात्, तदवच्छेदकत्वं संयोगादाविव तेन समं स्वरूपसम्बन्धविशेषः, स चानतिप्रसक्तधर्म्ममात्रे। न चेदन्त्वमपि तद्व्यावर्त्तकमेकमेव, तेन रूपेणो-पस्थितावदण्डव्यावृत्त्यप्रतीतेरयमनयन्न भवतीत्यादाविदन्त्वेन लक्षण-गमनं नानिष्टम् संग्राह्यत्वादत एव प्रतियोगी नाभावविशेषणं प्रत्याय्यव्यावृत्तेरभावनिष्ठायास्तदवच्छेदकाधिकरणत्वेन प्रतियोग्यनवच्छे-द्यत्वात् उक्तयुक्त्या स्वानधिकरणप्रतियोगिकव्यावृत्तेरेव स्वावच्छेद्यत्वेन काक-जटादेरप्यकाकाजटाव्यावृत्तिबोधे विशेषणत्वात् अदेवदत्तव्या-वृत्तेस्तूक्तयुक्त्या तदनवच्छेद्यत्वेनाप्रसङ्गादिति सर्व्वं सुस्थम्। व्यावृत्ति-रन्योन्याभावो नाभावे तत्र स्वरूपभेदाभ्युपगमादित्यभावे नोक्तरूपं विशेषणं किन्तूपलक्षणमेव प्रतियोग्यादीत्यपि वदन्ति। वस्तुतस्तु प्रत्याय्यव्यावृत्त्यधिकरणतावच्छेदकत्वग्रहे यथा व्याप्यवच्छेदकसंयोगा-वच्छेदकत्वग्रहो व्याप्तिसंयोगयोरेकतया विषयत्वानियतत्वया व्याव-त्तिविषयत्वानियत इति यत्र तथावच्छेदकत्वग्रहस्तत्र व्यावृत्त्यबोध-

एवञ्च प्रत्याय्यव्यावृत्त्यधिकरणतावच्छेदकत्वे सति व्यावर्त्तकं विशेषणं तदन्यव्यावर्त्तकमुपलक्षणं व्यावृत्त्युल्लेखानन्तरमेव विशेषणत्वबुद्धिः। तदाहुराचार्य्याः "तदन्यया समानाधिकरणं व्यवच्छेदकं विशेषणं व्यधिकरणमुपलक्षणम्" इति। अस्यार्थः। स्वाधिकरणमात्रवृत्तिव्यावृत्तिबोधकत्वं स्वावच्छिन्नाधिकरणताक-

---

कालेऽपि विशेषणत्वबुद्धिर्मा प्रसाङ्क्षीदिति व्यावर्त्तकत्वं विशेषणत्वं, अत एवाह, 'व्यावृत्त्युल्लेखानन्तरमेव विशेषणत्वबुद्धिरिति। न चावच्छेदकाग्रहे अवच्छेद्याग्रह इति सत्यं न त्ववच्छेदकत्वग्रहे अननुसंहितोपाधेरित्यादेरपीति वाच्यम्। अदण्डव्यावृत्त्यधिकरणतावच्छेदको दण्ड इति शब्दादवगतेऽपि तद्वृत्त्यदण्डव्यावृत्तेरप्रतीतेः सर्व्वसिद्धत्वादिन्द्रियासन्निकर्षादिना प्रत्यक्षसामग्र्यभावात् तस्माद्यथोक्तमेव विशेषणपदप्रवृत्तिनिमित्तं, विशिष्टधीविषयस्तु विशेषणत्वमेव न, यदि विषयतया वैशिष्ट्यप्रतियोगित्वरूपं तदित्यवधेयम्। नन्वेवं व्यावर्त्तकमित्येवास्तु, प्रतियोग्यवृत्तिधर्म्मज्ञानस्य भेदधीहेतुतया प्रतियोगितावच्छेदकभावस्यैव व्यावर्त्तकत्वं न तु काकादेरप्यदेवदत्तगतव्यावृत्तिबोधकत्वं मानाभावात् स्वमेव व्यभिचारस्य प्रदर्शनायेति चेत्। न। व्यावृत्तिधीप्रयोजकस्यैव व्यावर्त्तकत्वेनोक्तत्वात्। न हि दण्डधीरपि साक्षाद् दण्डव्यावृत्तिबोधे कारणं। अधिकरणज्ञानानुपलम्भादितद्धीसामग्रीसत्त्वे प्रतियोग्यवृत्तिधर्म्मग्रहं विना तद्धीविलम्भाभावात् अपि तु प्रतियोगितावच्छेदकानुपलम्भसम्पादकतया पर-

व्यावृत्तिबोधकत्वं स्वानधिकरणाधिकरणवृत्त्यभावबोधकत्वे सति व्यावृत्तिबोधकत्वं वेति, उपलक्षणन्तु स्वानधिकरणेऽपि व्यावृत्तिं बोधयति। अथ वा विवक्षितान्यप्रतियोगितावच्छेदकं विशेषणं दण्डिनमानयेत्यादौ दण्डस्तथा, तदनवच्छेदकं उपलक्षणं, काकेन देव-

---

यथा दण्डत्वेनोपलम्भे अदण्डत्वोपलम्भासम्भवात्[1]। तथाप तथा व्यावर्त्तकत्वमुपलक्षणस्यापीति सुष्ठूक्तम् विशेषणं विशेषणपरिचायकत्वात्तस्य। अत एव व्यावर्त्तकत्वविशेषे किञ्चित्स्वाकालेन तथा किञ्चित्तदापीति कथमिति पूर्व्वपक्षः, एकत्रात्यन्तायोगव्यवच्छेदो धर्म्मस्य विषयः अपरत्रायोगव्यवच्छेदः[2] इति समाधानमपि ज्ञेयम्। अयोगव्यवच्छेदादेर्व्विशिष्टज्ञानागोचरत्वात्। एतेन स्वानाधारव्यावृत्तिबोधकत्वं स्वाधारवृत्तिप्रतियोगितावच्छेदकाभावत्वञ्च विशेषणत्वं तदन्यदुपलक्षणत्वञ्चेत्यपि द्रष्टव्यम्। 'तदिति तादृशावच्छेदकत्वशून्यमित्यर्थः। अवच्छेदकत्वमुक्तमेवेति नातिप्रसङ्गस्तन्नियतत्वमवच्छेदकत्वादायेति भावः। स्वानधिकरणेति स्वानधिकरणनिष्ठव्यावृत्तिबोधकतावच्छेदकतावच्छेदकधर्म्मशून्यत्वे सतीत्यर्थः। तदवच्छेदकत्वन्तु प्रत्याय्यव्यावृत्तिप्रतियोगितावच्छेदकविरहरूपत्वं तेन गुरुत्ववति रस-

---

(१) अदण्डत्वेनोपलम्भासम्भवादिति ख०।

(२) एकत्रायोगव्यवच्छेदो धर्म्मस्य विषयोऽन्यत्रात्यन्तायोगव्यवच्छेद इति ख०।

दण्डस्य गृहा इत्यादौ वाक्ये न गृहस्य देवदत्तान्वय-प्रतियोगितावच्छेदकः तद्विरहदशायामपि देवदत्तान्वयावगमात्, किन्तु गृहविशेष एव उपलक्षणपरिचितः। अत एवान्वयाप्रतियोगित्वेऽपि नोपलक्षणवैयर्थ्यं। यद्वा यदन्वितत्वया ज्ञात एव विशेष्ये तात्पर्य्यविषयेतरान्वयधीस्तद्यवच्छेदकं विशेषणं अनेवम्भूतं तदुपलक्षणं उपलक्षणानन्विते ऽप्युपलक्ष्ये तात्पर्यविषयीभूतान्वयबोधात्,

---

इत्यादौ विशेषणस्यनियते उपलक्षणे न प्रसङ्ग इति भावः। नन्वरण्डपादौ विधेयान्वयनियमेन विशेषणत्वविचारः, प्रकृतलक्षितविशेषणत्वन्तु नोपयुज्यत इति तत्प्रयोजकं ग्रन्थविशेषणत्वमाह, 'अथवेति, विवक्षितत्वाविशेषणे पुरुषमात्रान्वयतात्पर्य्यपरिचायकतयोपात्तदण्डादिकेऽपि वाक्ये दण्डादेर्विशेषणत्वापातः। विशेषणे च तादृशानयनस्य दण्डाभावेऽपि सत्त्ववाजातिव्याप्तिः। तत्सहितानयनविवक्षायान्तु न व्यभिचार एवेति भवत्यवच्छेदकत्वमिति भावः। 'किन्त्विति, गृहस्य विशेषणयुक्तत्वादि, न तु धर्म्येव तस्य व्यावर्त्यत्वान्न तु व्यावर्त्तकत्वात्। ननु व्यावर्त्यधिकरणतावच्छेदकत्वं दण्डस्य सत्त्ववति व्यावृत्तेः स्वरूपसम्बन्धात् आनयनस्य तु सत्त्ववायादिः सम्बन्ध इति न तत्र दण्डादेः पूर्व्वोक्तमवच्छेदकत्वं अतो ज्ञानगर्भं तन्मनसिकृत्य लक्षणान्तरमाह, 'यदन्वितेति, 'प्रतियोग्यभावबुद्धिविषय इति, 'मत इति, उपनीत इन्द्रियासन्निकर्षान्न विशिष्टधीविषय इति प्राचीनमते

प्रयतेव कार्य्यान्वयि विशेषणं तदनन्वय्युपलक्षणमित्यर्थः, न तु तात्पर्य्यविषयीभूतविशेष्यान्वयबोधविषयत्वं विशिष्टज्ञानविषयत्वं वा, प्रतियोग्यभावबुद्धिविषय इति मते तदभावात्। यद्वा विशेष्यान्वयिना यस्यावश्यमन्वयस्तदवच्छेदकं विशेषणं तदन्यदुपलक्षणमिति तथोपलक्ष्यविशेष्यसामान्यान्वयात् यद्व्यावर्त्तकं विशेष्या-

---

नेयमतिव्याप्तिरिति मतभेदाश्रयणमिति भावः। ननु यदन्वितत्वेत्याद्यनुद्देश्यतावच्छिन्नव्यावृत्तौ गतम् इतरव्यवच्छिन्न एवानयनाद्यन्वयात्, न च सा न व्यावर्त्तिकेति, अदण्डान्योन्याभाववानयमिति बुद्धौ व्यावृत्तेरेव विशेषणत्वेन तस्या एव व्यावर्त्तकत्वात् अदण्डव्यावृत्तिशून्यव्यावृत्तेस्तदेकविषयत्वादित्यरुचेराह, 'यद्वेति, अत्राप्यवश्यमित्यधिकं मत्वा लक्षणान्तरमाह, 'यद्वेति, 'तात्पर्य्येत्यादि, धर्म्मपदञ्च विशेष्य एवातिव्याप्तिवारणाय। न चाव्यावर्त्तकमेयत्वाद्यतिव्याप्तिः, उक्तविशेषणत्वस्य तत्रेष्टत्वात्। न हि प्रमेयत्वविशिष्टं प्रमेयपदशक्यमित्यत्र प्रमेयत्वं न विशेषणं प्रमेयत्वस्याशक्यतापत्तेरित्यन्यत्र तद्वारणेऽप्यत्र सङ्गत्यत्वमेवेति। 'अलं विस्तरेणेति, न हि लौकिकविचारे विशेषणोपलक्षणविचारोऽर्थवान्, वेदार्थविचारे शास्त्रान्तरे तद्विचारो घटत इति शिष्यशिक्षायां याचितकन्यायेनेदं विवेचितं न त्वेतद्विचारव्यावृत्त्यैव कर्त्तव्यो विचारो व्यासङ्गनीयो भवतीति भावः। ननु सर्व्वलक्षणेन दण्डादि सङ्गृह्यते तत्रासङ्गतं दण्डिनोऽप्यदण्डतया भेदा-

न्वयिनान्वीयते तद्विशेषणं तदन्यदुपलक्षणमिति वा। यद्वा तात्पर्य्यविषयान्वयप्रतियोगी उद्देश्यान्वयप्रतियोगी वा धर्मो विशेषणन्तदन्यदुपलक्षणमित्यलं विस्तरेण।

इति श्रीगङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे निर्व्विकल्पकवादः।

भेदानङ्गीकारे अतद्व्यावृत्तेः तत्राभावेन तस्यैव तद्बोधकत्वादिति चेत् सत्यं, दण्डात्यन्ताभाववतोऽन्यस्माद्व्यावृत्तेस्तेन बोधनादत एवासत्यपि दण्डे पाकरक्ते श्याम इतिधीवत् दण्डीतिधीर्य्यथार्था अदण्डिव्यावर्त्तिका च पाकरक्ते श्यामबुद्धेरप्येवमेवान्यव्यावर्त्तकतया विशेषणत्वमिति॥

इति महामहोपाध्याय-सन्निश्र-श्रीजयदेवविरचिते तत्त्वचिन्तामण्यालोके निर्व्विकल्पकवादालोकः॥

समाप्तः प्रत्यक्षपरिच्छेदालोकः।

समाप्तश्च प्रथमखण्डालोकः।

अथ सविकल्पकवादः ।

सविकल्पकञ्च[१] विशिष्टज्ञानं यथा गौरयमिति, तच्च सामान्यादीनां परमार्थसत्त्वेनार्थजत्वादिन्द्रियजत्वाच्च प्रत्यक्षं क्वचित् संस्कारसहकारिवशेन तत्ताविशिष्टस्येदन्ताविशिष्टाभेदोल्लेखेन्द्रियजोविकल्पः । नन्वेकार्थसहकारित्वमन्वय प्रत्यभिज्ञानन्तु नैवं ज्ञानं तदंशे पारोक्ष्यस्येदमंशे चापारोक्ष्यास्यानुभवेन विरुद्धधर्मसंसर्गात् । न चेदं यथार्थं, अनेकदेश-कालसम्बन्धस्यैकत्र बाधात् । एकत्रकालादिसंसर्ग-तदभावव्यवच्छेदवत् तदविनाभूतकालान्तरादिसम्बन्धव्यवच्छेदात्, तदयथार्थत्वे बहु विप्लवेतेति चेत् । न । पारोक्ष्यापारोक्ष्ययोरिष्टासिद्धेः इन्द्रियजन्यत्वेनापरोक्षत्वनियमात्, तत्तांशस्य च स्मृत्युपनीतत्वात् इन्द्रियसम्बद्धविशेषणताप्रत्यासत्तेः । न चैकत्रकालसम्बन्धः कालान्तरसम्बन्धाभावाविनाभूतः, एकत्रिनानादिसम्बन्धस्य ज्ञाने अनेकविषयत्वस्य च व्याघातापत्तेः साक्षात्करोमीत्यनुव्यवसाये बाधकाभा-

---

(१) सविकल्पकवादस्य स्वप्रकाशत्वादालोकज्ञता पुनरालोकेन न प्रकाशितत्वमिति ।

वाच्च। ननु कैयन्तत्ता न तावदतीतसमयसम्बन्धः, अनागतगोचरस्मृति-प्रत्यभिज्ञयोस्तत्तोल्लेखात् प्रत्यक्षानुभूयमानघटादौ[१] अतीतसमयावच्छेदानुमाने तत्ताधी-व्यपदेशयोरभावात्। अतीतसमयसम्बन्धावगमेऽपि सोऽयं न वेति संशयात् स नायमिति विपर्य्ययात् तदभावावगमेऽपि सोऽयमिति प्रतीतेः अतीतसमयविशिष्टः स इति सहप्रयोगात् काले तदभावाच्च। एतेन ज्ञातधर्मान्तरवैशिष्ट्यन्तत्तेति निरस्तम्। न च तद्वृत्ति गुणादिकमेव तत्ता, तदवगमेऽपि तदनवगमात् तदनवगमेऽपि तदवगमाच्च। नाप्यतीतज्ञानवैशिष्ट्यं, परेण ज्ञात इति ज्ञानेऽपि स इति प्रयोगाभावात्। नाप्येतज्ज्ञानातीतत्वज्ञानवैशिष्ट्यं, तदवगमेऽपि तत्तासंशय-विपर्य्ययदर्शनात् अतीतज्ञानविशिष्टः स इति सहप्रयोगात् अतीतानुभवविषयत्वस्यानुभवाविषयत्वेन स्मृत्या तदुल्लेखानुपपत्तेश्च।

यत्त्वतीतानुभवविषयत्वन्तत्ता तद्यानुभवाविषयत्वेन यदा ज्ञानान्तरेण गृह्यते तदा स घट इति सारूपं नोचेत् प्रमुष्टतत्तांशं[२] घटइति। तन्न। अतीतानु-

(१) प्रत्यक्षानुभूतघटादाविति ख०।

(२) प्रमुष्टतत्तांशमिति ख०।

भवविषयत्वस्यानुमितौ भानेऽपि स इति धी-व्यपदेश-योरभावात्। अतीतानुभवविषयत्वनिश्चयेऽपि तत्ता-संशय-विपर्य्ययदर्शनात् सहप्रयोगानुपपत्तेः ज्ञाना-न्तरेणातीतानुभवविषयत्वग्रहे तत्तोल्लेखापत्तेश्च। अ-थातीतधर्म्मवैशिष्ट्यं तत्ता स धर्म्मः क्वचित् समयः क्वचित् ज्ञानादिः। न चातीतधर्म्मविशिष्टः स इति सहप्रयोगानुपपत्तिः, धर्म्मविशेषमादाय तदुपपत्तेस्त-द्प्रतीतावपि स इति प्रतीतिरसिद्धैव। न चातीतधर्म्म-विशिष्टप्रतीतावपि स न वेति संशयात् स नाय-मिति विपर्य्ययाच्च नैवमिति वाच्यं। निश्चितधर्म्मेतर-धर्म्मविशेषविषयत्वेन तयोरुपपत्तेरिति चेत्। मैवम्। यदि वस्तुगत्या योऽतीतोधर्म्मस्तद्वैशिष्ट्यन्तत्ता तदानुभवेऽपि तद्विषयत्वात्तत्तोल्लेखापत्तिः। नाप्यतीतत्वेन यो भासते धर्म्मस्तद्वैशिष्ट्यं, भासमानधर्म्मस्यातीतत्वेनानुभवावि-षयत्वात् प्रत्युत वर्त्तमानत्वेनानुभवात् स्मृतौ तदु-ल्लेखानुपपत्तेश्च। न चानुभवानन्तरं यदा ज्ञानान्तरेणा-तीतधर्म्मवैशिष्ट्यभानन्तदा स्मृतौ तत्तोल्लेखो नान्यदेति वाच्यं। अतीतधर्म्मस्यानुमितौ[1] तत्तोल्लेखापत्तेः। इद-

(१) अतीतधर्म्मवैशिष्ट्यस्यानुमिताविति ख०।

नापि न तत्राचष्टे गुणादिकं अनुमानादिना तदपगमेऽपि अयमितिव्यपदेशाभावात्। प्रत्यक्षेण तदपगमे अयमिति व्यपदेश इति चेत्। न। वाच्यस्य प्रमाणगोचरतया व्यपदेशस्य नियन्तुमशक्यत्वात्। गुणादावपि तन्निर्वचने अननुगमात्। न चैतद्व्यक्त्याश्रयत्वं, इदमेतदोः पर्य्यायत्वात्। नापि प्रत्यक्षप्रमाणगोचरत्वं, अपाटुषत्वापत्तेः अतीते तदनुमानेऽयमितिपुरिव्यवहाराभावात् स्मृत्वापि तदुल्लेखापत्तेश्च।

अत्र केचिदाहुः। तत्रेदन्ते स्मृत्यनुभवभासिन्यौ अखण्डे एवोपाधी स्मृतधर्म्मातिरेकिणौ, एवञ्चेदन्तासंस्कारेणेदन्तैव तत्तया स्मर्य्यते। न च तत्तायाः कथमिदन्तारोपे कथमारोप इति वाच्यं। प्रत्यभिज्ञायास्तत्तांशे यथार्थत्वात्। इदन्तानुल्लेखानुभवप्रभवस्मरणे धर्म्मान्तरेण तत्तया भासते। अत एवायं घट इति न स्मरणतः सर्वा स्मृतिरयथार्था अयथार्थानुभवाच। परि-पराचनुचिन्तनञ्च कथिताद्यमूलप्रमाणवज्जोरयप्रमाणवच्च साक्षात्पदार्थप्रमाणप्रभवमनुभवरूपमेवेति। तन्न। स्मृतेः पूर्वमिदन्तोपस्थितिं विना तत्र तत्तारोपासम्भवात्। किञ्च तत्तांशेऽननुभूतगोचरत्वेन स्मृतेः संस्कारसीमाबन्धने इदन्ता तत्तया स्मर्य्यत इत्यत्र

मानाभावात्। घट एव तत्तया स्मर्य्यते इत्यस्तु लाघवादिति[१]।

अत्रोच्यते। अनुभवे कालो धर्म्मान्तरं वा यो वर्त्तमानत्वेन विषयः स एव स्मरणस्य, अनुभव-स्मरणयोरेकविषयत्वेऽपि स्मरणे तत्र तच्छब्दप्रयोगः संस्कारमात्रस्यैव तच्छब्दप्रयोगहेतुत्वात्। अत एव प्रत्यभिज्ञाने तत्र तच्छब्दप्रयोगः प्रत्यक्षानुभवे तथैव इदम्शब्दप्रयोगः, न तु विषयतोऽनुभव-स्मरणयोर्विशेषः। अत एवायं घट इत्यनुभवादयं घट इति न स्मरणं, स घट इति स्मरणात्स्मरणं स घट इति नानुभवः। यद्वा अयं घट इत्यत्र यद्धर्म्मवैशिष्ट्यं भासते तस्यातीतत्वं तत्ता तद्वैशिष्ट्यमननुभूतमपि स्मृतिविषयः। इदन्ताविशिष्टगोचरसंस्कारात् यथन्तास्मृतिरिति चेत्। न। स घट इति स्मृतिं प्रत्यनुभवस्य हेतुत्वनिर्वाहकतया संस्कारस्य तथैव कल्पनात् अयं घट इति स्मृतेः स घट इत्यनुभवस्याहर्यनाच। समानविषयत्वेन स्मृतेरयं घट इति स्मृतिर्न स घट इति नानुभवश्च स्यात्। न चैवं स्मृतिरननुभूततत्तांशे अनुभवः स्यात्, संस्कारासाधारणकारणत्वेन स्मृतित्वात्। सइप्रयोगश्च धर्म्मवि-

(१) इत्यास्तान्तु लाघवादितीति ख०।

शेषमादाय प्रतिविधेयः। अत एव संस्कारहेत्वनुभव-प्रामाण्यपारतन्त्र्येण यथार्थत्वेऽपि स्मृतिरप्रमेति सर्व-तन्त्रसिद्धान्तः। यद्वा नेयं यथार्था तथाहि स्मृतिः स्वविषयवर्त्तमानत्वविषया अतीतानागतागोचरप्रतीतित्वात् प्रत्यभिज्ञावत्। प्रतीतित्वाद्वा घटोऽस्तीति प्रतीतिवत्। प्रतीतेः समयविशेषविषयत्वनियमात्। ज्ञानसामग्री-महिम्ना चाननुभूतेऽपि समयांशे स्मृतिर्न तत्र संस्कार-व्यापारोऽन्यथासिद्धत्वात्। अत एव पाकरक्ते श्यामो-ऽयमितिधियोऽयथार्थत्वव्यवहारः लौकिकानां श्याम-त्वस्य वर्त्तमानत्वेनावगमात्। एतेन श्यामधीस्तत्र यथा-र्थैव घटे कदाचित्तत्त्वात् इदानीमयं श्याम इतिप्रती-तेराकार एव नेत्यपास्तं। अत एवातीतानागतवह्न्यगो-चरत्वे विद्यमानधूमेन पर्वते वह्निरित्यनुमितेर्वर्त्तमा-नवह्निविषयत्वादिदानीं वह्निनिश्चयेन वह्न्यर्थिप्रवृत्तिः अन्यथेदानीं तत्सन्देहे प्रवृत्तिर्न स्यात्। यदा धूमस्तदा वह्निरिति व्याप्तावपि तदप्रानदशायां प्रवृत्तेरन्यथानु-पपत्तेः। यद्वा स घट इतिस्मृतौ तत्ताविशिष्टस्य वर्त्त-मानता भासते संस्कारस्य वर्त्तमानज्ञानसामग्रीसहि-तस्यैव हेतुत्वात् सोऽयमिदानीमित्यादौ तथा कल्पनात् गेहे स घट इति स्मरणान्निःशङ्कप्रवृत्तेश्च। अन्यथा

तत्ताविशिष्टस्य इदानीं सन्देहे सा न स्यात्। न च वर्त्तमानत्वांशेऽननुभूतविषयत्वं, वर्त्तमानत्वेनानागत-वर्त्तमानस्य पूर्वमनुभवात्। एवञ्च स्मृतेस्तथाभूतस्य वर्त्तमानता विषयः तच्च विशेष्यस्य विशेषणस्य वा वर्त्त-मानत्वाभावात् स्मृतिरयथार्थैव। न च पूर्वं तथासी दर्थ इति तथार्थत्वं, पाकरक्ते श्यामोऽयमिति ज्ञानस्य यथार्थत्वप्रसङ्गात्। प्रमुष्टतत्तांशे च स्मरणे अविद्य-मानधर्मावच्छेदः[1] न भासते। तदाहुराचार्य्याः। "स्मृतेर्याथार्थ्यमपि दुतः" इति।

इति महामहोपाध्याय-श्रीमद्गङ्गेश्वरविरचिते तत्त्व-चिन्तामणौ प्रथमे प्रत्यक्षखण्डे सविकल्पकवादः।

समाप्तः प्रत्यक्षखण्डात्मकः प्रथमपरिच्छेदः।

---

(१) अविद्यमानत्वमवच्छेद इति ख०।

B
132
N8G3
1888a
pt.1
v.2

Gangeśa
The Tattva-chintamani

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY